CC-0. In Public Domain. Digitization by eGangotri

बौद्धभारतीग्रन्थमाला–३१

Baudddha Bharati Series-31

श्रीमदाचार्यबुद्धघोषविरचितं

सिद्धार्थचरितम्

पद्यचूडामणिकाव्येत्यपरनामधेयम्

(संस्कृत-हिन्दीव्याख्योपेतम्)

प्रधानसम्पादकः

स्वामी द्वारिकादासशास्त्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वौ. ८. ६८११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सरस्वती नः सुभगा मयस्करत्
NEPAL SANSKRIT UNIVERSITY, 1986 A.D.
वाल्मीकि विद्यापीठ
पुस्तकालय

श्रीमदाचार्यबुद्धघोषविरचितं

सिद्धार्थचरितम्

पद्यचूड़ामणिकाव्येत्यपरनामधेयम्

(संस्कृत-हिन्दीव्याख्योपेतम्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

NEPAL SANSKRIT UNIVERSITY
वाल्मीकि विद्यापीठ

क्र.सं. ३८०/-

Acc 322८४ / 3228४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Kablinath Nyaupane

★ नमस्तस्मै भगवतेऽर्हते सम्यक्सम्बुद्धाय ★

आचार्यबुद्धघोषविरचितं

पद्यचूडामणिमहाकाव्यम्

प्रथमः सर्गः

मङ्गलम्

कारुण्यकल्लोलितदृष्टिपातं कन्दर्पदर्पानलकालमेघम् ।
कैवल्यकल्पद्रुममूलकन्दं वन्दे महःकन्दलमर्कबन्धुम् ॥ १ ॥

ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं कविरादौ मङ्गलमाचरन् भगवन्तं बुद्धं प्रणमति कारुण्येत्यादिना । कारुण्येन=करुणया, कल्लोलितः=महोर्मिभिस्तरङ्गितः, पूर्णतया व्याप्त इत्यर्थः । दृष्टेः पातो यस्य तम् । करुणैव कारुण्यम्, स्वार्थे ष्यञ् । "कारुण्यं करुणा घृणा" इत्यमरः । "अथोर्मिषु महत्सूल्लोलकल्लोलौ" इत्यमरः । "तदस्य सञ्जातं तारकादिभ्य इतच्" (पा०सू० ५.२.३६) इतीतच् । कन्दर्पस्य=कामदेवस्य, दर्पः=गर्व एवानलः=अग्निस्तस्य कृते कालमेघम्=वर्षोन्मुखं नीलमेघम् । कैवल्यम्=निर्वाणमेव कल्पद्रुमः=कल्पवृक्षः, तस्य मूलभूतं कन्दम्=मूलम् । "मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम्" इत्यमरः । केवलस्य भावः कैवल्यम्; भावे ष्यञ् । कैवल्यस्य पूर्णकामदत्वात् तस्य कल्पद्रुमत्वम्; तादृशनिर्वाणप्राप्तेः बुद्ध आचार्यत्वेन हेतुभूत इत्यर्थः । महसः=ज्योतिषः कन्दलं महःकन्दलम्=ज्योतिरंकुरम्; "कन्दलोऽस्त्री नवांकुरः" इति मेदिनी । बुद्धस्य तेजस्वित्वात्, तच्छक्तेर्वैधिष्णुत्वाच्च महःकन्दलत्वेनात्र निर्देशः । अर्कबन्धुम्=गौतमं बुद्धम् । "गौतमश्चार्कबन्धुश्च" इत्यमरः । बुद्धो हि सूर्यवंशोत्पन्न इति प्रसिद्ध्या तस्यार्कबन्धुत्वम् । अत्र इन्द्रवज्रा वृत्तम्; "स्यादिन्द्रवज्रा ततजास्ततो गौ" इति लक्षणात् ॥ १ ॥

मङ्गल—जगत् पर निरन्तर करुणामय कटाक्ष करने वाले, कामाग्नि के लिये काले (प्रबलवृष्टिकारक) मेघ के समान, तथा निर्वाणरूप कल्पवृक्ष के मूलभूत उन तेजोऽङ्कुरस्वरूप, सूर्यवंशोत्पन्न (भगवान्) बुद्ध को (मैं बुद्धघोष) प्रणाम करता हूँ ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कवेर्विनयः

यस्यैकदेशं यतयोऽपि वक्तुं नालं बभूवुर्नलिनासनाद्याः ।
शास्तुस्तदेतच्चरितापदानं वक्तुं मनीषा मम मौग्ध्यमेव[1] ॥ २ ॥

कविः **यस्येत्यादिना** श्लोकेन स्वविनयमाविष्करोति । यतयः=योगनिष्ठाः सिद्धाः, अत एव ज्ञानिनः । नलिनम्=पद्ममेव आसनं यस्य स नलिनासनः-ब्रह्मा, स आदिर्येषां ते नलिनासनादयाः=ब्रह्मादयः । यस्य=भगवतो बुद्धस्य, एकदेशम्=अल्पमपि भागम् । वक्तुम्=कथयितुम्, न अलम्=समर्थाः । "अलं भूषण-पर्याप्ति-शक्ति-वारण-वाचकाः" इत्यमरः । शास्तुः=बुद्धस्य; "मुनीन्द्रः श्रीघनः शास्ता" इत्यमरः । चरितापदानम्=चरिते यत् प्रसिद्धं कर्म, तदेतत् । जातावेकवचनम् । अपदानं कर्म; वक्तुम्=कथयितुम्; मम=कवेः; मनस ईषा मनीषा=बुद्धिः, सङ्कल्प इत्यर्थः । "बुद्धिर्मनीषा" इत्यमरः । मुग्धस्य=मूर्खस्य भावो मौग्ध्यम्=बालिशत्वम् । एव-पदेन बालिशत्वं विना साहसोद्धुरा तादृशी मनीषा न स्यादिति भावः । अत्रापि इन्द्रवज्रा वृत्तम् ॥ २ ॥

यद्यपि जिसके विषय में ब्रह्मा आदि ज्ञानयोगी सिद्ध भी कुछ न कह पाये उस शास्ता बुद्ध के जीवन की प्रसिद्ध घटनाओं का वर्णन प्रारम्भ करने का मेरा सङ्कल्प मेरी मूर्खता ही द्योतित करता है ॥ २ ॥

तथापि तत्राहितभक्तिशक्त्या[2] तदेतदाख्यातुमहं प्रवीणः ।
तथाहि तत्पादसमाश्रयेण रजोऽपि लक्ष्मीं कुरुते हि पुंसाम् ॥ ३ ॥

कविरिदानीं स्वसाहसं समर्थयति **तथापीत्यादिना** । तत्र=तस्मिन् भगवति बुद्धे, आहितायाः=विन्यस्तायाः, भक्तेः=अनुरागस्य, शक्त्या=सामर्थ्येन, प्रवीणः=निपुणः । "प्रवीणे निपुणाभिज्ञ-विज्ञ-निष्णात-शिक्षिताः" इत्यमरः । तस्य=बुद्धस्य, पादयोः=चरणयोः, समाश्रयेण=सम्बन्धेन; रजः=रेणुः । पुंसाम्=नृणाम्, लक्ष्मीम्=श्रियम्, कुरुते=आतनोति । यथा रजसोऽपि तत्पादसम्बन्धेन नृणामैश्वर्यप्रदत्वं सम्भवति, तथैव मम तद्विषयकभक्तेस्तच्चरित्रकथनशक्तिप्रदत्वमिति भावः । बुद्धे भक्तिः स्वयमनिपुणमपि निपुणं करोतीति कवेः स्वसाहससमर्थनम् ।

अत्रोपेन्द्रवज्रा वृत्तम्; 'उपेन्द्रवज्रा जतजास्ततो गौ' इति वृत्तरत्नाकरपठितलक्षणात् ॥ ३ ॥

---

१. मौढ्यमेव—वि०, त्रि० ।
२. शक्तिभक्त्या—म० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथापि उन भगवान् बुद्ध में मेरे अतिशय अनुराग (भक्ति) के कारण प्राप्त शक्ति के सहारे मैं स्वयं को उनका चरित्रवर्णन करने में समर्थ मान रहा हूँ। जैसा कि हम लोक में देखते आ रहे हैं कि मनुष्यों को उन भगवान् बुद्ध के चरणों में लगी धूल को भी शिर पर लगाने से लक्ष्मी (यशःशोभा) ही प्राप्त होती है ॥ ३ ॥

कपिलानगरीवर्णनम्

अस्ति प्रशस्ता कपिलेति नाम्ना काचित् पुरी कामदुघा प्रजानाम् ।
यां वीक्ष्य शक्रो निजराजधान्याः श्लाघाभिसन्धिं शिथिलीकरोति[1] ॥ ४ ॥

सप्तविंशत्या पद्यैः कविर्भगवतो बुद्धस्य वासभूमिं कपिलाह्वयां नगरीं वर्णयति अस्तीत्यादिना । प्रजानाम्=लोकानाम् । कामदुघा=इष्टप्रदा । कामान् दोग्धीत्युपपदसमासः । "दुहः कब्घश्च" (पा० सू० ३.२.७०) इति कप्, हकारस्य घकारादेशश्च । काचित्=अनिर्वचनीया, कपिला इति नाम्ना=आख्यया; प्रशस्ता=प्रसिद्धा; पुरी=नगरी, अस्ति=आसीत् । याम् =पुरीम्, वीक्ष्य=दृष्ट्वा, शक्रः=इन्द्र अपि, निजस्य=स्वस्य; राजधान्याः=अमरावतीनगर्याः । राजानो धीयन्तेऽस्यामिति राजधानी; "प्रधाननगरी राज्ञां राजधानीति कथ्यते" इति शब्दार्णवः । श्लाघायाम्=स्तुतौ, अभिसन्धिम्=उद्देशम्, शिथिलीकरोति=अशिथिलं शिथिलं सम्पद्यमानं करोति; अभूततद्भावे च्विः । श्लाघाकरणे उत्साहमान्द्यमापादयतीत्यर्थः । अत्र अमरावतीश्लाघाभिसन्धिशिथिलीकरणोक्त्या कपिलानगर्या अमरावत्यपेक्षया गुणप्राशस्त्यं शोभाप्राशस्त्यं च व्यज्येते ॥ ४ ॥

[अब कवि अग्रिम २७ श्लोकों से कपिला नगरी का, जहाँ भगवान् बुद्ध अवतरित हुए थे, शोभावर्णन कर रहे हैं—] प्रजा के मनोरथों को सर्वथा पूर्ण करने वाली कपिला नामक नगरी, शोभा एवं समृद्धि के कारण, अपने समय में इतनी प्रख्यात थी कि देवराज इन्द्र भी उसके सामने अपनी राजधानी अमरावती नगरी के शोभावर्णन में लोगों से कतराते थे ॥ ४ ॥

सम्भाव्यते यत्र सुधामरीचिः सौधध्वजस्तम्भनिलीनबिम्बः ।
मुखारविन्दद्युतिमोषरोषादारोपितः शूलमिवाङ्गनाभिः ॥ ५ ॥

सम्भाव्यत इति । यत्र=यस्यां नगर्याम् । सुधायाः=अमृतस्य, मरीचयः=किरणा यस्मिन् स सुधामरीचिः=चन्द्रः । सौधस्य=प्रासादस्य, "सौधोऽस्त्री राजसदनम्" इत्यमरः । ध्वजस्य=पताकायाः, स्तम्भे, निलीनम्=अन्तर्गतं बिम्बं यस्य सः । मुखारविन्दस्य=मुखकमलस्य, द्युतेः=कान्तेः, मोषेण=

१. शिथिलीचकार—वि० त्रि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपहारेण यो रोषः=क्रोधस्तस्मात्। अङ्गनाभिः=कपिलावासिनीभिर्योषिद्भिः, शूलम्=वधहेतवे अयःकीलम्, आरोपित इव। सम्भाव्यते=तर्क्यते। अत्र ध्वजस्तम्भप्रतिफलितस्य चन्द्रस्य पद्मसमस्वमुखकान्तिमोषणेन कुपिताभिरङ्गनाभिः शूलारोपणमुत्प्रेक्ष्यते। अत्र **उपजातिवृत्तम्**।

"अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः।
इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम" ॥

इति लक्षणात् ॥ ५ ॥

उस कपिला नगरी में बने राजप्रासादों के ध्वजस्तम्भ इतने चमकीले, साफ और चिकने थे कि उनमें चन्द्रमा का प्रतिबिम्ब बहुत स्पष्ट दिखायी देता था। मानो उस नगरी में रहने वाली स्त्रियों ने चन्द्रमा द्वारा उनकी कमल के तुल्य मुखकान्ति चुरा लेने से कुपित हो, उसे शूली पर चढा दिया हो ॥ ५ ॥

वीथीषु माणिक्यमयीषु यस्यां ज्योतींषि भान्ति प्रतिबिम्बितानि।
अनङ्गचापादपकृष्यमाणान्मुक्ताफलानीव परिच्युतानि ॥ ६ ॥

वीथिष्विति। यस्याम्=नगर्याम्, माणिक्यमयीषु=रत्नप्रचुरासु, प्राचुर्ये मयट्। वीथिषु=रथ्यासु; ज्योतींषि=नक्षत्राणि; "ज्योतिस्ताराग्निभाज्वालादृक्पुत्रार्थाध्वरात्मसु" इति वैजयन्तीकोशः। प्रतिबिम्बितानि=प्रतिफलितानि एवं भान्ति=शोभन्ते, यथा अनङ्गस्य=मन्मथस्य, चापात्=धनुष इक्षुदण्डात्; मुक्ताफलस्य इक्षुदण्डोत्पन्नत्वं रत्नशास्त्रप्रसिद्धम्। अपकृष्यमाणात्=प्रकर्षेणाकृष्यमाणात्। मुक्ताफलानि परिच्युतानि स्युः। माणिक्यखचितवीथिप्रतिफलितनक्षत्रेषु मन्मथचापगलितमुक्ताफलत्वमुत्प्रेक्ष्यते। वृत्तं पूर्वश्लोकवत् ॥ ६ ॥

उस नगरी की रत्नजटित गलियाँ बहुत साफ सुथरी थी। आकाश में चमकने वाले तारागण का प्रतिबिम्ब उनमें ऐसा स्पष्ट झलकता था मानों वहाँ कामदेव द्वारा बलपूर्वक खींचे गये धनुर्दण्ड से टूट कर मोती गिर रहे हों ॥ ६ ॥

उत्सेधिनो यत्र गृहाः प्रभूणामुदस्तजैत्रध्वजदण्डबाहाः।
आलोलघण्टाक्वणितैरजस्रमभ्यर्थिनो दातुमिवाह्वयन्ति ॥ ७ ॥

उत्सेधिन इति। यत्र=नगर्याम्, प्रभूणाम्=आढ्यानाम्, गृहाः=गृहाणि; "गृहाः पुंसि च भूम्न्येव" इत्यमरसिंहवचनात् अस्य शब्दस्य पुंसि तु बहुत्वमेव। उत्सेधिनः=उन्नताः; उत्सेधः उच्छ्रय एषामस्तीति विग्रहः। 'उत्सेधश्चोच्छ्रयश्च सः' इत्यमरः। उदस्ताः=उत्क्षिप्ताः, जैत्रस्य=जयशीलस्य, ध्वजस्य=पताकायाः, दण्डाः=स्तम्भा एव बाहा येषां ते तथा। "बाहा तु बाहौ स्यात्" इति हैमः। आलोलघण्टानाम्=ध्वजाग्रसङ्घटितानां चञ्चलघण्टानाम्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्वणितैः=आरावैः, अभ्यर्थिनः-याचकान् । दातुम्=वाञ्छितप्रदानाय, अजस्रम्=निरन्तरम्, आह्वयन्तीवेत्युत्प्रेक्षा ॥ ७ ॥

उस नगरी में बने घनाढ्य पुरुषों के ऊँचे-ऊँचे महलों में लगे ध्वजस्तम्भ ऐसे लेहराते थे मानों वे हाथ हिला-हिलाकर याचकों को, उनका मनचाहा देने के लिये, अपने पास बुला रहे हों ॥ ७ ॥

रथ्यासु रत्नोपहितासु यस्यां बिम्बप्रविष्टाः करिणो विभान्ति ।
कुलाद्रिकूटा इव कुण्डलीन्द्रसाहायकं कर्तुमधः प्रवृत्ताः[1] ॥ ८ ॥

रथ्यास्विति । यस्याम्=नगर्याम्, रथ्यासु-विपुलासु रथार्हासु वीथिषु "रथ्या प्रतोली विशिखा" इत्यमरः । रत्नोपहितासु=रत्नखचितासु सतीषु । बिम्बेन-प्रतिफलनेन, प्रविष्टाः=अन्तर्गताः, करिणः=गजाः, इत्थं विभान्ति-शोभन्ते यथा कुलाद्रीणाम्-कुलपर्वतानाम्, कूटाः=शिखराणि, "कूटोऽस्त्री शिखरं शृङ्गम्" इत्यमरः । "माहेन्द्रो मलयः सह्यः शुक्तिमानृक्षवानपि । विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः ॥" इति मत्स्यपुराणम् । कुण्डलीन्द्रस्य=फणीन्द्रस्य (शेषस्य), "कुण्डली गूढपाच्चक्षुःश्रवाः" इत्यमरः । सहायकम्-सहायस्य कर्म । योपधत्वाद् वुञ् । कर्तुम्=विधातुम्, अधः=भूमेरधोभागे, पाताले इत्यर्थः । प्रवृत्ताः-उद्यताः, अभूवन्निति । कुलाद्रिकूटानां महीधरणविषये शेषसजातीयत्वेन तत्क्लेशापनोदनप्रवृत्तिवर्णनेन कपिलानगर्यां गजानां कुलाद्रिकूटसदृशपीनत्वौन्नत्यादिकं व्यज्यते ॥ ८ ॥

उस नगरी की रत्नजटित वीथियाँ भी इतनी साफ रखी जाती थीं कि वीथियों में खड़े लम्बे डील-डौल वाले हाथियों का प्रतिबिम्ब वीथियों में जड़े रत्नों पर ऐसे पड़ता था मानों माहेन्द्र आदि कुलपर्वतों के शिखर नीचे पाताल लोक में नागराज शेष की सहायता करने जा रहे हों ॥ ८ ॥

पाञ्चालिका यद्गृहपञ्जरेषु प्रपञ्चिताः काञ्चनसञ्चयेन ।
भूमाभिभूतारिपुराहृतानां[2] पुष्यन्ति शोभां पुरदेवतानाम् ॥ ९ ॥

पाञ्चालिका इति । यस्याः=कपिलानगर्याः, गृहेषु=भवनेषु, यानि पञ्जराणि=पक्ष्यादिबन्धनगृहाणि, तेषु । "कुलायस्तु पञ्जरं नीडमस्त्रियाम्" इति वैजयन्तीकोशः । पाञ्चालिकाः=कृत्रिमपुत्रिकाः; काञ्चनसञ्चयेन=स्वर्णसमूहेन । प्रपञ्चिताः=उत्पादिताः; ताः भूम्ना=बहुत्वेन, अभिभूतानि=जितानि यानि अरीणाम्=शत्रूणाम्, पुराणि=नगराणि, तेभ्यः

१. प्रयाताः—वि० त्रि० ।

२. भूमाहिभूताग्य०, प्रजाहिभितारि०—क० । भूमाभिभूतान्य०—वि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आहृतानाम् = बलादुपनीतानाम्, पुरदेवतानाम् – तन्नगराधिष्ठानदेवतानाम् । शोभाम् = कान्तिम्, पुष्यन्ति = वर्धयन्ति । बहन्तीति यावत् । व्यञ्जकाप्रयोगाद् गम्योत्प्रेक्षा ।। ९ ।।

उस कपिला नगरी के घरों में बने पिञ्जरों में रखी सोने की राशि से बनी गुडियाएँ (पुतलियाँ) ऐसे शोभायमान हो रही थीं मानों वे बहुत से शत्रुओं के नगरों से बलात् छीनकर लाये गये पुरदेवताओं की शोभा बढा रही हों ।। ९ ।।

आरुह्य सौधानतिमेघमार्गान् वर्षान्धकारेष्वपि वासरेषु ।
कथानभिज्ञा घनगर्जितानां वसन्ति यस्यां वनिता वियुक्ताः ।। १० ।।

आरुह्येति । यस्याम् = कपिलानगर्याम्; वर्षैः = वृष्टिभिः, अन्धं कुर्वत्सु; वासरेषु – दिवसेषु, प्रावृषेण्येषु दिवसेष्वित्यर्थः । अतिमेघमार्गान् – मेघमार्गमतिक्रान्तान्, सौधान् = प्रासादान्, आरुह्य = आरोहणं कृत्वा, घनानाम् = मेघानाम्, गर्जितानाम् = ध्वनीनाम्, कथानभिज्ञाः = कथामप्यजानानाः; अननुभूतमेघनिर्घोषा इत्यर्थः । वियुक्ताः = रहिताः, वनिताः = प्रोषितभर्तृकाः । आसन्निति शेषः । कपिलानगर्याः प्रासादानां मेघमार्गातिक्रान्त्या उन्नतत्वात् तत्रस्थविरहिणीनां वर्षर्तुजनितं विरहवेदनासहत्वं न सम्भवतीति भावः ।।१०।।

उस कपिला नगरी में, वर्षा के दिनों में पतिवियुक्ता नारियाँ मेघों के मार्ग से भी ऊँचे बने महलों में बैठ कर मेघगर्जन की कल्पना से भी, जिसके कारण पतिविरह में आधिक्य आता, दूर रहती थीं ।। १० ।।

यत्रालयाः काञ्चनकेतुदण्डैरुदञ्चितैर्दोर्भिरिवातिदीर्घैः ।
अपाहरन्तीव कृताभ्यसूयाः शोभां शुनासीरपुरालयानाम् ।। ११ ।।

यत्रेति । यत्र = यस्यां कपिलायाम्, आलयाः = गृहाः, "निकाय-निलयालयाः" इत्यमरः । उदञ्चितैः = उत्क्षिप्तैः दोर्भिः – बाहुभिरिव स्थितैः, भुजबाहू प्रवेष्टो दोः" इत्यमरः । अतिदीर्घैः – उच्चैर्लम्बायमानैः, काञ्चनैः – सुवर्णमयैः, केतुदण्डैः = ध्वजदण्डैः, कृता = विहिता, अभ्यसूया – निन्दा यैस्ते, सन्तः, शुनासीरस्य – इन्द्रस्य, पुरे – इन्द्रावत्याम्, आलयानाम् – कृतवासानाम्, शोभाम् – कान्तिम्, अपाहरन्ति – बलाद् गृह्णन्तीवेत्युत्प्रेक्षा ।। ११ ।।

उस कपिला नगरी में बने ऊँचे-ऊँचे महल आकाश में अत्यधिक ऊँचाई तक फहराते हुए अपने सुवर्णमय ध्वजदण्डों से मानो अपनी लम्बी भुजाओं से अमरावतीवासियों की शोभा का अपहरण कर रहे हों ।। ११ ।। [इन श्लोकों में कवि ने कपिला नगरी के प्रसादों का औन्नत्य बताया है ।]

यदङ्गनाः सौधसमीपलग्नामादाय हस्तैरमृतांशुलेखाम् ।
निवेशयन्त्यो निजकुन्तलेषु विडम्बयन्ति श्रियमम्बिकायाः ।। १२ ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदङ्गना इति । यत्रत्या अङ्गनाः=नार्यः, हस्तैः=करैः, सौधस्य=प्रासादस्य, समीपे=प्रान्ते, लग्नाम्=सक्ताम्, आदाय=गृहीत्वा, अमृतांशोः=चन्द्रस्य, लेखाम्=रेखाम्, निजस्य=स्वकीयस्य, कुन्तलेषु=चिकुरेषु, "चिकुरः कुन्तलो बालः" इत्यमरः । निवेशयन्त्यः=धारयन्त्यः, अम्बिकायाः=पार्वत्याः; "मृडानी चण्डिकाऽम्बिका" इत्यमरः । श्रियम्=शोभाम्, विडम्बयन्ति=अनुकुर्वन्ति । अम्बिकासादृश्यं लभन्त इत्यर्थः । अम्बिकायाः शिवार्धभागत्वात् चन्द्रकलाधरत्वं बोध्यम् ॥ १२ ॥

उस कपिला नगरी में बसने वाली नारियाँ अपने महलों के किनारों पर पड़ती हुई चन्द्रमा की कान्ति को अपने बालों में अपने ही हाथों से बिखेरती हुई ऐसी लग रही थीं मानो वे अपनी इस क्रिया द्वारा भगवती पार्वती की शोभा का अनुकरण कर रही हों ॥ १२ ॥

यन्मण्डपाः प्रौढनिदाघतप्ताश्चञ्चत्पताकारसनाञ्चलेन ।
आस्वादयन्तीव तुषाररश्मिं सुधारसेन स्वदमानबिम्बम् ॥ १३ ॥

यन्मण्डपा इति । यस्या मण्डपाः=गृहाः, प्रौढेन=बलवता, निदाघेन=तापेन, "निदाघौ स्वेदतापौ च" इत्यमरः । तप्ताः=तापं प्राप्ताः, चञ्चन्त्याः=चलन्त्याः, पताकायाः=वैजयन्त्याः; "पताका वैजयन्ती स्यात्" इत्यमरः । रसनायाः=जिह्वायाः 'रसज्ञा रसना जिह्वा" इत्यमरः । अञ्चलेन=अग्रभागेन, सुधायाः=अमृतस्य, रसेन=सारेण, स्वदमानम्=रस्यम्, बिम्बम्=प्रतिबिम्बम्, यस्य तम्, तुषारस्य=हिमस्य, रश्मिम्=कान्तिम्, आस्वादयन्ति=लिहन्ति । इवेत्युत्प्रेक्षायाम् ॥ १३ ॥

उस कपिला नगरी के घोर ग्रीष्मताप से तपे मण्डप अपनी चञ्चल (हवा में लहराती) जिह्वारूपी पताकाओं के व्याज से बहते हुए अमृत रस से युक्त हिमकान्ति का स्वाद चख रहे थे ॥ १३ ॥

विलोक्य चैत्यध्वजसिंहमुद्रां भयाकुले क्वापि गते कुरङ्गे ।
निशाकरो यत्र नितम्बिनीनां साधर्म्यमभ्येति सहाननाब्जैः ॥ १४ ॥

विलोक्येति । यत्र कपिलानगर्याम्, निशाकरः=चन्द्रः, चैत्यस्य=बौद्धविहारस्य, ध्वजे=पताकां स्थिताम्, सिंहमुद्राम्=सिंहचिह्नम्, विलोक्य=दृष्ट्वा; भयेन=भीत्या, आकुले=व्याकुले सति, क्वापि=कुत्राप्यन्यत्र, कुरङ्गे=हरिणे, गते=याते, नितम्बाः पृथुला आसां सन्तीति तासां नितम्बिनीनाम्=स्त्रीणाम्, आननाब्जैः=मुखपद्मैः; समानो धर्मो येषां ते सधर्माणः, सधर्माणां भावः साधर्म्यम्=सादृश्यम्, अभ्येति=प्राप्नोति । ध्वजचिह्नसिंहभीत्या चन्द्रमृगपलायनेन चन्द्रस्य निष्कलङ्कत्वम्; तेनैव हेतुना कापिलेयनारीमुखसादृश्यसम्भवः ॥१४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उस कपिला नगरी में स्थित बौद्धविहारों की ध्वजा में सिंहाकृति देखकर भयभीत स्वस्थित हरिण के कहीं दूर भाग जाने पर, चन्द्रमा वहाँ की नारियों के मुखकमल की निष्कलङ्कता से तुलना (समानता) करता था ॥ १४ ॥

यच्चन्द्रशालास्वबलाजनानां वितन्वतां विभ्रममण्डनानि ।
आदर्शतामाश्रयते निशासु पुरोगतं पूर्णसुधांशुबिम्बात् ॥ १५ ॥

यदित्यादि । यस्याः=कपिलानगर्याः, चन्द्रशालासु=शिरोगृहेषु । "चन्द्रशाला शिरोगृहम्" इत्यमरः । निशासु=रात्रिषु; विभ्रमाय=विलासाय, मण्डनानि=अलङ्करणानि; वितन्वताम्=कुर्वताम्; अबलाजनानाम्=नारीजनानाम्; पुरोगतम्=अग्रेस्थितम्; पूर्णस्य=सकलकलासहितस्य, सुधांशोः=चन्द्रस्य, बिम्बम्=प्रतिबिम्बम्; आदर्शताम्=दर्पणभावम्; आश्रयते=सेवते । अत्र चन्द्रमण्डलस्य दर्पणरूपताप्रतिपादनेन चन्द्रशालाया औन्नत्यातिशयो व्यज्यते ॥ १५ ॥

उस कपिला नगरी की चन्द्रशालाओं (ऊँची अटारियों) में रात्रि में शृङ्गार के लिये बैठी हुई नारियों के लिये पूर्ण चन्द्रमा का प्रतिबिम्ब ही दर्पण का काम देता था ॥ १५ ॥

यत्रेन्द्रनीलोपलगोपुराणां विजृम्भमाणाः किरणप्रणालाः ।
चण्डांशुबिम्बेऽपि सनीड़भाजि क्षणं वितन्वति कलङ्कशङ्काम् ॥ १६ ॥

यत्रेति । यत्र=कपिलानगर्याम्; इन्द्रनीलोपलगोपुराणाम्=इन्द्रनीलशिलामयपुरद्वाराणाम् । "पुरद्वारं तु गोपुरम्" इत्यमरः । विजृम्भमाणाः=वर्धमानाः; किरणाः प्रणाला इव किरणप्रणालाः=किरणप्रवाहा इत्यर्थः । "प्रणाल्यावली पयोवहा" इति वैजयन्ती । चण्डाः=उग्राः, अंशवः=किरणाः यस्य तस्य=सूर्यस्य; बिम्बे=आकारे, अपि=एव; सनीडम्=समीपं भजतीति तस्मिन्=समीपवर्तिनि । "समीपे निकटासन्नसन्निकृष्टसनीडवत्" इत्यमरः । क्षणम्=कियन्तं कालं यावत् । कलङ्कस्य=लाञ्छनस्य, शङ्काम्=संशयम्, वितन्वन्ति=विस्तारयन्ति ॥ १६ ॥

उस कपिला नगरी के इन्द्रमणि प्रस्तरों से निर्मित गोपुरों से निःसृत किरण-प्रवाह से समीप ही किसी सूर्य के प्रतिबिम्ब होने का सन्देह उत्पन्न होता था ॥ १६ ॥

यत्रापगाः स्वच्छजलान्तरालसंक्रान्ततीरस्थितकेलिशैलाः[1] ।
सदोष्मणा मग्नसुरद्विपाया महेन्द्रसिन्धोः श्रियमाश्रयन्ते ॥ १७ ॥

---

१. ०न्तरालाः—क०, म० । ०तीरस्थल०—त्रि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्रेति । यत्र=यस्यां कपिलायाम्; अपां समूहः आपम्, तेन गच्छन्तीति आपगाः=नद्यः; स्वच्छस्य=परिशुद्धस्य, जलस्य=सलिलस्य, अन्तराले=मध्ये, संक्रान्ताः=प्रतिफलिताः, तीरे=तटे, स्थिताः, केलिशैलाः=क्रीडापर्वता यासु ताः सत्यः, मदेन=मदजनितेन, ऊष्मणा=तापेन; मग्नः=अवगाढः, सुरद्विपः=ऐरावतो यस्यां तस्याः; महेन्द्रसिन्धोः=इन्द्रनद्याः, सुरगङ्गाया इत्यर्थः। श्रियम्=शोभाम्, आश्रयन्ते=स्वीकुर्वन्ति । अत्र निदर्शनालङ्कारः ॥ १७ ॥

उस कपिला नगरी के आस-पास बहने वाली नदियाँ, तीर-स्थित क्रीड़ापर्वतों की छाया उनके जल में पड़ने के कारण, ऐसी लगती थीं मानों सुरगङ्गा में ऐरावत हाथी नहा रहा हो ॥ १७ ॥

यत्रौकसां रत्नविनिर्मितानामुच्चावचैरुच्चलितैर्मयूखैः ।
वर्षावसानेऽपि महेन्द्रचापैराभाति सन्नद्धमिवान्तरिक्षम् ॥ १८ ॥

यत्रेति । यत्र=कपिलानगर्याम्, रत्नविनिर्मितानाम्=रत्नमयानाम्; ओकसाम्=गृहाणाम्; "धिष्ण्यमोको निवसनम्" इत्यमरः । उच्चावचैः=विविधैः । उदञ्चश्चावाञ्चश्चोच्चावचा इति मयूरव्यंसकादित्वात् समासः । "उच्चावचं नैकभेदम्" इत्यमरः । मयूखैः=किरणैः, उच्चलितैः=ऊर्ध्वं गतैः; वर्षावसाने=शरदृतावपि; महेन्द्रचापैः=इन्द्रधनुर्भिः; सन्नद्धम्=सम्बद्धम्, इव अन्तरिक्षम्=आकाशम्; आभाति=शोभते ॥ १८ ॥

उस कपिला नगरी में रत्नमय गृहों की इधर-उधर ऊँची नीची उठी अनेक तरह की किरणों से उस नगरी का आकाश ऐसा लगता था मानों वर्षा ऋतु बीतने पर (शरद् ऋतु में) भी उसमें इन्द्रधनुषों की पंक्ति लगी हुई हो ॥ १८ ॥

प्रासादमालासु हिरण्मयीषु प्रारब्धलीलाः प्रमदा यदीयाः ।
सुमेरुशृङ्गेषु विहारिणीनां सुराङ्गनानां द्युतिमाक्षिपन्ति ॥ १९ ॥

प्रासादेत्यादि । हिरण्यस्य विकारा हिरण्मय्यस्तासु; प्रासादमालासु=सौधपंक्तिषु; प्रारब्धाः=उपक्रान्ताः, लीला=क्रीडनक्रियाकलापो याभिस्ताः; क्रीडितुमारब्धा इत्यर्थः । प्रमदाः=स्त्रियः । "प्रमदा भगिनी कान्ता" इत्यमरः । सुमेरुशृङ्गेषु=सुमेरुपर्वतशृङ्गेषु विहारिणीनाम्=विहरणशीलानाम्; सुराङ्गनानाम्=देवयोषिताम्, अप्सरसामिति भावः । द्युतिम्=शोभाम्; आक्षिपन्ति=धिक्कुर्वन्ति ॥ १९ ॥

उस कपिला नगरी की सुवर्णमय अट्टालिकाओं में रहनेवाली युवती नारियों ने परस्पर क्रीड़ा करते हुए, देवाङ्गनाओं को भी नीचा दिखा दिया था ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्रालयानां प्रविजृम्भमाणाः प्रभाविरोहाः स्फटिकाचितानाम् ।
आसन्नभाजां हरितां हयानां यान्तीव[1] कर्णक्षणचामरत्वम्[2] ॥ २० ॥

यत्रेत्यादि । यत्र=कपिलानगर्याम्; स्फटिकाचितानाम्=स्फटिकमणिनिर्मितानाम्, आलयानाम्=गृहाणाम्; प्रभाप्ररोहाः=किरणाङ्कुराः; आसन्नभाजाम्=समीपगतानाम्; हरिताम्=हरिद्वर्णानाम्; हयानाम्=अश्वानाम्, सूर्यस्य हरिदश्वत्वात् सूर्याश्वानामित्यर्थः । कर्णयोः क्षणकाले चामररूपताम् यान्ति=गच्छन्ति । इवेत्युत्प्रेक्षायाम् ॥ २० ॥

उस कपिला नगरी में स्फटिकमणिनिर्मित इतनी ऊँची-ऊँची अट्टालिकाएँ थी कि उनसे निकला हुआ किरणसमूह सूर्याश्वों के कर्णयुगलों को चँवर ढुलाता सा प्रतीत होता था ॥ २० ॥

मरीचिभिर्यन्मणितोरणानां विसृत्वरैर्विच्छुरितप्रवाहा ।
मध्येनभो भाति महेन्द्रसिन्धुः कलिन्दजाकर्बुरितान्तरेव ॥ २१ ॥

मरीचिभिरिति । यस्या=कपिलायाः, मणितोरणानाम्=हरितमणिमयबहिर्द्वाराणाम्, "तोरणोऽस्त्री बहिर्द्वारम्" इत्यमरः । विसृत्वरैः=व्यापनशीलैः, मरीचिभिः=कान्तिभिः; विच्छुरितप्रवाहा=रूषितप्रवाहाः; मध्येनभः=नभसो मध्ये । "पारे मध्ये षष्ठ्या वा" (पा०सू० २.१.१८) इत्यव्ययीभावसमासः । महेन्द्रस्य=सुरेन्द्रस्य, सिन्धुः=नदी आकाशगङ्गेत्यर्थः । "सिन्धुर्ना सरिति स्त्रियाम्" इत्यमरः । कलिन्दजया=यमुनानद्या, कर्बुरितम्=शबलितम्, अन्तरम्=मध्यं यस्यास्तादृशी, भाति शोभते । इवेत्युप्रेक्षायाम् ॥ २१ ॥

उस कपिला नगरी के ऊँचे-ऊँचे हरित मणिमय तोरणों की दूर दूर तक फैलने वाली कान्ति की छाया से आकाशगङ्गा ऐसी लग रही थी मानो उससे यमुना नदी का सङ्गम हो गया हो ॥ २१ ॥

समुच्छ्रितै:[3] सौधतलेषु यस्यां मत्स्यध्वजैर्मारुतकम्पमानैः ।
सार्धं विगृह्णन्ति सपत्नबुद्ध्या मरुत्स्रवन्तीमकराः सरोषम् ॥ २२ ॥

समुच्छ्रितैरिति । यस्याम्=नगर्याम्, समुच्छ्रितैः=ऊर्ध्वसमुत्क्षिप्तैः, मारुतेन=वायुना, कम्पमानैः; मत्स्यध्वजैः=मत्स्याकारचिह्नितध्वजैः । "केतनं ध्वजमस्त्रियाम्" इत्यमरः सार्धम्=सह, सपत्नबुद्ध्या=शत्रुभावेन, मरुताम्=देवानाम्, स्रवन्त्याम्=नद्याम्, स्थिता मकराः ग्राहाः, रोषेण सह वर्तन्त इति सरोषम्=सक्रोधम् (क्रियाविशेषणम्) विगृह्णन्ति=कलहं कुर्वन्ति ॥

---

१. आयान्ति—क०, म० ।   २. कर्णक्षम०—क०, म० ।
३. समुद्धृतैः—त्रि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उस कपिलानगरी के ऊँचे-ऊँचे महलों पर हवा में लहराती मत्स्याकृति वाली पताकाओं से, उन्हें वास्तविक मत्स्य समझकर, शत्रुबुद्धि से देवनदियों में रहनेवाले बड़े-बड़े ग्राह (मकर) द्वेषभाव से विग्रह (कलह) करने को उद्यत रहते थे ॥ २२ ॥

रतिश्रमो यत्र विलासिनीनां प्रासादमभ्रङ्कषमाश्रितानाम्[1] ।
विनीयते गन्धवहेन मन्दं मन्दाकिनीवीचिविहारभाजा ॥ २३ ॥

रतिश्रम इति । यत्र–कपिलायाम्, अभ्रङ्कषम्–मेघमण्डलस्पर्शम् । अभ्रं कषति इति विग्रहे "सर्वकूलाभ्रकरीषेषु कषः" (पा० सू० ३.२.४२) इति खचि, "अरुर्द्विषदजन्तस्य मुम्" (पा० सू० ६.३.६७) इति मुमागमः । प्रासादम्–सौधम्; आश्रितानाम्=वासिनीनाम्; विलासिनीनाम्=प्रमदानाम्; रतिश्रमः=रतिजनितः खेदः । मन्दाकिन्याः–आकाशगङ्गायाः, "मन्दाकिनी वियद्गङ्गा" इत्यमरः । वीचिषु–तरङ्गेषु, विहारम्=क्रीडां भजतीति तेन, गन्धवहेन=वायुना, विनीयते–अपह्रियते । गन्धवह–वीचिविहार-मन्देति पदत्रयेण सौरभशैत्य-मान्द्यप्रतिपादनात् वायो रतिश्रमापहरत्वं ज्ञेयम् ॥ २३ ॥

उस कपिला नगरी के मेघमण्डल तक स्पर्श करनेवाले प्रासादों में रहनेवाली प्रमदाओं का रतिजनित श्रम (थकावट) मन्दाकिनी की तरङ्गों से टकराकर लौटनेवाले वायु द्वारा दूर किया जाता था ॥ २३ ॥

सुधासनाथेन सुधामयूखः कलासमग्रः करपल्लवेन ।
विलिम्पतीव क्षणदासु यस्यां क्रीडागृहाणामुपरिस्थलानि ॥ २४ ॥

सुधेत्यादि । यस्याम्–कपिलायाम्, सुधया=लेपभेदेन, अमृतेन च, सनाथेन=सहितेन, "लेपभेदेऽमृते सुधा" इति वैजयन्ती । सुधामयूखः=अमृतरश्मिः, चन्द्र इत्यर्थः । कलाभिः=शिल्पविद्याभिः, षोडशकलाभिश्च, समग्रः=पूर्णः । करः किरण एव करो हस्तः, पल्लवः–किसलयमिव, तेन । "बलिहस्तांशवः कराः", "पल्लवोऽस्त्री किसलयम्" इत्युभयत्रामरः । क्षणदासु–रात्रिषु, क्रीड़ागृहणाम्–केलिगृहाणाम्, उपरिस्थलानि–उपरितलानि; विलिम्पति । इवेत्युत्प्रेक्षायाम् । अर्थादत्र श्लोके सुधाशब्दवाच्ययोः अमृत-लेपद्रव्ययोः, करशब्दवाच्ययोः किरण-हस्तयोः, कलासमग्रपदवाच्ययोः शिल्पि-चन्द्रयोश्च अभेदाध्यवसायात् चन्द्रस्यात्र लेपनक्रियाकर्तृत्वमुत्प्रेक्ष्यते ॥ २४ ॥

उस कपिला नगरी में रात्रि के समय क्रीड़ागृहों के ऊपर के तलों पर चन्द्रमा अमृत के द्वारा एवं कलाविद् शिल्पी अपने हाथों से लेप करते रहते थे ॥ २४ ॥

---

१. ०मास्थितानाम्—त्रि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्रेन्द्रनीलोपलकुट्टिमेषु प्रविष्टबिम्बां प्रथमेन्दुलेखाम्[1] ।
मृणालखण्डस्पृहया[2] मरालाश्चञ्चूपुटैश्चर्वितुमुत्सहन्ते ॥ २५ ॥

यत्रेति । यत्र=कपिलायाम्, इन्द्रनीलोपलकुट्टिमेषु=इन्द्रनीलशिलानिबद्धभूमिषु । कुट्टिमोऽस्त्री निबद्धा भूः" इत्यमरः । प्रबिष्टः=प्रतिफलितः, बिम्बः=आकारो यस्यास्ताम् । प्रथमायाः=प्रतिपत्तिथेः, इन्दुलेखाम्=चन्द्रकलाम्; मृणालस्य=विसस्य, खण्डस्य=भित्तस्य, स्पृहया=इच्छया । "इच्छा कांक्षा स्पृहेहा तृट्" इत्यमरः । मरालाः=हंसाः । "हंसो मरालो नीलाक्षः" इति वैजयन्ती । चञ्चूपुटैः=त्रोटचग्रभागैः । चञ्चूश्चञ्चुस्तथा त्रोटिः" इति हलायुधः । चर्वितुम्=खादितुम् । उत्सहन्ते=उत्साहं कुर्वन्ति ॥ २५ ॥

उस कपिला नगरी में रात्रि के समय इन्द्रनीलमणि से निर्मित स्थानों में प्रतिबिम्बित प्रतिपदा तिथि की चन्द्रकला को मृणालखण्ड समझकर वहाँ रहने वाले राजहंस उसे अपनी चोंचों से खाने का प्रयास करते थे ॥ २५ ॥

अभ्युद्गतं यद्गृहधूपराशिमकाण्डघाटीपटुराहुदर्शम्[3] ।
पश्यन् भयेनैव पतिर्दिनानामन्तर्दधात्यम्बुधराटवीषु ॥ २६ ॥

अभ्युद्गतमिति । अभ्युद्गतम्=अभ्युन्नतम् । यस्याः=कपिलायाः, गृहेषु जातमगरुप्रभृतिजं धूपराशिम् । अकाण्डे=अवसरे; "काण्डोऽस्त्रीदण्डवाणार्ववर्गावसरवारिषु" इत्यमरः । या घाटी=शत्रुसम्मुखगमनम्, तस्यां पटुम्=समर्थम् । राहुदर्शम्=राहुं दृष्ट्वा । पश्यन्तीत्यनेनान्वयः । "उपमाने कर्मणि च" (पा० सू० ३.४.४५) इति णमुल् । दिनानां पतिः सूर्यः । धरन्तीति धराः, अम्बुनो धरा अम्बुधराः=मेघाः, त एवाटव्यः=विपिनानि, तासु । अन्तर्दधाति=तिरोधत्ते । "अटव्यरण्यं विपिनम्" । इवेत्युत्प्रेक्षायाम् ॥ २६ ॥

उस कपिला नगरी के प्रासाद अत्यधिक अगरबत्ती के जलने से उठी हुई धूमराशि के कारण ऐसे लग रहे थे मानो असमय में ही शत्रु के सामने जाने में समर्थ राहु को देखने से भयभीत होकर दिवाकर सूर्य मेघों के वन में छिप गया हो ॥२६॥

बिम्बप्रविष्टाः स्फटिकस्थलीषु वक्त्रश्रियो यद्वरवर्णिनीनाम् ।
विकासिनां व्योमनदीजलेषु सरोरुहाणां वितरन्ति शङ्काम् ॥ २७ ॥

बिम्बोत्यादि । यस्यां=कपिलायां स्थितानां, वरवर्णिनीनाम्=उत्तमाङ्गानाम्; "उत्तमा वरवर्णिनी" इत्यमरः । स्फटिकस्थलीषु=स्फटिकमयकृत्रिमभूमिषु; बिम्बप्रविष्टाः=प्रतिबिम्बिताः, वक्त्राणाम्=मुखानाम्, श्रियः=शोभाः,

---

१. प्रथिते०—वि , म०, क० । २. ०दण्ड०—त्रि० ।
३. ०राशिं कारण्ड०—त्रि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्योमनद्याः=आकाशगङ्गायाः, जलेषु=सलिलेषु, विकासिनाम्=उत्फुल्लानाम् सरोरुहाणाम् =कमलानाम्; शङ्काम् =भ्रान्तिम्; वितरन्ति=जनयन्ति ।

उस कपिला नगरी में युवतियों के लिए स्फटिकनिर्मित स्थलियों में प्रतिबिम्बित उन युवतियों की मुखच्छाया ऐसी लग रही थी मानो आकाशगङ्गा में कमल खिले हों ॥ २७ ॥

सालं यदीयं समतीत्य गन्तुमपारयन् धिक्कृतचक्रवालम् ।
पतिस्त्विषामुत्तरदक्षिणार्धव्याजेन तत्पार्श्वभुवा प्रयाति ॥ २८ ॥

सालमित्यादि । यदीयम्=यस्याः कपिलानगर्याः सम्बन्धि; धिक्कृतः= औन्नत्यादिना तिरस्कृतः, चक्रवालः=लोकालोको येन तम्; "लोकालोकश्चक्रवालः" इत्यमरः । सालम्=प्राकारम्; "प्राकारो वरणः सालः" इत्यमरः । समतीत्य=अतिक्रम्य, गन्तुम्=यातुम्, अपारयन्=अशक्नुवन्; त्विषाम्पतिः= सूर्यः । अर्धं च अर्धं च अर्धे=वत्सरसमांशौ, उत्तरं च दक्षिणं च उत्तरदक्षिणे=उत्तरदक्षिणायनरूपे, उत्तरदक्षिणे च ते अर्धे च उत्तरदक्षिणार्धे, तयोर्व्याजेन=कपटेन । उत्तरदक्षिणार्धगतिरिति व्याजेनेति पर्यवसितम् । तस्य= सालस्य, पार्श्वभुवा=पार्श्वस्थितेन मार्गेण; प्रयाति=गच्छति ॥ २८ ॥

उस कपिलानगरी के प्राकार (दुर्ग की दीवार) को अत्यधिक ऊँचाई के कारण न लाँघ पाने से सूर्य उसके आधे-आधे भाग को उत्तर-दक्षिण समझकर उसके पास से ही निकलता हुआ अपनी उत्तरायण एवं दक्षिणायन स्थिति समझ लेता था ॥२८॥

प्रभञ्जनक्षोभविजृम्भिताभिर्वीचिभिरुल्लङ्घिततीरदेशम् ।
खातं यदीयं कलशाम्बुराशिं जेतुं समुद्योगमिवातनोति ॥ २९ ॥

प्रभञ्जनेत्यादि । यदीयम्=कपिलानगरीसम्बन्धि; प्रभञ्जनेन=वायुना जातो यः क्षोभः=चाञ्चल्यँस्तेन अभिवृद्धाभिः=समन्ताद् वृद्धिङ्गताभिः; वीचीभिः=तरङ्गैः; उल्लङ्घितः=अतिक्रान्तः, तीरदेशः=स्वकीयस्तीरप्रदेशो येन तम्; खातम्=परिखा; कलशाम्बुराशिम्=क्षीरसमुद्रम् । तस्यामृतकलशोत्पत्तिहेतुत्वात् तथा निर्देशः । जेतुम्=विजेतुम्; समुद्योगम्=प्रयत्नम्; आतनोति=करोति । इवेत्युत्प्रेक्षायाम् ॥ २९ ॥

उस कपिला नगरी की परिखा (प्राकार के चारों ओर खुदी हुई खाई) का तीव्र वायु के झोंकों से उठी ऊँची तरङ्गों के कारण उछलता हुआ जल क्षीरसमुद्र को जीतने का प्रयास करता था ॥ २९ ॥

कनन्ति कालागरुधूपमिश्रा[1] यत्सौधचीनध्वजवैजयन्त्यः ।
कल्लोलभिन्नास्तपनात्मजायाः स्वर्लोकसिन्धोरिव वीचिमालाः ॥३०॥

१. ०धूपधूमः—वि०, त्रि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कनन्तीति । यस्याः=कपिलानगर्याः, सौधेषु प्रासादेषु स्थिताः चीनस्य-चीनांशुकस्य, ध्वजवैजयन्त्यः=ध्वजपताकाः; कालागरोः=अगरुखण्डस्य, धूपेन=गन्धेन, मिश्राः=सम्मिश्राः; कल्लोलैः=महावीचिभिः, भिन्नाः=मिश्राः सन्त्यः; तपनात्मजायाः=सूर्यतनयायाः, यमुनानद्या इत्यर्थः। स्वर्लोकस्य-द्युलोकस्य, सिन्धोः=नद्याः, गङ्गाया इत्यर्थः। वीचिमालाः-तरङ्गमालाः; कनन्ति=प्रकाशन्ते । इवेत्युत्प्रेक्षायाम् ॥ ३० ॥

उस कपिला नगरी के प्रासादों पर लहराते हुए चीनदेश के वस्त्र से बने ऊँचे ऊँचे ध्वज, उन प्रासादों से उठी अगर के काले धूएँ से मिलकर ऐसे शोभित हो रहे थे मानों आकाशगङ्गा के साथ जाकर यमुना नदी मिल गयी हो ॥ ३० ॥

कपिलाधिपतेर्वर्णनम्

महीपतिस्तत्र बभूव मान्यः शाक्यान्वयः शाश्वतराजलक्ष्मीः ।
धर्मानुरोधार्जनशुद्धवृत्तिः[1] शुद्धोदनो नाम यथार्थनामा ॥ ३१ ॥

अथ कविर्विंशत्या पद्यैः कपिलाधिपतिं शुद्धोदनं वर्णयति—**महीपति**-रित्यादिना। शाक्या नाम इक्ष्वाकुवंशजाः क्षत्रियविशेषाः, तेषामन्वयः-वंशजः। अथवा—शाको वृक्षविशेषः, तत्र भवाः केचन राजानः। तदुक्तम-मरटीकायां भरतेन—

"शाकवृक्षप्रतिच्छन्नं वासं यस्मात् प्रचक्रिरे।
तस्मादिक्ष्वाकुवंश्यास्ते भुवि शाक्या इति स्मृताः ॥" इति ।

शाश्वती=स्थिरा, राजलक्ष्मीः=राजश्रीर्यस्य सः। समासान्तविधेरनित्यत्वान्नात्र कप्। धर्मस्य अनुरोधेन=अनुवर्तनेन यद् अर्जनम्=ईहितार्थसम्पादनम्, तेन शुद्धा=पापरहिता, वृत्तिः=जीविका यस्य सः। शुद्धमोदनं यस्य स शुद्धोदनः=एतन्नामा। शकन्ध्वादित्वात् पररूपम्। यथार्थम्=अन्वर्थम्, नाम=अभिधेयं यस्य सः। मान्यः=लोकविश्रुतः; बभूव=जज्ञे ॥ ३१ ॥

[अब आचार्य बुद्धघोष अग्रिम बीस श्लोकों में कपिलाधिपति महाराज शुद्धोदन का माहात्म्य-वर्णन कर रहे हैं—]

शाक्यकुल में उत्पन्न, राजलक्ष्मी का निरन्तर भोग करनेवाले, धर्माचरण से शुद्ध चित्तवृत्तिवाले, अन्वर्थनामा महाराज शुद्धोदन उस कपिला नगरी के राजा हुए ॥ ३१ ॥

---

१. ०रोधार्जित०—त्रि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विभुः प्रतापानलमेव वीध्रं विवाहसाक्ष्ये विरचय्य वीरः ।
यः पर्यणैषीदरिराजलक्ष्मीं कृपाणधाराजलपातपूर्वम् ॥ ३२ ॥

विभुरिति । स राजा वीरः=शूरः; विभुः=समर्थश्चासीत्, यः; वीध्रम्=विमलम्, प्रतापः=प्रभाव एव अनलः=अग्निस्तमेव विवाहस्य=परिणयस्य, साक्ष्ये=साक्षाद् द्रष्टुः कर्मणि; विरचय्य=परिकल्प्य, अरीणाम्=शत्रूणां राजलक्ष्मीम्-राजश्रियम् । कृपाणस्य=खड्गस्य; धारेव धारा, तस्या जलम्, तस्य पातः=पूरो यस्मिन् कर्मणि तत्; पर्यणैषोत्-उदवाहयत् । अत्र "श्रीगर्भो विजयश्शास्ता"; "कृपाणासङ्गरिष्टयः"; धारास्त्राग्रेऽम्बुसन्तत्याम्" इति च प्रासङ्गिको वैजयन्तीकोशः ॥ ३२ ॥

जिस वीर ने अपने विवाह में स्वकीय प्रतापाग्नि को साक्षाद् द्रष्टा बनाकर कृपाणधारा के जलपात के सहारे शत्रुओं की राजलक्ष्मी से भी विवाह कर लिया था। (अर्थात् उनके राज्यशासन के प्रारम्भ से ही कोई शत्रु नहीं रह गया था) ॥ ३२ ॥

यः पूर्वमाधाय महाभिषेकं कृत्तेभकुम्भैर्गलदस्रपूरैः ।
पश्चादरीणां हृदयारविन्दैः पुपोष पूजां रणदेवतायाः ॥ ३३ ॥

य इति । यः=शुद्धोदनो राजा; पूर्वम्=प्रथमम्; कृत्तानाम्=छिन्नानाम्, इभानाम्-गजानाम्, कुम्भैरेव कुम्भैः-मस्तकरूपघटैः । गलन्तः=प्रघरन्तः, अस्रस्य=रक्तस्य, पूराः-प्रवाहा येभ्यस्तैः । महाभिषेकम्=राज्याभिषेकम्, आध्याय=स्वीकृत्य; पश्चाद् अरीणाम्=शत्रूणाम्; हृदयारविन्दैः=हृत्प्रदेशैः; रणदेवतायाः=संग्रामदेवतायाः, पूजाम्-सत्कृतिम् । पुपोष-पुष्टिं कृतवान् ॥

जिसने पहले, राज्याभिषेक के समय, काटे गये हाथियों के मस्तकरूपी घटों से अपना महाभिषेक कराया और तदनन्तर शत्रुओं का हृदय चीर कर (उनके रक्त से) रणदेवता की पूजा की ॥ ३३ ॥

पाणौ कृपाणी विरराज यस्य विभूषिताङ्गी पुलकाक्षरेण ।
आकारणाय द्विषतां यमेन सम्प्रेषिता शासनपत्रिकेव ॥ ३४ ॥

पाणाविति । यस्य-राज्ञः शुद्धोदनस्य; पाणौ=हस्ते; पुलकाक्षरेण=रोमाञ्चरूपाक्षरेण, विभूषितम्=अलङ्कृतम् अङ्गं यस्याः सा । कृपाणी=कर्तरी, "कृपाणीली च कर्तरी" इति वैजयन्ती । अत्र कृपाण्याः पुलकाक्षरभूषितत्वं स्वधारकरोमाञ्चप्रतिफलनादिति बोध्यम् । विरराज=शुशुभे । या हि कृपाणी, यमेन-मृत्युदेवतया, तस्य राज्ञो द्विषताम्-शत्रूणाम्, आकारणाय=स्वलोके आह्वानाय शासनपत्रिका=आज्ञापत्रिकेव सम्प्रेषिता=प्रेषणमाप्ता ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जिसके हाथ में छोटी तलवार ऐसे शोभित हो रही थी मानों वह उस राजा के शत्रुओं को अपने यहाँ बुलाने के लिये यमराज का शासनादेशपत्र हो ॥ ३४ ॥

निरुद्धभूभृन्महिमातिरेको निःशेषपीताहितवाहिनीशः ।
यच्चन्द्रहासो भुवनप्रसादं प्रासूयतागस्त्य इवोदयेन ॥ ३५ ॥

निरुद्धेत्यादि । यस्य=राज्ञः शुद्धोदनस्य, चन्द्रहासः=खड्गविशेषः; निरुद्धः=प्रतिरुद्धः, भूभृताम्=शत्रुभूतानां राज्ञाम्; अन्यत्र भूभृतः=विन्ध्यपर्वतस्य च, महिम्नः=माहात्म्यस्य, अतिरेकः=अतिशयो येन सः । यथा—निःशेषं यथा स्यात् तथा पीताः=हताः, अहितानाम्=शत्रूणाम्, वाहिनीशाः=सेनाधिपा येन सः; अन्यत्र—पीतः, आहितः=विमुक्तः, वाहिनीशः=नदीशः समुद्रो येन सः; "वाहिनी पृतना चमूः" "स्रवन्त्यामपि वाहिनी" इति चामरः । सन् । स्वकीयोदयेन=उन्नत्या; भुवनस्य=लोकस्य, जलस्य च; प्रसादम्=अनुग्रहः, निर्मलतां वा । "विष्टपं भुवनं जगत्", "जीवनं भुवनं वनम्" इत्यमरः । अगस्त्यः=एतन्नामा ऋषिरिव; प्रासूयत=उत्पादितवान् । इदमत्र ज्ञेयम्—अगस्त्योदयस्य जलनैर्मल्यकारित्वं वराहसंहितायां प्रसिद्धमिति । यथा—

"उदये च मुनेरगस्त्यनाम्नः कुसुमायोगफलप्रदूषितानि ।
हृदयानि सतामिव स्वभावात्पुनरम्बूनि भवन्ति निर्मलानि ॥ इति ॥३५॥

जिसने राज्य में शत्रुओं की बढत रोक दी, जिसने शत्रुओं के समस्त सेनापतियों को मार गिराया, ऐसे उस राजा शुद्धोदन के खड्ग ने अपनी उपस्थिति (उदय) से प्रजा के हृदय में वह आनन्द उत्पन्न कर दिया जो कभी विन्ध्य पर्वत की उन्नति को रोकते हुए तथा समस्त समुद्र का शोषण करते हुए अगस्त्य के उदय ने किया था ॥ ३५ ॥

यो वाहिनीं मेघ इवात्तधन्वा विपक्षभूभृत्कटकप्रभूताम् ।
आसारयन्नाकुलराजहंसां[1] चक्रे समुच्चेलकबन्धनृत्ताम् ॥ ३६ ॥

य इति । यः=शुद्धोदनो राजा । आत्तम्=गृहीतम्, धनुः=चापः, इन्द्रधनुश्च, येन सः; "धनुषश्च" (पा० सू० ५.४.१३२) । सन् स्वकीयां वाहिनीम्=सेनाम्, नदीं वा । मेघः=अम्बुद इव । विपक्षाः=शत्रवः, पक्षरहिताश्च ये भूभृतः=राजानः, पर्वता वा, तेषां कटकात्=राजधान्याः सानोः; प्रभूताम्=प्रभवमाप्ताम्, निःसृतामित्यर्थः । "राजधान्यां नितम्बेऽद्रेर्वलये कटकोऽस्त्रियाम्" इत्यमरः । आसारयन्=आ समन्तादपसारयन्, प्रवाहयँश्च । आकुलाः=परिभ्रान्ताः, राजहंसाः=राजश्रेष्ठाः, हंसविशेषाश्च यस्यां ताम् । "राजहंसास्तु ते

१. आसारवानाकुल०—म०; आधारयाना०—त्रि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चञ्चुचरणैर्लोहितैः सिताः'' इत्यमरः। समुच्चेलितम्=उच्चलितम्, उद्गतमित्यर्थः; कबन्धानाम्=अपमूर्धकलेवराणाम्, जलानां च; नृत्तम्=नर्तनं यस्यां तादृशीम्। "कबन्धोऽस्त्री क्रियायुक्तमपमूर्धकलेवरम्", "कबन्धमुदकं पाथः" इत्युभयत्रामरः। चक्रे=कृतवान् ॥ ३६ ॥

जिसने धनुष उठाते ही विरोधी राजाओं की सेनाओं को दूर भगाते हुए उन राजाओं को अपने अधीन कर उनकी राजधानियों पर अपना विजयध्वज फहरा दिया ॥ ३६ ॥

अलंकृताङ्गाः सुभटान्त्रमाल्यैरादाय शृङ्गानिव नागहस्तान्।
यद्वैरिरक्ताम्बुतरङ्गिणीषु व्यात्युक्षिलीला विदधुः पिशाचाः[1] ॥३७॥

अलंकृतेत्यादि। यस्य=राज्ञः शुद्धोदनस्य, वैरिणाम्=रिपूणाम्, रक्तान्येव अम्बूनि-जलानि यासु तासु तरङ्गिणीषु-नदीषु। "तरङ्गिणी शैवलिनी" इत्यमरः। पिशाचाः-प्रेताः, देवयोनिविशेषा इत्यर्थः। सुभटानाम्-शत्रुयोद्धृणाम्, अन्त्राणि=पुरीतत एव माल्यानि=मालास्तैः। शृङ्गान् इव-क्रीडार्थं जलयन्त्राणीव, "क्रीडाम्बुयन्त्रे शृङ्गोऽस्त्री" इति यादवः। नागहस्तान्=गजशुण्डादण्डान्। आदाय-गृहीत्वा। व्यात्युक्षी=व्यतिहारेण उक्षणम्=परस्परसेचनम्, "कर्मव्यतिहारे णच् स्त्रियाम्" (पा० सू० ३.३.४३) इति णचि, "णचः स्त्रियामञ्" (पा० सू० ५.४.१४) इति अञि, ङीप्, समुदायस्य संज्ञात्वविवक्षया "ङ्यापोः संज्ञा" (पा० सू० ६.३.६३) इति ह्रस्वः। तद्रूपाः; लीलाः-क्रीडाः; विदधुः=चक्रुः ॥ ३७ ॥

वैरी योद्धाओं की आंतों से बनी माला द्वारा अपने शरीर को अलंकृत कर, जलक्रीडा हेतु हाथियों के शुण्डादण्डों को शृङ्ग (जलक्रीडा-यन्त्र) बना कर उससे पिशाचगण राजा के वैरियों के रक्त से बनी नदी में जलक्रीडा-सी करते हुए एक दूसरे पर रक्तजल फैंका करते थे ॥ ३७ ॥

प्रशस्तिवध्वा प्रवरस्य यस्य प्रतापदीपाञ्जनसंग्रहाय।
आस्थापितं पात्रमिवेन्द्रनीलमभ्रं घनश्याममलमाबभाषे ॥ ३८ ॥

---

[1] इतोऽग्रे म० पुस्तके एतदन्यदपि श्लोकत्रयमुपलभ्यते–
"आलूय शस्त्रैररिराजशालीनामदर्थं सेनाश्वपरम्पराभिः।
यः शोधयित्वा द्विपकर्णशूर्पैस्तत्कीर्त्तिधान्यं युधि सञ्चिकाय ॥ १ ॥
मुखारविन्दं समरे यदीयं कृपाणयष्टौ प्रतिमाप्रविष्टम्।
बभार वेलाजलबिम्बितेन मृगाङ्कबिम्बेन सहोपमानम् ॥ २ ॥
आरुह्य सेनारथयानपात्रं त्वङ्गत्पताकाध्वजकूपदण्डम्।
प्रवर्त्तिता येन रणे रिपूणां रक्तस्रवन्तीरतरन् पिशाचाः" ॥ ३ ॥ इति ॥

प० चू० म० : २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रशस्तीत्यादि । प्रवरस्य=श्रेष्ठस्य; यस्य=राज्ञः शुद्धोदनस्य, अभ्रम्=आकाशम्; प्रशस्तिः=कीर्तिरेव वधूः=पत्नी तया; प्रतापः=तेज एव दीपः, तस्मात् अञ्जनस्य=मष्याः, संग्रहाय=ग्रहणाय; ऐन्द्रनीलम्=इन्द्रनीलमणिमयम्; पात्रम्=भाजनम्; आस्थापितम्=समन्तान्निक्षिप्तम्, आबभासे=शुशुभे । इवेत्युत्प्रेक्षायाम् ।। ३८ ।।

उस श्रेष्ठ राजा की प्रशंसारूपी वधू का प्रतापरूपी दीपक से आँजन एकत्र करने के लिये चारों ओर फैलाये गये इन्द्रनीलमणि के पात्रों से वहाँ (उस राजा की नगरी) का आकाश मेघाच्छन्न सा ज्ञात होता था ।। ३८ ।।

आपूरिते निर्भरमन्तरिक्षे यस्याण्डकुक्षिम्भरिभिर्यशोभिः ।
पृथ्वीपतीनां यशसः प्रसर्तुमासीत् परेषामिव नावकाशः ।। ३९ ।।

आपूरित इत्यादि । यस्य=राज्ञः शुद्धोदनस्य; अण्डेन=ब्रह्माण्डेन, कुक्षि बिभ्रतीति तैः=ब्रह्माण्डं व्याप्य स्थितैः । "फलेग्रहिरात्मम्भरिश्च" इति पाणिनिसूत्रे चकारेण कुक्षिम्भरीत्यादि संगृह्यते । यशोभिः=कीर्त्तिभिः; अन्तरिक्षे=आकाशे; निर्भरम्=भृशम्; "अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भराः" इत्यमरः । आपूरिते=भरिते सति । परेषाम्=अन्येषाम्; पृथ्वीपतीनाम्=राज्ञाम्; यशसः=कीर्तेः; प्रसर्त्तुम्=व्याप्तुम्; अवकाशः=स्थानं नासीत् ।।३९।।

उस राजा की समग्र ब्रह्माण्ड में व्याप्त कीर्त्ति से सभी लोकों के भर जाने के कारण विरोधी राजाओं से यश को कहीं भी फैलने का अवसर नहीं मिल पाता था ।।

यशस्तदीयं यदि नाभविष्यच्छीतांशुशुभ्रं शिशिरोपचारः[1] ।
सोढुं प्रतापानलमप्रसह्यमपारयिष्यत्[2] कथमेष लोकः[3] ।। ४० ।।

यश इति । यदि=चेत्; तदीयम्=तस्य राज्ञः सम्बन्धि; शीतांशुः=चन्द्र इव शुभ्रम्=धवलम्; यशः=कीर्त्तिः, नाभविष्यत्, तर्हि एष लोकः=तद्राज्यवासिनो जनाः; अप्रसह्यम्=सुदुःसहम्; प्रतापः=तेज एवाग्निः=अनलस्तम्; सोढुम्=सहनं कर्तुम्; शिशिरोपचारः=शैत्योपचारः । यशसो विधेयविशेषणम् । कथमपारयिष्यत्=अशक्ष्यत् ।। ४० ।।

यदि उस राजा का चन्द्रमा की तरह स्वच्छ यश न होता तो प्रजाजन उसकी असह्य प्रतापाग्नि को सहन करने हेतु अपना शीतलोपचार कैसे कर पाते ! ।। ४० ।।

भुजेन भोगीन्द्रधुरन्धरेण यस्मिन् दृढं भूवलयं दधाने ।
प्रत्यर्थिकान्ताभुजवल्लरीभ्यः पपात भूषावलयं विचित्रम् ।। ४१ ।।

---

१. शिशिरोपचारम्—वि० । २. प्रतापज्वर०—म०, त्रि० ।
३. लोकः—म०, त्रि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भुजेनेति । यस्मिन्=राज्ञि शुद्धोदने; भोगीन्द्रः=फणीन्द्र इव, धुरन्धरेण=भारवाहिना; भुजेन=बाहुना, दृढम्=कठिनम्; भूवलयम्=भूरूपवलयम्=कङ्कणम्, भूमण्डलं च; दधाने=धार्यमाणे सति; प्रत्यर्थिनाम्=शत्रूणां याः कान्ताः=स्त्रियस्तासां भुजा एव वल्लर्यः=लताः, ताभ्यो भूषावलयम्=आभरणभूतं कङ्कणम्; पपात=पतितवान् इति विचित्रम्=आश्चर्यमयम् । राज्ञि धृतवलये सति शत्रुस्त्रीणां वलयच्युतिरिति अहो विचित्रमिति भावः ॥ ४१ ॥

यह कैसे आश्चर्य की बात है कि शेषनाग के समान पृथ्वी का भार उठाने में पूर्ण समर्थ उस राजा के द्वारा भूमण्डलरूपी वलय (कङ्कण) के ग्रहण कर लेने पर शत्रुओं की नारियों के हाथों के कङ्कण अपने आप खिसक गये ! ॥ ४१ ॥

दयालुमाश्रित्य तमत्युदारं वनीपका नापरमभ्यगच्छन् ।
आसाद्य वाराकरमम्बुवाहाः कासारमन्यं किमु कामयन्ते ! ॥ ४२ ॥

दयालुमिति । दयते इति तं दयालुम्=कृपालुम्; तम्=राजानं शुद्धोदनम्; अत्युदारम्=अतिदातारम् । "उदारो दातृमहतोः" इत्यमरः । आश्रित्य=प्राप्य; वनीपकाः=याचकाः । "वनीपको याचनकः" इत्यमरः । अपरम्=अन्यम्; दातारम्, नाभ्यगच्छन्=नायुः । यतो हि अम्बुवाहाः=मेघाः; वारामाकरम्=समुद्रम्; आसाद्य=प्राप्य; अन्यम्=अपरम्; कासारम्=सरः । "कासारः सरसी सरः" इत्यमरः । कामयन्ते=वाञ्छन्ति किमु ! न कामयन्ते इति भावः ॥ ४२ ॥

याचकगण उस उदार राजा को पाकर किसी अन्य दाता के सामने हाथ नहीं फैलाते थे । क्या मेघ समुद्र के मिल जाने के बाद किसी अन्य छोटे-मोटे जलाशय की कामना किया करते हैं ! ॥ ४२ ॥

तस्यांसधारासदनेऽवतंसमाल्यासवस्यन्दनितान्तशीते ।
बहिः प्रतापज्वरविह्वलेव विमुक्तलौल्या विजहार लक्ष्मीः ॥ ४३ ॥

तस्येति । तस्य=राज्ञः शुद्धोदनस्य, लक्ष्मीः=श्रीः; अंसः=स्कन्धः । "स्कन्धो भुजशिरोंऽसोऽस्त्री" इत्यमरः । स एव धारासदनम्-स्नानगृहं तस्मिन्; अवतंसभूतस्य माल्यस्य य आसवः=मधु । "मध्वासवोऽसितः सेव्यः" इति वैजयन्ती । तस्य स्यन्देन=प्रस्रवणेन; नितान्तम्=अत्यन्तम्; शीते=शीतले । बहिः=बाह्ये; प्रतापज्वरेण=तेजस्तापेन, विह्वला=क्षीणा; विमुक्तम्=त्यक्तम्, लौल्यम्=चापल्यं यया सा स्थिरेत्यर्थः; विजहार=विहारं कृतवती ॥ ४३ ॥

लक्ष्मी भी उस राजा के स्कन्धरूपी स्नानगृह में अलङ्करणभूत माला के मधु के प्रस्रवण से अत्यन्त शीतल होती हुई और दूसरी तरफ उसकी प्रतापाग्नि से क्षीण (थकी) हुई वहाँ (उसके राज्य में) ही विहार करने लगी ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्याभिषेके सचिवावमुक्तैर्गङ्गादितीर्थोपनतैः पयोभिः ।
शत्रुप्रतापानलशक्तिरासि[1] सहैव पुंसां हृदयज्वरेण ॥ ४४ ॥

तस्येति । तस्य=राज्ञोऽभिषेकावसरे, सचिवैः=मन्त्रिभिः, अवमुक्तैः-विसृष्टैः; गङ्गा आदिर्येषां तानि तीर्थानि=पवित्रसलिलाशयानि, तैः; उपनतैः=आहृतैः; पयोभिः=जलैः; शत्रूणाम्=अरीणाम्, प्रतापः=तेज एव अनलः=अग्निस्तस्य शक्तिः=सामर्थ्यम्; पुंसाम्=प्रजानां हृदयज्वरेण=राजाभिषेकाभावप्रयुक्तेन तदुन्मुखेन सन्तापेन सहैव=साधंमेव; आसि=निरस्ता । "असु क्षेपणे" (दिवा० ग०) इत्यस्माद् धातोः कर्मणि लुङ् । अत्र सहोक्तिरलङ्कारः ॥ ४४ ॥

उसके अभिषेक के समय गङ्गा आदि पवित्र तीर्थों से लाये गये जल का मन्त्रियों द्वारा प्रक्षेप करने से जनता का हृदयज्वर (घबराहट) एवं शत्रुओं की प्रतापाग्नि— दोनों ही एक साथ शान्त हो गये ॥ ४४ ॥

सुवर्णरूपं सुमनोनिषेव्यं तुङ्गं सुधर्मास्पदमद्वितीयम् ।
तं भूभृतं मेरुमिव प्रपन्नाश्चकाशिरे षड्गुणरत्नसार्थाः[2] ॥ ४५ ॥

सुवर्णेत्यादि । वर्णश्च रूपं च वर्णरूपे, शोभने वर्णरूपे=जात्याकृती यस्य तम्, अन्यत्र स्वर्णमयम् । सुमनोभिः=विद्वद्भिः; देवैश्च; निषेव्यम्=सेव्यम्; तुङ्गम्=उन्नतम्, एकत्र गुणेन अन्यत्र आकृत्या चेति भावः । सुधर्माणाम्= शोभनानां धर्माणाम् हिंसादीनाम्, अन्यत्र सुधर्मायाः=देवसभायाः, "स्यात् सुधर्मा देवसभा" इत्यमरः । आस्पदम्=स्थानम्; अद्वितीयम्=प्रथमम्; तम्= शुद्धोदनम्; भूभृतम्=राजानम्; प्रपन्नाः=प्राप्ताः, षड् गुणाः=सन्धि-विग्रह-यान-आसन-द्वैधीभाव-समाश्रया एव रत्नानि, तेषां सार्थाः=समूहाः; मेरुम्=सुमेरु-पर्वतमिव, चकाशिरे=शोभां प्रददुः ॥ ४५ ॥

जाति और आकृति—दोनों से सुन्दर लगने वाले, सुमेरु-पक्ष में स्वर्णमय, विद्वानों और देवताओं द्वारा सेवनीय, गुण और आकृति से उन्नत अहिंसादि शोभन धर्मों का आश्रयस्थल, सुमेरु-पक्ष में—देवसभा के आश्रयभूत, उस अद्वितीय राजा (शुद्धोदन) को पाकर सन्धि, विग्रह, यान, आसन, द्वैधीभाव एवं समाश्रय—ये छह गुण, सुमेरु पर्वत की तरह अच्छे लग रहे थे ॥ ४५ ॥

अन्यत्र कर्णः[3] सुधियामसक्तस्तस्यापदानश्रवणे ससज्ज ।
अपास्य पीयूषरसं सुराणां रसान्तरे किं रमते रसज्ञा ! ॥ ४६ ॥

अन्यत्रेति । सुधियाम्=विद्वज्जनानां कर्णः=कर्णेन्द्रियम्; अन्यत्र=विषया-न्तरश्रवणे; असक्तः=निःस्पृहः सन्; तस्य=राज्ञः शुद्धोदनस्य; अपदानश्रवणे—

१. शान्तिरासीव्—वि०, म० । २. सद्गुण०—म० ।
३. कामः—म० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जीवनचरितश्रवणे, ससज्ज=आसक्तोऽभूत्। सुराणाम्=देवानाम्, रसना=जिह्वा, "रसज्ञा रसना जिह्वा" इत्यमरः। पीयूषरसम्=अमृतास्वादम्, अपास्य=विहाय, अन्यो रसो रसान्तर तस्मिन्; रमते=स्वदते, किम्? नैव रमत इति भावः ॥ ४६ ॥

सज्जनों के कान, उसके जीवन की घटनाओं को सुनने के अतिरिक्त किसी अन्य बात को सुनने के लिये प्रवृत्त नहीं होते थे। क्या देवताओं की जिह्वा, अमृत का स्वाद छोड़कर, किसी अन्य रस का स्वाद लेने में प्रवृत्त होती है! ॥ ४६ ॥

सहस्रशस्सन्त्वपरेऽपि भूपास्तेनैव सौराज्यवती धरित्री।
अनेकरत्नप्रभवोऽप्युदन्वान् रत्नाकरोऽभून्ननु कौस्तुभेन ॥ ४७ ॥

सहस्रश इति। (यद्यपि भूमण्डले) तं विहाय अपरे=अन्येऽपि; भूपाः=राजानः, आसन्, (तथापि) धरित्री=भूः; तेन=शुद्धोदनराज्ञैव; सौराज्यवती=शोभनराजकर्मवती; शोभनो राजा=सुराजः, तस्य भावः कर्म वा सौराज्यम्=प्रजापालनरूपमस्यामस्तीति सा। अनेकेषां रत्नानां प्रभवः=उत्पत्तिस्थानम्; उदन्वान्=समुद्रः; उदकमस्यास्तीति विग्रहे "उदन्वानुदधौ च" (पा० सू० ८.२.१३) इति निपातनात् साधुः। कौस्तुभेन=कौस्तुभाख्यमणिना एव; रत्नाकरः=रत्नानामाकरः=कोषः इत्यन्वर्थनामा अभूत् ॥ ४७ ॥

भले ही संसार में दूसरे भी हजारों राजा हुए होंगे, परन्तु यह पृथ्वी तो राजा (शुद्धोदन) के राज्यशासन में ही सौराज्यवाली कहलायी। जैसे समुद्र में और भी हजारों लाखों रत्न उत्पन्न होते रहते हैं, परन्तु समुद्र का 'रत्नाकर' नाम कौस्तुभमणि के पैदा होने पर ही पड़ा था ॥ ४७ ॥

महात्मना तेन मखैरजस्रमाहूयमानेष्वमृताशनेषु।
परिष्क्रियाऽजायत पारिजातः परं सुराधीश्वरराजधान्याः ॥ ४८ ॥

महात्मनेति। महान् आत्मा=स्वभावो यस्य तेन;=राज्ञा शुद्धोदनेन, मखैः=यज्ञैरमृतमशनं भोजनं येषां तेषु अमृताशनेषु; अजस्रम्=निरन्तरम्, आहूयमानेषु=आकारितेषु; सुराणाम्=देवानाम्, अधीश्वरस्य=इन्द्रस्य, राजधान्याः=प्रधाननगर्या अमरावत्याः; पारिजातः=कल्पतरुः; परिष्क्रिया=अलङ्करणमात्रम्, अजायत=अभूत्। शुद्धोदनस्य राज्ञो यज्ञैः पुष्टानां देवानामीहितफलप्रदत्वेन पारिजातस्य न किमपि प्रयोजनमिति भावः ॥ ४८ ॥

उस उदात्त स्वभाववाले राजा शुद्धोदन द्वारा यज्ञों में देवगणों के निरन्तर बुलाये जाने पर कल्पवृक्ष अमरावती नगरी का शोभामात्र ही रह गया। (इस राजा द्वारा किये गये यज्ञों से परिपुष्ट देवताओं को ईप्सित फल देनेवाले कल्पवृक्ष की तब कोई आवश्यकता नहीं रह गयी ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

**तस्यापदानानि तटस्थिताभिः[1] सङ्गीयमानानि सुराङ्गनाभिः ।
आकर्ण्य हर्षाद् द्रवतीव मेरुरद्यापि निष्यन्दजलापदेशात् ॥ ४९ ॥**

तस्येति । तटस्थिताभिः=सुमेरुपर्वतोपत्यकायां स्थिताभिः; तस्य=राज्ञः; अपदानानि=चरितानि; सङ्गीयमानानि=गानं कुर्वतीभिः; सुराङ्गनाभिः=अप्सरोभिः; आकर्ण्य=श्रुत्वा; मेरुः=सुमेरुपर्वतः; अद्यापि=साम्प्रतमपि; निष्यन्दस्य=प्रस्रवणस्य, जलस्य=सलिलस्य, अपदेशात्=व्याजात्; "व्याजोऽपदेशो लक्ष्यं च" इत्यमरः । हर्षात्=मुदः; द्रवति=प्रघरति । इवेत्युत्प्रेक्षायाम् ॥४९॥

सुमेरुतट पर बैठकर उस राजा की विरुदावली गाती हुई अप्सराओं का सङ्गीत सुनकर सुमेरु पर्वत अपने बहते जल के व्याज से हर्ष से द्रवीभूत हो रहा था ॥४९॥

**तस्मिन् नृपे तन्वति दानवर्षं नैकोऽप्यसम्पूर्णमनोरथोऽभूत् ।
महाघने वर्षति बद्धधारमलब्धपूर्त्यस्ति सरः किमुर्व्याम् ! ॥ ५० ॥**

तस्मिन्निति । दानवर्षम्=दानवृष्टिम्; तन्वति=विस्तारयति, तस्मिन् नृपे=शुद्धोदने राज्ञि; एकोऽपि याचको जनः; असम्पूर्णमनोरथः; नाभूत्=नावशिष्टः । (यथा) उर्व्याम्=पृथिव्याम्; महाघने=वृष्टिकर्तरि जलदे; बद्धा=निष्पादिता, धारा=जलसन्ततिर्यस्मिन् कर्मणि तत् । क्रियाविशेषणम् । वर्षति=वर्षणं कुर्वति सति; किमपि सरः=जलाशयः; अलब्धा=अप्राप्ता, पूर्त्तिः=पूरणं येन तत्; अस्ति किम् । 'उर्व्याम्' इत्यस्य वर्षतीत्यनेनान्वयः ॥ ५० ॥

उस राजा द्वारा दानयज्ञ सम्पन्न करने के बाद वहाँ कोई भी याचक निष्फलमनोरथ नहीं रह गया था । क्या पृथ्वी पर महामेघों द्वारा मूसलधार वर्षा बरसाने के बाद भी कोई जलाशय खाली रह सकता है ! ॥ ५० ॥

मायादेव्याः शोभावर्णनम्

**नदीव सिन्धोर्नलिनीव भानोः कलेव चेन्दोः कमलेव विष्णोः ।
सौदामिनीवाम्बुधरस्य तस्य मायेति नाम्ना महिषी बभूव ॥ ५१ ॥**

नदीवेति । सिन्धोः=समुद्रस्य, नदी=सरिदिव; इवेति सादृश्ये; भानोः=सूर्यस्य, नलिनी=पद्मिनीव, इन्दोः=चन्द्रस्य, कला=षोडशो भाग इव, विष्णोः=नारायणस्य, कमला=लक्ष्मीरिव; अम्बु धारयतीति तस्याम्बुधरस्य=मेघस्य, सौदामिनी=विद्युदिव । "तडित् सौदामिनी विद्युत्" इत्यमरः । तस्य=राज्ञः शुद्धोदनस्य; महिषी=कृताभिषेका पत्नी; "माया" इति नाम्ना=आख्यया; बभूव=अभूत् ॥ ५१ ॥

१. तटस्थितानि—क०, त्रि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

[अब कवि राजा शुद्धोदन की पटरानी मायादेवी की सौन्दर्य-महिमा का वर्णन कर रहे हैं—] समुद्र की नदी, सूर्य की नलिनी, चन्द्रमा की कला, विष्णु की कमला (लक्ष्मी), मेघ की बिजली की तरह उस राजा की माया नामक पटरानी हुई ॥

तस्याः प्रवालोदरसोदराभं[1] युग्मं पदाम्भोरुहयोर्बभार ।
सामन्तकान्तालकवल्लरीणां पुष्पायमाणान् नखपूर्णचन्द्रान् ॥ ५२ ॥

तस्या इति । तस्याः=मायादेव्याः; प्रवालस्य=अभिनवपल्लवस्य । "प्रवालो विद्रुमे वीणादण्डेऽभिनवपल्लवे" इति हेमचन्द्रः । उदरम्=अन्तर्भागः तस्य सोदरा=तुल्या, आभा=कान्तिर्यस्य तत् । पदे अम्भोरुहे इवेत्युपमित-समासः । पदम्भोरुहयोः=चरणकमलयोः, युग्मम्=युगलम्; सामन्तकान्ता-नाम्=उपराजवधूनाम्, अलकाः=चूर्णकुन्तला एव वल्लर्यः=लतास्तासाम् । "अलकाश्चूर्णकुन्तलाः" इत्यमरः । पुष्पायमाणान्-पुष्पाणीवाचरतः; नखान् पूर्णचन्द्रानिवेत्युपमितसमासः । बभार=भरणं चकार ॥ ५२ ॥

उस मायादेवी के प्रवाल के तुल्य अरुण चरणयुगलों की सामन्त (छोटे) राजाओं की राजमहिषियाँ अपने कोमल नखों से शोभा थीं ॥ ५२ ॥

विजृम्भमाणा नखरत्नदीप्तिः पदस्य तस्याः पतिदेवतायाः ।
चकार शङ्कां शरणागतायाः स्वर्भानुभीत्या शशिचन्द्रिकायाः ॥ ५३ ॥

विजृम्भमाणेति । तस्याः=मायादेव्याः, पतिः देवता अस्यास्तस्याः पति-देवतायाः=पतिव्रतायाः; नखरत्नानां दीप्तिः=कान्तिः, विजृम्भमाणा=वर्ध-माना; स्वर्भानोः=राहोः, भीत्या=भयेन; "तमस्तु राहुः स्वर्भानुः" इत्यमरः । शशिचन्द्रिकायाः=चन्द्रमसः कान्तेः; शरणागतायाः=रक्षित्रीमागतायाः; "शरणं गृहरक्षित्रोः" इत्यमरः । शङ्काम्=सन्देहम्; चकार=कृतवती ॥ ५३ ॥

उस पतिव्रता रानी के चरणकमलों के नखों की शोभा ऐसी लग रही थी मानो राहु के भय से शरण में आयी चन्द्रकला हो ॥ ५३ ॥

आकारमत्यद्भुतसन्निवेशं दधानयोर्दर्शितसौकुमार्यम् ।
तज्जङ्घयोस्तादृशकान्तिमत्योर्न चाधिकं नापि समं बभूव ॥ ५४ ॥

आकारमिति । अत्यद्भुतः सन्निवेशः=विन्यासो यस्य तम्; दर्शितं सौकुमार्यम्=मार्दवं येन तमु; आकारम्=रूपम्; तज्जङ्घयोः=तस्या जङ्घा-प्रदेशयोः । "प्रसृता जाघनी जङ्घा" इति वैजयन्तीकोशः । तादृशकान्ति-मत्योः=प्रसिद्धशोभावत्योः; न च अधिकम्=बहु; नापि च समम्=तुल्यम्; बभूव ॥ ५४ ॥

---

१. ०सोदरोत्थं–म० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्यन्त आश्चर्यमय परिधान (वस्त्रविन्यास) धारण करने से अपनी सुकुमारता प्रकट करती हुई उस मायादेवी की सुन्दर जङ्घाओं से लोक में न तो किसी नारी की जाँघें अधिक सुन्दर थीं, न उसके समान ही थीं ॥ ५४ ॥

ये दर्शनीया द्विपराजहस्ता ये चाभिजाताः कदलीविशेषाः ।
तदूरुकाण्डद्वयजृम्भमाणसौन्दर्यरत्नाकरबिन्दवस्ते ॥ ५५ ॥

ये इति । लोके ये द्विपराजानाम्=गजश्रेष्ठानाम्; हस्ताः=शुण्डादण्डाः; अभिजाताः=जात्या उत्कृष्टाः; कदलीविशेषाः=विशिष्टाः कदलीस्तम्भाः; वा; दर्शनीयाः=अवलोकनयोग्याः सन्ति, ते; तस्या मायादेव्या; ऊरू=सक्थिनी, काण्डौ=दण्डौ इव । "सक्थि क्लीबे पुमानूरुः", "काण्डोऽस्त्री दण्डबाणार्ववर्गावसरवारिषु" इत्युभयत्रामरः । तस्या ऊरुकाण्डद्वयात् जृम्भमाणम्=वर्धमानम्; यत्सौन्दर्यम्=सुन्दरता, तदेव रत्नाकरः=समुद्रः, तस्य बिन्दवः=कणाः । तस्या ऊरुद्वयस्य यत्सौन्दर्यं तल्लेशोऽपि करिणः शुण्डादण्डे कदलीविशेषे च नास्तीति भावः ॥ ५५ ॥

लोक में जो अन्य नयनाभिराम हाथियों की सूँड (गोलाई और चिकनाई में में अद्वितीय) और कदलीस्तम्भ थे, वे भी उस मायादेवी की जाँघों के सम्मुख सौन्दर्यसमुद्र के एक साधारण बिन्दु के ही समान थे । (गोलाई और श्लक्ष्णता में वे भी उसकी समानता नहीं कर पा रहे थे ।) ॥ ५५ ॥

माणिक्यकाञ्चीवलयानुविद्धश्रोणीभरा क्ष्मापतिधर्मपत्नी ।
वसुन्धरेवार्णवरत्नगर्भवेलासमालिङ्गितसैकतान्ता ॥ ५६ ॥

माणिक्येत्यादि । माणिक्यमय्या काञ्च्या=मेखलायाः; "स्त्रीकट्यां मेखला काञ्ची" इत्यमरः । वलयेन=कटकेन, अनुविद्ध=बद्धः, श्रोणीभरः=कटिभरो यस्याः सा; "कटिः श्रोणी ककुद्मती" इत्यमरः । क्ष्मापतेः=भूपतेः, धर्मपत्नी=महिषी मायादेवी; अर्णवस्य=समुद्रस्य रत्नानि=गर्भे=उदरे यस्यास्तया वेलया=सीमया; "वेला कालमर्यादयोरपि" इत्यमरः । समालिङ्गितम्=परिवृतं यत् सैकतम्=सिकता(बालुका)मयप्रदेशः, तेन अन्ता रम्या "अन्तः प्रान्तेऽन्तिके नाशे स्वरूपेऽतिमनोहरे" इति विश्वः । वसुन्धरा=पृथ्वीव राजते ॥ ५६ ॥

अपने कटिप्रदेश में मणि-माणिक्यजटित मेखला (करधनी) पहन कर वह मायादेवी ऐसी शोभित होती थी मानो रत्नों से भरपूर समुद्र से घिरी हुई वसुन्धरा (पृथ्वी) हो ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुरार्णवावर्तमनोज्ञशोभं नतभ्रुवोऽलक्ष्यत नाभिरन्ध्रम् ।
कुचाद्रिकान्तिद्रवनिर्झरस्य निम्नीकृतं स्थानमिव प्रपातैः ॥ ५७ ॥

सुरेत्यादि । (तस्याः) नते भ्रुवौ यस्यास्तस्याः महिष्याः । सुरार्णवस्य=सुरासमुद्रस्य, आवर्तस्य=जलभ्रमस्येव, मनोज्ञा=हृदयहारिणी, शोभा=कान्तिर्यस्य तत् । नाभिरन्ध्रम्=नाभिकुहरम्; कुचावेव अद्री=पर्वतौ, तयोः कान्तिद्रवस्य=शोभास्यन्दस्य, एव निर्झरस्य=जलप्रवाहस्य; प्रपातैः=पतनैः, निम्नीकृतम्=श्वभ्रीकृतम्, स्थानम्, अलक्ष्यत=दृष्टम् । इवेत्युत्प्रेक्षायम् ॥ ५७ ॥

उस लज्जालु मायादेवी का नाभिरन्ध्र सुरासमुद्र में पड़े आवर्त (भ्रमरी) के समान सौन्दर्ययुक्त था। वह स्तनयुगल के कान्तिजल के प्रवाह से पड़े गर्त (खड्डे) के समान लगता था ॥ ५७ ॥

तस्या वपुःक्षेत्रमनङ्गशालि सौन्दर्यनिष्यन्दजलैर्निषेक्तुम् ।
आसूत्रिता यौवनहालिकेन त्रयीव कुल्या त्रिवली चकाशे ॥ ५८ ॥

तस्या इति । तस्याः=महिष्या मायादेव्याः, यौवनमेव हालिकः=कर्षकस्तेन, हलेन खनतीति हालिकः, "खनत्यनेन तद्वोढाऽस्येदं हालिकसैरिकौ" इत्यमरः । वपुः=शरीरमेव क्षेत्रम्=केदारस्तत्, "केदारः केदरः क्षेत्रम्" इति वैजयन्ती । अनङ्ग एव शालयो यस्मिंस्तत् । सौन्दर्यमेव निष्यन्दजलम्=स्रावजलम्, तैः; निषेक्तुम्=सिञ्चनं कर्तुम्; त्रयोऽवयवा यस्याः सा त्रयी=अवयवत्रयविशिष्टा, कुल्या=अल्पसरित्; "कुल्याल्पा कृत्रिमा सरित्" इत्यमरः । त्रयाणां वलीनां समाहारः त्रिवली=वलित्रयम्, चकाशे=शुशुभे । इवेत्युत्प्रेक्षयाम् ॥ ५८ ॥

उस पटरानी के काममद से भरे शरीर की त्रिवली ऐसी शोभायमान होती थी मानो यौवनरूपी किसान ने उसके शरीररूपी खेत में अनङ्गरूपी धान के पौधों को सौन्दर्यरूपी जल से सेचन करने के लिये तीन छोटी नालियाँ बनायी हों ॥ ५८ ॥

विलग्नमालग्नवलित्रयीकं दरिद्रताजन्मगृहं तदीयम् ।
अमर्त्यगङ्गाजलवेणिकाभिराश्लिष्टमाकाशमिवाबभासे ॥ ५९ ॥

विलग्नेत्यादि । तदीयम्=तस्या मायादेव्याः सम्बन्धि; आलग्ना=संश्लिष्टा, वलित्रयी=त्रिवली यस्मिंस्तत्; विलग्नम्=मध्यप्रदेशः; "मध्यमञ्च विलग्नं च" इत्यमरः । दरिद्रताया जन्मगृहम्=उत्पत्तिस्थानम्, अतिसूक्ष्ममित्यर्थः । अमर्त्यानाम्=देवानाम्, गङ्गायाः=नद्याः; जलवेणिकाभिः=जलप्रवाहैः; आश्लिष्टम्=व्याप्तम्, आकाशम्=गगनमिव, आबभासे=शुशुभे । अत्रापि इवशब्द उत्प्रेक्षायामेव ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उस मायादेवी के सुन्दर शरीर का वलित्रययुक्त मध्यभाग इतना पतला (दरिद्रतायुक्त) था मानो आकाशगङ्गा के जलप्रवाह से कटा हुआ आकाश (खाली स्थान) हो ॥ ५९ ॥

तमालनीला नवरोमराजिस्तस्या बभौ तामरसेक्षणायाः ।
विवृण्वती बाल्यदशाविनाशमुत्पातधूमावलिरुत्थितेव ॥ ६० ॥

तमालेत्यादि । तस्याः=मायादेव्याः; तामरसेक्षणायाः=श्यामलोचनयाः; नवानां रोम्णां राजिः=पंक्तिः; तमालपत्रवत् नीला=श्यामा; बाल्यदशायाः=बाल्यावस्थाया विनाशम्=नाशम्; विवृण्वती=विवरणं कुर्वन्ती । उत्थिता=उद्ध्र्वं गता, उत्पातधूमस्य=दुर्निमित्तसूचकधूमस्य, आवलिः=पंक्तिरिव, बभौ=शुशुभे । इवेत्युत्प्रेक्षायाम् ॥ ६० ॥

कजरीली आँखों वाली उस मायादेवी की नव एवं मृदु रोमपंक्ति ऐसी लगती थी मानो बाल्यदशा (बचपन) के संहारक दुर्निमित्तसूचक किसी धूएँ की रेखा हो ॥ ६० ॥

आतन्वतश्चेतसि कोमलाङ्ग्याः कोदण्डशिक्षां कुसुमायुधस्य ।
मौर्वी बहिर्बिम्बगतेव मान्या तन्व्याश्चकाशे तनुरोमरेखा ॥ ६१ ॥

आतन्वत इति । (तस्याः) कोमलाङ्ग्याः=कोमलानि=मृदूनि, अङ्गानि=शरीरावयवा यस्यास्तस्याः, तन्व्याः=युवत्याः, चेतसि=मनसि, कुसुममेवायुधं यस्य तस्य=पुष्पचापस्य, कोदण्डशिक्षाम्=चापाभ्यासम्, आतन्वतः=विस्तारयतः; मान्या=प्रशस्या, मौर्वी=ज्या । "मौर्वी ज्या शिञ्जिनी गुणः" इत्यमरः । बहिर्बिम्बगता=बहिः प्रतिफलिता, प्रत्यक्षविषया इत्यर्थः, तन्वी=सरला, रोमरेखा=रोमराजिः; चकाशे=बभौ । इवेत्युत्प्रेक्षायाम् ॥ ६१ ॥

और उस रानी की वह रोमरेखा ऐसी शोभायमान थी कि मानो वह उस कोमलाङ्गी को कामशिक्षा देने हेतु आये कामदेव के पुष्पधनुष की, उस सुन्दरी के बाह्य शरीर में दिखायी देने वाली, सुन्दर सी डोरी हो ॥ ६१ ॥

विजृम्भमाणेन विलङ्घ्य वेलां तस्यास्तरुण्याः स्तनमण्डलेन ।
निःशेषमाक्रान्तनिजावकाशमाकाशमासीदवलग्नशेषम् ॥ ६२ ॥

विजृम्भमाणेनेति । तरुण्याः=यौवनेऽधिरूढायाः, तस्याः=मायादेव्याः, विजृम्भमाणेन=वर्धमानेन; स्तनमण्डलेन=कुचवृत्तेन, वेलाम्=अवधिम्; निर्गतः शेषो यस्मिन् कर्मणि तत्; विलङ्घ्य=उल्लङ्घ्य; आक्रान्तो निजः=स्वकीय आकाशसम्बन्धी, अवकाशो यस्य तत्; अवलग्नेन=मध्येन, शेषम्=शिष्टम्, आकाशम्=शून्यस्थानमासीत् ॥ ६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बाल्यावस्था लाँघ कर युवावस्था में पदार्पण करती हुई उस नवयौवना मायादेवी का स्तनमण्डल शनैः शनैः इतना वृद्धिङ्गत होता जा रहा था कि उनका मध्यभाग अत्यन्त कठिनाई से दृष्टि में आता था ।। ६२ ।।

मृणालिका विभ्रमदीर्घिकाया विद्युल्लता यौवनमेघपंक्तेः ।
मङ्गल्यमाला मकरध्वजस्य बाहा बभौ वामविलोचनायाः ॥ ६३ ॥

मृणालिकेति । (तस्याः) वामे=सुन्दरे, विलोचने=नेत्रे यस्यास्तस्याः; अल्पा मृणालो मृणालिका । "मृणाली शतपत्रं क्ली बिसं च" इति बैजयन्ती । विभ्रमः=शोभा एव, दीर्घिका = वापी यस्यास्तस्याः । "अथ विभ्रमः शोभायां संशये हावे" इति हेमचन्द्रः; "वापी तु दीर्घिका" इत्मरः । बाहा=बाहुः, यौवनम्=तरुणावस्था एव मेघपंक्तिः=मेघमाला यस्यास्तस्याः; विद्युल्लता= तडिल्लता; मकरध्वजस्य=मन्मथस्य; मङ्गल्यमाला इव बभौ=शुशुभे ।। ६३ ।।

हाव-भाव—उस मायादेवी के हाव-भाव इतने मनोहारी थे कि मानो वहाँ यौवनमेघ पंक्ति की बिजली चमक रही हो । और उस सुनयना के बाहु ऐसे शोभायमान हो रहे थे मानो वे मकरध्वज (कामदेव) की मङ्गलकर माला हो ।। ६३ ।।

आमुक्तमुक्तासरदर्शनीयमाबिभ्रती कण्ठमतीव रेजे ।
निष्ठ्यूतमुक्तानिकराभिरामशङ्खोज्ज्वला सागरवीचिकेव ॥ ६४ ॥

आमुक्तेत्यादि । आमुक्तेन=आसञ्जितेन, मुक्तासरेण=मुक्ताहारेण, दर्शनीयम्=मनोहरम्, कण्ठम्=ग्रीवाम्, आबिभ्रती=धारयती, निष्ठ्यूतैः= उद्गीर्णैः, मुक्तानिकरैः=मौक्तिकसमूहैः, अभिरामः=मनोज्ञो यः शङ्खः= कम्बुस्तेन उज्ज्वला=शुभ्रा, सागरस्य=समुद्रस्य, वीचिका=तरङ्ग इव, अतीव= अत्यन्तम्; रेजे=शुशुभे । शङ्खस्य मौक्तिकोत्पत्तिस्थानत्वमुक्तं **भावप्रकाशे**—

"शङ्खो गजश्च क्रोडश्च फणी मत्स्यश्च दर्दुरः ।
वेणुरेते समाख्यातास्तज्ज्ञैर्मौक्तिकयोनयः ।।" इति ।। ६४ ।।

कण्ठ वर्णन—पहने गये मुक्ताहार से उस मायादेवी का कण्ठ ऐसा कमनीय लग रहा था मानो मुक्तासमूह को अपने से बाहर निकाल देने के कारण खाली हुए श्वेत शङ्खों से युक्त सागर की तरङ्गें हों ।। ६४ ।।

तदाननेन्दुं भुवि निस्सपत्नं निर्मातुकामेन पितामहेन ।
अकारि पद्मं ध्रुवमात्तगन्धमन्तःकलङ्कं च सुधांशुबिम्बम् ॥ ६५ ॥

तदाननेत्यादि । तस्याः=मायादेव्याः, आननम्=मुखमेव इन्दुः, तम्, निर्गताः=नष्टाः, सपत्नाः=वैरिणो यस्य तम् । "रिपौ वैरिसपत्नारिद्विषद्-द्वेषणदुर्हृदः" इत्यमरः । निर्मातुम्=स्रष्टुम्, कामः=इच्छा यस्य तेन, "लुम्पेद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वश्यमः कृत्ये तुङ्काममनसोरपि" इति मलोपः। पितामहेन=ब्रह्मणा, पद्मम्=कमलम्, आत्तगन्धम्= अभिभूतम्, "आत्तगन्धोऽभिभूतः स्यात्" इत्यमरः। गृहीतगन्धं च, सुधांशोः=चन्द्रस्य, बिम्बम्=प्रतिबिम्बम्, च, अन्तः=मध्ये, कलङ्कः=लाञ्छनं यस्मिस्तत्, ध्रुवम्=निश्चयेन, अकारि=कृतम् ॥ ६५ ॥

सृष्टिकर्ता ब्रह्मा ने पद्म (कमल) को आत्तगन्ध (कुम्हलाने वाला) एवं चन्द्रमा को कलङ्कयुक्त इसलिये बना दिया कि संसार में कोई उस मायादेवी के मुख-कमल की समानता में कभी खड़ा ही न हो सके ॥ ६५ ॥

तरुप्रवालाश्चलसौकुमार्यात् सिन्धुप्रवालाः स्थिरकर्कशत्वात् ।
न जग्मुरस्या नलिनेक्षणाया बिम्बाधरौपम्यकथाप्रसङ्गम् ॥ ६६ ॥

तर्वित्यादि। नलिनेक्षणायाः=पद्मनेत्रायाः, तरूणाम्=वृक्षाणाम्, प्रवालाः=नवपल्लवाः, चलम्=चञ्चलं च तत् सौकुमार्यम्=सुकुमारावस्था, तस्मात्=मार्दवस्थैर्याभावात्। सिन्धौ=समुद्रे, स्थिताः, प्रवालाः=विद्रुमाः। "प्रवालो विद्रुमे वीणादण्डेऽभिनवपल्लवे" इति हेमचन्द्रः। स्थिरम्=स्थायि यत् कर्कशत्वम्=काठिन्यं तस्मात्, च, बिम्बमिव=रक्तबिम्बफलमिव, अधरः=ओष्ठः, तेन औपम्यस्य=सादृश्यस्य या कथा=कथनम्, तस्य प्रसङ्गः=प्रस्तावना, तम्, न जग्मुः=न ययुः ॥ ६६ ॥

ओष्ठ-वर्णन—वृक्षों के नवपल्लव निरन्तर कोमल न रहने के कारण और समुद्र में उत्पन्न मूँगे स्थायी रूप से कठोर होने के कारण—वे दोनों भी उस कमल-नयना मायादेवी के अरुणिमायुक्त (लाल) होठों की बराबरी में खड़े नहीं हो सके ॥ ६६ ॥

बिम्बाधरोष्ठद्युतिरायताक्ष्यास्तस्या विलासस्मितविप्रकीर्णा[1] ।
सन्ध्येव बन्धूकरुचिश्चकाशे चन्द्रातपैः शारितसन्निवेशा ॥ ६७ ॥

बिम्बेत्यादि। आयते=दीर्घे, अक्षिणी यस्यास्तस्याः; तस्या=मायादेव्याः; विलासस्मितेन=मन्दहास्येन, विप्रकीर्णा=मिश्रा; बिम्बमिव=पक्वबिम्बफल-मिव अधरोष्ठम्, तस्य द्युतिः=कान्तिः; अधरश्च ओष्ठं च अधरोष्ठम्; प्राण्यङ्गत्वादेकवद्भावः। बन्धूकस्य=बन्धुजीवकपुष्पस्य रुचिरिव रुचिः=दीप्तिर्यस्याः सा; "बन्धूको बन्धुजीवकः" इत्यमरः। चन्द्रस्य=शशिनः; आतपैः=किरणैः; "प्रकाशो द्योत आतपः" इत्यमरः। शारितः=शबलितः, खण्डित इत्यर्थः; सन्निवेशः=आकृतिर्यस्याः सा; "शारः शबरवातयोः" इति हेमचन्द्रः। सन्ध्या=सान्ध्यकाल इव, चकाशे=बभौ ॥ ६७ ॥

---

१. ०द्युतिविप्र०—वि० कृ० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उस विशालनयना मायादेवी के अरुणिमामय अधरोष्ठ की कान्ति मन्दहास से मिश्रित हो ऐसी लग रही थी मानो बन्धूक (जीवक) पुष्प की कान्ति चन्द्रमा की किरणों से घुल-मिल गयी हो ॥ ६७ ॥

नितान्तकान्तालिकचन्द्रलेखानिष्यन्दसौन्दर्यमहाप्रणाली[1] ।
सीमान्तरेखा नयनान्तनद्योर्नासा बभासे नवयौवनायाः ॥ ६८ ॥

इदानीं कविस्तस्या मायादेव्या नासां वर्णयति **नितान्तेत्यादिना**। नवयौवनायाः=तरुण्याः, तस्याः=मायादेव्याः; नितान्तम्=भृशम्, कान्तम्=रम्यं यद् अलिकम्=ललाटम्; "ललाटमलिकं गोधिः" इत्यमरः। तदेव चन्द्रलेखा=शशिरेखा, तस्या निष्यन्दम्=स्रावभूतं यत् सौन्दर्यम्=सुन्दरता, तस्य महाप्रणाली=जलनिर्गममार्गः; नयनयोः=नेत्रयोः, अन्ते एव नद्यौ तयोः; सीम्नः=अवधेः, अन्ये=अन्तभागे, रेखा=लेखा इव; नासा=नासिका; बभासे=चकाशे ॥ ६८ ॥

नासिका-वर्णन—उस नवयुवती मायादेवी की नासिका सुन्दर ललाटरूपी चन्द्रमा की कान्ति से निकले जलप्रवाह की नाली और नयन-नदी की सीमा सी द्योतित हो रही थी ॥ ६८ ॥

कस्तूरिकाकल्पितपत्रलेखस्तस्याः कपोलः शशिमण्डलश्रीः।
आक्रम्य तस्थौ मुकुरस्य शोभामम्भोदवातैर्मलिनोदरस्य ॥ ६९ ॥

कविस्तस्याः कपोलवर्णनमारभते **कस्तूरिकेत्यादिना**। तस्याः=शुद्धोदनमहिष्याः; कस्तूरिकया=मृगमदेन, कल्पिता=रचिता, पत्रलेखा=पत्रवल्ली यस्मिन् सः; "अनुबोधः पत्रलेखा पत्रांगुलिरिमे समे" इत्यमरः। शशिमण्डलवत्=चन्द्रमण्डलवत्. श्रीः=शोभा यस्य सः; कपोलः=गण्डस्थलम्, अम्भोदस्य=मेघस्य; वातैः=पवनैः; मलिनमुदरम्=अन्तर्भागो यस्य तस्य; मुकुरस्य=दर्पणस्य; 'दर्पणे मुकुरादर्शौ" इत्यमरः। शोभाम्=कान्तिम्; आक्रम्य;=अतिक्रम्य; तस्थौ=स्थितः ॥ ६९ ॥

कपोल-वर्णन—उस मायादेवी के कस्तूरी से चित्रित सुन्दर कपोल चन्द्रमण्डल की शोभा लिये हुए ऐसे लग रहे थे मानो कोई दर्पण मेघवातों से उठे जलकणों से मैला हो गया हो ॥ ६९ ॥

बभूव तस्या नयनोत्पलस्य नीलोत्पलस्यापि महान् विशेषः।
अमोघमस्त्रं कुसुमायुधस्य पूर्वं द्वितीयं तु तपःसु शीर्णम्[2] ॥ ७० ॥

बभूवेति। तस्याः=मायादेव्याः; नयनमेव उत्पलम्=पद्मम्, तस्य; नीलं च तदुत्पलं तस्य=नीलकमलस्य; (अयमेव) महान्; विशेषः=भेदः, यत्

१. सौन्दर्यनिष्यन्द० त्रि०।　　२. कुण्ठम्–म०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वम्=तस्या नयनोत्पलम्, कुसुममेवायुधं यस्य तस्य=मन्मथस्य; अमोघम्=अव्यर्थम्, अस्त्रम्=आयुधम्, द्वितीयम्=अपरम्, नीलोत्पलम्, तपःसु=माघ-मासेषु, शीर्णम्=विशीर्णं न भवति, शिशिरर्तौ तस्य नश्वरत्वात् ॥ ७० ॥

नेत्र-वर्णन—उस मायादेवी के नेत्रकमल में सरोजकमल से यह भेद (अन्तर) था कि पहला (नेत्रकमल) तो पुष्पधन्वा कामदेव का अमोघ अस्त्र बन बैठा था, जब कि दूसरा (सरोज कमल) माघ मास में क्षीणता प्राप्त करने के कारण उस (नेत्रकमल) से अपने में हीनता मान रहा था ॥ ७० ॥

तस्या विशालेन विलोचनेन विलासगर्भेण विजीयमानाः ।
अद्यापि वासं वनकन्दरेषु ह्रियेव कुर्वन्ति कुरङ्गशावाः ॥ ७१ ॥

तस्या इति । तस्याः=मायादेव्याः, विलासाः=विभ्रमाः, गर्भे यस्य तेन, विशालेन=बृहता; विलोचनेन=नेत्रेण, विजीयमानाः=पराजीयमानाः, कुरङ्गाणाम्=हरिणानाम्, शावाः=शिशवः; "मृगे कुरङ्गवातायुहरिणाजिनयोनयः", "पृथुकः शावकः शिशुः" इत्युभयत्राप्यमरः । अद्यापि=इदानीमपि, वनानाम्=अरण्यानाम्, कन्दरेषु=गह्वरेषु, ह्रिया=लज्जया; वासम्=निवासम्, कुर्वन्ति=विदधति । इवेत्युत्प्रेक्षायाम् ॥ ७१ ॥

उस मायादेवी के विशाल नेत्रों के चञ्चल हाव-भावों के सामने पराजित हुए मृगशावक अपने को लज्जित सा मानते हुए वनकन्दराओं में जाकर छिप गये ॥७१॥

सौभाग्यवाराकरवीचिकाभ्यां तारुण्यकल्पद्रुमशाखिकाभ्याम् ।
भ्रूवल्लरीभ्यां वदनं तदीयं बभाविवाब्जं भ्रमरावलीभ्याम् ॥ ७२ ॥

सौभाग्येत्यादि । तदीयम्=तस्या मायादेव्याः सम्बन्धि, वदनम्=मुखम्, सौभाग्यम्=सौन्दर्यमेव, वाराम्=जलानाम्, आकरः=निधिः, तस्य वीचिकाभ्याम्=तरङ्गाभ्याम्, तारुण्यम्=यौवनमेव, कल्पद्रुमः=कल्पवृक्षः, तस्य शाखिकाभ्याम्; भ्रुवौ वल्लर्याविव ताभ्याम्; भ्रमरावलिभ्याम्=भ्रमरसमूहाभ्याम्; अब्जम्=कमलमिव, बभौ=शुशुभे ॥ ७२ ॥

मुख-वर्णन—उस मायादेवी का मुखकमल सौभाग्यरूपी समुद्र की तरङ्गों के समान तथा नव-यौवनरूपी कल्पवृक्ष की दो शाखाओं के समान दो नयनों से घिरा हुआ ऐसा लग रहा था मानो कोई सुन्दर कमल दो भ्रमर-पंक्तियों से घिरा हुआ हो ॥ ७२ ॥

रराज राजीवविलोचनाया ललाटरेखा रचितालकान्ता ।
आलक्ष्यनामाक्षरबिन्दुपंक्तिरनङ्गजैत्रध्वजपट्टिकेव ॥ ७३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रराजेति। राजीवमिव विलोचनं यस्यास्तस्याः=तामरसेक्षणायाः; (तस्याः=मायादेव्याः); रचितेन=समीकृतेन, अलकेन=चूर्णकुन्तलेन, कान्ता=मनोहरा, ललाटरेखा=मस्तकरेखा, आलक्ष्या=दृश्या, नामाक्षराणाम्, बिन्दूनाम्=वर्तुलरेखाणां पंक्तिर्यस्याः सा, अनङ्गस्य=मारस्य, जैत्रः=जयशीलो यो ध्वजः=पताका, तस्य पट्टिका=पटी, इवेत्युत्प्रेक्षायाम्, रराज=शुशुभे ॥७३॥

ललाट-वर्णन—उस कमलनयना मायादेवी की ललाट रेखा, जिस पर काले-काले बालों की लटें लटक रहीं थीं, ऐसी लग रही थीं मानो वह सुन्दर नामाक्षरों वाली गोल रेखाओं से युक्त कामदेव की विजयशील ध्वजपट्टिका हो ॥ ७३ ॥

विलोलदृष्टिद्वयलोभनीयं तस्या मुखं साम्यमुपाचकार ।
परिप्लुतान्तःपरिवर्तमानपाठीनयुग्मस्य पयोरुहस्य ॥ ७४ ॥

विलोलेत्यादि। तस्याः=मायादेव्याः, विलोलेन=चञ्चलेन, दृष्ट्योर्द्वयेन, लोभनीयम्=स्पृहणीयम्, मुखम्=आननम्, परिप्लुतम्=जलप्लावितम्, अन्तःपरिवर्तमानम्=भ्रमत्, पाठीनयोः=मीनयोः, युग्मम्=द्वयं यस्मिंस्तथाभूतस्य, पयोरुहस्य=मेघस्य, साम्यम्=सादृश्यम्, उपाचकार=उत्पादितवान् ॥ ७४ ॥

चञ्चल नेत्रों से युक्त होने के कारण दर्शनीय उस मायादेवी का मुख (चेहरा) जल में इधर उधर चक्कर लगाती दो मछलियों के युगल के समान लग रहा था ॥

गोरोचनागौररुचिश्चकाशे स षट्पदश्यामलकेशपाशा ।
धूमोद्गमैर्धूसरिताग्रभागा[1] मान्योदया मङ्गलदीपिकेव ॥ ७५ ॥

गोरोचनेत्यादि। गोरोचना=गोपित्तम् इव गौरी=पीता, रुचिः=कान्तिः यस्याः सा, "पीतो गौरो हरिद्राभः" इत्यमरः। षट् पदानि=चरणानि येषां ते षट्पदाः=भ्रमराः, "षट्पदभ्रमरालयः" इत्यमरः। ते इव, श्यामलाः=कृष्णाः, केशपाशाः=केशकलापाः यस्याः सा, "पाशः पक्षश्च हस्तश्च कलापार्थाः कचात् परे" इत्यमरः। धूमानाम्=धूम्राणाम्, उद्गमैः=ऊर्ध्वगतिभिः धूसरितः=मलिनः=अग्रभागो यस्याः सा; मान्यः=सम्मतः, उदयः=प्रादुर्भावश्च यस्याः सा; मङ्गलस्य=कल्याणस्य, दीपिका=दीप्तिः, इव चकाशे=बभौ ॥ ७५ ॥

केशपाश—भौंरे के समान काले केशपाश वाली वह मायादेवी गोरोचन के लेप से गौर कान्ति वाली होकर ऐसी लग रही थी मानो धूआँ उठने से काले पड़ गये अग्रभाग वाला और जलती हुई लौ से सुन्दर लगने वाला कोई मङ्गलदीप हो ॥ ७५ ॥

अर्धासिकां भर्तुरनन्यलभ्यां भद्रासने सैव परं प्रपेदे ।
अन्याः किमर्हन्त्यपहाय लक्ष्मीं वक्षोनिवासं मधुसूदनस्य ॥ ७६ ॥

१. ०गृहाभा—क० वि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्धासिकामिति । सा=मायादेवी, भर्त्तुः=राज्ञः शुद्धोदनस्य, भद्रासने=राजसिंहासने, अन्येन=अपरेण, अलभ्याम्=अप्राप्याम्, अर्धमासिकाया इति अर्धासिकाम्=अर्धासनस्थितिम्, परम्=मुख्यत्वेन, प्रपेदे=लेभे । अन्याः=अपराः साधारणा नार्यः, मधुं सूदयतीति मधुसूदनः, तस्य=विष्णोः । "नन्दिग्रहि०" (पा० सू० ३.१.१३४) इत्यादिना ण्वुल् । वक्षसि=हृदये, निवासम्=स्थितिम्, लक्ष्मीम्=कमलाम्, विष्णुपत्नीमित्यर्थः; अपहाय=त्यक्त्वा, अर्हन्ति=शक्नुवन्ति किम् ? ॥ ७६ ॥

राजसभा (राजदरवार) में पति (राजा शुद्धोदन) के साथ आधे राजसिंहासन पर बैठने का विशिष्ट अधिकार राजा की पट्टमहिषी मायादेवी को ही मिल पा ा । क्या विष्णु के हृत्प्रदेश में विहरण करने का अधिकार लक्ष्मी (विष्णुपत्नी) को छोड़कर किसी अन्य नारी को (भले ही वह कितनी भी सुन्दर क्यों न हो) मिल सकता है ! ॥ ७६ ॥

महीपतिर्मान्यगुणोज्ज्वलायां तस्यां महिष्यां तनयाभिलाषी ।
प्रदीपधूपप्रमुखैः पदार्थैः स देवताराधनतत्परोऽभूत् ॥ ७७ ॥

महीपतिरिति । स महीपतिः=पृथ्वीपतिः राजा शुद्धोदनः, मान्याः=श्लाघ्याः, ये गुणाः=सौशील्यादयः, तैरुज्ज्वलायाम्=शोभमानायाम्, तस्यां महिष्याम्=मायादेव्याम्, तनयम्=पुत्रमभिलषतीति तादृशः, सन्, प्रदीपप्रमुखैः=धूपदीपादिभिः पदार्थैः=पूजोपकरणद्रव्यैः, देवतायाः=स्वकुलेष्टदेवतायाः, आराधने=पूजायाम्, तत्परः=आसक्तः, अभूत्=जातः ॥ ७७ ॥

राजा की पुत्रकामना —राजा शुद्धोदन अपनी उस पटरानी मायादेवी से एक पुत्ररत्न की प्राप्ति के इच्छुक था । इसके लिये उन्होंने धूप दीप आदि सुगन्धित पदार्थों से अपने कुलदेवता की आराधना प्रारम्भ की ॥ ७७ ॥

ममज्ज तीर्थेषु जजाप मन्त्रं ततान दानानि तपश्चकार ।
शुश्राव धर्मं सुजनं सिषेवे स पुत्रहेतोः सह धर्मपत्न्या ॥ ७८ ॥

ममज्जेति । सः=राजा शुद्धोदनः, पुत्रहेतोः=पुत्रप्राप्त्यर्थम्, धर्मपत्न्याः=स्वमहिष्या मायादेव्या सह, तीर्थेषु=पुण्यसलिलेषु, ममज्ज=मग्नः । मन्त्रम्=पुत्रप्रदमन्त्रम्, जजाप=जापं कृतवान् । दानानि=याचकेभ्योऽभिलषितवस्तुप्रदानानि, ततान=विस्तारितवान्, दत्तवानित्यर्थः । तपः=व्रतपालनादिदुष्करतपस्याम्, चकार=कृतवान् । धर्मम्=धार्मिकपुस्तकानि, शुश्राव=श्रुतवान् । सुजनम्=सज्जनम्, सिषेवे=सेवितवान् । पुत्रप्राप्त्युपायप्रश्नार्थं सज्जना अपि संवदिता इत्यर्थः ॥ ७८ ॥

(इसके साथ ही) पुत्रप्राप्ति के निमित्त उसने अपनी महिषी मायादेवी के साथ प्रख्यात गङ्गादि तीर्थों में स्नान किया, (पुत्रद) मन्त्रों का जाप किया, नाना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकार के दान किये तप (व्रतादि नियमों का कठोरता से पालन) किया, विद्वानों से धर्म-ग्रन्थों का श्रवण किया, सज्जनों की सङ्गति की (जिससे इन पुण्यों के फलस्वरूप उसे अनुरूप पुत्र मिल सके।) ॥ ७८ ॥

इति गतवति पुण्यैर्दीर्घदीर्घेऽपि काले,
पतिरवनिपतीनां पुत्ररत्नं न भेजे[1]।
तदपि च ववृधे तत्प्रार्थना तस्य पुंसां
विरमति न हि यत्नः कार्यसिद्धेः पुरस्तात् ॥ ७९ ॥

इति बुद्धघोषाचार्यविरचिते पद्यचूडामणिनाम्नि महाकाव्ये
सिद्धार्थचरिते प्रथमः सर्गः ॥

इतीति। (सः) अवनिपतीनाम्=पृथ्वीपतीनाम्, पतिः=स्वामी, चक्रवर्ती राजा, इति=एवम्, दीर्घाद् दीर्घे=अतिदीर्घे, काले=समये, गतवति=व्यतीते, सत्यपि, पुत्ररत्नम्=पुत्रश्रेष्ठम्, "रत्नं स्वजातिश्रेष्ठेऽपि" इत्यमरः। न भेजे=न लब्धवान्। तदपि=एतावत्कालविलम्बे सत्यपि, तस्य=राज्ञः, तत्प्रार्थना=तस्य पुत्रप्रार्थना, ववृधे=वृद्धिमेव प्राप्ता। यतो हि पुंसाम्=श्रेष्ठजनानाम्, यत्नः=प्रयासः, कार्यस्य=अभिलषितकर्मणः, सिद्धेः=पूर्तेः, पुरस्तात्=पूर्वम्, न विरमति=विरामं न प्राप्नोति। अत्र सामान्यरूपेण विशेषसमर्थनरूपोऽर्थान्तरन्यासालङ्कारः। **मालिनी** च वृत्तम्, तल्लक्षणं यथा—'न न म य य युतेयं मालिनी भोगिलोकैः" इति ॥७९॥

॥ इति पद्यचूडामणिमहाकाव्यस्य कीर्त्तिव्याख्यायां प्रथमः सर्गः ॥

यों, उस राजा ने अधिक से अधिक समय तक इन पुण्यकर्मों में मन लगाया, फिर भी उसे कोई पुत्र नहीं मिल सका। फिर भी (देवताओं के सामने) उसकी वह पुत्र-प्राप्ति के निमित्त प्रार्थना बढ़ती ही गयी; क्योंकि मनस्वी पुरुषों के प्रयास कार्यसिद्धि होने से पहले नहीं रुका करते ॥ ७९ ॥

आचार्य बुद्धघोष विरचित पद्यचूडामणि नामक महाकाव्य का,
जिसमें सिद्धार्थ का चरित्र-चित्रण है,
प्रथम सर्ग समाप्त ॥

---

१. लेभे—म०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयः सर्गः

देवानां तुषितपुरीगमनम्

तत्रान्तरे जगति पूर्वनिमित्तमासीद्
दृष्ट्वा तदद्भुतममर्त्यगणाः समेताः ।
सर्वज्ञतावसर एष तवेति वक्तुं
जग्मुः पुरीं सुरगुरोस्तुषिताभिधानम् ।। १ ।।

तत्रान्तरे=तस्मिन्नवसरे, "अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये । छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च" इत्यमरः । जगति=लोके; पूर्वनिमित्तम्=बुद्धावतारप्राक्तन निमित्तम् । आसीत्=बभूव । अद्भुतम्= आश्चर्यमयम्, तत्=पूर्वनिमित्तं दृष्ट्वा=अवलोक्य, समेता=सङ्गताः, अमर्त्य-गणाः=देवगणाः, एषः=अयम्, तव=सुरेश्वरस्य, सर्वज्ञतायाः=बुद्धभावस्य, "सर्वज्ञ। सुगतो बुद्धः" इत्यमरः । अवसरः=अनुकूलः समयः, अस्ति—इति सुरगुरोः=देवाधिपस्य, वक्तुम्=कथयितुम्; 'तुषित' इति सौगतसमये कस्यचिद् देवलोकस्य नाम, अत्र तु कविस्तत्रस्थां पुरीमभिदधाति, तुषितेति अभि-धानम्=नाम यस्यास्ताम् । पुरीम्=नगरीम्, जग्मुः=प्रतस्थुः ॥ अस्मिन् सर्गे **वसन्ततिलका** वृत्तम्, "उक्ता वसन्ततिलका त-भ-जा ज-गौ गः" इति लक्षणात् ।। १ ।।

द्वितीय सर्ग

उस समय एकत्र हुए देवसमूह ने, बुद्धावतार के पूर्वनिमित्तों का सूक्ष्मतया अवलोकन कर, "अब लोक में बुद्धभाव के अवतरित होने का अनुकूल अवसर है"— सुराधीश से यह निवेदन करने के लिए तुषितपुरी जाने का निश्चय किया ।। १ ।।

[आचार्य बुद्धघोष अब अग्रिम छह श्लोकों में सर्वप्रथम तुषितपुरी का माहात्म्य वर्णन कर रहे हैं—]

तुषितपुरीवर्णनम्

उत्तुङ्गनीलमणिमन्दिरजृम्भमाण-
रोचिश्छटाच्छुरणशाद्वलितान्तरिक्षाम् ।
प्रक्रीड़मानमृगशावविलोलदृष्टि-
च्छायासमुच्चलनचन्द्रकिलोपकण्ठाम् ।। २ ।।

कविः षड्भिः पद्यैः कुलकेन तां तुषिताख्यां नगरीं वर्णयति उत्तुङ्गे-त्यादिना । उत्तुङ्गम्=उन्नतं यन्नीलमणीनाम्=इन्द्रनीलानाम्, मन्दिरम्= गृहम्, तस्मात् जृम्भमाणा=वर्धमाना, रोचिः=छटा (कान्तिपरम्परा), तस्याः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

छुरणेन=व्यापनेन, शाद्वलितम्=हरितम्; शादा अस्मिन् सन्तीति शाद्वलम्, तथाकृतं शाद्वलितम्; तादृशम् अन्तरिक्षम्=गगनं यस्यां सा। प्रक्रीडमानानाम्=विहरणशीलानाम्। ताच्छील्ये चानश् प्रत्ययः। मृगाणाम्=हरिणानाम्, शावानाम्=शिशूनाम्, विलोलाः=चञ्चला या दृष्टयः=अवलोकनानि, तासां छायायाः=कान्तेः, समुच्चलनेन=सम्यक्तया चलनेन, चन्द्रकितः=मेचकितः, उपकण्ठः=प्रान्तप्रदेशो यस्यास्ताम्। "समौ चन्द्रमेचकौ", "उपकण्ठान्तिकाभ्यर्णाभ्यग्राः" इत्युभयत्राकारः ॥ २ ॥

उस तुषितपुरी का आकाश नीलमणिनिर्मित ऊँचे-ऊँचे प्रासादों से बढ़ी हुई शोभा के कारण हरे रंग से भरा हुआ था। और इधर-उधर उछलते-कूदते, चञ्चलनेत्र हरिणशावकों से उस तुषितपुरी के आस-पास का प्रदेश व्याप्त था ॥ २ ॥

लीलाचकोररसनाञ्चललिह्यमान-
प्रासाददन्तवलभीकिरणप्ररोहाम् ।
तिर्यक्प्रवृत्तमणितोरणदीर्घरश्मि-
मालावलीगुणितवन्दनमालिकाभाम् ॥ ३ ॥

लीलेत्यादि। लीलाचकोराणाम्=लीलार्थचकोरपक्षिणाम्, रसनायाः=जिह्वायाः, अञ्चलैः=अग्रभागैः, लिह्यमानाः=आस्वाद्यमानाः, प्रासादे स्थितायाः दन्तबलभ्याः=गोपानस्याः, "गोपानसी तु वलभी" इत्यमरः। किरणप्ररोहाः=रश्म्यङ्कुरा यस्यां ताम्। तिर्यक्प्रवृत्ता=तिरःप्रसारिणी या मणितोरणस्य=रत्नमयबहिर्द्वारस्य, "तोरणोऽस्त्री बहिर्द्वारम्" इत्यमरः। दीर्घाणाम्=लम्बायमानानाम्, रश्मिमालानाम्=कान्तिस्रजाम्, आवली=पंक्तिस्तया गुणितायाः=आवृत्तायाः, वन्दनमालिकायाः=मङ्गलदाम्नः, आभा=कान्तिर्यस्यां ताम्। "तोरणोर्ध्वे तु मङ्गल्यं दाम वन्दनमालिका" इति हेमचन्द्रः। सा च रम्भास्तम्भचतुष्टयवेष्टितताम्रपत्ररचिता माला ॥ ३ ॥

वह तुषितपुरी खेलने में ध्यान लगाये चकोर पक्षियों द्वारा अपने जिह्वाग्रभाग से वलभियों (चन्द्रशालाओं) के चाटने के कारण उठी कान्ति से जगमग थी। तथा वह रत्नमय बहिर्द्वारों पर टेढ़ी लटकी हुई चमकदार माला-पंक्तियों से सज्जित होने से शोभायमान थी ॥ ३ ॥

शिञ्जानपञ्चशरचक्रितकार्मुकज्या-
झङ्कारवेगचलिताध्वगवामनेत्राम् ।
दर्पान्धदिग्गजकपोलमदप्रवाह-
कल्लोलिनीसलिलकर्दमितप्रतोलीम् ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिञ्जानेत्यादि। शिञ्जाना=स्वनन्ती या पञ्चशरस्य=मारस्य (कामस्य), चक्रितम्=कुण्डलितम्, कर्मणे प्रभवति कार्मुकम्=धनुः, तस्य ज्या=मौर्वी, "मौर्वी ज्या शिञ्जिनी गुणः" इत्यमरः। तस्य झङ्कारस्य=टङ्कारध्वनेः, वेगेन=जवेन, चलिताः=उद्विग्नाः, अध्वगानाम्=प्रोषितानाम् वामनेत्राः=स्त्रियो यस्यां ताम्। दर्पेण=गर्वेण, अन्धानाम्=उन्मत्तानां दिग्गजानां कपोलेषु=गण्डस्थलेषु यो मदप्रवाहः=मदस्रावः, स एव कल्लोलिनी=नदी, तस्याः सलिलेन=जलेन, कर्दमिता=पङ्किला, प्रतोली=रथ्या यस्यास्ताम्। समासान्तविधेरनित्यत्वान्न कप्॥ ४॥

उस तुषितपुरी में कामदेव के पुष्प-धनुष की झनझनाती डोर की ध्वनि सुनकर नवयुवतियों का चित्त चञ्चल होता रहता था। एवं उस नगरी की गलियों में मदोन्मत्त हाथियों के कपोलों से झरते मदस्राव की नदियाँ सी बहा करती थीं॥ ४॥

शम्पासहस्रचतुरस्रसरोरुहाक्षी-
देहप्रभापुनरुदीरितदीपमालाम्।
सौधस्थलोपरिसमुच्छ्रितवैजयन्ती-
चीनांशुकाकलितदिग्वनितावगुण्ठाम्॥ ५॥

शम्पेत्यादि। शम्पानाम्=विद्युताम्। "सम्पा शतह्रदा ह्रादिनी" इत्यमरः। सहस्रस्य=एतत्सङ्ख्यायाः, चतुरस्राः=अन्यूनातिरिक्ताः, समा इति यावत्, या सरोरुहाक्षीणाम्=कमलनेत्राणां देहप्रभाः=शरीरकान्तयस्ताभिः पुनरुदीरिताः=पुनरुक्ता, दीपानां माला=पंक्तिः, यस्यां ताम्। सौधस्थलस्य=प्रासादप्रदेशस्योपरि समुच्छ्रितायाः=उद्गतायाः, वैजयन्त्याः=पताकायाः, चीनांशुकेन=पट्टाम्बरेण, आकलितः=कृतः; दिग्वनितायाः, दिगङ्गनायाः, अवगुण्ठः=आवरणं यस्यां ताम्॥ ५॥

उस नगरी में जलती हुई दीपमालाएँ हजारों विजलियों की एकसाथ चमक के के समान वहाँ की युवतियों की देहप्रभा से पुनरुक्त (द्विगुण) सी हो रही थी। और उस नगरी के ऊँचे प्रासादों पर चीनदेश के वस्त्रों से बने हुए ध्वजों के लहराने से ऐसा लगता था मानों दिग्वधुएँ अपना विविध शृङ्गार किये हुए हों॥ ५॥

पुष्पावचायवलमानपुरन्ध्रिवर्ग-
पीनस्तनोन्नतिविकल्पितकेलिशैलाम्।
माकन्दकोरकगलन्मकरन्दपूर-
धारानुबद्धपुनरुक्ततटाकतोयाम्॥ ६॥

पुष्पेत्यादि। पुष्पाणाम्=कुसुमानाम्, अवचायाय=लवनाय, वलमानः=उद्वर्तमानो यः पुरन्ध्रीणाम्=कुटुम्बिनीनां वर्गः=समूहस्तस्य पीनयोः=पीवरयोः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तनयोः=कुचयोः, उन्नतया=ऊर्ध्वङ्गमनेन, विकल्पितः=सन्दिग्धः, केलिशैलः= क्रीडापर्वतो यस्यां ताम्। माकन्दानाम्=चूतानाम्, कोरकेभ्यः=मुकुलेभ्यो गलन्त्यः=स्रवन्त्यो मकरन्दपूराणाम्; मकरन्दप्रवाहाणम्=धाराः=मधुप्रवाह-सन्ततयस्ताभिरनुबद्धम्=अनुसृतम्, अत एव पुनरुक्तम्=द्विगुणितम्, तटाका-नाम्=जलाशयानाम्, तोयम्=तलिलं यस्यां ताम् ॥ ६ ॥

वहाँ फूल तोड़ने के लिये गयी परिवार की स्त्रियों के पीवर (स्थूल) एवं उन्नत कुचों के कारण छोटे छोटे क्रीड़ापर्वतों का भ्रम होता रहता था। और वहाँ जलाशय भी आम्रवृक्षों की मञ्जरियों से बहनेवाले मधुप्रवाह (रस) की धारा से दोबार (द्विगुणित =पुनरुक्त) भरे हुए से लगते थे ॥ ६ ॥

शृङ्गारमण्डपशिरोनवरत्नतेजः-
सञ्चारसञ्चितशतक्रतुचापशोभाम् ।
मन्दारकल्पहरिचन्दनपारिजात-
सन्तानसंहृतदरिद्रकथाप्रसङ्गाम् ॥ ७ ॥

शृङ्गारेत्यादि। शृङ्गारमण्डपस्य=लीलामण्डपस्य, शिरसि=मस्तके, खचितानाम्=लग्नानाम्, नवरत्नानाम्, तेजःसञ्चारेण=कान्तिप्रसरेण, सञ्चिता=सम्पादिता, शतक्रतोः=इन्द्रस्य, चापस्य=धनुषः, शोभा=कान्तिर्यया ताम्। मन्दारादिभिः=पञ्चभिः देववृक्षैः, संहृतः=अवहृतः, 'दरिद्रता' इति कथाप्रसङ्गः=दारिद्र्यविषयकव्यवहारो यस्यां ताम् ॥ ७ ॥

वहाँ (तुषितपुरी में) शृङ्गारमण्डपों की छतों पर लगे नवरत्नों की मिश्रित कान्ति के कारण इन्द्रधनुष की सी शोभा हो जाती थी। एवं जिसमें १. मन्दार, २. कल्पवृक्ष, ३. हरिचन्दन, ४. पारिजात तथा ५. सन्तान—इन कल्पवृक्षजाति के पाँच वृक्षों ने अपनी उपस्थिति से 'दरिद्रता' शब्द का लोप ही कर दिया था ॥७॥

तुषिताधिपतेर्वर्णनम्

तत्र स्थितं सुरगणा ददृशुस्तमेनं
सिंहासने विविधरत्नशिलानिबद्धे ।
विभ्राजमानबहुधातुविचित्रवर्णे
मेरोर्मृगेन्द्रमिव सानुतटप्रदेशे ॥ ८ ॥

तत्रेति। सुरगणाः=देवसमूहाः, तत्र=तुषितपुर्याम्, विविधाभिः=नैक-विधाभिः, रत्नमयशिलाभिर्निबद्धे=निर्मिते, विभ्राजमानैः=दीप्यमानैः, बहुभिः= अनेकैर्धातुभिः=गैरिकादिभिः, विचित्रवर्णे=शबलवर्णे, राजसिंहासने=राज्ञ आरोहणपीठिकायाम्, स्थितम्=विराजमानं तमेनम्=तुषितपुर्यधीश्वरम्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेरोः=सुमेरुपर्वतस्य, सानोः=शिखरस्य, तटप्रदेशे=तटप्रान्ते स्थितं मृगेन्द्रम्=सिंहमिव, ददृशुः=अवलोकयामासुः ॥ ८ ॥

उन देवगणों ने ऐसी उस नगरी के एक प्रासाद में, जो कि नानारत्नमय शिलाओं एवं विविध धातुओं के मिश्रण से निर्मित था, उस सुराधीश को ऐसे विराजमान देखा मानों सुमेरुपर्वत की किसी शिला पर कोई मृगाधिपति (सिंह) बैठा हो ॥ ८ ॥

माणिक्यमौलिवलभीसविधस्थितेन
मान्येन मङ्गलसितातपवारणेन ।
पूर्वाचलस्य सुषमां मणितुङ्गश्रृङ्ग-
संलक्ष्यपूर्णशशिनः[1] प्रतिपक्षयन्तम् ॥ ९ ॥

अथ त्रयोविंशतिश्लोकैस्तुषिताधिपं वर्णयति कविः **माणिक्येत्यादिना ।** **माणिक्यमयो** मौलिः=शिरोभागो यस्यास्तस्याः, बलभ्याः=गोपानस्याः, सविधे=समीपे, स्थितेन । मङ्गलार्थं यत् सितम्=धवलम्, आतपवारणम्=छत्रं तेन । मणितुङ्गश्रृङ्गे=मणिमये उन्नते श्रृङ्गे, संलक्ष्यः=सम्यक् प्रकाशमानः, पूर्णशशी=पूर्णचन्द्रो यस्मिंस्तस्य, सुषमाम्=शोभाम्; प्रतिपक्षयन्तम्=शत्रूकुर्वन्तम्; तत्सदृशमित्यर्थः । 'देवाः जगत्त्रयगुरुं दृष्ट्वा शिरसा प्रणेमुः' इति अग्रिमेण द्वात्रिंशश्लोकेन सह सम्बन्धः । एवमेवोपरितनेषु (१० तः ३१) श्लोकेषु अपि बोध्यम् ॥ ९ ॥

वहाँ वे सुराधीश मङ्गलमय श्वेतछत्र के नीचे मणिमाणिक्यनिर्मित्त चन्द्रशाला (बलभी) के पास बैठे ऐसे सुशोभित हो रहे थे मानो वे किसी मणिमय उत्तुङ्गश्रृङ्ग पर दिखायी देने वाले पूर्ण चन्द्रमा की बराबरी (प्रतिपक्षता) कर रहे हों ॥ ९ ॥

प्रत्यग्रहाटकशिलाफलकायतस्य
फालस्थलस्य परितः प्रसृतैर्मयूखैः ।
आशाविशालनयनाननमण्डनाना-[2]
माकल्पयन्तमिव कान्तिसुधाविभागम् ॥ १० ॥

प्रत्यग्रेति । प्रत्यग्रम्=नूतनम्; सद्योद्रुतनिषिक्तमित्यर्थः । "प्रत्यग्रोऽभिनवो नव्यः" इत्यमरः । यत् हाटकस्य=सुवर्णस्य, शिलाफलकम्=शिलातलम् । "हिरण्यं हेम हाटकम्" इत्यमरः । तद्वत् आयतस्य=विशालस्य, फालस्थलस्य=ललाटप्रदेशस्य; परितः=अभितः, प्रसृतैः=विस्तीर्णैः, मयूखैः=कान्तिभिः, आशाः=दिशः । आशाश्च हरितश्च ताः" इत्यमरः । ता एव विशालानि=आयतानि, नयनानि=नेत्राणि यासां ताः स्त्रियस्तासाम्, आननमण्डलानाम्=

१. संक्षिप्त०—त्रि० । २. ०मज्जनानाम्—म० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुखमण्डलानाम्, कान्तेः=शोभाया एव सुधाया=अमृतस्य, विभागम्=विभजनम्, आकल्पयन्तम्=कुर्वन्तम् । इवेत्युत्प्रेक्षायाम् ॥ १० ॥

अभिनव सुवर्ण निर्मित शिलातल के समान उनके आयताकार (चौड़े) ललाट (मस्तक) से एक प्रकार की विचित्र कान्ति चारों ओर इस तरह फैल रही थी मानो दिशारूपी विशालनयना युवतियों के मुखमण्डल का विभाजन हो ॥ १० ॥

आयामशालिभिरमन्ददयासमुद्र-
वेलाजलेषु विहरद्भिरपाङ्गपातैः ।
आपादयन्तममराधिपराज्यलक्ष्म्याः
क्रीडासरोरुहततीरिव दिङ्मुखेषु ॥ ११ ॥

आयामेत्यादि । आयामशालिभिः=विस्तृतैः, अमन्दायाः=अधिकायाः, दयायाः=करुणाया एव समुद्रस्य=जलधेः, वेलाजलेषु=विवृद्धजलेषु; विहरद्भिः=विचरद्भिः; अपाङ्गपातैः=कटाक्षैः, अमराधिपस्य=देवेन्द्रस्य, राज्यलक्ष्म्याः=राज्यश्रियः, क्रीडासरोरुहततीः=क्रीडापद्मपरम्पराः, दिङ्मुखेषु=दिशामग्रभागेषु; आपादयन्तम्=कुर्वन्तम् । इवेत्युत्प्रेक्षायाम् ॥ ११ ॥

वे तुषिताधीश्वर अपने विशाल नेत्रों से अत्यधिक वृद्धिङ्गत दयासमुद्र में इस तरह विहार (विचरण) कर रहे थे मानों देवराज इन्द्र सभी दिशाओं में जलक्रीड़ा कर रहे हों ॥ ११ ॥

आकाशकन्दरदरीषु वितायमानै-
रानन्दमन्दहसितैरधिकप्रसन्नैः ।
सन्धुक्षणाय निजकीर्त्तिपयःपयोधेः
सम्पादयन्तमिव शाश्वतमिन्दुलोकम् ॥ १२ ॥

आकाशेत्यादि । आकाशस्य=नभसः, कन्दराः=विवरा एव दर्यः=गुहाः तासु, वितायमानैः=विस्तार्यमाणैः । तनोतेर्यकि धातोर्नकारस्य अन्तादेश आकारः । आनन्देन=आनन्दजैः, अधिकप्रसन्नैः=अतिनिर्मलैः; मन्दहसितैः=स्मितहास्यैः; निजा=स्वकीया या कीर्तिः=यशः, सा एव पयः=जलम्, तेन पूरितस्य पयोधेः=क्षीरनिधेः, सन्धुक्षणाय वर्धनाय, इन्दुलोकम्=चन्द्रलोकम्, शाश्वतम्=अविनाशिनम्, सम्पादयन्तम्=कुर्वन्तम् । इवेत्युत्प्रेक्षायाम् ॥१२॥

उस तुषितपति ने आकाशविवररूपी गुफाओं में अत्यधिकमात्रा में फैलने योग्य आनन्दजन्य मन्द (स्मित) हास्यों से अपने कीर्तिरूपी समुद्र को बढ़ाने के लिए अविनाशी (शाश्वत) चन्द्रमा की उत्पत्ति की ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यर्णवर्त्तिभिरकृत्रिमभक्तिशोभै-
रात्मीयबिम्बसदृशैः सह मित्रवर्गैः ।
आभाषणेष्वधरविद्रुमरागलक्ष्या[1]-
दन्तःस्फुरन्तमनुरागमिवोद्गिरन्तम् ॥ १३ ॥

अभ्यर्णेत्यादि । अभ्यर्णम्=समीपे, वर्तिभिः=स्थतैः; अकृत्रिमा=नैसर्गिकी, भक्तिशोभा=भक्तिसुषमा येषां तैः; आत्मीयेन=स्वकीयेन, बिम्बेन=आकारेण, सदृशैः=तुल्यैः, मित्रवर्गैः=सुहृत्समूहैः, सह=सार्धम्; आभाषणेषु=सँल्लापेषु; अधर एव विद्रुमः=प्रवालस्तस्य रागस्य=अरुणिमायाः, लक्ष्यात्=व्याजात्;, "व्याजोऽपदेशो लक्ष्यं च" इत्यमरः । अन्तः=हृत्प्रदेशे, स्फुरन्तम्=चञ्चलतां गतम्, अनुरागम्=स्नेहम् । उद्गिरन्तम्=बहिःप्रकटयन्तम् । इवेत्युत्प्रेक्षायाम् ॥ १३ ॥

समीपस्थित एवं उसमें अत्यन्त श्रद्धा रखने वाले एवं समान शीलसदाचार वाले अपने मित्रवर्ग के साथ वार्तालाप करते हुए वे तुषिताधीश्वर मानों अपने ओठों की अरुणिमा के व्याज से, उनके प्रति अपना हार्दिक अनुराग बाहर उड़ेल रहे थे ॥१३॥

आनन्दवाष्पजलजर्जरदृष्टिपात-
मभ्युल्लसत्पुलकभूषितगण्डरेखम् ।
आकर्णयन्तमभिजातनिजापदान-
मग्रे कुशीलवगणैरभिगीयमानम् ॥ १४ ॥

आनन्देत्यादि । आनन्देन=सुखजेन, बाष्पजलम्=अश्रुजलम्, तेन जर्जरः=शिथिलः, दृष्टिपातः=कटाक्षपतनं यस्मिन् कर्मणि तत्; अभ्युल्लसता=उद्गच्छता, पुलकेन=रोमाञ्चेन, भूषिता=अलंकृता, गण्डरेखा=कपोलरेखा यस्मिन् कर्मणि तत्; अभिजातम्=श्रेष्ठम्, निजम्=स्वकीयम्; अपदानम्=चरितम्; अग्रे=सम्मुखम्; कुशीलवगणैः=गायकगणैः, अभिगीयमानम्=अभिवर्ण्यमानम् । "गायकास्तु कुशीलवाः" इत्यमरः ॥ १४ ॥

आनन्दाश्रुओं से शिथिल दृष्टिपात एवं रोमाञ्चित गण्डस्थल वाले वे तुषितपति चारणसमूह द्वारा गाये गये गीतों में अपने जीवन की श्रेष्ठ घटनाओं का वर्णन सुन रहे थे ॥१४॥

कल्पद्रुमप्रसवकल्पितकर्णपूर-
रिच्छोलिकाविगलितैर्मकरन्दपूरैः ।
बाहुद्वयस्य महनीयपराक्रमस्य
वीराभिषेकमहिमानमिवाचरन्तम् ॥ १५ ॥

---

१. लक्ष्मया०—क० । ०लक्ष्म्याश्चान्तः०—पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कल्पद्रुमेत्यादि । कल्पद्रुमाणाम्=कल्पवृक्षाणाम्, प्रसवैः=पुष्पैः; "स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचने" इत्यमरः; कल्पिताभ्यः=रचिताभ्यः, कर्णपूरानाम्=कर्णावतंसानाम्, रिच्छोलिकाभ्यः=पंक्तिभ्यः; "रिच्छोली पंक्तिरावली" इति त्रिकाण्डशेषः; विगलितैः=निःसृतैः; मकरन्दपूरैः=मकरन्दानां प्रवाहैः; '-मकरन्दः पुष्परसः" इत्यमरः; "पूरः स्यादम्भसां वृद्धौ" इति हेमचन्द्रः । महनीयः=पूजनीयः, पराक्रमः=शौर्यम्, यस्य तस्य; बाहुद्वयस्य=भुजयुगलस्य, शोभाम्=अतिशायिताम्, आचरन्तम्=सम्पादयन्तम् । इवेत्युत्प्रेक्षायाम् ।। १५ ।।

वे तुषितपति अपने कानों में लगे कल्पवृक्ष के पुष्पों से निःसृत मकरन्दप्रवाह के भुजाओं पर पड़ने से ऐसे लग रहे थे मानों उनकी श्रेष्ठ पराक्रमशाली दोनों भुजाओं का वीरोचित अभिषेक किया जा रहा हो ।। १५ ।।

उत्तुङ्गबाहुयुगलोदयशैलजात-
तेजोदिवाकरयशोहिमरश्मिशङ्काम् ।
आतन्वतारुणसितोपलनिर्मितेन
मङ्गल्यकुण्डलयुगेन मनोज्ञगण्डम् ।। १६ ।।

उत्तुंगेत्यादि । उत्तुङ्गम्=उन्नतम् यद् बाह्वोः=भुजयोः, युगलम्=युग्मम्, तदेव उदयशैलः=पूर्वदिक्पर्वतः, तस्मात् जातौ=उत्पन्नौ, यौ तेज इति, दिवाकरः=सूर्य इति; यश इति=कीर्तिरिति हिमरश्मिः=चन्द्रश्च, तयोः शङ्काम्=सन्देहम् । अरुणैः=रक्तवर्णैः, सितैः=धवलैः, उपलैः=प्रस्तरैः, रत्नैरित्यर्थः, "उपलो ग्रावरत्नयोः" इति हेमचन्द्रः; निर्मितेन=खचितेन; मङ्गल्ययोः=मङ्गलकरयोः, कुण्डलयोः=कर्णाभरणयोः, युगेन=द्वयेन, मनोज्ञयोः=शोभायमानयोः, गण्डस्थलयोः=गण्डप्रदेशयोः; आतन्वता=उत्पादितवता ।। १६ ।।

वे तुषितपति अपने उन्नत भुजारूप पर्वत से उत्पन्न शौर्य और यश के कारण ऐसे शोभित हो रहे थे मानों उनके दोनों तरफ सूर्य और चन्द्रमा खड़े हों । इसी तरह लाल और श्वेत रत्नों से निर्मित मङ्गलदायक कर्णकुण्डलों की कान्ति से उनके गण्डस्थल भी अत्यन्त शोभित हो रहे थे ।। १६ ।।

मन्दारपुष्पकलिकापरिकल्पितेन
माल्येन मान्यभुजामध्यविलम्बितेन ।
कण्ठप्रणालिमुखगत्वररक्तधार[1]-
मादर्शयन्तमिव मैत्रबलावतारम् ।। १७ ।।

मन्दारेत्यादि । मन्दारस्य=पारिजातस्य, पुष्पकलिकाभिः=मुकुलैः, परिकल्पितेन=रचितेन; मान्यम्=पूज्यं प्रशस्तमित्यर्थः, यद् भुजमध्यम्=वक्षः, तत्र

१. मुखगह्वर०—वि०, त्रि०; ०रत्न०—म०, त्रि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विलम्बितेन=लग्नेन; कण्ठः=ग्रीवा, एव प्रणालिः=जलमार्गः, तस्याः मुखात्=अग्रभागात्, गत्वरा=निःसृता, रक्तधारा=शोणितप्रवाहो यस्य तम् । मैत्रमेव बलम्=शक्तिर्यस्य तस्य=बुद्धस्य, अवतारम्=लोके आगमनम्, आदर्शयन्तम्=प्रकटयन्तम् । इवेत्युत्प्रेक्षायाम् । अस्य श्लोकस्य गूढार्थावगाहनाय भगवतो बुद्धस्य गृध्रकूटपर्वतवासकाले शत्रुभूतेन स्वदायादेन देवदत्तेन शिलिपद्वारा प्रहितेन कूटयन्त्रेणाविद्धात् कण्ठाद्रक्तप्रवाहः प्रासरत्—इति सौगतसमयकथा अनुसन्धेया ।। १७ ।।

वे तुषितपति अपनी बाहुओं बीच लटकी पारिजात फूलों की लाल माला से उत्पन्न कण्ठगत रक्तवर्ण के कारण ऐसे लगते थे मानों भगवान् बुद्ध के शरीर से उनके शत्रुभूत दायाद देवदत्त द्वारा फेंके गये शिलाखण्ड के कारण रक्तधारा बह रही हो ।। १७ ।।

अभ्युद्गतैररुणरागमनोऽभिरामै-
रामुक्तरत्नवलयांकुररश्मिजालैः ।
निर्भिद्यमाननिजशौर्यमहःप्रवाल-
सञ्छादिताविव भुजौ[1] विटपौ दधानम् ।। १८ ।।

अभ्युद्गतैरिति । अभ्युद्गतैः=बहिर्निःसृतैः, अरुणरागेण=रक्तवर्णेन, मनोऽभिरागैः=मनोज्ञैः । आमुक्तयोः=विधृतयोः, रत्नवलययोः=रत्नकटकयोः, अङ्कुरैरिव स्थितैः, रश्मिजालैः=किरणसमूहैः, निर्भिद्यमानैः=बहिरुत्थितैः, निजयोः=स्वकीययोः, शौर्यमहसोः=वीर्यतेजसोः, प्रबालैः=विद्रुमैः, सञ्छादितौ=आवृतौ, विटपौ=वृक्षशाखे इव; भुजौ=बाहू; दधानम्=धारयन्तम् । इवेत्युत्प्रेक्षायाम् ।। १८ ।।

वे तुषितपति, धारण किये हुए रत्नजटित अङ्गदों की कान्ति के कारण बाहर दिखायी देने वाले अरुणिमायुक्त सौन्दर्य से ओतप्रोत बाहुओं से ऐसे लग रहे थे मानों बाहर दिखायी देने वाली, प्रवालसञ्छादित किसी वृक्ष की दो शाखाएँ हों ।। १८ ।।

अङ्गैरमन्दहरिचन्दनपङ्कलिप्तै-
रभ्यन्तरेषु कृतकुंकुमपत्रलेखैः ।
पक्षीन्द्रचञ्चुपुटपाटनजर्जराङ्गं
जीमूतवाहनदशामिव दर्शयन्तम् ।। १९ ।।

अङ्गैरिति । अमन्दम्=निविडं यथा स्यात्तथा हरिचन्दनस्य पंकेन=लेपेन, लिप्तैः=रूषितैः । कृताः=विहिताः, कुंकुमानाम्=केसराणाम्, पत्ररेखाः=पत्रावलयो येषु तैः; अङ्गैः=शरीरावयवैः; पक्षीन्द्रस्य=शकुन्यधीशस्य, गरुडस्येति

[1] भुजाविटपौ--त्रि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यावत्, चञ्चुपुटेन=त्रोटयग्रेण; "चञ्चुस्त्रोटिरुभे स्त्रियाम्" इत्यमरः। यत् पाटनम्=विदारणं तेन जर्जराणि=शिथिलानि, अङ्गानि=अवयवाः यस्यां ताम्। जीमूतवाहनस्य=एतन्नामकस्य गन्धर्वराजस्य, दशाम्=अवस्थाम्, दर्शयन्तम्। इवेत्युत्प्रेक्षायाम्। पुरा किल जीमूतवाहनः समयसंरक्षणाय गरुडस्याहारत्वेन समागतं शङ्खचूड़नामानं सर्पं दयया संरक्षितुं स्वशरीरं गरुत्मते आहारत्वेन दत्त्वा रक्ताप्लुतशरीरोऽभूत्—इति पौराणिकी कथाऽत्रानुसन्धेया ॥ १९ ॥

उस तुषितपति के हरिचन्दन का गाढ़ा लेप लगे हुए, एवं केशर से नानाविध चित्रकारी किये हुए शरीर के अङ्ग ऐसे लग रहे थे मानो गरुड़ पक्षी द्वारा चोंच से विदारित जीमूतवाहन नामक गन्धर्व के शरीर के अङ्ग हों ॥ १९ ॥

नानाविधाभरणरत्नमरीचिदण्डै-
र्दिङ्मण्डलेषु परितः परिजृम्भमाणैः।
आगामिबोधिपदवैभवचिह्नभूता-
मृद्धिप्रदर्शनधुरामिव शिक्षयन्तम् ॥ २० ॥

नानेत्यादि। नानाविधेषु=विचित्रेषु, आभरणेषु=अलङ्करणेषु, यानि रत्नानि=मणिमाणिक्यादीनि, तेषां मरीचिदण्डैः=दण्डसदृशैर्लम्बायमानकिरणैः; दिङ्मण्डलेषु=दिक्समूहेषु, परितः=अभितः; परिजृम्भमाणैः=विवर्धमानैः; सद्भिः; आगामि=भावि, यद् बोधिपदम्=बोधिस्थानम्; बोधिर्नाम समाधिभेदः; "बोधिः पुंसि समाधेश्च भेदे पिप्पलपादपे" इति मेदिनीकोशः। तस्य वैभवस्य=महिम्नः, चिह्नभूताम्=लक्षणभूताम्; दण्डधारणस्य यतिचिह्नत्वादिति भावः। ऋद्धेः=समृद्धेः, प्रदर्शनमेव धूः=भारः, ताम्, शिक्षयन्तम्=बोधयन्तम्। इवेत्युत्प्रेक्षायाम् ॥ २० ॥

धारण किये गये विचित्र अलङ्करणों में जड़े हुए रत्नों से निःसृत चारों ओर फैलने वाली कान्ति से वे तुषितपति ऐसे लग रहे थे मानों भावी बुद्ध के सभी श्रेष्ठ चिह्न उनमें अभी से प्रकट होने लगे हों ॥ २० ॥

आपादपद्ममभितः प्रविजृम्भिताभि-
रम्भोजरागपतपताकाभरणप्रभाभिः।
तस्मात् प्रभृत्युपरिभाविमुनित्वमुद्रां
काषायधारणकलामिव शीलयन्तम् ॥ २१ ॥

आपादेत्यादि। आपादपद्मम्=पदारविन्दमभिव्याप्य, प्रविजृम्भिताभिः=व्याप्ताभिः; अम्भोजरागाणाम्=पद्मरागमणीनाम्; तैः खचितानामित्यर्थः, पताकाभरणानाम्=अलङ्करणविशेषाणाम्, प्रभाभिः=कान्तिभिः तस्मात् प्रभृति=तत आरभ्य; उपरिभाविनः=भविष्यतः, मुनित्वस्य=मुनिभावस्य; मुद्राम्=

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लक्षणम्; कषायेण रक्तं वस्त्रं काषायम्; "तेन रक्तं रागात्" (पा० सू० ४. २. १) इत्यण्प्रत्ययः, आदिवृद्धिः । तस्य धारणम्=परिवेशनमेव, कला=शिल्पम्, ताम्; शीलयन्तम्=अभ्यस्यन्तम् । इवेत्युत्प्रेक्षायाम् ॥ २१ ॥

चरणकमलों तक व्याप्त, पद्मरागमणिनिर्मित उनके पताकाभरण अलङ्कार से ऐसी कान्ति निकल कर उनके शरीर पर पड़ रही थी मानों काषाय वस्त्र धारण किये कोई संन्यासी बैठा हो ॥ २१ ॥

संक्रान्तसौधवलभीमणिपुत्रकेण
वक्षः कवाटफलकेन मनोहरेण ।
साक्षादुरःस्थलविहारिसमुद्रराज-
कन्यस्य कैटभरिपोः कलयन्तमाभाम् ॥ २२ ॥

संक्रान्तेत्यादि । संक्रान्ता=प्रतिफलिता, सौधस्य=प्रासादस्य, वलभ्याम्=गोपानस्याम्, स्थिता, मणिपुत्रिका=रत्नप्रतिमा, यस्मिंस्तेन; मनोहरेण=मनोज्ञेन; वक्षः=उरः; कवाटस्य=कपाटस्य, फलकम्=भागमिव, तेन । "उरो वत्सं च वक्षश्च", "कवाटमररं तुल्ये" इत्युभयत्रामरः । साक्षात्=प्रत्यक्षस्य, उरःस्थले=वक्षसि, विहारिणी=विहरमाणा, समुद्रराजस्य=क्षीराब्धेः, कन्या=लक्ष्मीर्यस्य तस्य । कैटभरिपोः=विष्णोः; आभाम्=शोभाम्, कलयन्तम्=कुर्वन्तम् ॥ २२ ॥

अपने प्रासाद के ऊपरी तल के प्रकोष्ठ में रखी मणिनिर्मित रत्नप्रतिमा की कान्ति छाया से उनका वक्षःस्थल ऐसे शोभित हो रहा था मानो भगवान् विष्णु के वक्षःस्थल पर साक्षात् लक्ष्मी विहार कर रही हो ॥ २२ ॥

निष्यन्दमानमकरन्दनिरन्तरेण
रक्तोत्पलेन करपङ्कजलालितेन ।
सद्यो विपाटनगलद्रुधिरारुणेन
नेत्रोत्पलेन शिविराजमिवोपलक्ष्यम् ॥ २३ ॥

निष्यन्दमानेत्यादि । करपङ्कजाभ्याम्=करकमलाभ्यां लालितेन=आदृतेन; निष्यन्दमानैः=प्रस्रवद्भिः, मकरन्दैः=पुष्परसैः, निरन्तरेण=नीरन्ध्रेण; रक्तोत्पलेन=कोकनदेन; सद्यः=सपदि, विपाटनेन=विदारणेन, गलता=स्रवता, रुधिरेण=रक्तेन, अरुणेन=अरुणवर्णेन, नेत्रोत्पलेन=नयनकमलेन; शिविराजम्=एतन्नामकं राजानम्, उपलक्ष्यम्=अनुमेयम् । पुरा किल शिविचक्रवर्ती अभ्यागताय कस्मैचिद् विप्राय स्वीयनयनद्वयमुत्पाट्य दत्तवानिति पौराणिकी कथाऽत्रानुसन्धेया ॥ २३ ॥

उस तुषिताधिपति के हाथ मे बहते पुष्परसवाला रक्तकमल ऐसा लग रहा था मानो तत्काल कटने के कारण बहते रुधिर से युक्त, राजा शिवि का नेत्रकमल हो ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आलेपचन्दनविसृत्वरगन्धलोभा-
दालीयमानमलिनामभितो निकायम् ।
अज्ञानगाढतिमिरौघमिवान्तरस्थं[1]
तेनैव दिक्षु नितरामपसारयन्तम् ॥ २४ ॥

आलेपेत्यादि । आलेपचन्दनात्=अनुलिप्तचन्दनात्; विसृत्वरे=प्रसरणशीले, गन्धे=सौरभे, लोभात्=ईप्सातः; अलिनाम्=भ्रमराणाम्, निकायम्=सङ्घम्; अभितः=पार्श्वद्वये; आलीयमानम्=आश्लिष्यमाणम्; अन्तरस्थम्=हार्दम्; दिक्षु=काष्ठासु, अज्ञानमेव गाढतिमिरम्=निविडान्धकारः, तस्य ओघम्=समूहम्; तेनैव=रक्तोत्पलेनेव; अपसारयन्तम्=दूरीकुर्वन्तम् । इवेत्युत्प्रेक्षायाम् ॥ २४ ॥

लिप्त चन्दन की फैली गन्ध के लोभ से चारों तरफ मँड़राते भ्रमरसमूह को वे तुषिताधिपति इस तरह दूर हटा रहे थे मानो अपने हृद्गत अज्ञानान्धकारसमूह को दूर भगा रहे हों ॥ २४ ॥

आशामुखप्रसृमरैरभिनन्दनीयै-
राश्चर्यसंहननकान्तिसुधाप्रवाहैः ।
आप्लावयन्तमिव निर्जरराजलोक-
मात्मप्रतापतपनातुरमन्तिकस्थम् ॥ २५ ॥

आशेत्यादि । अभिनन्दनीयैः=प्रशंसनीयैः; आशामुखेषु=दिङ्मुखेषु, प्रसृमरैः=व्यापनशीलैः; आश्चर्यस्य=अद्भुतस्य, संहननस्य=शरीरस्य; "गात्रं वपुः संहननम्" इत्यमरः । कान्तिः=शोभैव सुधा=अमृतम्, तस्याः प्रवाहैः=पूरैः; आप्लावयन्तम्=स्नापयन्तम्; निर्जरराजानाम्=सुरश्रेष्ठानाम्, जनम्=लोकम्, आत्मनः=स्वस्य, प्रतापः=तेज एव, तपनः=सूर्यः; "तपनः सविता रविः" इत्यमरः । तेन, आतुरम्=सन्नप्तम्; अन्तिकस्थम्=समीपस्थम् । इवेत्युत्प्रेक्षायाम् ॥ २५ ॥

वे तुषिताधिपति चारों तरफ फैली अपने शरीर की आश्चर्यमयी आभा से ऐसे शोभित हो रहे थे मानो उनके समीप ही इन्द्रलोक तक पहुँचा उनका अपना प्रतापरूपी सूर्य तप रहा हो ॥ २५ ॥

आलोलबाहुवलयस्खलनारवार-
वाचालिताखिलहरिन्मुखमण्डलीभिः ।
आरादमर्त्यपुरवारविलासिनीभि[2]-
राधूयमानसितचामरचक्रवालम् ॥ २६ ॥

१. मिवान्तिकस्थं—वि० ।　　२. ०मर्त्यवर०—त्रि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आलोलेत्यादि। आलोलानाम्=चञ्चलानाम्, बाह्वोः=भुजयोः, वलयानाम्=कटकानाम्, स्खलनेन=परस्परं सङ्घट्टनेन, य आरावः=शब्दः, तेन अरम्=द्रुतम्, यथा स्यात्तथा; "लघु क्षिप्रमरं द्रुतम्" इत्यमरः; वाचालितानि=मुखरितानि, अखिलानाम्=समग्राणाम्, हरिन्मुखानाम्=आशानाम्; मण्डल्यः=समूहाः, याभिस्तानि; अमरपुरे=देवपुरे, स्थिताभिः, वारविलासिनीभिः=गणिकाभिः, "वारस्त्री गणिका वेश्या" इत्यमरः। आरात्=समन्तात्; आधूयमानम्=वीज्यमानम्; सितानाम्=धवलानाम्, चामराणाम्=बालव्यजनानाम्, चक्रवालम्=मण्डलं यस्मिंस्तम् ॥ २६ ॥

उन तुषिताधिपति पर चञ्चल बाहुओं में खनखनाती चूड़ियों की ध्वनि से सभी दिशाओं को मुखरितकरती हुई देवलोक की अप्सराओं द्वारा सफेद चँवर ढुलाये जा रहे थे ॥ २६ ॥

वक्षःस्थलेन वलमानमनोज्ञहार-
तारावलीवलयिना गगनोपमेन ।
आकाशसिन्धुलहरीपरिरभ्यमाण-
माभासयन्तममराद्रितटावलेपम् ॥ २७ ॥

वक्षःस्थलेनेति। वलमाना=लुठन्ती, मनोज्ञा च या हारतारावली=तारावलीसमो हारः, हारसदृशतारावली च, तस्या वलयः=कटकोऽयमस्मिन्नस्तीति तद्वता, गगनोपमेन=गगनसदृशेन; वक्षःस्थलेन=उरसा; आकाशसिन्धोः=देवनद्याः, लहर्या=तरङ्गेण, प्रवाहेणेति वा। परिरभ्यमाणम्=आश्लिष्यमाणम्; अमराद्रेः=सुमेरुपर्वतस्य, तटस्य=उपत्यकायाः, अवलेपम्=गर्वम्; आभासयन्तम्=परिहसन्तम् ॥ २७ ॥

इन तुषिताधिपति का वक्षःस्थल, जिसपर कि उन्होंने तारासमूह सदृश चमकीला हार पहन रखा था, ऐसा शोभित हो रहा था मानो सुमेरु पर्वत से बहती आकाशगङ्गा नीचे (भूलोक में) आ रही हो ॥ २७ ॥

अम्भोरुहाकृतिमभङ्गुरपद्मराग-
भङ्गीभिरारचितमद्भुतपादपीठम् ।
दानाभिभूतनतपद्मनिधिप्रकाशं
सव्येतरेण चरणेन परामृशन्तम् ॥ २८ ॥

अम्भोरुहेत्यादि। अम्भोरुहस्य=पद्मस्य, आकारम्=आकृतिम्, अभङ्गुराभिः=अक्षयाभिः, पद्मरागाणाम्=पद्मरागमणीनाम्, भङ्गीभिः=विच्छित्तिभिः आरचितम्=निर्मितम्; अद्भुतम्=आश्चर्यमयं पादपीठम्=पादविन्यासपीठम्, दानेन=याचकेभ्यो दानक्रियया, अभिभूतः=धिक्कृतः, नतः=पादनम्रश्च यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पद्मनिधिः=नवसु निधिष्वन्यतमः, तस्येव प्रकाशः=तेजो यस्य तत्; सव्येतरेण= दक्षिणेन, चरणेन=पादेन; परामृशन्तम्=स्पृशन्तम् ॥ २८ ॥

अक्षय पद्मराग मणियों से बने कमल के आकार वाले पद्मनिधि मणि के प्रकाश वाले पादपीठ पर अपना दायाँ चरण रखे हुए वे तुषिताधिपति अत्यन्त शोभित हो रहे थे ॥ २८ ॥

अंघ्रेरलक्तलकरसद्युतिहारिणीभि-
रभ्युद्गताभिररुणांगुलिदीधितीभिः ।
वन्दारुदेववदनाम्बुजबोधनाय
बालातपप्रसरवर्षमिवाचरन्तम् ॥ २९ ॥

अंघ्रेरिति । अंघ्रेः=पादस्य; अलक्तकरसस्य=लाक्षारसस्य, द्युतिम्= कान्ति हरन्ति=मुष्णन्तीति ताभिस्तथोक्ताभिः; अरुणाभिः=रक्ताभिः, अंगुलीनां दीधितिभिः=कान्तिभिः । दीधितिशब्दात् "कृदिकारादक्तिनः" (पा० ग०सू०) इति ङीष्; अभ्युद्गतम्=उन्नतम्; वन्दारूणाम्=देवानां वदनानाम्=मुखाना-मेव, अम्बुजानाम्=पद्मानाम्, बोधनाय=विकासाय, बालातपस्य, प्रसरम्= व्याप्तिमेव, वर्षम्=वृष्टिम्, आचरन्तम्=कुर्वन्तम् । इवेत्युत्प्रेक्षायाम् ॥२९॥

चरणों में लगे महावर के कारण अरुण कान्ति वाली अगुलियों की शोभा से वे तुषितपति ऐसे लग रहे थे मानो देवताओं के कमनीय मुख-कमलों के विकास के लिये बालसूर्य की किरणें बिखेर रहे हों ॥ २९ ॥

नक्षत्रनाथकरकन्दलमांसलेन
नव्येन पादनखदीधितिजालकेन ।
निष्यन्दमानसुरनिर्झरिणीमरन्द[1]-
धाराभिरामचरणाब्जमिवाब्जनाभम् ॥ ३० ॥

नक्षत्रेत्यादि । नक्षत्रनाथस्य=चन्द्रस्य, कराणाम्=किरणानां कन्दलाः= अंकुरा इव मांसलेन=सान्द्रेण; नव्येन=नवीनेन, पादनखानाम्=चरणनखा-नाम्, दीधितिजालकेन=कान्तिसमूहेन; निष्यन्दमाना=प्रवहन्ती या सुरा-णाम्=देवानाम्; निर्झरिणी=नदी, सैव मरन्दधारा=मकरन्दप्रवाहः, तया अभि-रामे=मनोहरे, चरणाब्जे=चरणकमले यस्य तम्; अब्जनाभो यस्य तम्= विष्णुम् । "अच् प्रत्यन्ववपूर्वात्" (पा० सू० ५.४.७५) इति सूत्रे 'अच्' इति योगविभागात् समासान्तोऽच् प्रत्ययः । इवेत्युत्प्रेक्षायाम् ॥ ३० ॥

वे तुषितपति चन्द्रमा के किरणांकुरों से व्याप्त पैरों की नखों के कान्तिसमूह से बहती देवनदी के मकरन्दप्रवाह से सुन्दर लगनेवाले विष्णु लग रहे थे ॥ ३० ॥

१. ०णीममन्द०—म०, वि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारघोरपरितापजुषां जनानां
संरक्षणाय किमयं समयो न वेति ।
जिज्ञासया क्षणमिवावतरीतुकामं[1]
माणिक्यकुट्टिमतलप्रतिमानिभेन ।। ३१ ।।

संसारेति । संसारस्य=जगतः, यो घोरः=भयङ्करः, परितापः=दुःखम्, तं जुषन्ते=भजन्तीति तेषां तादृशानाम्, जनानाम्=लोकानाम्, संरक्षणाय=रक्षायै, किम्, अयम्=एषः, समयः=कालः, अस्ति, न वा-इति जिज्ञासया=ज्ञातुमिच्छया, माणिक्यमये कुट्टिमतले=कुडचतले, प्रतिमानिभेन=प्रतिबिम्बव्याजेन, "सदृशव्याजयोर्निभः" इति त्रिकाण्डशेषः । क्षणमिव=मुहूर्तमिव, अवतरीतुं काम=इच्छा यस्य तम् ।। ३१ ।।

"भयङ्कर दु:ख से दुःखी सांसारिक जनों की रक्षा के लिये लोक में अवतरित होने का यह उचित समय है या नहीं ?"-इस पर विचार करते हुए इन तुषिताधिपति की माणिक्यमय भूप्रदेश पर छाया पड़ रही थी ।। ३१ ।।

दृष्ट्वा जगत्त्रयगुरुं शिरसा प्रणेमु-
र्दूरानतेन तुषितालयपारिजातम् ।
वाचामतीत्य पदवीमभिवर्तमान-
मारेभिरे स्तुतिभिरर्चयितुं च देवाः ।। ३२ ।।

दृष्ट्वेति । तुषितालयस्य=तुषितलोकस्य कृते कल्पद्रुमभूतम्, तम्, जगताम्=लोकानाम्, त्रयस्य=एतत्संख्याकस्य गुरुम्=स्वामिनम्, दृष्ट्वा=विलोक्य, दूरानयेन=दूरत एव नम्रेण शिरसा=मस्तकेन, प्रणेमुः=नमश्चक्रुः । अथ च देवाः, वाचाम्=वाणीनाम्, पदवीम्=स्थानम्, अतीत्य=उलङ्घ्य, अभिवर्तमानम्=स्थितं तम्=तुषिताधिपतिम्, अर्चयितुम्=पूजयितुम्=आरेभिरे=प्रारम्भं चक्रुः ।। ३२ ।।

इस तरह तुषित लोक को, कल्पद्रुम की तरह समग्र अभीष्ट प्रदान करने वाले, तीनों लोकों के स्वामी उन तुषिताधिपति को देखकर उन देवताओं ने उनके प्रति दूर से ही नम्रतापूर्वक झुकते हुए, वाणी से अवर्णनीय उनकी यों स्तुति करने लगे ।। ३२ ।।

तुषिताधिपतेर्देवकृता स्तुतिः

दीनावलोकनदशान्तरजृम्भमाण-
कारुण्यपूरपरिवाहमहाप्रणालैः[2] ।
अस्मानपाङ्गय विनिद्रसरोजमुद्रा-
कर्णजपैस्तव सुरेन्द्र ! कटाक्षपातैः ।। ३३ ।।

१. ०क्षितिमिव—भ० ।
२. परिवार०—म०, त्रि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दीनेत्यादि । हे सुरेन्द्र=सुराधिप ! दीनानाम्=अकिञ्चनानाम्, अवलोकनस्य=दर्शनस्य, अन्तरे=अवसरे; जृम्भमाणः=वर्धमानः, कारुण्यम्=दया एव, पूरः=जलभरस्तस्य परिवाहस्य=प्रवाहस्य, महाप्रणालैः-विशालनिर्गममार्गैः । विनिद्राणाम्=विकचानां सरोजानाम्=कमलानाम्, मुद्रायाः=लक्षणस्य, कर्णेजपैः=सूचकैः, कटाक्षपातैः=दृष्टिपातैः, अस्मान्=एतान् स्तुतिकर्तॄन् देवान्; अपाङ्गय-कृपया विलोकय ॥ ३३ ॥

"हे सुरेन्द्र ! दीनों की दशा देखकर करुणा नदी वहानेवाले आप हम पर खिले कमल के समान अपने नेत्रों से करुणाकटाक्ष फेंकने की कृपा करें ॥ ३३ ॥

स्वैरोज्जिहानसुषमाभरदुग्धसिन्धु-
कल्लोलकन्दलकरम्बितगात्रयष्टे !
चूडावतंस ! तुषितालयदेवतानां
तुभ्यं नमः परमकारुणिकव्रताय ॥ ३४ ॥

स्वैरेत्यादि । स्वैरम्=यथेच्छम्, यथा स्यात्तथा, उज्जिहानः-उदगच्छन्; सुषमां बिभर्त्तीति सुषमाभरः=कान्तिसमूह एव यो दुग्धसिन्धुः-क्षीरसमुद्रः, तस्य कल्लोलकन्दलैः=वीचिकन्दलैः, करम्बिता-व्याप्ता, गात्रयष्टिः=देहदण्डो यस्य तस्य सम्बुद्धौ । हे चूड़ावतंस=शिरोभूषण ! परमम्=मुख्यम्, कारुणिकानाम्=दयालूनाम्, व्रतम्=नियमो यस्य तस्मै; करुणाशीलं स्वभावो येषामिति कारुणिकास्तेषाम् । "स्याद्दयालुः कारुणिकः" इत्यमरः । तुभ्यम्=तुषिताधिपतये; तुषितालयदेवतानाम्=तुषितलोकवासिदेवानाम्; नमः=प्रणामः । अस्त्विति शेष ॥ ३४ ॥

यथेच्छ ऊपर उठती हुई सुषमा वाले क्षीरसमुद्र की ऊँची उठती तरङ्गों से व्याप्त शोभामय शरीरवाले, करुणा का कठिन व्रत लेने वाले आप को हमारा प्रणाम है ॥ ३४ ॥

प्रज्ञाप्रधानमहिषीपदपट्टबन्ध-
सम्भावनातिशयसम्भृतनिर्वृताय[1] ।
सर्वोत्तराश्रमकथामृतपानलीला[2]**-**
गोष्ठीपराय गुणवारिधये नमस्ते ॥ ३५ ॥

प्रज्ञेत्यादि । प्रज्ञायाः-मेधायाः, प्रधानमहिषीपदे-मुख्यमहिषीस्थाने, पट्टबन्धनहेतुना, यः सम्भावनातिशयः=बहुमानातिशयः, तेन सम्भृतम्=पूजितं यथा स्यात् तथा, निर्वृताय=सुखिताय । सर्वोत्तरः-सर्वोत्कृष्टो य आश्रमः-संन्यासाश्रमः, तत्सम्बधिनो कथा एव अमृतम्-सुधा, तस्य पानार्थं या

---

१. ०संभ्रम०-वि०, त्रि० ।	२. शमधनामृत०-वि०, त्रि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लीलागोष्ठी=लीलासम्मर्दः, तस्यां पराय=आसक्ताय, गुणवारिधये=गुणसमुद्राय, ते=तुभ्यम् । युष्मच्छब्दस्य चतुर्थ्येकवचनेऽन्वादेशः । नमः=प्रणामः । अस्त्विति शेषः ॥ ३५ ॥

प्रज्ञा को प्रधान महिषी का पद देकर उसका मान बढ़ाने से सुखी, एवं सर्वोत्कृष्ट आश्रम (सन्यास) की चर्चा करने वाली गोष्ठियों में ही रस लेने वाले आपको हमारा प्रणाम है ॥ ३५ ॥

मैत्रीकलत्रकुचभारपटीरपङ्क-
पत्रावलीमकरिकाङ्कुरमण्डिताय ।
तेजस्तरङ्गितदिगन्तरकन्दराय,
त्रैलोक्यभाग्यपरिपाकभुवे नमस्ते ॥ ३६ ॥

मैत्रीत्यादि । मैत्री एव कलत्रम्=पत्नी, तस्य कुचभारे=स्तनभारे, यः पटीरपङ्कः=चन्दनकर्दमः, पत्रावल्या मकरिकाङ्कुरश्च, ताभ्यां मण्डिताय=अलंकृताय=शोभमानाय । तेजसा=कीर्त्या, तरङ्गिता=व्याप्ता, दिगन्तराणि=दिङ्मुखा एव कन्दरा=गुहा यस्य तस्मै, त्रैलोक्यभाग्यस्य=त्रिलोकीदिष्टस्य यः परिपाकः=फलोन्मुखत्वम्, तस्य भुवे=उत्पत्तिस्थानाय, ते नमोऽस्तु ॥३६॥

मैत्रीरूप पत्नी के स्तनयुगल पर की गयी विविध चित्रावलि से अलंकृत, चारों दिशाओं में फैली कीर्ति वाले, एवं समग्र त्रिलोकी को उसके प्रारब्ध का फल देनेवाले, आपको प्रणाम है ॥ ३६ ॥

मारप्रतापबडवानलकीलजाल-
जाज्वल्यमानजननार्णवधर्मनावे ।
दिक्पालशेखरितशासनपत्रिकाय
दिव्यानुभाव ! जगदेकगुरो ! नमस्ते ॥ ३७ ॥

मारेत्यादि । हे दिव्यानुभाव=हे दिव्यप्रभाव ! हे जगदेकस्वामिन् ! मारप्रतापः=मन्मथतेज एव, बडवानलः=और्वाग्निः, तस्य कीलजालैः=ज्वालासमूहैः; "वाडवो बडवानलः", 'वह्नेर्द्वयोर्ज्वालकीलौ' इत्युभयत्रामरः । जाज्वल्यमानः=प्रदीप्यमानो यो जननार्णवः=संसारसागरः, तस्य; धर्माचरणाय नौकाभूताय, धर्मतरये इति यावत् । दिक्पालैः=दिग्देवैः, शेखरिता=शिरोभूषणीकृता, शिरोभिरुह्यमानेत्यर्थः, शासनपत्रिका=आदेशपत्रमिव, यस्य तस्मै । ते नमः=प्रणामः । अस्त्विति शेषः ॥ ३७ ॥

हे दिव्यशक्तिसम्पन्न ! मार के बढते उन्माद रूप बाड़वाग्नि के ज्वालासमूह से जलते हुए ससारसमुद्र में रक्षा को साधनभूत धर्मनौका के तुल्य, समग्र दिक्पालों को अपने शासन से वश में रखने वाले ! हे जगत् के एकमात्र स्वामिन् ! आपको हमारा प्रणाम है ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निष्यन्दमाननिरपायकृपाप्रवाह-
वीचीविटङ्कवलमानविशालदृष्टे !
ध्यानामृतद्रवतरङ्गितचित्तवृत्ते !
देवादिदेव ! जगदेकदृशे नमस्ते ।। ३८ ।।

निष्यन्दमानेत्यादि । निष्यन्दमानस्य=प्रस्रवमाणस्य, निरपायस्य=अविच्छिन्नस्य, कृपाप्रवाहस्य=करुणापूरस्य, वीचीनाम्=तरङ्गाणाम्, विटङ्केषु=कपोतपालिकासु । "कपोतपालिकायां तु विटङ्कं पुंनपुंसकम्" इत्यमरः । उन्नतप्रदेशेष्विति यावत् । बलमाने=विशाले=दीर्घे, दृष्टी=नेत्रे यस्य, तस्य सम्बुद्धौ । अनेन तस्य दृष्टेः कृपापरिपूर्णत्वमुक्तम् । ध्यानम्=समाधिरेव, अमृतद्रवः=सुधास्यन्दस्तेन तरङ्गिता=आलोडिता, चित्तवृत्तिः=आशयस्तत्सम्बुद्धौ जगताम्=लोकानाम्, एकदृशे=एकचक्षुषे, ज्ञानप्रदायेत्यर्थः । हे देवादिदेव=हे देवेषु प्रमुख ! ते=तुभ्यम्, नमः=प्रणामः । अस्त्विति शेषः ।। ३८ ।।

अविच्छिन्नतया बहते करुणाप्रवाह की ऊँची उठी तरङ्गों से वृद्धिङ्गत विशाल नेत्रोंवाले; ध्यानामृत रस की तरङ्गों से द्रवीभूत चित्तवृत्ति वाले, हे जगत् के एकमात्र पथप्रदर्शक, हे देवाधिदेव ! आप को प्रणाम है ।। ३८ ।।

निर्व्याजकृत्तगलनिर्गलदस्रधारा-
निर्वापितक्षुधितराक्षसजाठराग्ने !
निर्वाणकेलिकृतिनिर्मितिसूत्रधार !
नेत्राभिराम ! सुरराज ! नमो नमस्ते ।। ३९ ।।

निर्व्याजेत्यादि । निर्व्याजम्=निष्कपटं यथा स्यात् तथा कृत्तात्=छिन्नात्, गलात्=कण्ठात्, निर्गलन्त्या=निर्गच्छन्त्या, अस्रधारया=रक्तप्रवाहेण, निर्वापितः=शमितः, क्षुधितस्य-बुभुक्षायुक्तस्य, राक्षसस्य=रक्षसः, जाठराग्निः=उदरवह्निर्येन तस्य सम्बुद्धौ । निर्वाणम्=अपवर्ग एव केलिकृतिः=नाटयम्, तस्य निर्मितौ=प्रवर्तने; सूत्रम्=नाटयसाधनं धारयतीति सूत्रधारः ।

"नाटयोपकरणादीनि सूत्रमित्यभिधीयते ।
सूत्रं धारयतीत्यर्थे सूत्रधारो मतो बुधैः" ।।

इति तल्लक्षणात्, तत्सदृशः प्रारम्भक इति यावत् । नेत्राभ्याम्=लोचनाभ्याम्, अभिरामः=मनोहरस्तत्सम्बुद्धौ; हे सुरराज=देवेन्द्रः ! ते=तुभ्यम्, नमो नमः=मुहुर्मुहुः प्रणामः । अस्त्विति शेषः ।। ३९ ।।

विना किसी कपट के काटे गये गले से बहती रक्तधारा से भूखे राक्षसों की उदराग्नि को शान्त करनेवाले ! हे सूत्रधारभूत ! (सभी तरह से सुन्दर लगनेवाले) हे नयनाभिराम ! आप को बार-बार प्रणाम है ।। ३९ ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गन्धर्वराजमहिलाजनगीयमान-
कीर्त्तिप्रवाहपरिवाहितदिङ्मुखाय ।
भव्यानुरक्षणपराय फलोन्मुखीन-
भाग्याधिकाय भगवन् ! भवते प्रणामः ॥ ४० ॥

गन्धर्वेत्यादि । हे भगवन्=हे प्रभो ! गन्धर्वराजानां महिलाजनैः=स्त्रीजनैः, गीयमानेन कीर्तिप्रवाहेण=यशःपूरेण, परिवाहितानि=प्लावितानि, दिङ्मुखानि=दिग्भागानि यस्य तस्मै । भव्यानाम्=भक्तिनम्राणाम्, अनुरक्षणे=पालने, आसक्ताय=संलग्नाय, फलम्=परिणामं प्रति उन्मुखीनेन=उन्मुखगामिना, फलप्रदेनेत्यर्थः । भाग्येन=दैवेन, अधिकाय, भवते=तुषिताधिपाय, प्रणामः=प्रकर्षेण नतिः । अस्त्विति शेषः ॥ ४० ॥

हे तुषितपते ! चारों दिशाएं गन्धर्वपत्नियों द्वारा गाये जाते आपके यशोगान से प्लावित है । भक्तों की रक्षा में तत्पर, शुभ फल देनेवाले भाग्य से युक्त आपको प्रणाम है ॥ ४० ॥

नित्यप्रवृत्तनिरवद्यमहाप्रदान-
शोभापराजितसुरद्रुमकामधेनो !
शुद्धाशयाय सुचरित्रविभूषणाय
तुभ्यं नमस्तुषितलोकधुरन्धराय ॥ ४१ ॥

नित्येत्यादि । नित्यप्रवृत्तानाम्=अविच्छिन्नानाम्, निरवद्यानाम्=निर्दुष्टानाम्, महाप्रदानानाम्, शोभया=कान्त्या, पराजिते=पराभूते, सुरद्रुमः=कल्पवृक्षः, कामधेनुः=सुरभिश्च येन, तत्सम्बुद्धौ; शुद्धः=पूतः, आशयः=चित्तवृत्तिर्यस्य तस्मै । "अभिप्रायश्छन्द आशयः" इत्यमरः । सुचरित्रम्=शोभनचरित्रमेव विभूषणमलङ्कारो यस्य तस्मै; तुषितलोकस्य धुरन्धराय=भारवहने समर्थाय, तुभ्यम्=तुषिताधिपतये; नमः=प्रणतिः । अस्त्विति शेषः ॥४१॥

निरन्तर की जाती हुई जिसकी शुद्ध दानक्रियाओं से कल्पवृक्ष और कामधेनु—दोनों ही पराजित हो चुके हैं : हे, शुद्ध चित्तवृत्ति वाले, तुषितलोक का विविध भार वहन करने वाले, चरित्रशाली आपको हमारा प्रणाम है ॥ ४१ ॥

राकासुधाकिरणबिम्बमनोऽभिराम-
वक्त्रावधूतवरवारिजवैभवाय ।
शान्ताशयाय शफरध्वजबाहुवीर्य-
मुष्टिन्धयाय मुनिमान्यधिये नमस्ते ॥ ४२ ॥

राकेत्यादि । राकायाः=पूर्णिमायाः, सुधाकिरणस्य=चन्द्रस्य, बिम्बम्=आकार इव यद् वक्त्रम्=मुखम्, तेनावधूतः=तिरस्कृतः, वरवारिजानाम्=श्रेष्ठ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कमलानां वैभवः=माहात्म्यं यस्य तस्मै; शफरध्वजस्य=मकरध्वजस्य, कामदेवस्येति यावत्, यद् बाहुवीर्यम्=भुजबलम्, तस्य मुष्टिं धयतीति तस्मै मुष्टिन्धयाय=विनाशकाय; शान्ताशयाय=शान्तचित्तवृत्तये, मुनिमान्यानाम्=मुनिश्रेष्ठानां या धीः=बुद्धिर्यस्य तस्मै; ते=तुभ्यम्, नमोऽस्तु ॥ ४२ ॥

पूर्णिमा के चन्द्रतुल्य अपनी मुखाकृति से कमलों की शोभा को तिरस्कृत करनेवाले, मकरध्वज के बाहुबल को भी पराजित करनेवाले, शान्तचित्तवृत्तिवाले एवं श्रेष्ठ मुनियों के तुल्य ज्ञानवाले आपको हमारा प्रणाम है ॥ ४२ ॥

शृङ्गारितायतदिगन्तमदावलेन्द्र-
शुण्डारकाण्डपरिभावुकबाहुदण्डम् ।
सौन्दर्यकन्दलितचारुमुखारविन्दं
वन्दामहे वरदराज ! भवन्तमेव ॥ ४३ ॥

शृङ्गारितेत्यादि। हे वरदानाम्=वरप्रदायिनां राजा=श्रेष्ठस्तत्सम्बुद्धौ ! शृङ्गारितः=मण्डितः "शृङ्गारो गजमण्डनः" इति हेमचन्द्रः। आयतः=विस्तृतः दिगन्तमदावलेन्द्रस्य=दिग्गजश्रेष्ठस्य, शुण्डारदण्डः=शुण्डादण्डः, तस्य परिभावुकौ=शोभया निराकरिष्णू, बाहुदण्डौ=भुजदण्डौ यस्य तम्; सौन्दर्येण=सुन्दरतया, कन्दलितम्=युक्तम्, चारु=शोभनम्, मुखारविन्दम्=मुखकमलम्, यस्य तम्। भवन्तम्=तुषिताधिपतिमेव, वन्दामहे=प्रणमामः ॥ ४३ ॥

हे वर देनेवालों में श्रेष्ठ ! अलङ्कृत होने के कारण, दिग्गजों की सूँडों की शोभा को परामूत करने में समर्थ भुजदण्डों वाले, और सौन्दर्यमय मुखाकृति वाले आपको हमारा प्रणाम है ॥ ४३ ॥

वीर ! त्वमेव विजिताखिलदिङ्मुखस्य
मीनध्वजस्य विनिपातविधौ विदग्धः ।
सिंहाद् ऋते जगति कः खलु धीरचेता
दन्तावलं जयति जर्जरिताद्रिकूटम् ॥ ४४ ॥

वीरेति। हे वीर=हे बलशालिन् ! त्वम्=भवानेव; विजितम्=पराजितम्, अखिलम्=समग्रम्, दिङ्मुखम्=आशामुखं येन तस्य; मीनध्वजस्य=मारस्य, मकरध्वजस्येत्यर्थः। विनिपातः=पराजय एव विधिः=व्यापारः, तस्मिन्; विदग्धः=समर्थः असीति शेषः। यतो हि, जगति=लोके; सिंहात्=केसरिणः, ऋते=विना, कः, धीरम्=गभीरम्=चेतः=हृदयं यस्य सः; जर्जरिताः=शिथिलीकृताः, अद्रीणाम्=पर्वतानाम्, कूटाः=शिखराणि येन तम्, दन्तावलम्=गजम्; "दन्ती दन्तावलो गजः" इत्यमरः। जयति=वशीकरोति ॥ ४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हे वीर ! समस्त दिशाओं के विजयी कामदेव (=मार) के समस्त क्रियाकलाप को नष्ट करने में आप ही समर्थ हैं; क्योंकि लोक में सिंह के अतिरिक्त अपने दाँतों से पहाड़ों की बड़ी-बड़ी शिलाओं को भी हिला देने वाले हाथी को दूसरा कौन अपने वश में कर सकता है ॥ ४४ ॥

विद्वेषतापमखिलं जगतां विनेतुं
शक्तस्त्वमेव शरणागतपुण्यराशे !
धाराधरं तरलविद्युतमन्तरेण
दावानलं शमयितुं भुवि: कः क्षमेत ! ॥ ४५ ॥

विद्वेषेत्यादि। शरणम्=रक्षितारम्; "शरणं गृह-रक्षित्रोः" इत्यमरः; आगतानाम्=प्राप्तानाम्; पुण्यराशे=पुण्यसमूहरूप ! जगताम्=लोकानाम्, अखिलम्=सम्पूर्णम्, विद्वेषेण=परस्परं क्रोधेन जनितं तापम्=औष्ण्यम्; विनेतुम्=नाशयितुम्; त्वमेव=भवानेव, शक्तः समर्थः; असीति शेषः। यतो हि भुवि=लोके, तरला=चञ्चला, विद्युत्=तडित् यस्य तम्; धाराधरम्=जलधरम्; "धाराधरो जलधरः" इत्यमरः। अन्तरेण=विना; दावानलम्=वनाग्निम्; "वने च वनवह्नौ च दवो दाव इहेष्यते" इति यादवः। शमयितुम्=शान्तं कर्तुम्; (अन्यः) कः क्षमेत=समर्थो भवेत् ॥ ४५ ॥

हे पुण्यराशे ! शरण में आये सभी लोगों की, जो कि क्रोधाग्नि से जल रहे हैं, रक्षा करने में आप ही समर्थ हैं; क्योंकि संसार में जल से भरे मेघों के अतिरिक्त वनाग्नि को कौन शान्त कर सकता है !॥ ४५ ॥

मोहान्धकारमुषितानि जगत्त्रयाणि
पुण्याधिक ! त्वमसि बोधयितुं प्रवीणः।
को वा विकासयितुमर्हति कोकबन्धुं
भानुं विना शरदि पङ्कजकाननानि ॥ ४६ ॥

मोहेत्यादि। पुण्यमेवाधिकं यस्य सः, तत्सम्बुद्धौ पुण्याधिक !=अतिपुण्यमय ! जगत्त्रयाणि=लोकत्रयाणि; मोह एवान्धकारस्तेन मुषितानि=मोषमाप्तानि; नष्टज्ञानानीत्यर्थः। बोधयितुम्=ज्ञापयितुम्; त्वमेव प्रवीणः=चतुरः; असि=वर्तसे। यतो हि शरदि=शरदृतौ; पङ्कजकाननानि=कमलवनानि; विकासयितुम्=प्रकाशयितुम्; कोकानाम्=चक्रवाकाणाम्; "कोकश्चक्रश्चक्रवाकः" इत्यमरः; बन्धुम्=प्रियम्; भानुम्=सूर्यं विना=अन्तरेण, कः अर्हति=शक्नोति ॥ ४६ ॥

हे अतिशय पुण्यशालिन्, मोहान्धकार से विनष्ट ज्ञान वाले तीनों लोकों को आप ही ज्ञान देकर सन्मार्ग पर प्रवृत्त करने में समर्थ हैं; क्योंकि कमलसमूह को चक्रवाकहितकारी सूर्य के अतिरिक्त कौन विकसित कर सकता है ! ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृष्णाप्रवाहमवशोषयितुं जनानां
तेजस्विनामधिप ! दक्षतरस्त्वमेव ।
कल्पावसानबडवानलमन्तरेण
कः पारयेज्जगति पातुमपामधीशम् ॥ ४७ ॥

तृष्णेत्यादि । हे तेजस्विनामधिप=प्रतापिनामधीश्वर ! जनानाम्=लोकानाम्; तृष्णायाः=वासनायाः, सन्ततिम्=जालम्; अवशोषयितुम्=शुष्कीकर्तुम्, नाशयितुमिति यावत्, त्वमेव=भवानेव; दक्षतरः=पटुतरः । असीति शेषः । अपामधीशम्=समुद्रम्, अन्तरेण=विना; कल्पावसाने=प्रलयकाले; "सम्वर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि" इत्यमरः । बडवानलम्=बाडवाग्निम्, पातुम्=शोषयितुम्, कः पारयेत्=शक्नुयात् ॥ ४७॥

हे तेजस्वियों में श्रेष्ठ ! लोगों के तृष्णा (वासना) जाल को नष्ट करने में आप ही प्रवीण हैं; क्योंकि समुद्र के विना प्रलयकाल की वाडवाग्नि को शान्त करने में और कौन समर्थ हो सकता है ! ॥ ४७ ॥

धीर ! त्वमेव जननाम्बुनिधेस्त्रिलोकीं
पारं परं गमयितुं पटुतामुपैषि ।
को वा विहाय भुवने कुहनावराहं
क्षोणीसमुद्धृतिविधौ कुशलः पयोधेः ॥ ४८ ॥

धीरेति । हे धीर=हे धैर्यशालि !, त्रिलोकीम्=जगत्त्रयम्, जननस्य=जन्मनः, अम्बुनिधेः=समुद्रस्य, परम्=अन्तिमम्, पारम्=तटम्, गमयितुम्=प्रेषयितुम्; त्वमेव=भवानेव, पटुताम्=दक्षताम्; उपैषि=प्राप्नोषि । भुवने=लोके; पयोधेः=समुद्रात्; क्षोण्याः=पृथिव्याः, समुद्धृतिविधौ=समुद्धरणकर्मणि; कुहनया=कपटेन, वराहम्=वराहरूपधारिणम्, विष्णुमित्यर्थः, विहाय=त्यक्त्वा; कः कुशलः=प्रवीणः; अस्तीति शेषः ॥ ४८ ॥

हे धैर्यशालिन् ! इस संसार को जन्म-मरणरूप समुद्र के उस पार पहुँचाने में आप ही कुशल हैं । ऐसी ही कुशलता वराहावतार धारण कर राक्षस द्वारा समुद्र डुबोयी गयी पृथ्वी का उद्धार करते हुए विष्णु ने भी दिखायी थी ॥ ४८ ॥

इत्थं सुपर्वविहितां स्तुतिमादरेण
श्रुत्वा प्रसन्नहृदयस्तुषिताधिराजः ।
गम्भीरवारिधरगर्जितमन्दरेण
तान् प्रत्युवाच वचसा मधुराक्षरेण ॥ ४९ ॥

इत्थमिति । इत्थम्=अनेन प्रकारेण, सः, तुषिताधिराजः=तुषितदेवलोकाधिपतिः; सुपर्वविहिताम्=देवैः कृताम्, स्तुतिम्=स्तोत्रम्; श्रुत्वा=

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आकर्ण्य; प्रसन्नहृदयः=प्रीतिमनाः सन्; गम्भीरं यद् वारिधराणाम्=मेघानां गर्जितम्=ध्वनिः, तदिव मन्दरेण=बहलेन; "मन्दरो मन्थपर्वते। स्वर्गमन्दारयोर्मन्दे बहले" इति हेमचन्द्रः। मधुराणि=स्वादूनि, प्रियाणि हितकराणि चेत्यर्थः, अक्षराणि=वर्णानि यस्मिंस्तेन, वचसा=वाण्या, तान्=देवान्, प्रत्युवाच=उत्तरं दत्तवान् ॥ ४९ ॥

इस तरह उन तुषिताधिपति ने देवताओं द्वारा की गयी स्तुति सुनने से प्रसन्न होकर प्रिय और हितकर एवं मधुर पदावलियुक्त वाणी से यों प्रत्युत्तर दिया ॥ ४९ ॥

तुषिताधिपतेः पिपृच्छा

भो भोः पुरन्दरमुखा हरिदन्तपालाः
सम्भूय यूयमिह सादरमागताः किम् !
कार्यं मया किमपि चेद् भवतामभीष्ट-
मावेद्यतामलमिह स्तुतिसम्पदेति ॥ ५० ॥

भो भोरिति। यूयम्=भवन्तः; पुरन्दरमुखाः=इन्द्राद्याः; हरिदन्तपालाः=दिक्पालाः; इह=मम समीपे; सम्भूय=मिलित्वा; किम्=केन कार्येण, सादरम्=ससम्मानम्; आगताः=आयाताः; स्थ इति शेषः। चेद्=यदि; भवताम्=युष्माकम्; किमपि किञ्चिदपि; कार्यम्=प्रयोजनम्, अभीष्टम्=अभिलषितम्; अस्तीति शेषः। तर्हि तत्=अभीप्सितकार्यम्; आवेद्यताम्=निवेद्यताम्। (मम) स्तुतिसम्पदा=स्तोत्रातिशयेन; अलम्=न किमपि कार्यं सेत्स्यतीति भावः। अत्र निषेध्यस्य निषेध्यं प्रति करणत्वात् तृतीया ॥ ५० ॥

आप इन्द्रादि दिक्पाल इकट्ठे होकर किस विशेष कार्य की पूर्ति कराने हेतु मेरे पास आये हैं ? यदि आपका कोई अभिलषित प्रयोजन हो तो कहो। यों केवल स्तुति करने से तो आप लोगों का क्या प्रयोजन सिद्ध नहीं होगा ! ॥ ५० ॥

देवानां निवेदनम्

तेऽपि प्रसन्नमनसः प्रणिपत्य तस्मै
व्यज्ञापयन् विनयनम्रितपूर्वकायाः।
देवाधिदेव ! जगतामवबोधनाय,
सन्तिष्ठते समुचितोऽवसरस्तवेति ॥ ५१ ॥

तेऽपीति। ते=देवा अपि, प्रसन्नमनसः=प्रसन्नहृदयाः सन्तः, तम् प्रणिपत्य=प्रणामं कृत्वा; विनयेन नम्रितः=नामितः कायस्य पूर्वभागो यैस्ते, सन्तः, तस्मै=तमनुकूलयितुम्; "क्रियार्थोपपदस्य कर्मणि०" (पा० सू० २.३.१४) इति चतुर्थी। "देवानामधिदेव=देवानामधीश्वर ! जगताम्=लोकानाम्, अवबोधनाय=ज्ञानाय; तव=त्वत्कृते; समुचितः=अनुकूलः; अवसरः=समयः; सन्तिष्ठते=सम्प्राप्तः"—इति व्यज्ञापयन्=विज्ञापयन्ति स्म।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'सन्तिष्ठते' इत्यत्र "समवप्रविभ्यः स्थः" (पा० सू० १.३.२२) इति सूत्रेणात्मनेपदम् ॥ ५१ ॥

तब (यह सुनकर) प्रसन्नचित्त हो उन देवताओं ने तुषिताधिपति को पुनः प्रणाम कर, उनके सामने नम्र हो, उन्हें अपने अनुकूल बनाने के लिये, उनसे यह निवेदन किया—"हे प्रभो ! देवाधिदेव ! लोगों को सन्मार्ग (निर्वाण) पर चलने हेतु आप के द्वारा ज्ञान प्रदान करने के लिये अब उचित अवसर आ गया है" ॥५१॥

आकर्ण्य तद्वचनमश्रुतपूर्वमेषां
कालादिचिन्तनपरः क्षणमेष भूत्वा ।
निश्चित्य तत् सकलमेव निधिर्गुणानां
प्रत्यब्रवीत् पुनरमून् प्रथितापदानः ॥ ५२ ॥

आकर्ण्येत्यादि । एषः=तुषिताधिपः; एषाम्=इन्द्रादिदेवानाम्; अश्रुतपूर्वम्=पूर्वमश्रुतम्, तद्वचनम्=जगतामवबोधनरूपम्, आकर्ण्य=श्रुत्वा, क्षणम्=किञ्चित् कालम्; कालादीनाम्=काल-देश-व्यक्त्यादीनां चिन्तने=आलोचने परः=आसक्तो भूत्वा, सः प्रथितम्=प्रख्यातमपदानम्=वृत्तकर्म यस्य सः, गुणानां निधिः=गुणानिधानम्; सकलम्=उपर्युक्तं कालदेशादिकं निश्चित्य=विचार्य, अमून्=सम्मुखस्थान् देवान्; प्रत्यब्रवीत्=प्रत्युत्तरं दत्तवान् ॥ ५२ ॥

देवताओं का यह निवेदन सुनकर कुछ क्षण, भूलोक में अवतरित होने के लिये काल, देश व व्यक्ति का विचार करते हुए तुषिताधिपति ने उसको यह कहा ॥ ५२ ॥

तुषिताधिपतेः प्रतिज्ञा

शुद्धोदनस्य सुततामहमेत्य सत्यं
सम्बोधनं त्रिजगतां नियतं करिष्ये ।
अङ्गैर्धनैरसुभिरप्यहमेतदेव
सम्प्रार्थ्य पुण्यनिचयं कृतवान् पुरेति ॥ ५३ ॥

शुद्धोदनस्येति । (भो देवाः !) शुद्धोदनस्य=एतन्नाम्नो राज्ञः, सुतताम्=पुत्रभावमेत्य=प्राप्य, अवश्यमेव त्रि जगताम्=लोकत्रयस्य, सम्बोधनम्=सम्यक्तत्त्वबोधनम्, नियतम्=निश्चयेन; करिष्ये=विधास्यामि । अहम्=तुषिताधिपतिरपि; पुरा=पूर्वस्मिन् काले, अङ्गैः=शरीरावयवैः, धनैः=वित्तैः, असुभिः=प्राणैः, "पुंसि भूम्न्यसवः प्राणाः" इत्यमरः; एतदेव=लोकत्रयसम्बोधनमेव सम्प्रार्थ्य=सङ्कल्पं कृत्वा; पुण्यनिचयम्=पुण्यराशिम्, नानाविधपुण्यानि कृतवान् । इतिः निश्चयार्थे ॥ ५३ ॥

हे देवगण ! शुद्धोदन राजा के घर में मैं पुत्ररूप में अवतार लूंगा; क्योंकि मैंने अपने पूर्वजन्मों में, लोगों को सम्बोधि तक पहुँचाने के लिये ही, अपने तन और

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घन या प्राणों की बलि देते हुए विविध पुण्य कार्य किये हैं, जिनसे मैं बुद्धभाव प्राप्त कर सकूँ। अब वह अवसर आ गया है ।। ५३ ।।

इति कृतवति तस्मिन् सत्यसन्धे प्रतिज्ञां
परहितपरभावे पारमीपारनिष्ठे ।
प्रमुदितमनसस्ते स्फीतरोमाञ्चदण्ड-
प्रचयनिचुलिताङ्गाः प्रत्यगच्छन् यथेच्छम् ।। ५४ ।।

इतीति । इति=इत्थम्, सत्या=तथ्या, सन्ध्या=प्रतिज्ञा यस्य तस्मिन्; "सन्ध्या स्थितिप्रतिज्ञयोः" इति हेमचन्द्रः । परेषाम्=अन्येषाम्, हिते=अर्थे, परः=उत्कृष्टो भावः=आशयो यस्य तस्मिन्; परमस्य भावः पारमी; अत्र भाव-ष्यङन्तात् स्त्रियां ङीष्; तस्या प्रज्ञादिमुख्यतायाः पारे निष्ठा=व्यवस्थिति-र्यस्य तस्मिन्; "निष्ठोत्कर्षव्यवस्थयोः" इति हेमचन्द्रः । तस्मिन्=तुषिताधि-पतौ; प्रतिज्ञाम्=शपथम्; कृतवति=विहितवति सति, ते=देवाः; स्फीतानाम्=प्रवृद्धानाम्, रोमाञ्चदण्डानाम्=दण्डाकारपुलकानाम्, प्रचयेन=समूहेन, विपु-लितानि=आवृतानि, अङ्गानि=अवयवा येषां ते; प्रमुदितमनसः=प्रसन्नहृदयाः सन्तः; यथेच्छम्=यथाभिलषितम्, प्रत्यगच्छन्=प्रतिनिवृत्ताः ।। अत्र **मालिनी** वृत्तम् । लक्षणं तु पूर्वं प्रथमसर्गन्ते उक्तम् ।। ५४ ।।

इस तरह उन सत्यप्रतिज्ञ, परहित के लिये उत्कृष्ट भाव वाले, प्रज्ञादिपारमिताओं के किनारे तक पहुँचे तुषिताधिपति के यह कहे जाने पर, अपनी प्रार्थना मान लिये जाने से पुलकित इन्द्रादि देवता यथाभिलषित स्थानों को लौट गये ।। ५४ ।।

अथ कानिचिदेव वासराणि क्षपयित्वा त्रिदिवे स देवराजः ।
विदधे विविधव्रतोज्ज्वलायां प्रतिसन्धिं पृथिवीपतेर्महिष्याम् ।।५५।।

इति बुद्धघोषविरचिते पदयचूडामणिनाम्नि महाकाव्ये द्वितीयः सर्गः ।।

अथेति । अथ=एतदनन्तरम्, सः देवराजः=तुषिताधिपतिः; कानिचिदेव वासराणि=दिनानि, त्रिदिवे=तुषितलोके, क्षपयित्वा=यापयित्वा, पृथ्वीपतेः=राज्ञः शुद्धोदनस्य । विविधैः=नानाप्रकारैः, व्रतैः=उपवासादिभिः, उज्ज्वला-याम्=दीप्तायाम्, महिष्याम्=पट्टाभिषिक्तायाम्, प्रतिसन्धिम्=गर्भप्रवेशम्, विदधे=कृतवान् । **वियोगिनी** वृत्तम् । विषमे स-स-जा गुरुः समे स-भ-रा लोऽथ गुरुर्वियोगिनी" इति लक्षणात् ।। ५५ ।।

इति पदयचूडामणिमहाकाव्यस्य कीर्तिव्याख्यायां द्वितीयः सर्गः ।।

प्रतिसन्धि ग्रहण—उधर वे तुषिताधिपति भी, उसी तुषित पुरी में कुछ समय बिता कर, राजा शुद्धोदन के घर में नानाविध व्रतों से पवित्र हुई महारानी मायादेवी की कोख में विराजमान हुए ।। ५५ ।।

पद्यचूड़ामणि महाकाव्य के दूसरे सर्ग का हिन्दीभाषान्तर पूर्ण ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृतीयः सर्गः

दौहृदलिङ्गाधानम्

अथोदयं[1] शाक्यमहीपतीनामानन्दमालीजनलोचनानाम् ।
आश्वासनं सज्जनमानसानामाधत्त सा दौहृदलिङ्गमार्या ॥ १ ॥

अथेति । अथ=गर्भप्रवेशानन्तरम्; सा आर्या=श्रेष्ठा राज्ञी मायादेवी; शाक्यमहीपतीनाम्=शाक्यान्वयवंशजानां राज्ञाम्; उदयम्=अभिवृद्धिकरम्; आलीजनलोचनानाम्=सखीजननेत्राणाम्; आनन्दम्=सुखदायकम्; सज्जनमानसानाम्=सज्जनहृदयानाम्, आश्वासनप्रदम्, दौहृदलिङ्गम्=गर्भलक्षणम्, "दोहदं दौहृदं श्रद्धा लालसा सूतिमासि तु" इति हेमचन्द्रः । आधत्त=दधार । अस्मिन् सर्गे **उपजाति**वृत्तम् ॥ १ ॥

उस तुषिताधिपति द्वारा मायादेवी के गर्भ में प्रतिसन्धि ग्रहण के बाद महारानी के शरीर में, शाक्यकुल के राजाओं के लिये अभिवृद्धिकारक, एवं मायादेवी की सखियों के लिये आनन्दकारक तथा सज्जनों के हृदय में धर्माभिवृद्धि के लिए आश्वासन प्रदान करने वाले गर्भ चिह्न प्रकट होने लगे ॥ १ ॥

गर्भलक्षणवर्णनम्

विवर्धमानेन च मध्यमेन श्यामायमानेन च चूचुकेन ।
गर्भोदयोऽभूदलसेक्षणायास्तस्याः सखीनामनुमानगम्यः ॥ २ ॥

अथ कविः सप्तभिः पद्यैर्मायादेव्या गर्भलक्षणानि वर्णयति **विवर्धमानेने**त्यादिना । मध्येन=मध्यभागेन, विवर्धमानेन=वृद्धिं प्राप्नुवता, चूचुकेन=स्तनाग्रभागेन च, श्यामायमाने=कार्ष्ण्यं धारयता, अलसेक्षणायाः=अलसे ईक्षणे=नेत्रे यस्यास्तस्याः, तस्याः=मायादेव्याः, गर्भोदयः=गर्भधारणम्, सखीनाम्-आलीजनानाम्, अनुमानेन-अनुमित्या, गम्यः=ज्ञेयः, अभूत्=जातः ॥ २ ॥

गर्भलक्षण—उस आलस्य भरे नेत्रों वाली मायादेवी के शरीरगत मध्यभाग का धीरे धीरे स्थूलता प्राप्त करना, एवं स्तनों के अग्र भाग का काला पड़ना देखकर उसकी सखीजनों को यह अनुमान होने लगा कि अब रानी गर्भस्थिति प्राप्त कर चुकी है ॥ २ ॥

महामुनीनामपि माननीये गर्भत्वमातस्थुषि बोधिसत्त्वे ।
मध्यस्तदीयो मनसोऽपि सूक्ष्मः प्रियादिव स्फीततरो बभूव ॥ ३ ॥

---

१. अथोहितं—प०; अथोत्सवं-त्रि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महामुनीनामिति। महामुनीनाम्-मुनिश्रेष्ठामपि, माननीये-पूज्ये, बोधिसत्त्वे=तस्मिन् तुषिताधिपतौ, गर्भत्वम्=गर्भस्थत्वम्, आतस्थुषि=अधिष्ठिते, सति; तस्याः-मायादेव्याः, मनसः=अणुपरिमाणादपि चित्तात्, सूक्ष्मः=सूक्ष्मतरो मध्यः-मध्यभागः, प्रियादिव-गर्भधारणनिमित्तकानन्दादिवेति हेतूत्प्रेक्षा। स्फीततरः=अत्यन्तं स्फीतः, विस्तृत इत्यर्थः। बभूव=अभूत् ॥ ३ ॥

श्रेष्ठ मुनियों द्वारा भी सम्मान प्राप्त उस बोधिसत्त्व के मायादेवी के गर्भ में आ चुकने पर, उस मायादेवी के मनसे भी सूक्ष्म शरीर का मध्य भाग गर्भधारण-निमित्तक आनन्द से और भी सुन्दर लगने लगा ॥ ३ ॥

यथा यथा वृद्धिमवाप तस्या मध्यं महिष्या महनीयमूर्त्तेः।
तथा तथा वृद्धिमवाप गात्रमपुत्रताशोककृशस्य भर्त्तुः॥ ४ ॥

यथा यथेति। तस्याः महनीयमूर्त्तेः-प्रशस्ताकृतेः, महिष्याः=मायादेव्याः, मध्यम्-शरीरमध्यभागः, यथा यथा-येन येन प्रकारेण, वृद्धिम्=वर्धनम्, अवाप=प्राप्तवान्, तथा तथा=तेन तेन प्रकारेण, तस्याः भर्तुः=राज्ञः शुद्धोदनस्य, अपुत्रतया=पुत्राभावेन, कृशस्य=दीनस्य, सतः, गात्रम्=शरीरम्; वृद्धिमवाप ॥ ४ ॥

आकृति से सुन्दर दिखायी देने वाली उस रानी के शरीर का मध्यभाग गर्भधारण के कारण ज्यों ज्यों बढ़ने लगा, त्यों त्यों उनके पति राजा का शरीर भी, जो कि पुत्र न होने की चिन्ता से कृश होता जा रहा था, अब भावी पुत्र-प्राप्ति के आनन्द के कारण, बढ़ने (मोटा होने) लगा ॥ ४ ॥

स्तनद्वयस्याग्रमभूद् विवर्णं साकं सपत्नीवदनेन तस्याः।
किञ्चाननं गर्भभरालसायाः कीर्त्या समं पाण्डुरमास भर्त्तुः ॥ ५ ॥

स्तनद्वयेति। गर्भभरालसायाः=गर्भभारेण स्तब्धायाः; तस्याः=महिष्या मायादेव्याः; स्तनद्वयस्य=चूचुकद्वयस्य, अग्रम्=अग्रभागम्, समानः पतिर्यासां तासां मुखेन=आननेन; साकम्=सार्धम्, विवर्णम्=विकृतवर्णं नीलवर्णमित्यर्थः; अभूत्=बभूव। किञ्च=अथ च; तस्या आननम्; भर्तुः=राज्ञः शुद्धोदनस्य; कीर्त्या=यशसा, समम्=सह, पाण्डुरम्=धवलम्; "हरिणः पाण्डुरः पाण्डुः" इत्यमरः। आस=बभूव। मायादेव्याः स्तनाग्रनीलिम्ना गर्भमनुमाय सपत्न्यः ईर्ष्यया विवर्णवदना बभूवुरिति भावः। अत्र सहोक्तिरलङ्कारः॥ ५ ॥

गर्भ के कारण शरीर के अवयवों में आलस्य का अनुभव करती हुई उस महारानी मायादेवी के स्तनों का अग्रभाग, सौतों के मुख की तरह काला (विवर्ण) हो

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चला और उसकी मुखाकृति भर्ता (राजा) के यश की तरह धवल (श्वेत) होती गयी ॥ ५ ॥

अन्तर्गतस्याद्भुतविक्रमस्य विश्वत्रयीविस्मयनीयमूर्त्तेः ।
प्रतापवह्नेरिव धूमजालैस्तस्याः स्तनः श्याममुखो बभूव ॥ ६ ॥

अन्तर्गतस्येति । तस्याः=मायादेव्याः; स्तनः=चूचुकः; अन्तर्गतस्य=गर्भगतस्य; अद्भुतविक्रमस्य=विस्मयनीयपराक्रमस्य; विश्वानाम्=लोकानाम्, त्रय्या=त्रयेण, विस्मयनीया=आश्चर्यं प्रापणीया, मूर्त्तिः=शरीरं यस्य तस्य; "विश्वं कृत्स्ने च भुवने विश्वदेवेषु नागरे" इति विश्वः"; "स्त्रियां मूर्तिस्तनुस्तनूः" इत्यमरः । प्रतापवह्नेः=प्रतापाग्नेः; धूमजालैः=धूमसमूहैरिव; श्याममुखः=नीलाग्रभागो बभूव=अभूत् इवेत्युत्प्रेक्षायाम् ॥ ६ ॥

उस रानी के स्तन गर्भगत, अद्भुत विक्रमशाली, एवं तीनों लोकों के लिये आश्चर्यमय शरीर वाले बोधिसत्त्व की प्रतापाग्नि के धूएँ से मानों काले पड़ने लगे ॥ ६ ॥

तस्याः स्तनद्वन्द्वमनिन्दिताङ्ग्याः श्यामं शिखायामवशेषपाण्डु ।
तटाभिघाताहितपङ्कमुद्रामाधत्त नागाधिपकुम्भलक्ष्मीम् ॥ ७ ॥

तस्या इति । अनिन्दितानि=अनवद्यानि, अङ्गानि=अवयवा यस्यास्तस्या=मायादेव्याः; स्तनद्वन्द्वम्=स्तनयुगलम्; शिखायाम्=अग्रभागे, "शिखाग्रमात्रे चूड़ायाम्" इति हेमचन्द्रः । श्यामम्=नीलवर्णम्, अवशेषे=अग्रभिन्नप्रदेशे; पाण्डु=धवलं (भूत्वा); तटस्याभिघातेन=तिर्यग्दन्तप्रहारेण, आहिता=उत्पादिता, पङ्कमुद्रा=कर्दमचिह्नम्, ताम्; नागाधिपस्य=गजपतेः, ऐरावतस्येत्यर्थः, कुम्भयोः=गण्डस्थलयोः, शोभाम्=कान्तिम्; आधत्त=दधार ॥ ७ ॥

उस प्रशस्त अङ्गों वाली महिषी के स्तनों के अग्रभाग श्यामवर्ण एवं अवशिष्ट भाग धवल वर्ण वाले होकर ऐसे लग रहे थे मानों दन्तप्रहार के कारण तटाभिघात से उछली कीचड़ गजराज के गण्डप्रदेश की शोभा बढ़ा रही हो ॥ ७ ॥

गर्भरक्षा

वृद्धा वितेनुर्विविधौषधीभिः पुत्रस्य रक्षामुदरस्थितस्य ।
सैव स्मरोपद्रवपीडितानां बभूव रक्षा भुवनत्रयाणाम् ॥ ८ ॥

वृद्धा इति । वृद्धाः=वयोवृद्धाः स्त्रियः; विविधौषधीभिः=नानाविधैरौषधविशेषैः; उदरस्थितस्य=गर्भस्थस्य; पुत्रस्य=शिशोः; रक्षाम्=रक्षणकर्म; वितेनुः=विस्तारयामासुः । सैव=उदरस्थशिशोः रक्षणक्रियैव; स्मरोपद्रवेण=मन्मथबाधया पीडितानाम्=सन्तप्तानाम्; भुवनत्रयाणाम्=लोकत्रयाणाम्; रक्षा=पालनम् बभूव=अभूत् । मारं जेष्यतोऽस्य रक्षया जगत्त्रयमपि माराद्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रक्षितमिति भावः। अत्र भुवनत्रयाणामिति उद्भूतावयवभेदविवक्षया बहुवचनमिति बोध्यम् ॥ ८॥

उस समय कुल की वयोवृद्ध स्त्रियाँ नानाविध ओषधियों से उदरस्थित गर्भ की यों रक्षा कर रही थीं मानो कामोन्माद से पीड़ित तीनों लोकों की रक्षा कर रही हों (ताकि बाद में यह शिशु लोक में मार से लोकत्रय की रक्षा करे) ॥ ८ ॥

पुंसवनादि कृत्यम्

पुण्ये मुहूर्त्ते पुरुहूतलक्ष्मीः कुलानुरूपं गुरुगर्भवत्याः।
यथाक्रमं पुंसवनादि कृत्यं निर्वर्तयामास नृपो महिष्याः॥ ६ ॥

पुण्ये इति। स पुरुहूतस्य=इन्द्रस्येव लक्ष्मीः=शोभा यस्य सः; नृपः=राजा; पुण्ये=पवित्रे; मुहूर्ते=काले; गुरुगर्भवत्याः=प्रवृद्धगर्भायाः स्वकीयभार्यायाः; महिष्याः=मायादेव्याः; यथाक्रमम्=क्रममनतिक्रम्य, आनुपूर्व्येणेत्यर्थः। पुंसवनमादि यस्य तत्, पुमान् सूयतेऽनेनेति पुंसवनम्। आदिना सीमन्तोन्नयनस्य परिग्रहः। कृत्यम्=कर्म; कुलानुरूपम्=स्ववंशानुकूलम्; निवर्तयामास=समपादयत् ॥ ६ ॥

इन्द्रतुल्य शोभा वाले राजा शुद्धोदन ने, पवित्र मुहूर्त आने पर, उस मायादेवी का यथाक्रम पुंसवनादि कर्म भी सम्पन्न किया ॥ ६ ॥

पुत्रोत्पत्तिः

प्रभातवेलेव सहस्रभानुं प्रदोषलक्ष्मीरिव शीतरश्मिम्।
भद्रे मुहूर्ते नृपधर्मपत्नी प्रासूत पुत्रं भुवनैकनेत्रम् ॥ १० ॥

प्रभातेत्यादि। सा नृपधर्मपत्नी=राजमहिषी मायादेवी, भद्रे=मङ्गलमये; "श्वः श्रेयसं शिवं भद्रम्" इत्यमरः। मुहूर्ते=काले; भुवनस्य=जगतः, एकनेत्रम्=मुख्यचक्षुर्भूतम्, ज्ञानप्रदमित्यर्थः; पुत्रम्=सुतम्; सहस्रभानुम्=सूर्यम्, प्रभातवेला=प्रातःकाल इव; शीतरश्मिम्=चन्द्रम्; प्रदोषलक्ष्मीः=शुभरात्रिरिव, प्रासूत=सुषुवे ॥ १० ॥

(यह सब होने पर) प्रभात वेला में जैसे सूर्य उदित होते हैं, तथा रात्रि में चन्द्रमा उदित होते हैं, उसी तरह उस राजमहिषी ने मङ्गलमय मुहूर्त में तीनों भुवनों के लिये एकमात्र ज्ञानप्रद पुत्र उत्पन्न किया ॥ १० ॥

तदीयमाहात्म्यसूचकानि असाधारणानि आश्चर्यजातानि

तत्रान्तरे तामरसैरुदारैरुदञ्चितै रञ्चितपञ्चवर्णैः।
सञ्छादिता तस्य विहारहेतोः कृतोपहारेव[1] बभूव पृथ्वी ॥ ११ ॥

महात्मनस्तस्यावतारकाले तदीयमाहात्म्यसूचकान्याश्चर्यजातानि कविर्वर्णयति एकादशभिः पद्यैः। **तत्रान्तरे** इति। तत्रान्तरे=सिद्धार्थावतारसमये

१. कृतोपकारेव–म०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदारैः=महद्भिः; "उदारो दातृमहतोः" इत्यमरः। उदञ्चितैः=तद्गतैः, अञ्चितपञ्चवर्णैः=वर्णपञ्चकालंकृतैः; तामरसैः=पद्मैः; "पङ्केरुहं तामरसं सारसं सरसीरुहम्" इत्यमरः, सञ्छादिता=सञ्छन्ना, पृथ्वी=भूमिः; तस्य=सिद्धार्थस्य बोधिसत्त्वस्य; विहारहेतोः=क्रीडाहेतोः; कृतः=अर्पितः, उपहारः=उपायनं यया सा; बभूव=जाता। इवेत्युत्प्रेक्षायाम् ॥ ११ ॥

असाधारण आश्चर्यजात—इस बोधिसत्त्व के अवतार के समय समग्र पृथ्वी, उस बोधिसत्त्व के विहार के समय भेंट देने के लिए नानाविध कमलवनों से शोभित हो गयी ॥ ११ ॥

शाखासु शाखासु समुद्भवद्भिर्विचित्रपत्रैः शतपत्रजातैः।
चकाशिरे तस्य विलोकनाय सञ्जातनेत्रा इव शाखिनोऽपि ॥ १२ ॥

शाखास्विति। शाखिनः=वृक्षा अपि; तस्य=सिद्धार्थस्य; विलोकनाय=दर्शनाय, शाखासु शाखासु इति=प्रतिशाखम्; समुद्भवद्भिः=उत्पत्तिमद्भिः, विचित्राणि=नानावर्णानि, पत्राणि=दलानि येषां तैः, शतपत्राणाम्=पद्मानाम्, जातैः=समूहैः, "शतपत्रं कुशेशयम्" इत्यमरः। सञ्जातनेत्राः=चक्षुष्मन्त इव। बभूवुरिति वचनविपरिणामेन पूर्वतः सम्बन्धः। अत्रावतारकाले वृक्षोत्पन्नेषु पुष्पेषु सिद्धार्थदर्शनैकफलकवृक्षसम्बन्धि नेत्रत्वमुत्प्रेक्ष्यते ॥ १२ ॥

वहाँ शाखा-शाखाओं में खिले हुए, नानाविध पत्रावली से युक्त वृक्ष ऐसे लग रहें थे मानों उस लोकोत्तर बोधिसत्त्व के दर्शन के निमित्त वे भी आज नेत्रमय हो गये हों ॥ १२ ॥

अस्माकमुत्पत्तिरिवात्र भूमौ बुद्धाङ्कुराणामपि दुर्लभेति।
सन्दर्शनायेव शरीरभाजां नालीकमासीन्नभसः स्थलेऽपि ॥ १३ ॥

अस्माकमिति। अत्र आकाशस्थले; अस्माकम्=पद्मानाम्; उत्पत्तिः=जन्म इव, भूमौ=पृथिव्याम्; बुद्धांकुराणाम्=बुद्धानामाभिनवोद्गमानाम्; "अंकुरो रोम्णि सलिले रुधिरेऽभिनवोद्गमे" इति हैमः। अपि, उत्पत्तिः=जन्म, दुर्लभा=दुष्प्रापा, अपूर्वेति यावत्। इत्येवं शरीभाजाम्=देहिनाम्; सन्दर्शनाय=बोधनाय; इवेत्युत्प्रेक्षायाम्; नालीकम्=पद्मम्; "नालीकौ पद्मनाराचौ" इति त्रिकाण्डशेषः। नभसः=गगनस्य, स्थले=प्रदेशेऽपि; आसीत्=अभूत्। गगनारविन्दवद् बुद्धोत्पत्तिरपि अतिदुर्लभेति भावः ॥ १३ ॥

"इस पृथ्वी पर हमारी उत्पत्ति की तरह बुद्धजन्म भी अत्यन्त दुर्लभ होता है"—लोगों को यह दिखाने के लिए आकाश में भी कमल खिल उठे। (अर्थात् गगनारविन्द की तरह बुद्धप्रादुर्भाव भी अत्यन्त दुर्लभ होता है।) ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्योपदेशादखिलोऽपि सत्यं निर्वाणमभ्येष्यति जीवलोकः ।
किमस्मदभ्युज्ज्वलनैरतीव निर्वाणमीयुर्निरयाग्नयोऽपि ॥ १४ ॥

अस्येति । (यदि) अखिलः=समग्रः, अपि, जीवलोकः=जगत्, अस्य=सिद्धार्थस्य, उपदेशात्=शिक्षातः, निर्वाणम्=मोक्षपथम्, अभ्येष्यति=गमिष्यति, (तर्हि)अस्मदभ्युज्ज्वलनैः=अस्माकं नरकाग्नीनां ज्वलनैः, किम् ? न किमपि प्रयोजनमिति भावः । इतीव=इति मत्वेव; निरयाग्नयः=नरकाग्नयः, अपि, निर्वाणम्=विश्रान्तिं कैवल्यं च "निर्वाणं मोक्षनिर्वृत्योर्विश्रान्तौ करिमज्जने" इति हेमचन्द्रः । ईयुः=प्रापुः ॥ १४ ॥

"इस बोधिसत्त्व के ज्ञानोपदेश से, समग्र जीवलोक यदि निश्चित रूप से निर्वाण प्राप्त कर ही लेगा, तो फिर हमारे जलते रहने का क्या लाभ ?"—यह विचार कर उन समग्र नरकाग्नियों की ज्वाला भी शान्त हो गयी ॥ १४ ॥

महात्मनस्तस्य महीध्रपातगुरूणि पादाक्रमणानि सोढुम् ।
अपारयन्तीव भृशं चकम्पे विश्वम्भरा विश्लथशैलबन्धा ॥ १५ ॥

महात्मना इति । तस्य महात्मनः=सिद्धार्थस्य, महीध्राणाम्=पर्वतानाम्; "महीध्र-शिखरि-क्ष्माभृदहार्यधर पर्वताः" इत्यमरः । पातवत्=पतनवत्, गुरूणि=दुर्भराणि; पादाक्रमणानि=पादविन्यासान्; सोढुम्=क्षन्तुम्, अपारयन्ती=अशक्नुवाना; विश्वं बिभर्त्तीति विश्वम्भरा-भूमिः, विश्लथाः-विशीर्णा, शैलानाम्=गिरीणाम्, बन्धाः=अवयवसंयोगाः यस्या सा, सती; भृशम्=अत्यर्थम्, चकम्पे=कम्पितवती ॥ १५ ॥

उस समय समग्र पृथ्वी भी पर्वतों के शिलापात की तरह अत्यन्ततया असह्य उस बोधिसत्त्व के पदभार को सम्हालने में असमर्थ हो काँपने लगी, जिससे पर्वतों में दरारें पड़ गयीं ॥ १५ ॥

तालप्रमाणाः सहसा धरित्रीं भित्त्वा समुत्तस्थुरुदप्रवाहाः[1] ।
पुण्यात्मनस्तस्य नमस्क्रियार्थं भुजङ्गलोका इव शेषवश्याः ॥ १६ ॥

तालेत्यादि । तस्य पुण्यात्मनः=पवित्रमनसः, सिद्धार्थस्य; नमस्क्रियार्थम्=प्रणत्यर्थम्, तालः प्रमाणं येषां ते; उदवाहाः-जलप्रवाहाः । अत्र "न लुमताङ्गस्य" (पा० सू० १..१६३) इत्यस्यानित्यत्वेन 'मांसपचन्या' इत्यत्रेव प्रत्ययलक्षणेन विभक्तिपरकत्वादुदकशब्दस्य उदन्नादेशः । यद्वा-उदकशब्दपर्याय उदशब्दोऽपि वर्तते शब्दरत्नावल्याम् । धरित्रीम्=पृथिवीम्, भित्त्वा=भेदनं कृत्वा, शेषस्य=अनन्तनागस्य, वश्याः-वशंगताः, अधीना इत्यर्थः,

१. उदकप्रवाहाः-क० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भुजङ्गलोकाः=सर्पा इव, सहसा=अनायासेन; समुत्तस्थुः=उदतिष्ठन् । इवेत्युत्प्रेक्षायाम् ।। १६ ।।

उस समय अचानक ही भूमि से तालवृक्ष के समान ऊँचे-ऊँचे जल के फौवारे ऐसे उठने लगे मानों शेष (अनन्त) नाग के वंशज सभी सर्प, उस महासत्त्व को प्रणाम करने के लिए, ऊपर आ रहे हों ।। १६ ।।

अमुष्य सर्वत्र वितायमानैराकाशगङ्गासलिलावदातैः ।
यशःप्रवाहैरिव लिप्यमाना दिशः समस्ताः[1] विशदीबभूवुः ।। १७ ।।

अमुष्येति । सर्वत्र=जगति; वितायमानैः=विस्तारमापादयद्भिः; आकाशगङ्गायाः=देवनद्याः; सलिलवत्=जलवदवदातैः=शुभ्रैः, यशःप्रवाहैः=कीर्त्तिप्रवाहैः; "अवदातः सितो गौरः" इत्यमरः । लिप्यमानाः=लिम्पन्त्यः; समस्ताः=सर्वा अपि दिशः=आशाः; विशदीबभूवुः=प्रसेदुः । १७ ।।

उस समय ऐसा लग रहा था मानों समग्र दिशाओं में, इस महाप्राण का श्वेत यश आकाशगङ्गा के जल की तरह सर्वत्र फैल गया हो ।। १७ ।।

'जातः पृथिव्यामधिपो मुनीनाम्' इति ब्रुवाणा इव विष्टपानाम् ।
मङ्गल्यशङ्खानकमर्दलादयवादयप्रभेदाः[2] स्वयमेव रेणुः ।।१८।।

जात इति । पृथिव्याम्=जगति; मुनीनाम्=शास्त्रतत्त्वावगन्तॄणाम्, अधिपः=राजा, उत्तम इति यावत् । जातः=उत्पन्नः-इति ब्रुवाणाः=वदन्त इव, विष्टपानाम्=जगताम्; "विष्टपं भुवनं जगत्" इत्यमरः । मङ्गल्यम्=मङ्गलकारि; "तत्र साधुः" (पा० सू० ४.४.९८) इति यत् । शङ्खश्च, आनकश्च, मर्दलश्च तत् आदयं येषां ते च ते वादयानाम्=वाद्यसाधनानाम्, प्रभेदाः=विशेषाः, स्वयमेव=स्वत एव; रेणुः=सस्वनुः, शब्दमकार्षुरिति भावः । "रण शब्दे" इति धातोर्लिटि प्रथमपुरुषबहुवचने रूपम् ।। १८ ।।

उस अवसर पर "इस लोक में मुनिश्रेष्ठ का अवतार हो चुका है"—मानो यह बताने के लिये ही लोगों के घरों में रखे मङ्गलमय शङ्ख, दुन्दुभि, ढोल आदि वाद्य स्वयं ही बज उठे ।। १८ ।।

महानुभावस्य महाभिषेकसम्भावनां कर्तुमिव प्रवृत्ताः ।
व्यतीत्य वेलां सकलाः समुद्राः प्रचेलुरभ्युच्छ्रितवीचिहस्ताः ।। १९ ।।

महानुभावस्येति । महानुभावस्य=महाप्रभावस्य, "अनुभावः प्रभावे च सतां च मतिनिश्चये" इत्यमरः । तस्य बोधिसत्त्वस्य, महाभिषेकेण जातां सम्भावनाम्=पूजाम्, कर्तुम्=विधातुम्, इव, प्रवृत्ताः=सन्नद्धाः, सकलाः=

---

१. प्रशस्ता— त्रि० ।　　　　२. मुसदय०—क० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समग्रा अपि, समुद्राः=अम्बुधयः, वेलाम्=तटम्, व्यतीत्य=उलङ्घ्य, अभ्युच्छ्रिताः=अत्युन्नताः, वीचयः=तरङ्गा एव हस्ताः=कराः येषां ते, बभूवुः=जाताः। इवेत्युत्प्रेक्षायाम् ॥ १९ ॥

उस समय मानों इस महानुभाव की महाभिषेक पूजा करने हेतु समग्र समुद्रों का जल ऊँची-ऊँची तरङ्गों से अपना तट लाँघ कर सीमा तोड़ कर बाहर निकल आया ॥

चचाल मेरोरचलाभिधानं चस्खाल सिन्धोर्लवणोदवार्ता।
आख्या स्रवन्तीत्यगलत्स्रवन्त्यास्थिरेति भूमेरभिधा व्यरंसीत् ॥२०॥

चचालेति। न चलतीत्यन्वर्थम्, "अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः" इति प्रसिद्धमचल इत्यभिधानम्=नाम, "आख्याह्वे अभिधानं च नामधेयं च नाम च" इत्यमरः। चचाल=स्वस्थितिं तत्याज। अस्योदयेऽचला अपि सन्तोषेण ननृतुरिति भावः। सिन्धोः=समुद्रस्य, लवणमुदकं यस्मिन् स लवणोदः—इति वार्ता=जनोक्तिः, "वार्ता प्रवृत्तिर्वृत्तान्तः" इत्यमरः। चस्खाल=स्खलितवती। समुद्रोऽपि लवणं विहाय तदा माधुर्यं स्वीचकारेति भावः। स्रवन्त्याः=नद्याः, अपि, "स्रवन्ती निम्नगापगा" इत्यमरः। इति कोशे उक्ता आख्या=नाम अगलत्=गलितवती। नद्यः सन्तोषातिशयजातविस्मयेन तदा स्तिमिता बभूवुरिति भावः। अथ च भूमेः पृथिव्या अपि 'स्थिरा' इति अभिधा=अभिधानम्, व्यरंसीत्=विरराम। रमतेः विपूर्वाल्लुङ्। "व्याङ्परिभ्यो रमः" (पा० सू० १.३.८३) इति परस्मैपदम्। भूमिरपि बोधिसत्त्वावतारकाले हर्षातिरेकाच्चकम्पे इति भावः ॥ २० ॥

उस समय मेरु पर्वत भी, जिसे लोग 'अचल' कहते हैं, चञ्चल हो उठा। (अर्थात् पर्वत भी उस समय नाचने लगे)। 'समुद्र खारे जल वाला है'—यह बात भी झूठी पड़ गयी; क्योंकि उस समय प्रसन्नता के कारण उसने भी माधुर्य स्वीकार कर लिया। नदियों को लोग 'निरन्तर बहने वाली' कहते हैं, परन्तु वे भी इस विशेष अवसर पर आश्चर्यचकित सी होकर स्थिर (स्तब्ध) रह गयीं। इसी तरह भूमि में उस समय हर्षातिरेक से एक विशेष प्रकार का कम्पन होने लगा, जब कि जो लोग उसे अनादि काल से 'स्थिरा' नाम दिये हुए थे वे झूठे पड़ गये ॥ २० ॥

ववर्ष वर्षासमयं विनापि वलाहको वारिधिधीरघोषः।
आश्चर्यकर्माणि बभूवुरित्थं जाते सतामग्रसरे कुमारे ॥ २१ ॥

ववर्षेति। बलाहकः=मेघः "स्तनयित्नुर्वलाहकः" इत्यमरः। वर्षासमयम्=वर्षाकालं विनापि, वारिधिः=समुद्र इव, धीरः=गम्भीरः, घोषः=ध्वनिर्यस्य सः सन्, सताम्=सज्जनानाम्, अग्रसरे=श्रेष्ठे, वरिष्ठे इत्यर्थः, तस्मिन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

=कुमारे=सिद्धार्थे, जाते=उत्पन्ने सति, इत्थम्=उपर्युक्तविधानि, आश्चर्यकर्माणि=विस्मयोत्पादककर्माणि; बभूवुः=जातानि ॥ २१ ॥

उस समय वर्षाऋतु के बिना ही वर्षा होने लगी, मेघ समुद्र की तरह गर्जन करने लगे। उस सज्जनों में श्रेष्ठ राजकुमार की उत्पत्ति (अवतार) के समय ऐसे नानाविध आश्चर्यमय दृश्य दिखायी देने लगे ॥ २१ ॥

जननोत्सवश्रीवर्णनम्

आस्फालितानेकमृदङ्गघोषवाचालिताशान्तदरीमुखाणाम्[1]।
आनन्दनृत्तभ्रमिघूर्णमानवसुन्धरान्दोलितभूधराणाम्[2] ॥ २२ ॥

कविर्जननोत्सवश्रियं विशेषकेणाह—**आस्फालितेत्यादि**। आस्फालिताः=वादिताः, अनेके ये मृदङ्गाः=वाद्यमदाः, तेषां घोषेण=महाशब्देन, वाचालितानि=मुखरितानि, आशान्तेषु=दिगन्तेषु, विद्यमानानां दरीणाम्=गुहानाम्; 'दरी तु कन्दरो वा स्त्री देवखातबिले गुहा'' इत्यमरः। मुखानि=प्रवेशद्वाराणि येस्तेषाम्; आनन्देन=आनन्दजेन, नृत्ते=नर्तने, जाता या भ्रमयः=भ्रमणानि, ताभिः घूर्णमानया=वेष्टमानया, वसुन्धरया=पृथिव्या, आन्दोलिताः=चालिताः, भूधराः=पर्वता येषां तेषाम् ॥ २२ ॥

जननोत्सव—उस हर्षोल्लास के अवसर पर, अनेक प्रकार के मृदङ्ग (नगाडे) इस तरह बज उठे कि उनसे चारों तरफ दूर-दूर तक स्थित पर्वतों की गुफाएँ भी प्रतिध्वनित हो उठीं। वहाँ प्रजा द्वारा किये गये हर्षसूचक नृत्यों से पृथ्वीस्थित पर्वत भी डोल उठे ॥ २२ ॥

अन्योन्यसम्मर्दविशीर्णहारमुक्तावलीतारकितस्थलीनाम् ।
प्रक्षिप्तपिष्टातकपांसुमुष्टिशृङ्गारिताशेषदिगन्तराणाम् ॥ २३ ॥

अन्योन्येति। अन्योन्यम्=परस्परम्, सम्मर्दनेन=सङ्घट्टनेन, विशीर्णेषु=छिन्नेषु, हारेषु=अलङ्करणेषु, या मुक्तानामावलयः=पंक्तयः, ताभिः, तारकिताः=सञ्जाततारका इव, स्थिताः, स्थलाः=अकृत्रिमप्रदेशाः येषां तेषाम्; प्रक्षिप्तानाम्=विकीर्णानाम्, पिष्टातकपांसूनाम्=गन्धचूर्णानाम्; "पिष्टातः पटवासकः" इत्यमरः। मुष्टिभिः=बद्धहस्तैः, शृङ्गारितानि=अलंकृतानि, अशेषाणि, दिशाम्=काष्ठानाम्, अन्तराणि=मध्यभागाः यैस्तेषाम् ॥ २३ ॥

वहाँ एक दूसरे के टकराने के कारण टूटे हारों से गिरी हुई मुक्ताराशि से और एक दूसरे पर फेंके गये गुलाल और अबीर से सभी दिशाएँ अलंकृत हो उठीं ॥ २३ ॥

---

१. ०ताकाशद०–त्रि०, क०; अशेष०–वि० ।
२. ०तरूणाम्–क०, वि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परस्पराक्षिप्तविभूषणानां पर्यस्तचूडामणिशेखराणाम् ।
एकालयस्येव जगत्त्रयाणां बभूव तज्जन्ममहोत्सवश्रीः ॥ २४ ॥

परस्परेत्यादि । परस्परम्=अन्योन्यम्, आक्षिप्तानि=सम्मर्दातिशयेनाकृष्टानि, विभूषणानि=अलंकरणानि यैस्तेषाम्; पर्यस्ताः=पतिताः, चूडामणयः=शिरोभूषणानि इति तेषां शेखराः=अग्रभागाः, येषां तेषाम् । एकालयस्य=एकगृहस्येव; जगत्त्रयाणाम् =त्रिलोक्याः । अत्र जगच्छब्दो भुवनत्रयपरो लक्षणया तत्स्थो जनपदश्च यथासम्भवं योज्यः । तस्य=सिद्धार्थस्य, जननमहोत्सवस्य=अवताररूपमहोत्सवस्य, श्रीः=शोभा; बभूव=अभूत् ॥ यथैकस्मिन् गृहे स्थिताः सर्वे जनाः स्वगृहप्रवर्तमानोत्सवसमये युगपन्मुदिताः सम्भ्रान्ताश्च वर्तन्ते, तद्वद् भुवनत्रये विद्यमानाः सर्वेऽपि जनाः बभूवुरिति भावः ॥ २४ ॥

उस जन्ममहोत्सव के सुखद अवसर पर जनसम्मर्द (भीड़) में एक दूसरे से टकराने से गिरे हुए विविध भूषण एवं चूड़ामणियों से तीनों लोकों की शोभा अत्यन्ततया बढ गयी । तात्पर्य यह है—जैसे किसी एक घर में किसी मङ्गलमय अवसर पर तरह-तरह से हर्ष मनाया जाता है, उसी तरह उस बोधिसत्त्व का जन्ममहोत्सव तीनों लोकों में मनाया गया ॥ २४ ॥

प्रत्यग्रगर्भच्छविपाटलेन सुतेन माता सुतरां चकाशे ।
नव्योदयालोहितविग्रहेण[1] वेलेव बालेन सुधाकरेण ॥ २५ ॥

प्रत्यग्रेत्यादि । प्रत्यग्रया=अभिनवया, "प्रत्यग्रोऽभिनवो नव्यः" इत्यमरः । गर्भच्छव्या=गर्भकान्त्या, पाटलेन=धवलरक्तवर्णेन, "श्वेतरक्तस्तु पाटलः" इत्यमरः । सुतेन=पुत्रेण; माता=मायादेवी । नव्योदयेन=नूतनाविर्भावेन, आलोहितः=ईषद्रक्तो विग्रहः=शरीरं यस्य तेन; "शरीरं वर्ष्म विग्रहः" इत्यमरः । बालेन=शिशुभूतेन, रात्रिप्रारम्भकालिकेनेत्यर्थः । सुधाकरेण=चन्द्रेण, वेलेव=जलवृद्धिरिव; नितराम्=अत्यन्तम्; चकाशे=बभौ ॥

माता मायादेवी अभिनव गर्भकान्ति के कारण श्वेतरक्तवर्ण वाले पुत्र से उसी तरह शोभित हो रही थी जैसे नूतन आविर्भाव के कारण श्वेत रक्त वाले चन्द्रमा के उदय से समुद्रतट शोभायमान हो ॥ २५ ॥

प्रतप्तचामीकरभास्वरेण प्रसर्पता तस्य शरीरभासा ।
प्रसूतिकागर्भगृहप्रदीपाः प्रत्यूषताराप्रतिमा बभूवुः ॥ २६ ॥

प्रतप्तेत्यादि । प्रतप्तचामीकरम्=द्रुतसुवर्णमिव, भास्वरेण=प्रकाशमानेन; "चामीकरं जातरूपम्" इत्यमरः । प्रसर्पता=विसृत्वरेण; शरीर-

१. ०नवो०—म०; सन्ध्यो०—पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भासा=शरीरकान्त्या; भा-शब्दः पुंल्लिङ्गेऽपि वर्तते; "बाहुगवेध्रू रा गौर्भाः" इति हेमचन्द्रेण पठितत्वात्। प्रसूतिकायाः=प्रसूतायाः; गर्भगृहे=अन्तर्गृहे, स्थिताः प्रदीपाः; "प्रसूता च प्रसूतिका" इत्यमरः। प्रत्यूषे=प्रभातसमये; ताराणाम्=नक्षत्रणाम्, या प्रतिमा=मूर्तिस्तद्वत् समाः=तुल्याः, बभूवुः=जाताः॥

नये, तपाये हुए, चमकीले सुवर्ण तुल्य उसके शरीर से दूर तक फैली कान्ति से प्रसूता के गर्भगृह के दीपक भी प्रातःकालिक नक्षत्रों के समान मन्द प्रकाशयुक्त हो गये थे॥ २६॥

अत्यद्भुतामात्मजजन्मवार्तां शृण्वन् स शुद्धान्तजनान्नरेन्द्रः।
आनन्दमूर्च्छाकुलचित्तवृत्तिः कर्तव्यमूढः स्तिमितो बभूव॥ २७॥

अत्यद्भुतामिति। सः नरेन्द्रः=राजा शुद्धोदनः; शुद्धान्तजनात्=अन्तःपुरजनात्; अत्यद्भुताम्=अत्यन्ताश्चर्ययुक्ताम्; आत्मजस्य=पुत्रस्य सिद्धार्थस्य, जन्मनः=उत्पत्तेः, वार्ताम्=वृत्तम्; शृण्वन्=आकर्णयन्, आनन्देन=पुत्रोत्पत्तिजन्यसुखेन, जाता या मूर्च्छा=मोहः, तेन आकुला=व्यामुग्धा, चित्तवृत्तिः=मनोव्यापारो यस्य सः; स्तिमितः=स्तब्धः सन्; कर्तव्यमूढः=इतिकर्तव्यताज्ञानशून्यो बभूव=अभूत्॥ २७॥

उस समय अन्तःपुर के लोगों से अचानक पुत्र-जन्म की बात सुनकर वह राजा शुद्धोदन आनन्दातिरेक से मूर्छित सा होता हुआ किंकर्तव्यविमूढ सा स्तब्ध रह गया॥ २७॥

पदार्थमेतत्प्रियदानयोग्यमदृष्टवान् स त्रिषु विष्टपेषु।
सर्वस्वदानेन तथापि राजा सम्भावयामास तमत्युदारः॥ २८॥

पदार्थमिति। (यद्यपि) सः=राजा; एतस्मिन्-पुत्रजन्मश्रवणरूपे प्रिये विषये दानयोग्यम्=दानार्हम्, पदार्थम्=वस्तु, त्रिषु=एतत्सङ्ख्याकेषु, विष्टपेषु=लोकेषु; अदृष्टवान्=नावलोकितवान्। तथापि=तदपि; राजा=शुद्धोदनः; सर्वस्वस्य=सकलैश्वर्यस्य, दानेन=दानक्रियया, तम्=पुत्रजन्मनिवेदकं शुद्धान्तजनम्, अत्युदारः=अतिदाता, सन्, सम्भावयामास=सत्कृतवान्॥ २८॥

पुत्र-जन्म का शुभ समाचार सुनाने वाले को देने के लिये राजा शुद्धोदन को त्रिलोकी में ऐसा कोई अनमोल पदार्थ नहीं दिखायी दिया जो उसे उस समाचार के बदले में दिया जा सके। फिर भी उसने अपना सर्वस्व दान कर अपनी उदारता दिखायी॥ २८॥

भद्रे मुहूर्ते स पतिः प्रजानां ददर्श देव्याः स्तिमितायताक्षः[1]।
कुमारमुत्सङ्गतले शयानं तटे तटिन्या इव हंसशावम्॥ २९॥

१. स्तिमितायताक्षम्-क०, पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भद्रे इति। सः, स्तिमिते=स्तब्धे, निश्चले इत्यर्थः, आयते=विपुले, अक्षिणी=नेत्रे यस्य सः; प्रजानाम्=लोकानाम्, पतिः=स्वामी, राजेत्यर्थः; देव्याः=मायादेव्याः, उत्सङ्गतले=अङ्कप्रदेशे, शयानम्=स्थितम्; कुमारम्=पुत्रम्; तटिन्याः=नद्याः, तटे=तीरे; हंसशावम्=हंसशिशुमिव; "पृथुकः शावकः शिशुः" इत्यमरः। ददर्श=अवलोकितवान् ॥ २९ ॥

स्तब्ध नेत्रों वाले उस राजा ने शुभ मुहूर्त में देवी की गोद में सोये कुमार को उसी तरह देखा मानों नदीतट पर कोई हंस का बच्चा सोया हो ॥ २९ ॥

अश्रान्ततृष्णेन विलोचनेन मुखेन्दुमास्वादयतः स्वसूनोः।
आसीत् पितुः कण्टकिताङ्गयष्टेरानन्दबाष्पप्रसरो[1] निरोधः ॥ ३० ॥

अश्रान्तेत्यादि। स्वसूनोः-स्वपुत्रस्य; अश्रान्ता=शान्तिमनापन्ना, तृष्णा=इच्छा, पुत्रमुखदिदृक्षारूपा पिपासेत्यर्थः, यस्य तेन, विलोचनेन=नेत्रेण, मुखेन्दुम्=मुखचन्द्रम्, आस्वादयतः=विलोकयतः, पितुः=शुद्धोदनस्य; कण्टकिता=रोमाञ्चं प्राप्ता; "रोमहर्षे च कण्टकः" इत्यमरः। अङ्गयष्टिः=अवयवदण्डो यस्य तस्य; सतः, आनन्दजातो वाष्पप्रसरः=अश्रुप्रवाहः; निरोधः=दर्शनप्रतिबन्धकः; आसीत्=बभूव ॥ ३० ॥

व्रतादि से कृशकाय उस राजा की प्यास, आँखें फाड़ फाड़कर देखने के बाद भी, नहीं बुझ रही थी; क्योंकि वह आनन्दाश्रुओं के निरोधक हो जाने के कारण अपने पुत्र का मुखचन्द्र मनचाहे रूप से नहीं देख पा रहा था ॥ ०॥

स्तनन्धयस्याननचन्द्रबिम्बममन्दसौन्दर्यसुधानिधानम्।
निपीय नेत्राञ्जलिना नितान्तं नृपाधिपो निर्वृतिमाससाद ॥ ३१ ॥

स्तनन्धयस्येति। नृपाधिपः=चक्रवर्ती राजा शुद्धोदनः, स्तनं धयतीति स्तनन्धयः=बालकः, तस्य; "अप्युत्तानशयो वत्सस्तनयस्तु स्तनन्धयः" इति वैजयन्ती। आननचन्द्रस्य=मुखचन्द्रस्य; बिम्बम्=मण्डलम्; अमन्दम्=अत्यन्तं यत् सौन्दर्यं तदेव सुधा=अमृतम्, तस्या निधानम्=आश्रयभूतम्; नेत्रे=नयने एव अञ्जलिः=करपुटस्तेन; नितान्तम्=अत्यन्तम्, निपीय=निःशेषेण पीत्वा; निर्वृत्तिम्=स्वास्थ्यम्; "स्वास्थ्ये नाशे च निर्वृतिः" इति वैजयन्ती ॥ ३१ ॥

फिर भी किसी तरह राजा शुद्धोदन अपने उस सुन्दर दुधमुँहे बच्चे का मुखचन्द्र देख-देखकर अत्यन्त सुख का अनुभव करने लगा ॥ ३१ ॥

स जातकर्मादिकमत्युदारं सूनोः समापय्य[2] पुरोहितेन।
'सिद्धार्थ' इत्यस्य जगत्प्रशस्यामनन्ययोग्यामकरोदभिख्याम् ॥ ३२ ॥

१. कण्टकितस्वमूर्तेः-क०। २. समापाद्य-क०, वि०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स इति । सः=राजा शुद्धोदनः, पुरोहितस्य-धर्मगुरोः; साहाय्येन; सूनोः=नवजातस्य पुत्रस्य, अत्युदारम्=अतिविस्तृतेन महोत्सवायोजनेन, जातकर्म आदि यस्य तत् जातकर्मादि=संस्कारम्, समापय्य-कारयित्वा; अस्य-स्वपुत्रस्य, जगति=लोके, प्रशस्याम्=श्लाघनीयाम्; अन्यस्य-अपरस्य, योग्या न भवतीति तामनन्ययोग्याम्=अन्यानर्हाम्; सिद्धाः=निष्पन्नाः, पूर्णतां गता इति भावः, अर्थाः=प्रयोजनानि=कर्तव्यकर्माणीत्यर्थः, यस्य सः सिद्धार्थः—इति अभिख्याम्-नाम; "अभिख्या नाम-शोभयोः" इत्यमरः। अकरोत्=व्यधात् ।। ३२ ।।

राजा शुद्धोदन ने, पुरोहित के आदेशानुसार जातकर्म आदि संस्कार सम्पन्न कर, अपने पुत्र का नाम 'सिद्धार्थ' रखा ।। ३२ ।।

नवाम्बुवाहेन नभःस्थलीव नव्येन तारापतिना निशेव ।
मृगेन्द्रशावेन महाटवीव विभूषिता सन्ततिरास तेन ।। ३३ ।।

नवाम्बुवाहेनेति । नभःस्थली=नभःप्रदेशः, नवाम्बुवाहेन=नूतनमेघेन इव, निशा=रात्रिः; नव्येन=नवीनेन, तारापतिना=चन्द्रेण इव; महाटवी=महदरण्यम्; मृगेन्द्रशावेन=सिंहशिशुना इव, सन्ततिः-वंशः, शुद्धोदनराजकुलमित्यर्थः, तेन=शिशुना सिद्धार्थेन; विभूषिता=अलंकृता, आस=बभूव। तिङन्तप्रतिरूपकमव्ययमेतत् ।। ३३ ।।

जैसे बादलों से आकाश, नव चन्द्रोदय से रात्रि और सिंहशावक से अरण्य शोभित होता है उसी तरह राजा शुद्धोदन का कुल उस पुत्र (सिद्धार्थ) के उत्पन्न से शोभित हुआ ।। ३३ ।।

अव्यक्तवर्णाभिरमुष्य वाग्भिर्यथा नृपः प्रीतमना बभूव ।
तथा न गानैरपि गायकानां महाकवीनामपि वाग्विलासैः ।। ३४ ।।

अव्यक्तेत्यादि । नृपः=राजा शुद्धोदनः, अमुष्य=शिशोः सिद्धार्थस्य; अव्यक्तवर्णाभिः=अस्फुटाक्षराभिः, वाग्भिः=वचनैः; यथा=येन प्रकारेण; प्रीतमनाः=प्रीत मनो यस्य सः इति विग्रहः। प्रसन्नहृदय इत्यर्थः। बभूव=अभूत्; तथा=इतोऽधिकतरम्, गायकानाम्=स्वनिबद्धरसस्निग्धमहाकाव्यपाठकानाम्, महाकवीनाम्=महाधियाम्, पण्डितानामित्यर्थः, वाग्विलासैः=रसपुष्टवाचां गुम्फैरपि प्रीतो न बभूव ।। ३४ ।।

अस्फुट अक्षरों वाली उस शिशु की तोतली बोलीसे राजा इतना प्रमुदित हुआ जितना अच्छे-अच्छे गायक महाकवियों द्वारा गुम्फित काव्य-पाठ सुनकर भी प्रमुदित नहीं हो पाया था ।। ३४ ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निसर्गसौरभ्यनितान्तहृद्यं तस्याननं तादृशसौकुमार्यम् ।
बभूव सामान्यमयातयामं लीलाब्जमन्तःपुरसुन्दरीणाम् ॥ ३५ ॥

निःसर्गेत्यादि । तस्य–शिशोः, निसर्गेण–स्वभावेन, यत् सौरभ्यम्=मनोज्ञता, सुगन्धता च "सुरभिः स्यान्मनोज्ञेऽपि", तेन नितान्तम्=अत्यन्तम्, हृद्यम्–हृदयप्रियम्, तादृशम्=अनुपमं यत् सौकुमार्यम्=मार्दवम्, यस्य तत्; आननम्=मुखम्, अन्तःपुरसुन्दरीणाम्=राज्ञोऽन्तःपुरवासिनानां स्त्रीजनानाम्, सामान्यम्=साधारणम्, न यातयाममयातयामम्=रसपरिपूर्णम्, "यातयामं गतरसम्" इत्यमरः । लीलाब्जम्=क्रीडारविन्दम् । इदं विधेयविशेषणम् । बभूव=अभूत् ॥ ३५ ॥

स्वभावतः सुरभिमयं होने से हृदय को अत्यन्त प्रिय लगने वाला उसका कोमल मुख राजा के अन्तःपुर की परिचारिका नारियों को खेलने के लिये खिले हुए फूल का काम दे रहा था ॥ ३५ ॥

मनोऽभिरामैर्मणिकिङ्कणीनां[1] मातुर्मुदं[2] मांसलयन्निनादैः ।
आत्मीयबिम्बानुनयाभिमानश्चिक्रीड[3] सूनुर्मणिमेदिनीषु ॥ ३६ ॥

मनोऽभिरामैरिति । मनोऽभिरामैः=मनोहरैः, मणिकिङ्कणीनाम्=नूपुरादिबद्धमणिमयक्षुद्रघण्टिकानाम्, "किङ्किणी क्षुद्रघण्टिका" इत्यमरः । निनादैः=शब्दैः, मातुः=मायादेव्याः, मुदम्–हर्षम्, मांसलयन्=पोषयन्, सूनुः=पुत्रः, मणिमेदिनीषु, प्रासादगतमणिमयाङ्गणेषु, आत्मीयस्य=स्वस्य, बिम्बस्य=प्रतिबिम्बस्य, "बिम्बं तु प्रतिबिम्बे स्यात्" इति हैमः । अनुनयः=अनुसरणम्, तस्मिन् अभिमानः=आस्था यस्य सः । स्वस्य प्रतिबिम्बं दृष्ट्वा तदनुसरणे कृतोत्साह इत्यर्थः । सन् । चिक्रीड=क्रीडितवान् ॥ ३६ ॥

पैरों में पहने छोटे नूपरों में लगी घण्टियों से निकले कर्णप्रिय शब्दों से माता के मोद को बढ़ाता हुआ वह बालक राजप्रासाद के मणिमय आँगन में खेलते समय अपनी परछाई देखकर अत्यन्त प्रसन्न होता था ॥ ३६ ॥

आतन्वता पांसुविहारमाप्तैरमात्यपुत्रैः सह बालकेन ।
संग्रामभूधूलिषु भाविनीषु स्वैरं विहर्तुं विहितेव योग्या ॥ ३७ ॥

आतन्वतेति । आप्तैः=प्रियैः, अमात्यपुत्रैः=मन्त्रिकुमारकैः, सह, पांसुविहारम्=रेणुभिः क्रीडाम्, आतन्वता=विस्तारयता तेन बालकेन–वयः प्राप्य बालकभूतेन, तेन सिद्धार्थेन, भाविनीषु=आगामिनीषु, संग्रामभूः=युद्धभूमिः;

---

१. मनोऽभिरामं–क० । २. मातुर्मुखं–क०, पा०, त्रि०, वि० ।
३. ०बिम्बानुनयावमान०–क०, पा०, वि०; ०बिम्बाननुधव०–म० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"संग्रामाभ्यागमाहवाः" इत्यमरः; तस्या धूलिषु=रेणुषु, स्वैरम्=यथेच्छम्; विहर्तुम्=आचरितुम्; योग्या=अभ्यासः; "योग्यार्कयोषित्यभ्यासे" इति हेमचन्द्रः। विहिता=कृता। इवेत्युत्प्रेक्षायाम् ॥ ३७ ॥

उस बालक ने अपने साथी अमात्यपुत्रों के साथ धूल में खेलते हुए ऐसी-ऐसी क्रीडाएँ की कि मानों वह भावी संग्रामभूमि में यथेच्छ कार्य के लिये अभ्यास कर रहा हो ॥ ३७ ॥

स धीरमन्तःपुरसिंहशावैः संक्रीडमानः सह राजसूनुः।
अत्यद्भुतस्यात्मपराक्रमस्य शिक्षामिवैषां चिरमन्वतिष्ठत् ॥ ३८ ॥

स इति। स राजसूनुः=राजपुत्रः; अन्तःपुरसिंहशावैः=शुद्धान्तवर्त्तिभिः सिंहशिशुभिः; सह=साकम्; धीरम्=गभीरं यथा स्यात् तथा, संक्रीडमानः=खेलयन्, एषाम्=सिंहशावकानाम्, कृते; अत्यद्भुतस्य=अत्याश्चर्यमयस्य, आत्मनः=स्वस्य, पराक्रमस्य=बलस्य; शिक्षाम्=परिचयम्, अन्वतिष्ठत्=अनुष्ठितवान्। सिंहादप्यतिरिक्तपराक्रमोऽयमिति भावः। इवेत्युत्प्रेक्षायाम् ॥३८॥

वह राजपुत्र, अन्तःपुर के सिंह-शिशुओं के साथ खेलता हुआ ऐसा आचरण करता था मानो वह उन्हें अपने में उनसे अधिक बल का परिचय दे रहा हो ॥ ३८ ॥

अनुप्रवृत्तान्मणिघण्टिकानामारावहर्षाद् गृहराजहंसान्।
तताट[1] पादेन तदीयराजशब्दासहिष्णुः किल तान् कुमारः ॥ ३९ ॥

अनुप्रवृत्तानिति। कुमारः=सिद्धार्थः, मणिघण्टिकानाम्=मणिमयपादभूषणानाम्; आरावेण=शब्देनोद्भूताद्, हर्षात्=मुदः, अनुप्रवृत्तान्=अनुगतान्; गृहस्थितान् राजहंसान्=हंसजातिश्रेष्ठान्; "राजहंसास्तु ते चञ्चूचरणैर्लोहितैः सिताः" इत्यमरः। पादेन=चरणेन, तताट=ताडयामास। "तट आहतौ" इत्यस्माच्चौरादिकाद्धतोर्लिट्; 'चिति स्मृत्याम्' इति इदित्करणरूपज्ञापकस्य सामान्यापेक्षत्वाण्णिजभावः। तदीयः=राजहंससम्बन्धी यो राजशब्दस्तस्यासहिष्णुः=असहनशीलः। इवेत्युत्प्रेक्षायाम् ॥ ३९ ॥

वह कुमार उसके पैरों में बन्धी मणिघण्टियों के मधुर शब्द से आकृष्ट होकर उसकी तरफ आने वाले घरेलू राजहंसों पर बार-बार पादाघात करता था (उन्हें लात मारता था), मानो उसे उनके नाम के साथ लगे 'राज' शब्द से अत्यधिक ईर्ष्या हो ॥ ३९ ॥

नखांकुशाघातविधूतमूर्धा[2] मुखारवप्रस्तुतबृंहितश्रीः।
मङ्गल्यनिर्वृत्तमदाम्बुरेखो बालो वितेने मदहस्तिलीलाम् ॥ ४० ॥

---

१. तताड–त्रि०।　　२. कुशावधूत०–त्रि०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नखांकुशेत्यादि। सः बालः=सिद्धार्थः, नखाः=केशप्रसाधकनखरा एव अङ्कुशाः=आयुधाः, तेषामाघातेन=अभिघातेन, विधूतः=कम्पितः, मूर्धा=शिरोऽनेन सः; मुखारवेण=मुखशब्देन, प्रस्तुता=आरब्धा, वृंहितस्य=गजगर्जितस्य, श्रीः=शोभा येन सः; "वृंहितं करिगर्जितम्" इत्यमरः। मङ्गल्या=मङ्गलार्थं निर्वृता=विहिता, मदाम्बुनः=कस्तूरिकाजलस्य, रेखा=पत्रावली यस्य सः; अन्यत्र हस्तिपक्षे-मङ्गल्या=मल्लिगन्धिनी, निर्वृत्ता=जनिता, मदाम्बुनः=मदजलस्य, रेखा=राजिर्यस्य सः, "मङ्गल्यं मल्लिगन्धि यत्" इत्यमरः; "मदो रेतस्यहङ्कारे मद्ये हर्षेभदानयोः। कस्तूरिकायां क्षैव्ये च" इति हेमचन्द्रः। मदहस्तिनः=मत्तगजस्य, लीलाम्=क्रीडां वितेने=विस्तारयामास ॥

केशप्रसाधक नखों (कङ्घियों) के शिर में गड़ने से हुई वेदना के कारण उस राजकुमार की चिल्लाहट ऐसी लगती थी मानो हाथी का बच्चा चिंघाड़ रहा हो। और उसे सुखप्रदानहेतु किये गये कस्तूरी के लेप से वह बालक ऐसा लगता था मानों मदोन्मत्त हाथी के गण्डस्थलों से मदस्राव हो रहा हो ॥ ४० ॥

अभ्युल्लसच्चम्पकदामदीप्तिरालोकसम्भावितजीवलोकः।
स दारको दीप इव प्रदीप्तः शोकान्धकारं विनिनाय[1] पित्रोः॥ ४१ ॥

अभ्युल्लसदित्यादि। अभ्युल्लसन्ती=प्रकाशमाना, चम्पकदाम्नः=चम्पकमालाया इव दीप्तिः=कान्तिर्यस्य सः; आलोकेन=दर्शनेन, प्रकाशेन च; सम्भावितः=सत्कृतः, जीवलोकः प्राणिवर्गो येन सः; स **दारकः**=बालकः, सिद्धार्थ इति यावत्; "दारको भेदके पुत्रे" इति हेमचन्द्रः। पित्रोः=मातापित्रोः; शोकः=चिन्ता, अन्धकारः=तम इव, तम्; विनिनाय=उत्सारयामास ॥ ४१ ॥

चम्पक माला के सदृश कान्ति वाले, और दर्शनमात्र से सब का हृदय प्रसन्न करने वाले उस राजकुमार ने अपने माता-पिता की सभी चिन्ताएँ उसी तरह मिटा दीं जैसे जलता दीपक अन्धकार मिटा देता है ॥ ४१ ॥

आचार्यकुलगमनम्

कृतोपवीतं गलितातिबाल्यं समस्तविद्यापरिशीलनाय।
तमर्पयामास कुमारवर्यमाचार्यहस्तेषु पतिः पृथिव्याः॥ ४२ ॥

कृतोपवीतमिति। पृथिव्याः=भूमेः, पतिः=स्वामी, राजा शुद्धोदनः, तम्=प्रसिद्धम्, कुमारवर्यम्=कुमारश्रेष्ठम्, सिद्धार्थमित्यर्थः; कृतमुपवीतम्=उपनयनसंस्कारो यस्य तं तथोक्तम्; गलितम्=अतिबाहितम्, अतिबाल्यम्=अतिशैशवं यस्मात्तम्; समस्तविद्यानाम्=सकलशास्त्राणाम्, परिशीलनाय=

१. प्रणिनाय-त्रि०, पा०, क०, वि०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासाय; आचार्याणाम्=गुरूणाम्, हस्तेषु=अधीनतायाम्, अर्पयामास=प्रददौ ॥ ४२ ॥

गुरुकुल में—ऐसे उस राजकुमार का जब बचपन बीत चुका तो पिता राजा शुद्धोदन ने उसका यज्ञोपवीत कर्म कराकर, उसे समग्र विद्याओं का अध्ययन करने के लिये आचार्यों के पास (गुरुकुल में) भेज दिया ॥ ४२ ॥

स देशिकेन्द्रैरुपदिश्यमाना विद्याः समस्ताः सकलाः कलाश्च ।
जग्राह मेधावितयाऽचिरेण वर्षाघनो वारिनिधेरवाप ॥ ४३ ॥

स इति । सः=कुमारः सिद्धार्थः, देशिकेन्द्रैः=आचार्यवर्यैः, उपदिश्यमानाः=दीयमानाः, समस्ताः=सम्पूर्णाः, विद्याः=चतुर्दश विद्याः, शास्त्राणि च, सकलाः=समग्राः, कलाः=चतुःषष्टिकलाः, शिल्पानि च; मेधाः=धारणायां चतुरा बुद्धिरस्यास्तीति मेधावी; "धीर्धारणावती मेधा" इत्यमरः । "अस्मायामेधास्रजो विनिः" (पा० सू० ५.२.१२१) इति विनिप्रत्ययः; तस्य भावस्तत्ता, तया=बुद्धिचातुर्येण; अचिरेण=अल्पेनैव समयेन; वर्षाघनः=वृष्टिकारको मेघः वारिनिधेः=समुद्रात्, आपः=जलानीव, जग्राह=गृहीतवान् ॥

उस राजा ने उन कुशल आचार्यों द्वारा पढायी गयी समस्त विद्याओं और कलाओं (शिल्पों) को, अपनी कुशाग्र बुद्धि से, कुछ ही समय में उसी तरह ग्रहण कर लिया, जैसे वर्षा करने वाला मेघ समुद्र से बहुत शीघ्र जल ग्रहण कर लेता है ॥ ४३ ॥

अनन्यसामान्यधियं कुमारमासाद्य विद्याः सुतरां विरेजुः ।
शरत्प्रसन्नं गगनावकाशं ताराधिपस्येव मयूखमालाः ॥ ४४ ॥

अनन्येत्यादि । अन्येषाम्=अपरेषाम्, सामान्या=साधारणा, न भवतीति अनन्यसामान्या=अनपरसाधारणा धीः=बुद्धिर्यस्य तम्, कुमारम्=सिद्धार्थम्; आसाद्य=प्राप्य, विद्याः=चतुर्दशापि विद्याः, सुतराम्=अतिशयेन; शरत्प्रसन्नम्=शरदा निर्मलम्; गगनावकाशम्=आकाशप्रदेशम्, प्राप्य, ताराधिपस्य=चन्द्रस्य, मयूखमालाः=किरणमाला इव, सुतराम्=अतिशयेन; रेजुः=शुशुभिरे ॥४४॥

उस विशिष्ट बुद्धि वाले राजकुमार को पाकर समस्त विद्यायें उसी तरह शोभित हुईं जैसे निर्मल आकाश में चन्द्रमा की किरणें शोभित हुआ करती हैं ॥ ४४ ॥

कुमारस्य शरीरशोभावर्णनम्

नितान्तमानन्दयता प्रजानां मनांसि सद्यो हरता तमांसि ।
चन्द्रोदयेनेव महासमुद्रः शाक्यान्वयस्तेन समुल्ललास ॥ ४५ ॥

नितान्तमिति । तेन=कुमारेण सिद्धार्थेन; प्रजानाम्=लोकानाम्, तमांसि=तमोगुणान्, तिमिराणि च; सद्यः=तत्कालम्, हरता=नाशयता,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेनैव च हेतुना मनांसि=हृदयानि, आनन्दयता=प्रसादयता, सता; चन्द्रस्य=शशिनः, उदयेन=अभ्युदयेन; महासमुद्रः=पयोनिधिरिव; शाक्यान्वयः=शाक्यवंशः, समुल्ललास=अतिशयेन हर्षं प्राप ॥ ४५ ॥

उस राजकुमार के विद्याध्ययन के वाद दूसरों के चित्त के अज्ञानान्धकार को नष्ट कर विशिष्ट आनन्द प्रदान करने के कारण शाक्यवंश के वृद्धजन उसी तरह मुदित हुए जैसे महासमुद्र चन्द्रोदय से प्रसन्न होता है ॥ ४५ ॥

प्रभेव भानोः प्रतिभेव सूरेः शिखेव दीपस्य दयेव साधोः ।
ज्योत्स्नेव चन्द्रस्य सुधेव सिन्धोस्तस्योदिताऽऽसीन्नवयौवनश्रीः ॥४६॥

प्रभेवेति । तस्य=कुमारस्य सिद्धार्थस्य; भानोः=सूर्यस्य, प्रभा=कान्तिरिव, सूरेः=पण्डितस्य, प्रतिभा=तत्कालस्फूर्तिः; "बुद्धिर्नवनवोन्मेषशालिनी प्रतिभा मता" इत्युक्तेः । "धीमान् सूरिः कृती" इत्यमरः । दीपस्य=प्रदीपस्य, शिखा=वर्तेरग्रभाग इव; साधोः=सज्जनस्य, दया=करुणा इव; चन्द्रस्य=शशिनः, ज्योत्स्ना=चन्द्रिकेव; "चन्द्रिका कौमुदी ज्योत्स्ना" इत्यमरः । सिन्धोः=समुद्रस्य, सुधा=अमृतमिव; नवस्य=नूतनस्य, यौवनवयसः=तरुणावस्थायाः, श्रीः=शोभा; उदिता=वृद्धिङ्गता; आसीत्=अभूत् ॥ ४६ ॥

उस राजकुमार का नवयौवन उसी तरह अच्छा लगा रहा था मानों सूर्य की कान्ति हो, दीपक का प्रदीप्त अग्रभाग हो, या साधुजनों का करुणाभाव हो, चन्द्रमा की शीतल किरणें हों या समुद्र से निकला अमृत हो ॥ ४६ ॥

आरोप्य तारुण्यविशेषशाणं रौषाणितानीव मनोभवेन ।
अङ्गान्यभिव्यञ्जितलक्षणानि विभक्तसन्धीनि बभूवुरस्य ॥ ४७ ॥

आरोप्येति । तारुण्यस्य=नवयौवनस्य, विशेषः=अतिशय एव शाणः=निकषोपलः; "शाणस्तु निकषः कषः" इत्यमरः । आरोप्य=धृत्वा; मनोभवेन=मन्मथेन; रोषाणः=निकषोपलः, "रोषाणस्तु धृषिर्धृष्वो हेमादिनिकषाश्मनि" इति वैजयन्ती । तत्र घृष्टानि रौषाणानि, तथा कृतानि रौषाणितानि । करोतिण्यन्तात् कर्मणि क्तः । शाणघृष्टानीत्यर्थः । अस्य=कुमारस्य सिद्धार्थस्य; अङ्गानि=शरीरावयवाः; अभिव्यञ्जितानि=महाभाग्यसूचकत्वेन प्रकाशितानि, लक्षणानि=चिह्नानि येषां तानि; विभक्ताः=विविच्य गृहीताः, सन्धयः=अङ्ग-प्रत्यङ्गमेलनस्थानानि येषु तानि; बभूवुः=अभूवन् ॥ ४७ ॥

यौवन में निखार—उस समय उस राजकुमार के सभी अङ्ग कामदेव द्वारा यौवन की शाण पर चढ़ाये हुए से, सौभाग्यसूचक चिह्नों से युक्त एवं सुविभक्त सन्धिवाले दिखायी देने लगे ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यांघ्रियुग्मं सहजाभिरूप्यं रेखासहस्रारथाङ्गचिह्नम् ।
नव्यानि नालीकवनानि नूनं नखप्रभचन्द्रिकया जहास[1] ॥ ४८ ॥

तस्येति । तस्य=कुमारस्य; अंघ्रियुग्मम्=चरणयुगलम्; सहजम्=स्वाभाविकम्, आभिरूप्यम्=मनोहरता, यस्य तत्; रेखाभूतं यत् सहस्रारम्=सहस्रम् अराणि=नाभिनेमिमध्यगताश्चक्रावयवविशेषाः यस्य तत्; रथाङ्गम्=चक्रमेव चिह्नं यस्य तत्; नखानाम्=कररुहाणाम्, "पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियाम्" इत्यमरः। अत्र करेति उपलक्षणमात्रम्, चरणयोरपि ग्रहणं कार्यम् । प्रभा=कान्तिरेव चन्द्रिका=ज्योत्स्ना तया, नव्यानि=नूतनानि, प्रत्यग्रविकसितानीत्यर्थः । नालीकवनानि=पद्मवनानि, "नालीको पद्मनाराचौ" इति त्रिकाण्डशेषः" । जहास=परिजहास । अत्र स्वरूपोत्प्रेक्षा । तया च स्वभावसिद्धनित्याभिरूप्यं तस्य पदद्वन्द्वं सूर्योदयाहितकान्तीनि चन्द्रिकामुकुलितानि च कमलवनानि नखप्रभाव्याजात् परिजहासेति कमलेभ्यः पदयुगलस्य विशेषप्रतीतेर्व्यतिरेकालङ्कारो ध्वन्यते ॥ ४८ ॥

उसके सहज सुन्दर एवं रथचक्र के चिह्नों वाले कोमल चरणकमल अपनी नखकान्ति से कमलवन की शोभा का उपहास सा कर रहे थे ॥ ४८ ॥

वलित्रयालंकृतिदर्शनीयविलग्नभागो नरपालसूनुः ।
मन्थाचलो वासुकिभोगवेष्टः लेखोल्लसन्मध्य इवालुलोके ॥ ४९ ॥

वलित्रयेत्यादि । वलीनाम्=उदरप्रदेशस्थानां तिसृणां रेखाणाम् "करोपहारयोः पुंसि वलिः प्राच्यङ्गजे स्त्रियाम्" इत्यमरः ।

"बलिर्दैत्यप्रभेदे च करचामरदण्डयोः ।
उपहारे पुमान् स्त्री तु जरया श्लथचर्मणि ।
गृहदारुप्रभेदे च जठरावयवेऽपि च ॥" इति मेदिनी ।

त्रयम्=त्रिवलिः, तदेवालंकृतिः=अलङ्कारस्तया दर्शनीयः=शोभनीयः, विलग्नभागः=शरीरस्य मध्यप्रदेशो यस्य सः, "मध्यमं च विलग्नं च" इत्यमरः । भोगस्य=शरीरस्य, "भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोः" इत्यमरः । वेष्टनलेखाभिः=वेष्टनराजिभिः, उल्लसन्=प्रकाशमानो मध्यः=मध्यभागो यस्य सः, इव, आलुलोके=ददृशे । इवेत्युत्प्रेक्षायाम् ॥ ४९ ॥

उस राजपुत्र के शरीर का मध्यभाग, तीनों रेखाओं के स्पष्ट उभार से, घिरा हुआ ऐसा शोभित हो रहा था मानों मन्थाचल का मध्यभाग वासुकि नागराज के फणों से आवेष्टित हो ॥ ४९ ॥

---

१. बभासे-क०, पा०, वि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुणैः समस्तैः सह[1] राजसूनोर्नितम्बबिम्बः प्रथिमानमाप ।
दोषैरशेषैः[2] सममेव तस्य मध्यप्रदेशः कृशतामयासीत् ॥ ५० ॥

गुणैरिति । राजसूनोः=राजपुत्रस्य सिद्धार्थस्य; समस्तैः=सकलैः, गुणैः=शुभलक्षणैः; सह=साकम्; नितम्बबिम्बः=नितम्बमण्डलम्; प्रतिमानम्=पृथुत्वम्, स्थूलत्वमित्यर्थः; आप=आप्नोत् । तस्य कुमारस्य; मध्यप्रदेशः=शरीरस्य मध्यभागः, कटिप्रदेश इति यावत् । अशेषैः=सकलैः, दोषैः=न्यूनैः, समम्=सहैव, कृशताम्=तनुत्ताम्, दौर्बल्यमित्यर्थः, शून्यतामिति वा; अयासीत्=अगमत् ॥ सहोक्त्योः संसृष्टिरलङ्कारः ॥ ५० ॥

उस राजकुमार के स्थूल नितम्बों की शोभा, अपने समस्त गुणों के साथ, इतनी बढ़ गयी थी कि उसके सामने उसके शरीर का मध्यभाग बहुत ही क्षीण लग रहा था ॥

नाभिह्रदस्तस्य नरेन्द्रसूनो रोमावलीकेतननीलयष्टिम् ।
निखातुकामेन मनोभवेन निर्वर्तितो गर्त इवाबभासे ॥ ५१ ॥

नाभीति । तस्य नरेन्द्रसूनोः=राजपुत्रस्य; नाभिः=नाभिप्रदेशं इव ह्रदः=सरोवरम्; रोमराजिः=लोमपंक्तिरेव केतनस्य=ध्वजस्य, नीलयष्टिः=नीलदण्डः, ताम्; निखातुकामेन=स्थापयितुमिच्छता, मनोभवेन=कामदेवेन; निर्वर्तितः=निर्मितः, गर्तः=आवट इव "गर्तावटौ भुवि श्वभ्रे" इत्यमरः । आबभासे=शुशुभे ॥ ५१ ॥

नाभि—उसकी नाभि इतनी गहरा थी कि मानों कामदेव ने उसके शरीर में रोमावलीं रूप अपना ध्वज दण्ड गाड़ने के लिए कोई गड्ढा खोदा हो ॥ ५१ ॥

श्रियः सरोजान्तरदुःस्थिताया विशृङ्खलं दातुमिवावकाशम् ।
पुण्यात्मनस्तस्य भुजान्तरालं बभूव विन्ध्याद्रिशिलाविशालम्[3] ॥५२॥

श्रिय इति । तस्य=राजकुमारस्य; पुण्यात्मनः=पुण्याशयस्य, सतः, विन्ध्याद्रे=विन्ध्यपर्वतस्य, शिलायाः=आयतप्रस्तरस्येव विशालम्=विपुलम्; सरोजानाम्=कमलानाम्, अन्तरे=अन्तर्भागे; दुःखेन स्थितायाः=वर्तमानायाः; पद्मस्य अल्पावकाशत्वाद् रात्रौ सङ्कोचस्वभावाच्च विशृङ्खलम्=निरर्गलम्, विपुलमित्यर्थः; अवकाशम्=प्रसरणस्थानम्; दातुम्=प्रदातुम्, बभूव=अभूत् । इवेत्युत्प्रेक्षायाम् ॥ ५२ ॥

उस पुण्यात्मा राजकुमार का भुजाओं के मध्य में फैला वक्षःस्थल विन्ध्यपर्वत की तरह विशाल (लम्बा चौड़ा) था, मानों वह पद्म की शोभा को अविच्छिन्न रूप से रहने के लिए विधाता ने बनाया हो ॥ ५२ ॥

१. अपि-म० ।
२. द्वेषैरशेषैः—पा० ।
३. ०विलासम्—पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शूरस्य[1] तस्य क्षितिपालसूनोर्वक्षःकवाटे सति वज्रसारे।
चक्रुः कवाटं सदनेषु सत्त्वा विभूषणार्थं न तु रक्षणार्थम् ॥ ५३ ॥

शूरस्येति। शूरस्य=वीरस्य, बलशालिन इत्यर्थः, तस्य=प्रसिद्धस्य, क्षितिपालसूनोः=राजकुमारस्य सिद्धार्थस्य, वज्रसारे=सारभूते, कठिने इति यावत्; वक्षःकवाटे=वक्षःस्थले; सति=विद्यमाने, सत्त्वाः=तद्राज्यमानवाः, "सत्त्वमस्त्री तु जन्तुषु" इत्यमरः; सदनेषु=स्वकीयगृहेषु; कवाटम्=पिधानम्, विभूषणार्थम्=अलङ्करणार्थमेव; न तु रक्षणार्थम्=स्वधनधान्यरक्षायै; चक्रुः=अकार्षुः ॥ ५३ ॥

वक्षःस्थल—उस वीर राजकुमार का वक्षःकपाट (छाती) वज्र की तरह कठोर था। और प्रजापालन में सर्वदा सन्नद्ध रहता था, अतः उसके शासन में प्रजाजनों ने अपने घरों में किवाड़ शोभामात्र के लिये लगा रखे थे, रक्षा के लिये नहीं ॥ ५३ ॥

भुजो भुजङ्गाधिपभोगदीर्घस्तस्य प्रजापालनपण्डितस्य।
अक्षेपणीयः प्रतिभूपतीनां त्रैलोक्यरक्षापरिघो बभूव ॥ ५४ ॥

भुज इति। तस्य प्रजापालनपण्डितस्य=प्रजापालने निपुणस्य भुजः=बाहुः; भुजङ्गाधिपस्य=अनन्तनाम्नः सर्पराजस्य; भोगः=काय इव, दीर्घः=विशालः; प्रतिभूपतीनाम् शत्रुभूतानां राज्ञाम्, अक्षेपणीयः=अनिराकरणीयः; त्रैलोक्यरक्षायाम्=लोकत्रयरक्षणे, परिघः=आयुधविशेषो बभूव=अभूत् ॥ ५४ ॥

भुजदण्ड—प्रजारक्षण में सर्वदा तत्पर उस वीर के भुजदण्ड नागराज के फण के सदृश विशाल थे, मानों शत्रुराजाओं द्वारा न लाँघने योग्य त्रिलोकी रक्षा के लिए निर्मित प्राकार की परिखा (खाई) हो ॥ ५४ ॥

रेखाभिरत्यन्तपरिस्फुटाभिस्तत्कन्धरा बन्धुरसन्निवेशा।
गाढादरालिङ्गितकान्तिलक्ष्मीकेयूरमुद्राभिरिवावबभासे ॥ ५५ ॥

रेखाभिरिति। अत्यन्तपरिस्फुटाभिः=सम्यग्विशदाभिः, रेखाभिः=पंक्तिभिः; तस्य=सिद्धार्थस्य, कन्धरा=ग्रीवा; "शिरोधिः कन्धरेत्यपि" इत्यमरः। बन्धुरः=मनोहरः, सन्निवेशः=विन्यासो यस्याः सा; "बन्धुरो रम्यनम्रयोः" इति हेमचन्द्रः। गाढं यथा स्यात् तथा आदरेण=सम्मानेन; आलिङ्गितायाः=आश्लिष्टायाः, कान्तेः=शोभायाः; केयूरस्य=अङ्गदभूषणस्य; मुद्राभिः=आकारैः, आबभासे=शोभां प्राप्तवती ॥ ५५ ॥

ग्रीवा—अत्यन्त स्पष्ट रेखाओं से अङ्कित एवं मनोरम विन्यास वस्त्र धारण की हुई उसकी ग्रीवा ऐसी सुन्दर लग रही थी मानों वह गाढतया आलिङ्गित कान्तिलक्ष्मी की केयूरमुद्रा हो ॥ ५५ ॥

---

१. सुरस्य–पा०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

**मुग्धस्य तस्यास मुखाम्बुजस्य महोत्पलस्यापि महान् विशेषः ।
वाणीमलोलां वहति स्म पूर्वं स्वभावलोलामितरत्तु लक्ष्मीम् ॥५६॥**

मुग्धस्येति । मुग्धस्य=मनोहरस्य; तस्य=सिद्धार्थस्य, मुखमेवाम्बुजं तस्य मुखकमलस्य; महोत्पलस्य=कमलस्य; अपि=च, महान्=अत्यन्तम्, विशेषः=भेदः; आस=आसीत् । आसेति तिङन्तप्रतिरूपकमव्ययम् । (यत् तत्र) पूर्वम्=पूर्वोक्तं सिद्धार्थमुखकमलम्; अलोलाम्=अचञ्चलाम्, गम्भीरामिति यावत्; वाणीम्=सरस्वतीम्, वाचम्; वहति स्म=धारयति स्म । इतरत्=द्वितीयम्, महोत्पलमित्यर्थः; तु; स्वभावेन=प्रकृत्यैव, लोलाम्=चपलाम्, लक्ष्मीम्=श्रियम्, वहति स्म । अत्र व्यतिरेकालङ्कारः ॥ ५६ ॥

वाणी—उस मनोरम राजपुत्र के मुख कमल और सरोवर में उत्पन्न कमल में इतना ही भेद था कि इनमें पहला (राजपुत्र का मुखकमल) गम्भीर व अचञ्चल वाणी (सरस्वती) से युक्त था और इसके विपरीत, तथा दूसरा (सरोज कमल) स्वभावतः चञ्चल लक्ष्मी से युक्त था ॥ ५६ ॥

**वाण्या वरेण्यस्य मुखे वसन्त्या मञ्जीरशिञ्जानमिवास सूक्तम् ।
नखप्रभेव स्मितचन्द्रिकाऽऽसीन्मुक्ताक्षमालेव च दन्तपंक्तिः ॥ ५७ ॥**

वाण्या इति । वरेण्यस्य=श्रेष्ठस्य; (तस्य) मुखे=आनने, वसन्त्या=वासं कुर्वन्त्या वाण्या=वाचा; मञ्जीरस्य=नूपुरस्य; "मञ्जीरो नूपुरोऽस्त्रियाम्" इत्यमरः । शिञ्जानम्=शिञ्जितम्; बाहुलकात् भावे शानच् । सूक्तम्=वचनम्; स्मितं चन्द्रिकेवेति स्मितचन्द्रिका=चन्द्रिकासममन्दहासः; दन्तानाम्=दशानानाम्, पंक्तिः=आवलिः; नखानाम्=करोरुहाणां प्रभा=कान्तिश्च मुक्ताक्षाणाम्—मुक्तामणिमिश्रिताक्षाणाम्, माला=स्रगिव, आस=आसीत् ॥

इस श्रेष्ठ राजपुत्र के मुख से निकली वाणी के वचन नूपुर की सुरीले घण्टियों की ध्वनि के तुल्य होते थे । उसके नख की प्रभा से चाँदनी सी छिटकती थी, और उसकी दन्तपंक्ति मोतियों की माला की तरह शोभायमान थी ॥ ५७ ॥

**तदाननाम्भोरुहकान्तिलक्ष्म्यास्तद्गण्डभित्तिर्मणिदर्पणश्रीः ।
तत्कर्णपाशश्च विलासडोला तदीक्षणं विभ्रमदीर्घिकाऽऽसीत् ॥ ५८ ॥**

तदाननेत्यादि । तस्य=राजसूनोः, आनने एवाम्भोरुहे=पद्मे वसन्त्या कान्त्याः=शोभाया एव लक्ष्म्याः । तस्य गण्डभितिः=गण्डप्रदेशः; "भित्तिः कुड्ये प्रदेशे च" इति हेमचन्द्रः । मणिमयस्य, दर्पणस्य=मुकुरस्य श्रीः=शोभा । तस्य कर्णपाशः=शोभनः कर्णः; "पाशः कचान्ते सङ्घार्थः कर्णान्ते शोभनार्थकः" इति त्रिकाण्डशेषः । विलासार्थम्=क्रीडार्थम्, डोला=प्रेङ्खोलिका; "डोला प्रेङ्खोलिका स्त्रियाम्" इत्यमरः । तस्य ईक्षणम्=नेत्रे; विभ्रमस्य=विलासस्य; दीर्घिका=वापी, आसीत्=अभूत् ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुख, कपोल एवं कर्णपाश - उसका मुखसरोज (कमल) की कान्तिलक्ष्मी की बराबरी कर रहा था। गण्डस्थल मणिमय दर्पण के समान चिक्कण था। उसका कर्णफूल क्रीड़ा के हिण्डोला के समान एवं उसके नेत्र विलासभूमि की वापी की उपमा हो रहे थे ॥ ५८ ॥

भ्रूवल्लरी तस्य मनोज्ञमूर्त्तेस्तारांशुलीढोभयकोटिभागा।
कोदण्डलीलेव विजित्य मारादात्मीकृतारोपितभृङ्गमौर्वी[1] ॥ ५९ ॥

भ्रूवल्लरीति। मनोज्ञमूर्तः=सुन्दराकृतेः; तस्य सिद्धार्थस्य भ्रूवल्लरी=भ्रूलता, तारयोः=कनीनिकयोः; "तारोऽत्युच्चस्वरे त्रिषु। तारिण्यङ्गदमात्रोः स्त्री न ना ऋक्षाक्षिमध्ययोः" इति त्रिकाण्डशेषः। अंशुभिः=किरणैः; लीढौ=व्याप्तौ; उभयकोटिभागौ=अग्रभागौ यस्याः सा; सती; मारात्=मन्मथात्; विजित्य=हठाद् गृहीत्वा, आत्मीकृता=स्वीकृता, स्वायत्तीकृतेत्यर्थः, आरोपिता=निबद्धा, भृङ्गरूपा=भ्रमररूपा, मौर्वी=ज्या यस्याः सा, "मौर्वी ज्या शिञ्जिनी गुणः" इत्यमरः। कोदण्डलीला=धनुर्लीला "धन्वशरासनकोदण्डकार्मुकम्" इत्यमरः। बभौ=शुशुभे इति शेषः। इवेत्युत्प्रेक्षायाम् ॥५९॥

भौंहे—उस मनोहर राजपुत्र की भौंहें दोनों तरफ आँख के कोण तक फैली हुई ऐसी लग रही थी मानों उन्होंने कामदेव का धनुष बलात् छीन लिया हो ॥ ५९ ॥

प्रसन्नमूर्णावलयाभिरामं ज्योतिर्मयं तस्य मुखारबिन्दम्।
भूयिष्ठमन्तर्गतचन्द्रलेखां बालार्कबिम्बश्रियमाततान ॥ ६० ॥

प्रसन्नमिति। तस्यः=राजसूनोः सिद्धार्थस्य, ज्योतिर्मयम्=कान्त्या प्रचुरम्, ऊर्णायाः=भ्रूमध्यस्थितावर्तविशेषस्य, "ऊर्णा भ्रूमध्यगावर्ते मेषादीनां च लोमनि" इति हेमचन्द्रः। वलयेन=वृत्तेन, अभिरामम्=मनोहरम्, प्रसन्नम्=अनाविलम्; मुखारविन्दम्=मुखकमलम्; अन्तर्गता चन्द्रलेखा=चन्द्रकला, यस्यास्ताम्, बालार्कस्य=बालसूर्यस्य, श्रियम्=शोभाम्, भूयिष्ठम्=अतिशयेन; आततान=धारयामास ॥ ६० ॥

रोमावलियुक्त मुखमण्डल—घुघराली रोमावलि से युक्त उस राजपुत्र का कान्तिमय मुखारविन्द ऐसा लग रहा था मानों चन्द्रलेखा को आत्मसात् किये हुए बालसूर्य का मण्डल हो ॥ ६० ॥

ऊर्णाभिरामा नरपालसूनोर्निटालभूर्मिनितरां चकाशे।
वप्रक्रियाभग्ननिलीनदन्तिदन्तांकुरा[2] मेरुशिलातटीव[3] ॥ ६१ ॥

---

१. ०वीरमात्मी० -म०, मारं सज्जीकृता०-त्रि०।
२. भिन्ननिलीन०—वि०।　　　३. तटीशिलेव-क०, वि०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऊर्णेति। नरपालसूनोः=राजपुत्रस्य, ऊर्णया=भ्रूमध्यस्थितावर्तविशेषेण, अभिरामा=मनोज्ञा, निटालभूमिः=फालप्रदेशः, "गोधिर्ललाटमलिकं निटालं फालमर्धकम्" इति पञ्चतत्त्वप्रकाशः। वप्रक्रियया=उत्खातकेल्या, भग्ना=निलीनाः, दन्तिनाम्=गजानाम् दन्ताङ्कुरा यस्यां सा; मेरोः=सुमेरुपर्वतस्य, शिलातटी=वृहच्छिला, इव, नितराम्=अत्यन्तम्, चकाशे=शुशुभे ॥ ६१ ॥

रोमावलियुक्त ललाट—उस राजकुमार का रोमयुक्त ललाट ऐसा लग रहा था मानो मदोन्मत्त हाथी द्वारा क्रीड़ा करते-करते उखाड़ा गया सुमेरु पर्वत का कोई बृहत् शिलावत् हो ॥ ६१ ॥

विनाङ्गरागेण विनाङ्गदेन विनावतंसेन विना स्रजाऽपि।
आविष्कृता सेचनकालमासीदङ्गं[1] तदीयं नवयौवनेन ॥ ६२ ॥

विनेति। तदीयम्=राजपुत्रसम्बन्धि, अङ्गम्=अङ्गसमूहः, अङ्गरागेण=चन्दनाद्यनुलेपनेन, विना, अङ्गदेन=कटकेन; विना, अवतंसेन=अलकारेण; विना, स्रजा=माल्येन विना; अपि; नवयौवनेन=नूतनतारुण्येन, आविष्कृतः=प्रकाशितः, आसेचनकालः=अभिषेकसमयो येन तत्, आसीत्=अभूत्। अङ्गरागाद्यलङ्करणरहितान्यपि तदङ्गानि तस्याभिषेकयोग्यवयस्कतां सूचयामासुरित्यर्थः ॥ ६२ ॥

शरीरशोभा—उसके शरीर के सभी अङ्ग चन्दनलेप, अलङ्कार या माला के बिना ही ऐसे लग रहे थे मानों वे उसके राज्याभिषेक का संकेत दे रहे हों ॥ ६२ ॥

आनन्दयित्री हरिणेक्षणानामदृष्टिपूर्वा पुरुषान्तरेषु।
निर्व्याजभूषा निखिलाङ्गयष्टेस्तस्योदितासीत् समुदायशोभा ॥ ६३ ॥

आनन्दयित्रीति। तस्य=राजसूनोः; हरिणेक्षणानाम्=मृगदृशाम्, आनन्दयित्री=सन्तोषकरी; पुरुषान्तरेषु=अन्यपुरुषेषु; अदृष्टपूर्वा=पूर्वमदृष्टा, निखिलायाः=समग्रायाः, अङ्गयष्टेः=देहदण्डस्य, निर्व्याजा=स्वाभाविकी, भूषा=अलङ्कारः, समुदायशोभा=सर्वावयवसमष्टिशोभा, उदिता=उद्भूता, आसीत्=अभूत् ॥ ६३ ॥

राजकुमार के समग्र शरीर की स्वाभाविक कान्ति युवतियों के लिये आनन्ददायक और दूसरे पुरुषों में पहले कभी न देखी गयी सी लग रही थी ॥ ६३ ॥

---

१. काममासीद०–क०, त्रि०, वि०; म०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विश्वम्भरावलयधारणयोग्यबाहोः
सूनोर्नृपः सुरपतिप्रतिमस्वभावः ।
माणिक्यकुम्भभरितैर्मणिमन्त्रपूतै-
स्तीर्थैश्चकार युवराजपदाभिषेकम् ।। ६४ ।।

इति बुद्धघोषविरचिते पद्मचूडामणिनाम्नि महाकाव्ये तृतीयः सर्गः ।।

विश्वम्भरेत्यादि । विश्वम्भरायाः=भूमेः, वलयम्=मण्डलमेव वलयम्=कङ्कणम्, तस्य धारणे योग्यः=अर्हः बाहुः=भुजा यस्य तस्य, सूनोः=पुत्रस्य, सुरपतेः=देवेन्द्रस्य, प्रतिमः=सदृशः, प्रभावः=महिमा, यस्य सः, नृपः=राजा शुद्धोदनः, माणिक्यकुम्भेषु=माणिक्यमयघटेषु, भरितैः=पूर्णैः, मणिभिः=रत्नविशेषैः, मन्त्रैः पूतैः=पवित्रैः परिशुद्धैरित्यर्थः । तीर्थैः=पुण्यजलैः ।

"तीर्थं शास्त्रे गुरौ यज्ञे पुण्यक्षेत्रावतारयोः ।
ऋषिजुष्टजले सत्त्रिण्युपाये··· ··· ··· ···।।' इतिहेमचन्द्रः ।

युवराजस्य, पदे=स्थाने, "पदं व्यवसिति=त्राण-स्थान-लक्ष्मांघ्रि-वस्तुषु" इत्यमरः । अभिषेकम्=आरोहणम्, चकार=अकार्षीत् ।। ६४ ।।

इति पद्मचूडामणिमहाकाव्यस्य कीर्त्तिव्याख्यायां तृतीयः सर्गः ।।'

इन्द्रतुल्य पराक्रमी उस राजकुमार की भुजाएँ पृथ्वीमण्डल का भार धारण करने योग्य हो चली थीं, अतः राजा शुद्धोदन ने उसका मणिमन्त्रपूत एवं पवित्र नदियों के जल से यौवराज्याभिषेक कर दिया ।। ६४ ।।

पद्मचूडामणि महाकाव्य के तृतीय सर्ग का भाषान्तर पूर्ण ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्थः सर्गः

सिद्धार्थविवाहप्रस्तावः

अथो कुमारस्य कुलोद्वहस्य करग्रहं कारयितुं नरेन्द्रः।
का साऽस्य[1] योग्या भुवि कन्यकेति स चिन्तयामास[2] समेतबन्धुः ॥१॥

सिद्धार्थस्य विवाहौपयिकमुपोद्घातमाह कविः—अथो कुमारस्येति। अथो=यौवराज्येऽभिषेकानन्तरं; समेताः=सङ्गताः, बन्धवः=पारिवारिकजनाः यस्य सः; नरेन्द्रः=राजा शुद्धोदनः; कुलोद्वहस्य=वंशधुरन्धरस्य, कुमारस्य=सिद्धार्थस्य; करगृहम्=पाणिग्रहणम्; कारयितुम्=निर्वर्तयितुम्; "भुवि=लोके, का सा=कतमा; कन्यका=तरुणी; अस्य=सिद्धार्थस्य, योग्या=रूपादिष्वनुरूपा"; भवेदिति शेषः। चिन्तयामास=विचारयामास ॥ १ ॥

यौवराज्याभिषेक के बाद, राजा शुद्धोदन ने अपने पारिवारिक के बान्धवों के साथ मिल-बैठकर उस राजकुमार के विवाह के विषय में विचार किया कि पृथ्वी पर इसके विवाह सम्बन्ध के लिये कौन राज्यकन्या योग्य होगी ? ॥ १ ॥

कोलियाधिपतिसन्देशः

तत्रान्तरे कोलियभूमिपालः[3] कुमारिकां मे कुलरत्नदीपाम्।
दास्यामि सूनोस्तव सर्वथेति सन्देशपत्रं विससर्ज तस्मै ॥ २ ॥

तत्रेति। तत्रान्तरे=तस्मिन्नवसरे, कोलियभूमिपालः=कोलियदेशाधिपः; तस्मै=राज्ञे शुद्धोदनाय; रत्नमिव दीपयति=प्रकाशयतीति रत्नदीपा, कुलस्य=वंशस्य रत्नदीपा, ताम्, मे=मम; कुमारिकाम्=विवाहयोग्यां कन्याम्, तव=ते, सूनोः=पुत्रस्य, सिद्धार्थस्येति यावत्। अत्र सम्बन्धसामान्ये षष्ठी। दास्यामि=प्रदास्यामि, इति=इत्थम्, सन्देशपत्रम्; विससर्ज=प्राहिणोत् ॥ २ ॥

इसी अवसर पर, कोलिय देश के राजा ने राजा शुद्धोदन के पास सन्देश-पत्र भेजा कि हम आपके पुत्र के साथ अपनी कन्या का विवाह करने के लिये सन्नद्ध हैं ॥ २ ॥

आकर्ण्य सन्देशमुखादुदन्तमतीव सन्तुष्टमनाः क्षितीशः।
तथैव सज्जीक्रियतां[4] त्वयेति सन्देशमस्मै प्रजिघाय भूयः ॥ ३ ॥

आकर्ण्येति। अतीव=अत्यन्तम्, सन्तुष्टमनाः=सन्तुष्टचित्तः; क्षितीशः=राजा शुद्धोदन; सन्देशमुखात्=सन्देशपत्रद्वारा उदन्तम्=वृत्तान्तम्; "वृत्तान्त

१. कस्यास्य–क०, वि०, पा० त्रि०।
२. सञ्चिन्तयामास–म०।
३. कोलय०—वि०।
४. विसज्जीक्रियताम्–पा० क० त्रि०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदन्तः स्यात्" इत्यमरः। आकर्ण्य=श्रुत्वा; तथैव=त्वदनुसारमेव; सज्जम्=सन्नद्धम्, क्रियताम्=विधीयताम्—इति=इत्थम्; अस्मै=कोलियदेशाधिपतये, सन्देशम्=प्रत्युत्तरम्; प्रजिघाय=प्रेषयामास। प्रपूर्वाद् हिनोतेर्लिट्॥ ३॥

उस सन्देश-पत्र में लिखे सन्देश को सुनकर राजा शुद्धोदन ने कोलियदेशापति को विवाह की तय्यारी करने का सन्देश (पत्र) भिजवाकर इस विवाह के लिये अपनी स्वीकृति दे दी॥ ३॥

तथेति सोऽपि प्रतिगृह्य तस्मै सन्देशपत्रं समुदीर्णहर्षः।
प्रचक्रमे कारयितुं कुमार्या विवाहदीक्षोत्सवमत्युदारम्॥ ४॥

तथेति। सोऽपि कोलियदेशाधिपोऽपि; समुदीर्णः=समुद्भूतः, हर्षः=मोदो यस्य सः; सः=कोलियदेशाधिपः, अपि; तस्य=राज्ञः शुद्धोदनस्य तथा इति=यथोक्तं त्वया तथेति सन्देशपत्रम्=सन्देशवचनम्; प्रतिगृह्य=स्वीकृत्य; अत्युदारम्=अतिमहान्तम्; "उदारो दातृमहतोः" इत्यमरः। विवाहस्य=उद्वाहस्य; दीक्षा=व्रतसंग्रह एव उत्सवः=क्षणस्तम्; "दीक्षासु व्रतसंग्रहः" इति वैजयन्तीकोशः। कारयितुम्=सम्पादयितुम्; प्रचक्रमे=प्रक्रमं कृतवान्॥ ४॥

कोलिय देश के राजा ने शुद्धोदन का उक्त स्वीकृति-सन्देश पाकर अपनी राजकुमारी के विवाह की तैयारियाँ प्रारम्भ कर दीं॥ ४॥

विवाहप्रसङ्गेऽन्तःपुरशोभावर्णनम्

आरोपिताभ्रङ्कषकेतुमालमाबद्धकौशेयवितानशोभम्।
अभ्युच्छ्रितेन्द्रायुधतोरणाङ्कमभ्यन्तरस्थापितपूर्णकुम्भम्॥ ५॥

आरोपितेत्यादि। आरोपिता=उत्क्षिप्ता, अभ्रङ्कषाणाम्=नभःस्पृशाम्, केतूनाम्=ध्वजानाम्, माला=पंक्तिर्यस्मिंस्तत्। आबद्धा=उत्पादिता, कौशेयस्य=पट्टाम्बरस्य; "कौशेयं कृमिकोशोत्थम्" इत्यमरः। यत् वितानम्=उल्लोचः, "अस्त्री वितानमुल्लोचः" इत्यमरः। तत्सम्बन्धिनी शोभा यस्मिंस्तत्। "अभ्युच्छ्रितः=उत्क्षिप्तो यः, इन्द्रायुधम्=शक्रधनुरिव; तदाकारक इति यावत्; तोरणे=बहिर्द्वारे स्थितोऽङ्कः=चिह्नम्, यस्मिंस्तत्; "इन्द्रायुधं शक्रधनुः", "तोरणोऽस्त्री बहिर्द्वारम्" इत्यमरः। तोरणेषु इन्द्रधनुराकाराणि चित्राणि विलिख्यन्ते—इति सम्प्रदायः। तथा च मेघदूते—

"तत्रागारं धनपतिगृहानुत्तरेणास्मदीयं।
दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन"॥ इति।

अभ्यन्तरे=गृहमध्यदेशे, स्थापिताः=निक्षिप्ताः, पूर्णकुम्भाः=भद्रकुम्भाः, यस्मिंस्तत्। "अन्तःपुरं भूमिपतेर्बभूव" इत्यग्रिमेण सह सम्बन्धः॥ ५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आकाश को छूने वाली पताकाओं से सज्जित तम्बू तनवा दिये, जिनपर कि रेशमी चन्दोवे लगे हुए थे; प्रासाद के प्रवेशद्वार पर इन्द्रधनुष की चित्रकारी करवा दी, और प्रासाद में यथास्थान जल से भरे कलश रखवा दिये ॥ ५ ॥

आस्तीर्णमुक्तासिकताभिराममाकीर्णनानाकुसुमोपहारम् ।
आरब्धवैवाहिकसंविधानमन्तःपुरं भूमिपतेर्बभूव ॥ ६ ॥

आस्तीर्णेत्यादि । आस्तीर्णाभिः=विस्तृताभिः मुक्ताभिः=मौक्तिकैः, एव, सिकताभिः=बालुकाभिः, अभिरामम्=मनोहरम् । आकीर्णानि=विकीर्णानि, नानाविधानि, कुसुमानि=पुष्पाणि एव, उपहाराः=उपायनानि, यस्मिंस्तत् । आरब्धम्=आक्रान्तम्, वैवाहिकम्=विवाहप्रयोजनकं संविधानम्=आयोजनं यस्मिस्तत् । भूमिपतेः=कोलियदेशाधिपस्य, अन्तःपुरम्=नारीगृहम्, बभूव=अभूत् ॥ ६ ॥

उस समय उस कोलिय देश के राजा के अन्तःपुर में स्थान-स्थान पर मोती बिखरे हुए थे, और तरह तरह के सुगन्धित फूल प्रासाद और गलियों, सड़कों पर बिखेर दिये गये थे, जिससे कि उस विवाहोत्सव की शोभा द्विगुणित हो उठी थी ॥

कन्याया अलङ्करणम्

अभ्यक्तगात्रीमधिवासितेन तैलेन गन्धामलकोपलिप्ताम्[१] ।
वराङ्गनास्ता[२] मणिकुम्भमुक्तैरम्भोधरैः सादरमभ्यषिञ्चन् ॥ ७ ॥

अभ्यक्तेत्यादि । वराङ्गना=युवतयः; अभ्यक्तम्=उपलिप्तम्, गात्रम्=शरीरं यस्यास्ताम्; अधिवासितेन=सुरभितेन; तैलेन=स्नेहेन; गन्धयुतेन आमलकेन=धात्रीफलेन, तद्रसेनेति यावत्, उपलिप्ताम्=रूषिताम्; ताम्=राजकुमारीम्; मणिकुम्भेभ्यः=मणिमयघटेभ्यः, मुक्तैः=पातितैः; अम्भोधरैः=जलैः; सादरम्=ससम्मानम्; अभ्यषिञ्चन्=स्नानमकार्षुः ॥ ७ ॥

उस समय, राजपुत्री को सुगन्धित तैल का मर्दन (मालिश) किया गया, सुरभित आँवले का उबटन लगाया गया, और सुन्दर युवतियों ने उसको जल से भरे मणिमय कलशों से स्नान कराया ॥ ७ ॥

स्नानावसाने नरदेवकन्या पाथोभरार्द्रं[३] परिमुच्य वासः ।
समाददे चारुतरं दुकूलं चन्द्रातपं शारदिकेव रात्रिः ॥ ८ ॥

स्नानावसान इति । स्नानावसाने=स्नानान्ते; सा=प्रसिद्धा; नरदेवकन्या=कोलियदेशाधिपतिपुत्री; पाथसाम्=जलानाम्, भरेण=राशिना; आर्द्रम्=क्लिन्नम्; वासः=वस्त्रम्; परिमुच्य=त्यक्त्वा; चारुतरम्=शोभनतरम्; दुकूलम्=क्षौमं वासः; "क्षौमं दुकूलं स्याद् द्वे तु" इत्यमरः । शारदिका=शरदृतु-

१. तुङ्गधामल०—क० । ०गन्धामलकेन लि०—म० । २. वाराङ्गना—वि०, क०
३. पाथोभिरा०—त्रि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सम्बन्धिनी; रात्रिः=निशा; चन्द्रातपम्=चन्द्रिकाम्, इवेति उपमायाम्; समाददे=गृहीतवती ॥ ८ ॥

स्नान के बाद, उस राजकन्या ने गीले कपड़े छोड़कर उनके बदले में रेशमी (कौशेय) वस्त्र धारण किये। उस समय वह राजकन्या शरद्‌ऋतु की तारों भरी रात्रि की तरह शोभित होने लगी ॥ ८ ॥

ततः प्रकीर्णाभिनवप्रसूने चतुष्कमध्ये विनिवेश्य सख्यः ।
नानाविधैराभरणैर्नरेन्द्रकन्यामलञ्चक्रुरतिप्रवीणाः ॥ ९ ॥

तत इति। ततः=दुकूलपरिधानानन्तरम्; प्रकीर्णानि=विकीर्णानि, अभिनवानि=नूतनानि, प्रसूनानि=पुष्पाणि, यस्मिस्तस्मिन्; चतुष्कस्य=चतुःस्तम्भविनिर्मितस्य मण्डपस्य मध्ये; विनिवेश्य=स्थापयित्वा; तस्याः=राजपुत्र्याः; अतिप्रवीणाः=अलङ्करणक्रियायामतीव कुशलाः; सख्यः=युवत्यः, ताम्=राजकन्याम्; अलञ्चक्रुः=अलंकृतामकार्षुः ॥ ९ ॥

वस्त्र पहनाने के बाद, उस राजकन्या की सुन्दर एवं अलङ्करण क्रिया में चतुर सखियों ने उसको चार स्तम्भों से बने मण्डप में बैठाकर नानाविध अलङ्कारों एवं पुष्पों से सजाया ॥ ९ ॥

अन्तःसमावेशितफुल्लमल्लीधम्मिल्लबन्धस्तरलेक्षणायाः[1] ।
ततान तारागणशारितस्य गाढान्धकारस्तबकस्य कान्तिम् ॥ १० ॥

अन्तरित्यादि। अन्तः=अन्तर्भागे; समावेशिताः=विन्यस्ताः, फुल्लाः=विकसिताः मल्ल्यः=मल्लिकापुष्पाणि यस्मिन् तादृशः, धम्मिल्लानाम्=कचानाम्, बन्धः=गुम्फनम्; "धम्मिल्लः संयताः कचाः" इत्यमरः। तरलेक्षणायाः=चञ्चलाक्ष्याः; तारागणैः=नक्षत्रसमूहैः, शारितस्य=चित्रितस्य; गाढः निविडोयोऽन्धकारः=अन्धतमः, तस्य स्तबकस्य=वृन्दस्य; कान्तिम्=शोभाम्; ततान=विस्तारयामास ॥ १० ॥

उस राजकन्या की तरह-तरह के फूलों से सज्जित चोटी (=धम्मिल्ल, वेणी) उसी तरह शोभित हो रही थी मानों गहरे अन्धकार वाली शरद् ऋतु की रात्रि तारागणों से शोभित हो ॥ १० ॥

आकुञ्चिताग्रैरलकैः प्रशस्तैस्तस्या मुखाम्भोरुहमाबभासे ।
तदीयसौरभ्यसमृद्धिलोभादालीयमानैरिव चञ्चरीकैः ॥ ११ ॥

आकुञ्चितेत्यादि। तस्याः=राजपुत्र्याः, मुखाम्भोरुहम्=मुखकमलम्; आकुञ्चितानि=ईषद्वक्राणि, अग्राणि=अग्रभागानि, येषां तैः; प्रशस्तैः=शोभनैः;

---

१. ०मल्लि०—म०, त्रि०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अलकैः=चूर्णकुन्तलैः; तदीयायाम्=मुखसम्बन्धिन्याम्, सौरभ्यस्य=गन्धस्य समृद्धौ=वृद्धो लोभात्=लुब्धैः; आलीयमानैः=अश्लिष्यमाणैः, चञ्चरीकैः=भ्रमरैः, इवेत्युत्प्रेक्षायाम्, आबभासे=शुशुभे ॥ ११ ॥

उसका मुख सुन्दर घुँघराले बालों से ऐसा लग रहा था मानों उसकी मुखशोभा के लोभ से वहाँ भौंरे मण्डरा रहे हों ॥ ११ ॥

सिन्दूरक्लृप्तः क्षितिपालपुत्र्या विवाहदीक्षातिलको विरेजे ।
प्राप्ताधिपत्यस्य मनोभवस्य प्रतापबालार्क इवोज्जिहानः ॥ १२ ॥

सिन्दूरेत्यादि । क्षितिपालपुत्र्याः=राजकुमार्याः, सिन्दूरेण=नागजेन, क्लृप्तः=रचितः; विवाहदीक्षायाः=विवाहव्रतारम्भस्य, तिलकः=विशेषकम्; "तमालपत्रतिलकचित्रकाणि विशेषकम्" इत्यमरः । प्राप्तम्=अधिगतम्, ऐश्वर्यम्=स्वामित्वं येन तस्य; मनोभवस्य=मदनस्य; प्रतापबालार्कः=प्रताप एव बालसूर्यः; उज्जिहानः=उद्गच्छन् इव; विरेजे=शोभामाप । इवेत्युत्प्रेक्षायाम् ॥ १२ ॥

विवाह-विधि में प्रमुख माना जाने वाला सिन्दूर-तिलक उस कमलमुखी राजकुमारी के स्मित हास्य वाले मुख पर ऐसा ही लग रहा था जैसे उसका प्रतापरूपी बालसूर्य हो ॥ १२ ॥

कर्णावसक्ताः कमलेक्षणाया यवाङ्कुराः[1] सातिशयं विरेजुः ।
त्रिलोकजिष्णोः कुसुमायुधस्य कीर्त्तिप्ररोहा इव जृम्भमाणाः ॥ १३ ॥

कर्णेत्यादि । कमलेक्षणायाः=कमलनेत्रायाः (तस्याः कोलियाधिपतिकन्यायाः) कर्णयोः=कर्णप्रदेशयोः, अवसक्ताः=लग्नाः; यवाङ्कुराः=यवानां धान्यविशेषाणां प्ररोहाः; त्रिलोकस्य=लोकत्रयस्य, जिष्णोः=विजयनशीलस्य, कुसुमायुधस्य=मन्मथस्य, मारस्येति यावत्; जृम्भमाणाः=वर्धमानाः, कीर्तिप्ररोहाः=यशोऽङ्कुरा इव; सातिशयम्=आधिक्येन सह, विरेजुः=शुशुभिरे ॥ १३ ॥

कर्णफूल—उसके कानों पर कर्णफूल के रूप में सजे यवांकुर ऐसे शोभायमान थे जैसे त्रिलोकी को जीतने चले पुष्पधन्वा कामदेव की यशःकान्ति बढ़ रही हो ॥

कस्तूरिकाकल्पितपत्रलेखस्तस्याः कपोलः शशिमण्डलश्रीः ।
आक्रम्य तस्थौ मुकुरस्य शोभामम्भोदवातैर्मलिनोदरस्य ॥ १४ ॥

कस्तूरिकेत्यादि । तस्याः=राजकन्यायाः कस्तूरिकया=मृगमदेन; "मृगनाभिर्मृगमदः कस्तूरी च" इत्यमरः । कल्पिता=रचिता, पत्ररेखा=

१. यावाङ्कुराः-त्रि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पत्रावलिर्यस्य सः। शशिमण्डलवत्=चन्द्रमण्डलवत्, श्रीः=शोभा यस्य सः; कपोलः=गण्डप्रदेशः, अम्भोदवातैः=मेघवायुभिः; मलिनमुदरम्=अन्तस्तलं यस्य तस्य; मुकुरस्य=दर्पणस्य, शोभाम्=कान्तिम्, आक्रम्य=अतिक्रम्य, तस्थौ=स्थितः ॥ १४ ॥

कपोल—चन्द्रमण्डल की शोभावाले उसके कपोल (गण्डस्थल) कस्तूरी के लेप से बनी चित्रकारी से ऐसे लग रहे थे जैसे जलवाले बादलों की गीली हवा से मैला हुआ दर्पण हो ॥ १४ ॥

विन्यस्तकालाञ्जनदर्शनीयं विलोचनं मीनविलोचनायाः।
अत्युग्रहालाहलपङ्कदिग्धामनङ्गबाणश्रियमन्वयासीत् ॥ १५ ॥

विन्यस्तेत्यादि। मीनवत्=मत्स्यवत्, विलोचने=नेत्रे यस्यास्तस्याः, विलोचनम्=नेत्रम्, विन्यस्तेन=विक्षिप्तेन, कालेन=श्यामलेन, "कालश्यामल-मेचकाः" इत्यमरः; अञ्जनेन=कज्जलेन, जातं दर्शनीयम्=दर्शनयोग्यं, सत; अत्युग्रेण=तीव्रतरेण, हालाहलपङ्केन=कालकूटकर्दमेन, दिग्धाम्=लिप्ताम्; अनङ्गबाणस्य=मन्मथबाणस्य, श्रियम्=शोभाम्; अन्वयासीत्=अन्वकार्षीत् ॥ १५ ॥

नेत्र—उस मछली की सी आँखों वाली राजकन्या के चञ्चल नेत्र आँजन लगाने से और भी अधिक शोभित हो रहे थे मानों तीव्रतर विष से लिप्त कामदेव के बाण हों ॥ १५ ॥

अनन्यसाधारणपाटलिम्नस्तस्या मनोज्ञस्य रदच्छदस्य।
आकल्पिता यावकपङ्कभूतिरभूतपूर्वां न चकार शोभाम् ॥ १६ ॥

अनन्येत्यादि। तस्याः=कन्यायाः, अनन्यसाधारणः=अन्यदुर्लभः, पाटलिमा=रक्तिमा, यस्य तस्य; मनोज्ञस्य=मनोहरस्य, रदच्छदस्य=अधरोष्ठस्य, "ओष्ठोऽधरो रदच्छदः" इति हेमचन्द्रः। यावकपङ्कस्य=लाक्षाकर्दमस्य, "यावकोऽलक्तो द्रुमामयः" इत्यमरः। भूतिः=ऐश्वर्यम्, "विभूतिर्भूतिरैश्वर्यम्" इत्यमरः। अभूतपूर्वाम्=नूतनाम्, शोभाम्=कान्तिम्, न चकार=कृतवती ॥ १६ ॥

दन्तपंक्ति—उस राजकन्या की सुन्दर दन्तपंक्ति कुछ ललाई और कुछ सफेदी लिये हुए ऐसी लग रही थी जैसे लाख (लाक्षा) का घोल (लेप) हो ॥ १६ ॥

अलंकृतं मौक्तिककुण्डलाभ्यामम्भोरुहाक्ष्या मुखमार्द्रहासम्।
पार्श्वद्वयावस्थितपुण्डरीककोशं शरत्कोकनदं जिगाय ॥ १७ ॥

अलंकृतमिति। अम्भोरुहाक्ष्याः=कमलनेत्रायाः (तस्याः), मौक्तिक-कुण्डलाभ्याम्=मुक्तामयकर्णकुण्डलाभ्याम्, अलंकृतम्=शोभितम्, आर्द्रहासम्=

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सस्मितं मुखम्=आननम्; पार्श्वद्वये=उभयपार्श्वे, अवस्थितौ, पुण्डरीककोशौ-सिताम्भोजमुकुलौ यस्य तत्, ''पुण्डरीकं सिताम्भोजम्'' ''कोशोऽस्त्री कुड्मले खड्गपिधाने'' इत्यमरः। शरत्कोकनदम्=शारदं रक्तोत्पलम्, ''रक्तोत्पलं कोकनदम्'' इत्यमरः। जिगाय=अजयत् ॥ १७ ॥

मुखमण्डल—उस कमलनयना राजकुमारी का मधुर मुस्कान वाला मुखमण्डल ऐसा शोभित हो रहा था जैसे दो सफेद कमलों के बीच शरदृतु का एक रक्त कमल शोभित हो रहा हो ॥ १७ ॥

आमुक्तमुक्तासरदर्शनीयमाबिभ्रती कण्ठमतीव रेजे ।
निष्ठ्यूतमुक्तानिकराभिरामशङ्खोज्ज्वला सागरवीचिकेव ॥ १८ ॥

आमुक्तेत्यादि । सा=कन्यका, आमुक्तेन=धृतेन, मुक्तासरेण=मौक्तिकहारेण, दर्शनीयम्=शोभनीयम्, कण्ठम्=ग्रीवाम्, आबिभ्रती=धारयती, सती, निष्ठ्यूतैः=उद्‌गीर्णैः, मुक्तानिकरैः=मौक्तिकसमूहैः, अभिरामेण=रमणीयेन, शङ्खेन, उज्ज्वला=दीप्रा, सागरस्य=समुद्रस्य, वीचिका=तरङ्गा इव, रेजे=चकासे ॥ १८ ॥

कण्ठ—सुन्दर मोतियों की माला धारण किया उस राजपुत्री का कण्ठ उसी तरह शोभित हो रहा था मानों मोती निकले श्वेत शङ्खों से भरा समुद्रतट हो ॥ १८ ॥

तस्या वपुश्चन्दनपङ्कलिप्तमामोदिकालागरुभक्तिचित्रम् ।
कलिन्दजाकर्बुरितान्तरायाः शोभामपुष्यत् सुरशैवलिन्याः ॥ १९ ॥

तस्या इति । तस्याः=राजकन्यायाः, आमोदिन्या=सुरभिण्या, कालागरोः, भक्त्या=भङ्गेन, चित्रम्=नानावर्णम्, वपुः=शरीरम्, कलिन्दजया=यमुनया, कर्बुरितम्=चित्रितम्, अन्तरम्=अन्तर्भागो यस्यास्तस्याः। सुरशैवलिन्याः=गङ्गायाः, शोभाम्=कान्तिम्, अपुष्यत्=पुपोष ॥ १९ ॥

मुख—उस राजपुत्री का चन्दनलिप्त मुख सुगन्धित काले अगर से चित्रित होकर ऐसा लग रहा था जैसे यमुना के जल से सम्पृक्त गङ्गा नदी हो ॥ १९ ॥

पयोधरद्वन्द्वमनिन्दिताङ्ग्याः परिस्फुरन्निस्तलतारहारम्[1] ।
आकीर्णतारानिकराभिरामामस्ताद्रिशृङ्गश्रियमन्वगच्छत्[2] ॥ २० ॥

पयोधरेत्यादि । अनिन्दिताङ्ग्याः=अनवद्यावयवायाः; तस्याः, पयोधरद्वन्द्वम्=स्तनयुगलम्, ''स्त्रीस्तनाब्दौ पयोधरौ'' इत्यमरः। परिस्फुरन्=प्रकाशमानः, निस्तलानाम्=तलरहितानाम्, वर्तुलानामित्यर्थः, ताराणाम्=

१. ०निस्तुल–त्रि० ।
२. ०भिराम—क०, म० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुद्धमुक्तामणीनाम्, हारो यस्मिंस्तत्। "वर्तुलं निस्तलं वृत्तम्", "तारस्तु मुक्ताशुद्धौ सुमौक्तिके" इत्युभयत्र वैजयन्ती। आकीर्णैः=विकीर्णैः, ताराणाम्, "नक्षत्रमृक्षं भं तारा" इत्यमरः, निकरैः=समूहैः, अभिरामाम्=रमणीयाम्, अस्ताद्रेः=अस्ताचलस्य, शृङ्गस्य=शिखरस्य, श्रियम्=शोभाम्, अन्वगच्छत्=अन्वगमत् ॥ २० ॥

स्तनमण्डल—उस सुन्दर शरीर वाली राजकुमारी के दोनों स्तन गोल ताराओं जटित हार की कान्ति से ऐसे लग रहे थे जैसे तारासमूह की कान्ति से दर्शनीय अस्ताचल के शिखर हों ॥ २० ॥

बलित्रयालंकृतमध्यदेशा तन्वी विलोलस्तनभारहारा।
तरङ्गिता शीकरजालिताङ्गचक्राह्वया शैवलिनीव रेजे ॥ २१ ॥

वलित्रयेत्यादि। बलित्रयेण=त्रिवल्या, अलंकृतः=मध्यदेशो यस्याः सा; विलोलः=चञ्चलः, स्तनभारे स्थितः हारो यस्याः सा, तन्वी=सुन्दरी; सा=कन्या, सीकरजालितानि=सञ्जातशीकरजालानि, अङ्गानि=अवयवा येषाम्, तेषाद्दृशाः, चक्राह्वया=चक्रवाकपक्षिणो यस्याः सा; शैवलिनी=नदी, "तरङ्गिणी शैवलिनी" इत्यमरः। इवेति उपमायाम्; रेजे=शृशुभे ॥ २१ ॥

उस राजकुमारी के शरीर का मध्यभाग तीन रेखाओं से अङ्कित था। उसका स्तनमण्डल झिलमिल कान्तिवाले हार से अलंकृत था। उस समय वह राजकुमारी ऐसी लग रही थी मानों गीले पंखों वाले चक्रवाक पक्षियों से भरी कोई नदी हो ॥

माणिक्यकाञ्चीवलयानुविद्धश्रोणीभरा क्षोणिपतेस्तनूजा।
वसुन्धरा वारिधिरत्नगर्भवेलासमालिङ्गितसैकतेव ॥ २२ ॥

मणिक्येत्यादि। माणिक्यकाञ्चीवलयेन=रत्नमेखलामण्डलेन, अनुविद्धः=व्याप्तः, श्रोणीभरः=कटिप्रदेशो यस्याः सा, सा, क्षोणीपतेः=भूपतेः, तनूजा=पुत्रीः वारिधेः=समुद्रस्य, रत्नानि गर्भे यस्याः सा; "तोयोत्थितं तत्पुलिनं सैकतं सिकतामयम्" इत्यमरः। वसुन्धरा=पृथ्वी इव। रराजेत्यग्रिमेण सह सम्बन्धः ॥ २२ ॥

कटिप्रदेश—उस कोलिय देश के राजा की पुत्री का कटिप्रदेश मणिजटित करधनी से घिरा हुआ था, मानों समुद्र के रत्नों से घुली-मिली तटभूमि से युक्त पृथ्वीमण्डल हो ॥ २२ ॥

रराज तस्या नवरोमराजिरारोहतस्तुङ्गपयोधराद्रिम्।
शृङ्गारयोनेरवलम्बनार्थमालम्बितेन्दीवरमालिकेव ॥ २३ ॥

रराजेति। तस्याः=राजपुत्र्याः, नवरोमराजिः=नूतनरोमरेखा, तुङ्गपयोधराद्रिम्=उन्नत स्तनगिरिम्, आरोहतः=आरोहणं कुर्वतः, शृङ्गार-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योनेः=मदनस्य, "शृङ्गारयोनिः श्रीपुत्रः" इत्यमरः । अवलम्बनार्थम्=आलम्बनाय; आलम्बिता=अधोमुखं क्षिप्ता, इन्दीवरमालिका=नीलोत्पलमाला, इव, रराज=शुशुभे ॥ इवेत्युत्प्रेक्षायाम् ॥ २३ ॥

रोमावलि—उस राजपुत्री की नवीन रोमपंक्ति ऊँचे स्तनमण्डलरूपी पर्वत पर चढ़ती हुई ऐसी लग रही थी मानों कामदेव को सहारा देने के लिये नीचे की तरफ लटकायी गयी नीलकमल की माला हो ॥ २३ ॥

अनर्घचामीकरकल्पिताभिरलंक्रियाभिः सुतनुश्चकाशे ।
समुज्ज्वला नूतनमञ्जरीभिः सञ्चारिणी चम्पकवल्लरीव ॥ २४ ॥

अनर्घेत्यादि । सा सुतनुः=शोभनशरीरा; अनर्घेण=अमूल्येन, चामीकरेण=सुवर्णेन, कल्पिताभिः=निर्मिताभिः, अलंक्रियाभिः=अलङ्करणैः; "मूल्ये पूजाविधावर्घः", चामीकरं जातरूपम्" इत्युभयत्रामरः । नूतनमञ्जरीभिः=नवपुष्पस्तबकैः; सञ्चारिणी=जङ्गमा, चम्पकवल्लरी=चम्पकलता इव, चकाशे=बभासे ॥ २४ ॥

वह सुन्दर राजपुत्री सुवर्णनिर्मित आभूषणों से ऐसे अलंकृत थी मानों नई नई मञ्जरियों से युक्त कोई चम्पकलता हो ॥ २४ ॥

अलक्तकासङ्गविवृद्धरागमंघ्रिद्वयं कोमलमायताक्ष्याः ।
नवातपस्पर्शविशेषदृश्यां नालीकशोभां नमयाञ्चकार ॥ २५ ॥

अलक्तकेत्यादि । आयताक्ष्याः=विशालाक्ष्याः; तस्याः=कन्यायाः, अलक्तकस्य=लाक्षारसस्य, आसङ्गेन=सम्बन्धेन, विवृद्धरागम्=अतिपाटलम्, अंघ्रिद्वयम्=चरणयुगलम्, नवातपस्त=बालातपस्य, स्पर्शेन, विशेषदृश्याम्=अतिमनोहराम्, नालीकशोभाम्=पद्मकान्तिम्, नमयाञ्चकार=तिरश्चकार ॥

चरणकमल—उस कमलनयना राजपुत्री के कोमल चरणकमल, आलता (लाक्षारस) लगा होने के कारण, नये बालसूर्य की किरणों से सम्पृक्त रक्तकमलों को भी तिरस्कृत कर रहे थे ॥ २५ ॥

आकल्पसौन्दर्यदिदृक्षयेयमाबिभ्रती[१] स्फाटिकमात्मदर्शम् ।
विदिद्युते पूर्णशशाङ्कबिम्बसम्पर्किणी शातमखी दिशेव ॥ २६ ॥

आकल्पेत्यादि । आत्मनः, आकल्पस्य=मण्डनस्य, "स्यादाकल्पस्तु मण्डने" इति हेमचन्द्रः । सौन्दर्यस्य=लावण्यस्य, दिदृक्षया=द्रष्टुमिच्छया, स्फाटिकम्=स्फटिकमयम्, आत्मानं दर्शयतीत्यात्मदर्शम्=निजरूपदर्शकम्, दर्पणम्=मुकुरम्, आबिभ्रती=धारयती, इयम्=कन्यका, पूर्णशशाङ्कबिम्बसम्पर्किणी=पूर्णचन्द्रमण्डलवती, शतमखस्येयं शातमखी=इन्द्रसम्बन्धिनी, दिशा=दिक्, "दिक् तु स्त्रियां दिशा दान्ती ककुद् देववधूः पविः" इति शब्दार्णवः ॥

१. दिदृक्षयैव--त्रि० क० पा०, वि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपने शृङ्गार के कारण विवृद्ध सौन्दर्य के देखने की इच्छा से हाथ में लिये दर्पण से वह राजपुत्री ऐसी लग रही थी मानों पूर्ण चन्द्रमण्डल से युक्त ऐन्द्री (पूर्व) दिशा हो ॥ २६ ॥

अनन्तरं बन्धुरगात्रयष्टेः पुरोधसः पूर्णमनोरथायाः ।
न केवलं कौतुकमाबबन्धुः कराम्बुजे किञ्च हृदम्बुजेऽपि ॥ २७ ॥

अनन्तरमिति । अनन्तरम्=अलङ्करणपरिसमाप्त्यनन्तरम्, पुरोधसः=पुरोहिताः; बन्धुरा=मनोज्ञा, गात्रयष्टिः-देहदण्डो यस्यास्तस्याः; "बन्धूर-बन्धुरौ रम्ये" इति विश्वः । पूर्णमनोरथायाः=सन्तोषाधिक्यात् परिपूर्ण-चित्तायाः; कौतुकम्=प्रतिसरसूत्रम्, कुतूहलं च; "कौतुकं विषयाभोगे हस्त-सूत्रे कुतूहले" इति वैजयन्ती । न केवलं कराम्बुजे=करकमले अपि तु हृदम्बुजे=हृत्कमलेऽपि; आबबन्धुः=बन्धयामासुः ॥ २७ ॥

अलङ्करणपरिसमाप्ति के बाद, सन्तोषाधिक्य से स्वस्थ (स्थिर) चित्तवाली उस राजकन्या द्वारा हाथ में लिये कमलपुष्प तथा स्थिरता के कारण उसके हृत्कमल की सुन्दरता से धार्मिक विधि सम्पन्न कराने वाले पुरोहितजन भी आश्चर्यचकित रह गये ॥ २७ ॥

वरस्यागमनप्रतीक्षणम्

एवं समापय्य कुमारिकाया वैवाहिकं मण्डनसंविधानम् ।
कुतूहली कौलियभूमिपालस्तस्थौ वरस्यागममीक्षमाणः ॥ २८ ॥

एवम्=अनेन प्रकारेण, कुमारिकायाः स्वकीयकन्यकायाः; वैवाहिकम्=विवाहसम्बन्धि; मण्डनसंविधानम्=अलङ्कारयोजनम्, समापय्य=पूर्णं कारयित्वा; कुतूहली=आत्मनि कौतुकं धारयमाणः; कोलियभूमिपालः=कोलियाधिपतिः; वरस्य=जामातुः सिद्धार्थस्य; आगमम्=आगमनम्, ईक्षमाण=प्रतीक्षमाणः सन् तस्थौ=अतिष्ठत् ॥ २८ ॥

इस तरह अपनी उस राजपुत्री की विवाहसम्बन्धी अलङ्करणक्रिया पूर्ण करा चुकने के बाद, कोलियदेश के राजा, वर (सिद्धार्थ) के आगमन की प्रतीक्षा में (अपने प्रासाद के बहिर्द्वार पर आकर) खड़े रहे ॥ २८ ॥

सिद्धार्थस्योद्वाहभूषाधारणम्

अथ स्ववेश्मन्यधिराजसूनुः स्नातानुलिप्तो नवधौतवासाः ।
उल्लासिकां लोकविलोचनानामुद्वाहभूषामुररीचकार[1] ॥ २९ ॥

अथेति । अथ=पुनःसन्देशप्रेषणानन्तरम्; अधिराजसूनुः=राजपुत्रः; स्ववेश्मनि=स्वगृहे; "वेश्म सद्म निकेतनम्" इत्यमरः । स्नातानुलिप्तः=पूर्वं स्नातः,

१. ०मुद्वाहलीला०—क० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पश्चादनुलिप्तः; नवम्=नवीनम्, धौतम्=क्षालितम्, वासः=वस्त्रम् यस्य सः; लोकविलोचनानाम्=द्रष्टुर्नेत्राणाम्; उल्लासिकाम्=आनन्दयित्रीम्, उद्वाहभूषाम्=उद्वाहकालयोग्यमलङ्करणम्; उररीचकार=स्वीचकार ॥ २९ ॥

उधर सम्राट् शुद्धोदन के पुत्र (सिद्धार्थ) ने पहले स्नान किया, फिर शरीर पर यथास्थान चन्दन कस्तूरी केशर का लेप किया, नये वस्त्र पहने, और अन्त में दर्शकों के नेत्रों को प्रिय लगने वाली विवाहसम्बन्धी वेशभूषा धारण की ॥ २९ ॥

सुवर्णसूत्रग्रथितान्तरेण क्षौमोत्तरीयेण स राजसूनुः ।
विद्युत्पिनद्धेन शरद्घनेन वियत्तलाभोग इव व्यराजत् ॥ ३० ॥

सुवर्णेत्यादि । स राजसूनुः=राजपुत्रः; सुवर्णसूत्रैः=हेममयैः सूत्रैः ग्रथितम्=स्यूतम्, अन्तरम्=मध्यभागो यस्य तेन; क्षौमोत्तरीयेण=दुकूलोत्तरीयवस्त्रेण, विद्युता=तडिता, पिनद्धेन=संयुक्तेन, शरद्घनेन=शरत्कालमेघेन; वियत्तलाभोगः=आकाशप्रदेशः, इव; व्यराजत्=विराजमानोऽभूत् : 'पिनद्धेन' इत्यत्र "वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः" इति अपेरकारस्य लोपः ॥

तब वह राजपुत्र अपने शरीर पर सुवर्णमय आभूषण पहनकर उपर से रेशमी दुपट्टा डालकर ऐसे शोभित हो रहे थे मानो बिजली से सम्पृक्त शरत्कालीन मेघ से आकाशमण्डल शोभित हो रहा हो ॥ ३० ॥

विशालवक्षःस्थललम्बितेन मुक्ताकलापेन बभौ कुमारः ।
विराजमानेन तटोपकण्ठं छायापथेनेव सुवर्णशैलः ॥ ३१ ॥

विशालेत्यादि । कुमारः=सिद्धार्थः; विशाले=विपुले, वक्षःस्थले=उरुप्रदेशे, लम्बितेन=आमुक्तेन, मुक्ताकलापेन=मौक्तिकभूषणेन, "कलापो भूषणे बर्हे" इत्यमरः । सुवर्णशैलः=सुमेरुपर्वतः, तटस्य=सानोः, उपकण्ठं=समीपं, विराजमानेन=शोभमानेन, छायापथेन=ज्योतिश्चक्रमध्यवर्तिदक्षिणोत्तरायतगगनावकाशविशेषेण, बभौ=शुशुभे ॥ ३१ ॥

विशाल वक्षःस्थल पर लम्बे लटकते मोतियों के हार से वे राजकुमार ऐसे सुन्दर लग रहे थे मानो शिखर पर पड़ने वाली सूर्यकान्ति से शोभित सुमेरु पर्वत हो ॥ ३१ ॥

प्रसन्नगम्भीरवपुः कुमारः प्रवालमुक्तामयकुण्डलाभ्याम्[1] ।
चण्डांशुताराधिपमण्डलाभ्यामलंकृतो मेरुरिवालुलोके ॥ ३२ ॥

प्रसन्नेत्यादि । प्रसन्नम्=निर्मलम्, गम्भीरम्=अप्रधृष्यम्, वपुः=शरीरं यस्य सः, कुमारः=सिद्धार्थः, प्रवालमुक्तामयाभ्याम्=विद्रुममौक्तिकप्रचुरा-

१. ०मुक्ताफल०-म० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्याम्, कुण्डलाभ्याम्=मण्डलाभ्याम्, चण्डांशुः=सूर्यः, ताराधिपः=चन्द्रस्तयो-र्मण्डलाभ्याम्, अलंकृतः=शोभितः, मेरुः=सुमेरुपर्वत इव, आलुलोके=ददृशे ॥

प्रसन्न और गम्भीर चेष्टा वाले तथा अपने कानों में प्रवाल और मोतियों से बने कर्णकुण्डल पहने वे राजकुमार इस तरह शोभित हो रहे थे मानों सूर्य और चन्द्रमा से घिरा हुआ सुमेरु पर्वत हो ॥ ३२ ॥

वरश्चकाशे हरिचन्दनार्द्रो बालातपाताम्र इवोदयाद्रिः ।
धातुच्छटाविच्छुरितः[1] करीव सन्ध्यामहःसान्द्र इवामृतांशुः ॥ ३३ ॥

वर इति । वरः=सिद्धार्थः, हरिचन्दनेन=रक्तचन्दनेन, आर्द्रः=अनुलिप्तः, बालातपेन=बालसूर्यप्रभया, आ=समन्तात्, ताम्रः=रक्तवर्णः, उदयाद्रिः=उदयाचल इव, धातुच्छटया=गैरिकादिधातुपुञ्जेन, विच्छुरितः=रूषितः, करि=हस्ती, इव, सन्ध्यायाः=सन्ध्याकालस्य, महःसान्द्रः=तेजोव्याप्तः, अमृतांशुः=चन्द्र इव, चकाशे=शुशुभे ॥ ३३ ॥

हरिचन्दन (लाल चन्दन) के लेप से अनुलिप्त वह वर (सिद्धार्थ) बालसूर्य की किरणों से ताम्रवर्ण हुए उदय पर्वत की तरह तथा गैरिक आदि धातुओं की धूल से भरी देहवाले हाथी की तरह या सान्ध्यकालिक कान्तियुक्त चन्द्रमा की तरह लग रहा था ॥ ३३ ॥

आदर्शबिम्बे प्रतिमाशरीरमामुक्तरत्नाभरणस्य यूनः ।
वैकर्तनं मण्डलमास्थितस्य पुंसः पुराणस्य पुपोष लक्ष्मीम् ॥ ३४ ॥

आदर्शेत्यादि । आदर्शबिम्बे=दर्पणे, प्रतिमाशरीरम्=प्रतिफलितशरीरम्, आमुक्तम्=धृतम्, रत्नाभरणम्=रत्नभूषणम्, येन तस्य, यूनः=तरुणस्य, विकर्तनस्य=सूर्यस्येदं वैकर्तनम्=सूर्यसम्बन्धि, मण्डलम्=चक्रम्, आस्थितस्य=विराजमानस्य, पुराणस्य=सनातनस्य, पुंसः=विष्णोः, लक्ष्मीम्=श्रियम्, पुपोष=पोषितवान् ॥ ३४ ॥

उस तरुण युवक की दर्पण में भूषणालंकृत शरीरशोभा ऐसी लग रही थी मानो स्वयं सूर्यमण्डलस्थित पुराणपुरुष (विष्णु) हो ॥ ३४ ॥

अलंक्रियाऽजायत देहकान्तिर्नैसर्गिकी तस्य नरेन्द्रसूनोः ।
ऐश्वर्यचिह्नानि परं बभूवुरन्यानि माणिक्यविभूषणानि ॥ ३५ ॥

अलंक्रियेति । तस्य=प्रसिद्धस्य, नरेन्द्रसूनोः=राजपुत्रस्य, नैसर्गिकी=स्वाभाविकी, देहकान्तिः=शरीरशोभा, एव, अलंक्रिया=अलङ्करणम्, अजायत=जाता । अन्यानि=अपराणि, देहे धारितानि, माणिक्यभूषणानि=माणिक्या-

---

१. बालच्छटा–वि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लङ्करणानि, तु, ऐश्वर्यचिह्नानि=समृद्धिसूचकलक्षणानि, परम्=अतिशयेन, बभूवुः=अभूवन् ॥ स्वभावसुन्दरस्य कुमारस्य भूषणजालं न शोभायै, अपि तु समृद्धिसूचनायेति भावः ॥ ३५ ॥

(वास्तविकता यह है कि) उस राजपुत्र सिद्धार्थ की स्वाभाविक देहकान्ति ही उसके शरीर का वास्तविक अलङ्करण थी। अवशिष्ट मणिमाणिक्यनिर्मित अलङ्कार तो उसके लिए ऐश्वर्यचिह्न (समृद्धि सूचक) ही लग रहे थे ।। ३१ ।।

सम्बन्धिगृहं प्रति प्रस्थानम्

उत्क्षिप्तमुक्तातपवारणश्रीरुद्धूतबालव्यजनोपचारः ।
आरुह्य वैवाहिकमौपवाह्यं जगाम सम्बन्धिगृहं कुमारः ॥ ३६ ॥

उत्क्षिप्तेत्यादि । कुमारः=सिद्धार्थः, उत्क्षिप्तस्य=ऊर्ध्वं धृतस्य, मुक्तातपवारणस्य=मौक्तिकमयच्छत्रस्य, श्रीः=शोभा यस्य सः, उद्धूते=उच्चालिते, बालव्यजने, चामर एव=उपचारः=पूजा, यस्य सः, वैवाहिकम्=विवाहे साधु, औपवह्यम्=राजार्हगजादियानम्, "औपवह्यो राजवह्यः" इति वैजयन्ती। सम्बन्धीगृहम्=श्वसुरगृहम्, जगाम=प्रतस्थे ॥ ३६ ॥

तब उस राजकुमार ने मुक्तामणिजटित छत्र, एवं चामर से युक्त हो विवाह के उपयुक्त, राजाओं के योग्य यान (पालकी) से श्वसुरगृह कोलियराज के प्रासाद की तरफ प्रस्थान किया ॥ ३६ ॥

श्वसुरगृहे सिद्धार्थस्य सत्कारः

तमागतं शाक्यकुलप्रदीपं क्षोणीपतिः कोलियचक्रवर्त्ती ।
स्वयं पदाभ्यामभिगम्य दूरं वैवाहिकं मण्डपमानिनाय ॥ ३७ ॥

तमिति । क्षोणीपतिः=पृथ्वीपतिः, कोलियचक्रवर्ती=कोलियराजा, शाक्यकुलप्रदीपम्=शाक्यकुलभूषणम्, तस्य=सिद्धार्थकुमारम्, आगतम्=आयातम्, वीक्ष्य, स्वयम्=आत्मना, दूरम्=दूरपर्यन्तम्, पदाभ्याम्=चरणाभ्याम्; अभिगम्य=समीपं गत्वा, वैवाहिकम्=विवाहसम्बन्धि, मण्डपम्=पूजास्थानम्, आनिनाय=आनीतवान् ॥ ३७ ॥

कोलियराज उस शाक्यवंशप्रदीप राजकुमार को, दूर से ही, आता हुआ देखकर यान के बिना स्वयं पैरों से चलकर, विवाहमण्डप में ससम्मान ले आये ॥ ३७ ॥

ददर्श धीरः क्षितिपालपुत्रीं तत्र स्थितां तारकराजवक्त्राम्[२] ।
लीलारविन्देन करस्थितेन पयोधिकन्यामिव भासमानाम् ॥ ३८ ॥

१. ०वैहारिक०—पाठा० ।
२. ०राजवक्त्रीम्—क०, पा०, त्रि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ददर्शेति । धीरः=गम्भीरः, स सिद्धार्थः; तत्र=विवाहमण्डपे, स्थिताम्=वर्तमानाम्, तारकराजवक्त्राम्=चन्द्रमुखीम्; क्षितिपालस्य=राज्ञः, पुत्रीम्=कन्याम्; करस्थितेन=हस्ते धृतेन; लीलारविन्देन=लीलार्थं धृतेन पङ्कजेन, भासमानाम्=शोभमानाम्; पयोधिकन्याम्=समुद्रकन्याम्, लक्ष्मीमिति यावत्; ददर्श=अवलोकितवान् ॥ ३८ ॥

उस धीर राजपुत्र ने चन्द्रमुखी राजकन्या को विवाहमण्डप में बैठी हुई देखा । वह राजकन्या वहाँ ऐसी शोभित हो रही थी मानो हाथ में कमलपुष्प लिये साक्षात् लक्ष्मी विराजमान हो ॥ ३८ ॥

सोत्कण्ठमालोकयतः कुमारीं सुधांशुशोभापरिभावुकाङ्गीम् ।
अतीत्य वेलामधिराजसूनोरानन्दसिन्धुः प्रससार दूरम् ॥ ३९ ॥

सोत्कण्ठमिति । सुधांशोः=चन्द्रस्य, शोभायाः=कान्तेः, परिभावुकाणि=तिरस्करणशीलानि, अङ्गानि=शरीरावयवाः यस्यास्ताम्; कुमारीम्=तां राजकन्याम्; सोत्कण्ठम्=औत्सुक्यसहितम्, आलोकयतः=पश्यतः, अधिराजसूनोः=चक्रवर्त्तिपुत्रस्य सिद्धार्थस्य; आनन्दसिन्धुः=आनन्दसमुद्रः; वेलाम्=तटम्, अतीत्य=अतिक्रम्य; दूरम्=दूरपर्यन्तम्, प्रससार=प्रसृतवान् ॥ ३९ ॥

अपने अङ्गों की शोभा से चन्द्रकान्ति को भी तिरस्कृत करने वाली राजकुमारी को उत्सुकता से देखते हुए उस राजकुमार का आनन्दसमुद्र, किनारों से भी बहुत दूर, आगे तक बढ़ चला ॥ ३९ ॥

यत् कार्यते तत्र पतिव्रताभिः कृत्वा तदेतत् सकलं कुमारः ।
तया समं तामरसायताक्ष्या जगाम वैतानिकवेदिमध्यम् ॥ ४० ॥

यत्कार्यत इति । तत्र=विवाहमण्डपे, कुमारः=सिद्धार्थः; पतिव्रताभिः=सतीभिः स्त्रीभिः प्रयोजककर्त्रीभिः, यत् कार्यजातम्, कार्यते=निष्पाद्यते; तदेतत् सकलं कार्यजातं कृत्वा=विधाय, तामरसायताक्ष्या=कमलायताक्ष्या, तया=राजपुत्र्या, समम्=सह, वितानं प्रयोजनमस्येति वैतानिकी=वितानसम्बन्धिनी या वेदिः=परिष्कृतभूमिः, "वेदिः परिष्कृता भूमिः" इत्यमरः। तस्या मध्यम्=मध्यभागम्, जगाम=अगमत् ॥ ४० ॥

उस पवित्र अवसर पर पतिव्रता स्त्रियों द्वारा जो भी औपचारिक कर्तव्य कराये जाते हैं उन्हें पूर्ण कर वह राजकुमार विवाहमण्डपस्थित वेदी पर पहुँचा ॥ ४० ॥

उदर्चिषस्तस्य हुताशनस्य हविर्भिरुच्चैर्ज्वलतः पुरस्तात् ।
क्रियाकलापे कृतधीः पुरोधाः संयोजयामास वधूकुमारौ ॥ ४१ ॥

उदर्चिष इति । उद्गतानि=उपरिगतानि, अर्चीषि=ज्वालाः, यस्य तस्य;

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हुताशनस्य=अग्नेः, हविर्भिः=प्रक्षिप्तघृतादिभिः, उच्चैः=अत्यन्तम्, ज्वलतः=प्रकाशयतः सतः, पुरस्तात्=अग्रे, कृतधीः=निश्चितबुद्धिः, पुरोधाः=पुरोहितः, वधूं च कुमारं चेति तौ, संयोजयामास=विवाहविधिना तयोः पाणिग्रहं कारयामास ॥ ४१ ॥

(वहाँ) हवि देने से अच्छी तरह जलती अग्नि के सम्मुख वैवाहिक विधियाँ संपन्न कराते हुए निश्चितमति पुरोहित ने वधू और कुमार का, पाणिग्रहण करा कर, उन्हें मिला दिया ॥ ४१ ॥

आसीत् कुमारः पुलकप्ररोहैरुदञ्चितैः कञ्चुकिताङ्गयष्टिः ।
वैकक्षमाल्यच्युतकेसरास्तद्गुप्त्यै बभूवुर्गुणरत्नराशेः ॥ ४२ ॥

आसीदिति । (तदा) कुमारः=सिद्धार्थः, उदञ्चितैः=उद्गतैः, पुलकप्ररोहैः=रोमाञ्चाङ्कुरैः, कञ्चुकिता=सञ्जातकञ्चुका, आवृतेति यावत्, अङ्गयष्टिः=देहदण्डो यस्य सः, आसीत्=अभूत् । वैकक्षमाल्यात्=कण्ठादुरसि उपवीतवत् तिर्यक्क्षिप्तमाल्यात्, "कण्ठाद् वैकक्षिकं तु तत् । यत् तिर्यक् क्षिप्तमुरसि" इत्यमरः । च्युताः=पतिताः, केसराः=किञ्जल्काः, "किञ्जल्कः केसरोऽस्त्रियाम्" इत्यमरः । गुणाः रत्नानीव तेषां राशेः=समूहस्य; तद्गुप्त्यै=रोमाञ्चाच्छादनाय, बभूवुः=अभवन् ॥ ४२ ॥

उस अवसर पर, राजकुमार का समग्र शरीर रोमाञ्चित हो उठा । परन्तु उस गुणी का वह रोमाञ्च उपवीत की तरह टेढ़ी धारण की हुई माला से गिरते हुए केसर से ढका रह गया ॥ ४२ ॥

आविर्भवद्भिः श्रमवारिलेशैरार्द्राङ्गुलिः कोलियकन्यकाऽऽसीत् ।
विवाहधाराजलशीकरास्तद्व्याजीबभूवुर्विपुलेक्षणायाः ॥ ४३ ॥

आविरित्यादि । कोलियकन्यका=कोलियाधिपतेः पुत्री, च, आविर्भवद्भिः=उत्पद्यमानैः, श्रमवारिलेशैः=स्वेदजलकणैः, आर्द्राङ्गुलिः=सिक्तांगुलिः, आसीत्=अभूत् । विपुलेक्षणायाः=आयताक्ष्यास्तस्याः, विवाहे=विवाहविधौ, धाराजलस्य शीकराः=बिन्दवः, "शीकरोऽम्बुकणाः स्मृताः" इत्यमरः । तद्व्याजीबभूवुः=अपलापसाधनानि बभूवुः । एतच्छ्लोकद्वयोक्ताभ्यां दम्पत्योः रोमाञ्च-स्वेदाभ्यां परस्परं निरतिशयानुरागः सूचितः ॥ ४३ ॥

उधर उसी समय, कोलियनरेश की कमलनयना कन्या के हाथों में भी सङ्कोच-वश पसीना आ गया । परन्तु वह भी उसे विवाहकार्य में गिरते जल के कणों से (गीला होना कहकर) छिपा ले गयी ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आलोकलोभादभिवर्तमाना निवर्तमानास्त्रपया च शश्वत् ।
तयोरपाङ्गप्रसरास्तदानीं डोलाविहारश्रियमन्वभूवन् ॥ ४४ ॥

आलोकेत्यादि । तदानीम्=तस्मिन् समये, आलोकलोभाद्=दर्शनौत्सुक्येन, अभिवर्तमानाः=अभ्युद्गच्छन्तः, त्रपया=लज्जया, च निवर्तमानाः=प्रत्यावृत्ताः, शश्वत्=मुहुः, तयोः=दम्पत्योः, अपाङ्गप्रसराः=कटाक्षव्याप्तयः, डोलाविहारस्य=प्रेङ्खोलिकाक्रीडायाः, "डोला प्रेङ्खोलिका स्त्रियाम्" इत्यमरः । श्रियम्=गमनागमनरूपां शोभाम्, अन्वभूवन्=अनुभूतवन्तः ॥ ४४ ॥

उस समय, देखने की उत्सुकता से कभी ऊपर उठती हुई, कभी बड़े-बूढ़ों से सङ्कोच (लज्जा) के कारण नीचे गिरती हुई उस राजकन्या की कटाक्षदृष्टि डोला (झूला) की तरह शोभायमान हो रही थी ॥ ४४ ॥

अभ्यस्तया संवरणाम्बुराशेरावर्तचक्रभ्रमलीलयेव ।
वरः समं वामदृशा कृशानोः प्रदक्षिणाप्रक्रममन्वतिष्ठत् ॥ ४५ ॥

अभ्यस्तयेति । वरः=सिद्धार्थः, संव्रियते वरोऽस्मिन्निति संवरणः=विवाहः, स एवाम्बुराशिः=समुद्रः, तस्य । आवर्ते=अम्भसां भ्रमे, यश्चक्रभ्रमः=चक्राकारभ्रमणम्, तस्य लीलया=क्रीडयेवेति हेतूत्प्रेक्षा । वामदृशा=वामलोचनया, सुन्दर्या, समम्=सह, कृशानोः=अग्नेः, प्रदक्षिणाप्रक्रमम्=प्रदक्षिणागतिम्, अन्वतिष्ठत्=अनुष्ठितवान् ॥ ४५ ॥

वैवाहिक विधि को सम्पन्न कराने के लिये बार बार गिरे जल से आयी भ्रमरी के समान वर (सिद्धार्थ) ने उस सुन्दरी के साथ अग्निप्रदक्षिणा सम्पन्न की ॥४५॥

कन्याकुमारौ कमनीयरूपावालोक्य होमाग्निरदृष्टपूर्वौ ।
प्रदक्षिणार्चिःस्फुरणच्छलेन श्लाघाशिरःकम्पमिवाचचार ॥ ४६ ॥

कन्येति । होमाग्निः=हविर्वह्निः, कमनीयरूपौ=रमणीयाकारौ, अदृष्टपूर्वौ=पूर्वमदृष्टौ, असाधारणावित्यर्थः, आलोक्य=दृष्ट्वा; प्रदक्षिणं यथा स्यात् तथा अर्चिषाम्=ज्वालानाम्, स्फुरणस्य=प्रकाशनस्य, छलेन=व्याजेन, श्लाघायै=अभिनन्दनाय, शिरःकम्पम्=शिरश्चालनम्, आचचार=अकरोत् । इवेत्युत्प्रेक्षायाम् ॥ ४६ ॥

सुन्दर आकृति वाले वर और कन्या दोनों को पहले कभी न देखा समझते हुए प्रदक्षिणाग्नि की ज्वालाएँ भी, आड़ी-टेढ़ी काँपते हुए मानों उनकी सुन्दरता स्वीकार करते हुए, अपना सिर हिला रही थीं ॥ ४६ ॥

गुरुप्रयुक्ता कुलपालिका सा लाजोपहारं विससर्ज वह्नौ ।
मरुद्विधूता लतिकेव पुष्पं चूतद्रुमे स्यूतनवप्रवाले[१] ॥ ४७ ॥

१. सूतनव०—क०, पा० त्रि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुरुप्रयुक्तेति। सा कुलपालिका=कुलाङ्गना, गुरुणा=पुरोधसा, प्रयुक्ता=प्रेरिता, वह्नौ=अग्नौ, लाजानाम्=भ्रष्टधानानाम्, उपहारम्=उपायनम्, "उपायनमुपग्राह्यमुपहारस्तथोपदा" इत्यमरः। विससर्ज=विसृष्टवती। मरुद्विधूता=वायुना कम्पिता, स्यूताः=ग्रथिताः, आबद्धा इति यावत्, नवप्रवालाः=नवपल्लवाः येन तस्मिन्, चूतद्रुमे=आम्रवृक्षे, लतिका, पुष्पम्=कुसुममिव, रेजे। इवेत्युत्प्रेक्षायाम् ॥ ४७ ॥

कुलाचार का पालन करने वाली उस कन्या ने पुरोहित के आदेश से धान की लाजाओं का अग्नि में जब प्रक्षेप किया, तब ऐसा लगा जैसे वायु द्वारा कँपायी गयी आम्रवृक्ष से लिपटी किसी लता मे फूल गिर रहे हों ॥ ४७ ॥

समुद्गता धूमततिः कृशानोः समीपलग्ना मुखसारसस्य।
अम्लाननीलायतनालभङ्गीमङ्गीचकाराम्बुजलोचनायाः[1] ॥ ४८ ॥

समुद्गतेति। अम्बुजलोचनायाः=कमलनेत्रायाः, तस्याः, मुखसारसस्य=मुखकमलस्य, समीपलग्ना=सन्निहिता, समुद्गता=समुत्थिताः, कृशानोः=वह्नेः, धूमततिः=धूमसमूहः, अम्लानः=नव्यः, आयतः=दीर्घः, यो नालः=दण्डस्तस्य भङ्गीम्=रीतिम्, अङ्गीचकार=स्वीकृतवती ॥ ४८ ॥

उस समय अग्नि से उठा धूँआ उस कन्या के मुखकमल के पास जाकर ऐसा लग रहा था मानो किसी नये खिले कमल की लम्बी नाल हो ॥ ४८ ॥

तस्मादुदीर्णा नवधूमराजिस्तस्या मुखे तद्ग्रहणप्रसन्ने।
क्षणं समालक्ष्यत सञ्चरन्ती सरोरुहे षट्पदमालिकेव ॥ ४९ ॥

तस्मादिति। तस्मात्=होमाग्नेः, उदीर्णा=उत्थिता, नवधूमराजिः=नवधूमपंक्तिः, तस्याः=राजपुत्र्याः, तस्य=वरस्य, ग्रहणेन=पाणिग्रहणेन, प्रसन्ने=निर्मले, विकसिते इत्यर्थः। मुखे=आनने, क्षणम्=कियन्तं कालम्, सञ्चरन्ती=सञ्चरणं कुर्वन्ती, सरोरुहे=कमले, षट्पदानाम्=भ्रमराणाम्, मालिका=पंक्तिरिव, "षट्पदभ्रमरालयः" इत्यमरः। समालक्ष्यत=सादृश्यमलभत। इवेत्युत्प्रेक्षायाम् ॥ ४९ ॥

वह अग्नि से उठी धूमरेखा बार बार उसके मुख के पास जाकर ऐसी लग रही थी मानों किसी कमल पर कोई भ्रमरपंक्ति मँडरा रही हो ॥ ४९ ॥

वक्त्रारविन्दं परितः प्रकीर्णा वामभ्रुवो मङ्गलधूमराजिः।
अन्यामृतांशुभ्रमतः प्रयातामधत्त साक्षात् परिवेषलक्ष्मीम् ॥ ५० ॥

१. अमाननील०—पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वक्त्रारविन्दमिति । वामभ्रुवः=वामलोचनायास्तस्याः; वक्त्रारविन्दम्=मुखाम्बुजम्, परितः=समन्तात्; प्रकीर्णा=व्याप्ता; मङ्गलधूमराजिः=मङ्गलमयी धूमपंक्तिः; अन्यामृतांशुभ्रमतः=चन्द्रान्तरभ्रमेण; प्रयाताम्=समीपं गताम्; साक्षात्, परिवेषलक्ष्मीम्=परिधिशोभाम्; "परिवेषस्तु परिधिः" इत्यमरः। अधत्त=धारयामास ॥ ५० ॥

वह वैवाहिक मङ्गलमय धूमराशि उसके मुख के चारों ओर घूमती हुई किसी दूसरे चन्द्रमा की सीमा रेखा सी लग रही थी ॥ ५० ॥

वक्त्राम्बुजं वामदृशः परीता वैवाहिकी मङ्गलधूमपंक्तिः[1] ।
बभार नीलांशुकनिर्मितस्य मुहूर्तवक्त्रावरणस्य शोभाम् ॥ ५१ ॥

वक्त्राम्बुजमिति । वामदृशः=वामलोचनायास्तस्याः; वक्त्राम्बुजम्=मुखकमलम्; परीता=व्याप्ता; वैवाहिकी=विवाहनिमित्ता; मङ्गलधूमपंक्तिः=मङ्गलमयी धूमराजिः; नीलांशुकेन=नीलवस्त्रेण, निर्मितस्य=रचितस्य; मुहूर्ते=विवाहमुहूर्तकाले, वक्त्रावरणस्य=अवगुण्ठनस्य, शोभाम्=कान्तिम्; बभार=दधार ॥ ५१ ॥

वह विवाहनिमित्तक अग्नि की धूमराशि उस कन्या के लिये नीले वस्त्र से बने परदे (घूँघट) का काम दे रही थी ॥ ५१ ॥

कालाञ्जनोच्छ्वासविकूणिताक्षं[2] धर्मोदकक्लिष्टकपोलपत्रम् ।
विवर्णकर्णोत्पलमाननाब्जं[3] बभूव धूमग्रहणान्मृगाक्ष्याः ॥ ५२ ॥

कालेत्यादि । तस्या मृगाक्ष्याः=मृगनयनायाः; आननाब्जम्=मुखकमलम्; धूमग्रहणात्=धूमव्यापनात्; कालाञ्जनस्य=कृष्णाञ्जनस्य, उच्छ्वासेन=व्यापनेन, विकूणिते=मीलिते, अक्षिणी=नेत्रे, यस्य तत्; घर्मोदकेन=स्वेदजलेन, क्लिष्टम्=मलिनम्; कपोलपत्रम्=गण्डस्थलं यस्य तत्; विवर्णे=विकृते, कर्णोत्पले, यस्य तत्, बभूव=अभूत् ॥ ५२ ॥

उस मृगनयना के नेत्र धूमरूप उस काले आँजन के अधिक लग जाने से बार बार खुल-मुँद रहे थे। तथा उसके कर्णफूल भी, अधिक धूँआ लगने के कारण, विवर्ण हो चले थे ॥ ५२ ॥

इति क्रमेणाहितपाणिपीड़स्तया[4] सहैव श्वसुरौ कुमारः ।
ननाम तावप्यनुमोदमानावाशीर्भिरेतावनुवर्धयेताम् ॥ ५३ ॥

---

१. ०धूमभङ्गिः—त्रि० ।
२. कालाम्बुदो०—क० ।
३. विकीर्ण०—वि० ।
४. पाद०—वि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति क्रमेणेति । इति=इत्थम्; क्रमेण=क्रमशः; आहिता=कृता, पाणिपीड़ा=पाणिग्रहणं येन सः; कुमारः-सिद्धार्थः; तया=स्वपत्न्या; सहैव-सार्धमेव; श्वसुरौ=पत्न्या मातापितरौ; ननाम=प्रणनाम । तौ-श्वसुरावपि, अनुमोदमानौ-अनुमोदनं कुर्वन्तौ; एतौ=वधूवरौ, दम्पतीत्यर्थः; अनुवर्धयेताम्=समवर्धयातामिति लङन्तमेव न्याय्यम् ॥ ५३ ॥

यों, उस राजकुमार ने वह पाणिग्रहण-विधि क्रमशः सम्पन्न कर तथा सास-ससुर (कन्या के माता-पिता) को प्रणाम कर, उनका अपनी (वर-वधू की) उन्नति-कामनारूप आशीर्वचन लिया ॥ ५३ ॥

कुमारस्य कपिलां प्रत्यागमनम्

अन्यांश्च सर्वानपि बन्धुवर्गान् सम्भाव्य जायासहितः कुमारः ।
निर्गत्य तस्मान्निजराजधानीप्रदक्षिणाय प्रवरो जगाम ॥ ५४ ॥

अन्यांश्चेति । जायया=पत्न्या सहितः; कुमारः-सिद्धार्थः; अन्यान्-अपरान्; अपि सर्वान्-निखिलान्; बन्धुवर्गान्-ज्ञातिवर्गान् यथाविधि, सम्भाव्य-सत्कृत्य; तस्मात्=कोलियदेशाधिपतिप्रासादात्; निर्गत्य=निष्क्रम्य; निजराजधान्याः=कपिलानगर्याः; प्रदक्षिणाय=प्रदक्षिणीकरणाय; गन्तुमित्यर्थः; प्रवरः-उत्सुको भूत्वा; जगाम=अगमत् ॥ ५४ ॥

उसी तरह कन्यापक्ष के अन्य बन्धु-बान्धवों (नाते-रिश्तेदारों) को सम्मानित कर पत्नीसहित राजकुमार सिद्धार्थ ने अपनी राजधानी लौटने का मन बनाया ॥ ५४ ॥

तस्मिन् मुहूर्ते कपिलाङ्गनानां कुमारनिध्यानपरायणानाम् ।
सौधेषु सौधेषु समुद्बभूवुः शृङ्गारचेष्टा मदनोपदिष्टाः ॥ ५५ ॥

तस्मिन्निति । तस्मिन् मुहूर्ते=कपिलाप्रत्यागमनकाले; कुमारस्य=सिद्धार्थस्य, निध्याने=दर्शने; "निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम्" इत्यमरः । परायणानाम्-आसक्तानाम्; कपिलाङ्गनानाम्=कपिलवासिनीनां नारीणाम्; मदनेन-मन्मथेन, उपदिष्टाः-जनिताः, शृङ्गारचेष्टाः=शृङ्गाररसानुभावाः; समुद्बभूवुः=समुत्पन्ना बभूवुः ॥ ५५ ॥

उस समय (राजधानी में लौटते समय) राजकुमार के दर्शनों को लालायित कपिलानगरीवासिनी नारियों के हाव-भाव (शरीरचेष्टाएँ) शृङ्गाररस से परिलुप्त हो गये ॥ ५५ ॥

कपिलावासियुवतीनां कुमारदर्शनौत्सुक्यम्

तथा हि काचित् करपल्लवेन कल्हारमालामवलम्बमाना ।
स्वयं वरीतुं किल राजधानीसोपानमार्गं[1] त्वरया जगाम ॥ ५६ ॥

१. राजधानीं—पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तभिरग्रिमैः पद्यैः कविः कपिलावासियुवतीनां कुमारदर्शनौत्सुक्यं प्रकटयति—**तथा हीत्यादिना** । तथा हि=तस्मिन् प्रसन्ने; काचिद् युवतिः, कल्हारमालाम्=सौगन्धिकपुष्पमालाम्; "सौगन्धिकं तु कल्हारम्" इत्यमरः। अवलम्बमाना=करे धारयमाणा, स्वयम्=आत्मना; वरीतुम्=वररूपेण धारयितुम्, राजधान्याः=कपिलायाः, सोपानमार्गम्=आरोहणमार्गम्; "आरोहणं स्यात् सोपानम्" इत्यमरः। त्वरया=शीघ्रतया; जगाम=ययौ ॥ ५६ ॥

वहाँ कोई स्त्री हाथ में सुगन्धिमय पुष्प लेकर 'राजकुमार मुझे भी देखें'—यह सोचकर राजधानी की तरफ जाने वाले मार्ग पर जल्दी जल्दी चल पड़ी ॥ ५६ ॥

नेत्रस्य तद्दर्शननिश्चलस्य मा भूदिदं रोध इतीव मत्वा ।
अपास्य कालाञ्जनमायताक्षी वातायनं सत्वरमाप काचित् ॥ ५७ ॥

नेत्रस्येति । काचिच्च, आयताक्षी=विशालाक्षी, तद्दर्शने=तस्य कुमारस्यावलोकने, निश्चलस्य=स्तब्धस्य; स्वकीयस्य नेत्रस्य=नयनस्य; "इदम्=नयनस्थाञ्जनम्, रोधः=प्रतिबन्धो मा भूत्" इति मत्वा=निश्चित्य, कालाञ्जनम्=कज्जलम्, अपास्य=निराकृत्य; सत्वरम्=शीघ्रम्, वातायनम्=गवाक्षम्, आप=प्राप ॥ ५७ ॥

और कोई विशालनयना तरुणी उस राजकुमार को एकटक नजर से देखने हेतु अपनी आँखों में लगे आँजन को इस तरह हटाकर कि यह दर्शन में कोई अवरोध न खड़ा कर दे, अपने प्रासाद की खुली खिड़की पर जा बैठी ॥ ५७ ॥

विभूषणैरन्तरिते मदङ्गे[1] नैसर्गिकीं कान्तिमसौ न पश्येत् ।
इतीव नैपथ्यमकल्पयन्ती काचित् प्रपेदे सहसा गवाक्षम् ॥ ५८ ॥

विभूषणैरिति । काचिच्च नवयौवना, असौ=सिद्धार्थः; विभूषणैः=अलङ्कारैः, अन्तरिते=व्यवहिते, मदङ्गे=मम शरीरे, जातां नैसर्गिकीम्=स्वाभाविकीम्, कान्तिम्=शोभाम्, न पश्येत्=नावलोकयेत्' इतीव=इत्थमिव (मत्वा) नैपथ्यम्=शरीरालङ्करणम्; अकल्पयन्ती=अकुर्वन्ती, सहसा=झटिति, गवाक्षम्=वातायनं प्रति; प्रपेदे=जगाम ॥ ५८ ॥

और उनमें से कोई नवयौवना यह सोचती हुई कि मेरे इन आभूषणों से ढकी होने के कारण वह राजकुमार मेरी वास्तविक शरीरशोभा सम्भवतः न देख पावें—अपने शरीर से सभी प्रकार के आभूषण हटाकर सहसा प्रासाद के गवाक्ष (झरोखे) पर जा बैठी ॥ ५८ ॥

१. ममाङ्गे—त्रि०, पा०, वि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्याकोशमेतद् यदि कर्णपाशे निवेशयेयं सुरभि द्विरेफः ।
मां पीडयेदित्यवधीर्य[1] मन्ये कर्णोत्पलं कापि जगाम जालम् ॥ ५९ ॥

व्याकोशमिति । कापि च युवतिः, यदि=चेत्, अहम्, एतत्, सुरभि= सुगन्धि, व्याकोशम्=विकसितम्, "व्याकोशविकचस्फुटाः" इत्यमरः । कर्णपाशे=प्रशस्ते कर्णे, निवेशयेयम्=धारयेयम्; तर्हि, द्विरेफः=भ्रमरः, "द्विरेफः पुष्पलिड् भ्रमरः" इत्यमरः । मां पीडयेत्-वेदयेत्, इति एवम्; कर्णोत्पलम्= कर्णसरोजम्, अवधीर्य-तिरस्कृत्येव; जालम्=गवाक्षं प्रति; "जालं तु गवाक्षे क्षारके गणे" इति हेमचन्द्रः । जगाम=अगमत् ॥ ५९ ॥

और कोई नवयौवना, 'यह विकसित कर्णफूल यदि कानों में लगा रहा तो कोई भ्रमर आकर मुझे उस समय पीड़ा देने लगे'—यह सोचकर अपने कानों से कर्णफूल हटाती हुई जल्दी से अपने घर के झरोखे पर जा बैठी ॥ ५९ ॥

तदाननालोकनहर्षजातः स्तनस्य रोमोद्गम एव भूषा ।
इतीव पत्रावलिमुत्सृजन्ती वातायनाभ्यर्णमवाप काचित् ॥ ६० ॥

तदाननेति । काचिच्च युवतिः; तदाननस्य=कुमारमुखस्य, आलोकनेन= वीक्षणेन, जातो यो हर्षः=मोदः, तेन जातः-उद्भूतः, स्तनस्य=कुचस्य, रोमोद्गमः-रोमहर्ष एव भूषा=अलङ्कारः-इति मत्वेव, स्तनयोर्धृतां पत्रावलिम्-अलङ्कारविशेषम्, उत्सृजन्ती=त्यजन्ती, अभ्यर्णम्-शीघ्रमेव, वातायनम्=गवाक्षम्प्रति, अवाप=प्राप । इवेत्युत्प्रेक्षायाम् ॥ ६० ॥

तथा दूसरी कोई मदविह्वला नारी "उसके दर्शन से उद्भूत मेरे स्तनों का रोमाञ्च ही मेरी नैसर्गिक शोभा है"—यह सोचकर स्तनों से पत्रावलि-अलङ्करण हटाती हुई गवाक्ष के समीप पहुँच गयी ॥ ६० ॥

पतिव्रतायाः परदर्शनाय यात्रा न युक्तेति निरुन्धतीव ।
नितम्बबिम्बाद् रसना गलन्ती कस्याश्चिदङ्घ्रिं कलयाञ्चकार ॥ ६१ ॥

पतिव्रताया इति । कस्याश्चित्=युवत्याः; "पतिव्रतायाः सत्याः, परदर्शनाय=परपुरुषवीक्षणाय, यात्रा=गमनम्, न युक्तम्=उचितम्" इति निरुन्धतीव=वारयन्तीव, नितम्बबिम्बात्=कटिप्रदेशात्, गलन्ती=स्खलन्ती, रशना=मेखला, अंघ्रिम्-चरणम्, कलयाञ्चकार=बबन्ध ॥ ६१ ॥

और किसी नारी की मेखला ने नितम्बबिम्बों से सरक कर उसके चरणों को मानों यह कह कर जकड़ लिया कि "किसी पतिव्रता स्त्री के लिए परपुरुष-दर्शन उचित नहीं है" ॥ ६१ ॥

१. ०देित्यवधार्य—वि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकावलीं काचिदनर्पयित्वा कण्ठोपकण्ठं करपङ्कजेन।
समुद्वहन्ती त्वरमाणचेतास्तस्योपहारार्थमिव प्रतस्थे ॥ ६२ ॥

एकावलीमिति । काचित्=अप्रसिद्धा युवतिः, एकावलिम्=एकयष्टिहारम्, अनर्पयित्वा=अधृत्वा, कण्ठोपकण्ठं=कण्ठसमीपम्, करपङ्कजेन=करकमलेन, तस्योपहारार्थम्=तस्मै उपायनार्थम्, समुद्वहन्ती धारयन्ती, त्वरमाणचेताः=परिभ्रान्तचित्ता, चञ्चलचित्तेत्यर्थः, सती, प्रतस्थे=प्रातिष्ठत् । इवेत्युत्प्रेक्षायाम् ॥ ६२ ॥

और कोई नवयौवना एक ही यष्टि में पिरोये पुष्पहार को अपने हाथ में कण्ठ के पास रखते हुए उसे उपहारस्वरूप देने के लिए, चञ्चल मन से राजकुमार के आने के मार्ग की तरफ चल पड़ी ॥ ६२ ॥

ताभिस्तदुद्वीक्षणतत्पराभिर्निरन्तराः सौधतलप्रदेशाः।
जगज्जिगीषोर्मकरध्वजस्य सेनानिवेशप्रतिमा बभूवुः ॥ ६३ ॥

ताभिरिति । तस्य=कुमारस्य, उद्वीक्षणे=दर्शने, तत्पराभिः=आसक्ताभिः; ताभिः=युवतीभिः; निरन्तराः=निविडाः; सौधतलप्रदेशाः=प्रासादोपरितनभागाः; जगताम्=लोकत्रयाणाम्, जिगीषोः=जेतुमिच्छोः; मकरध्वजस्य=मन्मथस्य; सेनानां निवेशेन=व्यूहरचनाविन्यासेन, प्रतिमाः=सदृशाः; बभूवुः=जाताः ॥ ६३ ॥

उस अवसर पर ऐसी उन युवतियों के एकत्र होने से राजधानी के सभी प्रासाद लोकविजय की कामना मन में लिए मारसेना (कामदेव की सेना) के व्यूह की तरह हो गये ॥ ६३ ॥

वीथीषु वीथीषु विलासिनीनां तस्मिन्निपेतुस्तरलाः कटाक्षाः।
प्रासादजालान्तरिताङ्गयष्टेः प्रसूनकेतोरिव पुष्पबाणाः ॥ ६४ ॥

वीथिष्विति । वीथिषु वीथिषु=रथ्यासु रथ्यासु स्थितानां विलासिनीनाम्=प्रमदानाम्; तरलाः=तीव्राः; कटाक्षाः=दृष्टिपाताः; तस्मिन्=सिद्धार्थे; प्रासादजालैः=सौधगतगवाक्षैः, अन्तरिता=आच्छादिता, अङ्गयष्टिः=देहयष्टिः, यस्य तस्य; प्रसूनकेतोः=मदनस्य, पुष्पबाणाः=पुष्पमया बाणा इव, निपेतुः=पतितवन्तः ॥ ६४ ॥

जिधर जिधर से निकलकर वह राजकुमार अपने राजभवन की तरफ जा रहा था, उन सभी गलियों व सड़कों पर प्रासादों में एकत्र हुई युवतियों ने उस राजकुमार पर ऐसे कटाक्ष फेंके मानों प्रासादों के गवाक्षों में अपने को छिपाये हुए कामदेव उस पर पुष्पबाण बरसा रहे हों ॥ ६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमायताक्ष्यः स्पृहणीयमङ्गादङ्गान्तरं गन्तुमशक्नुवानैः ।
आकर्णपूरप्रसृतैरपाङ्गैरालोकयामासुरतृप्तिभाजः ॥ ६५ ॥

तमायतेत्यादि । आयताक्ष्यः=विशालाक्ष्यस्ताः युवतयः; स्पृहणीयम्=कमनीयम्, अङ्गाद्=अवयवाद्, अङ्गान्तरम्=अवयवान्तरम्; गन्तुम्; अशक्नुवानैः=असमर्थैः; आकर्णपूरम्=कर्णालङ्कारपर्यन्तम्; प्रसृतैः=व्याप्तैः, अपाङ्गैः-नेत्रप्रान्तैः; अतृप्तिभाजः=तृप्तिमभजन्त्यः; आलोकयामासुः-दर्शयामासुः ॥ ६५ ॥

उस सुन्दर राजकुमार के प्रत्येक अङ्ग को देखने में असमर्थ अतएव अतृप्त सी उन नवयुवतियों ने अपने कर्णपूर तक फैले नेत्रों से एक साथ उस राजकुमार के मनोहारी अङ्गों पर दृष्टिपात किया ॥ ६५ ॥

तासां कुमारः शतपत्रमित्रैर्विलोचनैर्विस्मयनिर्निमेषैः ।
अङ्गेषु सर्वत्र निषिक्तबिम्बैः साक्षात् सहस्राक्ष इवाबभासे ॥ ६६ ॥

तासामिषि । कुमारः=सिद्धार्थः; तासाम्=युवतीनाम्, शतपत्रमित्रैः, पद्मसदृशैः "शतपत्रं कुशेशयम्" इत्यमरः । विस्मयेन=आश्चर्येण, निर्निमेषैः=अनिमेषैः; अङ्गेषु=अवयवेषु; सर्वत्र, निषक्तानि=आसक्तानि, बिम्बानि=आकाराणि येषां तैः, प्रतिफलितैरित्यर्थः; विलोचनैः=नेत्रैः, साक्षात्=प्रत्यक्षम्, सहस्राक्षः=इन्द्र इव आबभासे=बभौ ॥ ६६ ॥

कमल से मित्रता रखने वाले, उन मृगनयनाओं के आश्चर्यचकित अत एव बिना पलक झपकाये नेत्रों का कुमार के अङ्गों पर एक साथ प्रतिबिम्ब पड़ने के कारण, वे राजकुमार उस समय सहस्राक्ष इन्द्र के समान लग रहे थे ॥ ६६ ॥

यत्रैव यत्रैव कुमारगात्रे व्यापारितं लोचनमङ्गनाभिः ।
तत्रैव तत्रैव बभूव कान्तिनिर्यासनिःस्यूतमिवानुषक्तम् ॥ ६७ ॥

यत्रैवेति । अङ्गनाभिः=युवतिभिः, कुमारगात्रे-सिद्धार्थशरीरे, यत्रैव यत्रैव=यस्मिन् यस्मिन्नवयवे, लोचनम्=नेत्रम्, व्यापारितम्=न्यस्तम्; तत्रैव तत्रैव=तस्मिन् तस्मिन्नेव भागे, तत्-नेत्रम्; कान्त्या एव निर्यासेन=वृक्षक्षीरेण, निस्यूतम्=सम्यग्बद्धमिव, बभूव=अभूत् ॥ ६७ ॥

उन नवयुवतियों ने राजकुमार के जिस जिस अङ्ग पर भी दृष्टि डाली वह दृष्टि उसके अङ्गों की कान्ति के निर्यास (गोंद) से वहीं की वहीं मानों चिपक कर रह गयी ॥ ६७ ॥

तासां कुमाराकृतिरातुराणामस्पन्दविस्फारितलोचनानाम् ।
विनेतुकामेव मनोभवार्ति प्रत्येकमन्तर्हृदयं विवेश ॥ ६८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तासामिति । आतुराणाम्=मन्मथपीड़ितानाम्; अस्पन्दम्=निश्चलम्, यथा स्यात् तथा विस्फारिते=विस्तारिते, लोचने=नेत्रे यासां तासाम्, मनोभवार्तिम्=मदनपीडाम्; विनेतुकामा=अपनेतुमिच्छुः, कुमाराकृतिः=सिद्धार्थमुखबिम्बम्; प्रत्येकम्=प्रतियुवति, अन्तर्हृदयम्=हृदयस्यान्तर्भागम्, विवेश=प्रविष्टवान् ।। ६८ ।।

उन निर्निमेष दृष्टि से राजकुमार को देखने वाली प्रत्येक युवतियों के हृदय में कुमार की आकृति ऐसे बस गयी कि जिसके कारण उनके मन की कामोद्वेगजन्य वेदना दूर होती-सी दिखायी देने लगी ।। ६८ ।।

काचित् तदा कण्टकिताङ्गयष्टिस्तदाननाम्भोरुहनिर्विशेषम् ।
आजिघ्रदानन्दनिमीलिताक्षी करस्थितं विभ्रमपुण्डरीकम् ।। ६९ ।।

काचिदिति । तदा=कुमारदर्शनकाले; कण्टकिता=रोमाञ्चिता, अङ्गयष्टिः=देहलता, यस्याः सा, काचित्=नवयौवना; तस्य=कुमारस्य, आननाम्भोरुहात्=मुखकमलात्, निर्विशेषम्=विशेषशून्यम्, तत्सदृशमित्यर्थः; करस्थितम्=हस्तस्थितम्, विभ्रमस्य=विलासस्य, पुण्डरीकम्=पद्मम्; आनन्देन, निमीलिते अक्षिणी=नेत्रे यस्याः सा, सती, आजिघ्रत्=गन्धमगृह्णात् ।। ६९ ।।

उस समय (राजकुमार को देखते समय) कोई अत्यन्त रोमाञ्चित हो उसके मुखकमलसदृश हस्तस्थित कमल को ही निर्निमेष दृष्टि से देखती रह गयी ।।६९।।

काचित् तदाकर्षणसिद्धमन्त्रं कामोपदिष्टं किल जप्तुकामा ।
करेण मन्दं भ्रमयाञ्चकार मुक्ताक्षमालामिव हारयष्टिम् ।। ७० ।।

काचिदिति । काचिच्च नवयौवना तदा=तस्मिन्नवसरे; कामोपदिष्टम्=मदनोपदिष्टम्; तस्य=कुमारस्य, आकर्षणे=वशीकरणे, सिद्धम्=फलोत्पादिकम्, मन्त्रम्=देवसाधकं पदसमूहम्; किल, इवेति पदद्वयं सम्भावनायां वर्तते । जप्तुकामा=जापं चिकीर्षुः; करेण=हस्तेन, मुक्तामयीम्, अक्षमालाम्=जपमालाम्, एव हारयष्टिम्=हारसरम्, मन्दम्=शिथिलतया, भ्रमयाञ्चकार=भ्रमिमकरोत् ।। ७० ।।

और कोई युवती उस राजकुमार को वश में करने के लिए कामदेव द्वारा बताये गये किसी सिद्धमन्त्र का करमाला के सहारे जाप करती हुई सी अपने वक्षःस्थल पर पहनी मोतियों के माला की मणियाँ घुमाने लगी ।। ७० ।।

शुकावचञ्चूपुटपाटलेन नखेन काचिद् विलिलेख नव्यम् ।
पाणिस्थितं केतकगर्भपत्रमनङ्गसन्देशमिवास्य कर्तुम् ।। ७१ ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुकेत्यादि। शुकस्य=कीरस्य, "कीरशुकौ समौ" इत्यमरः। अवचञ्चूपुटमिव=त्रोटिपुटवत्, पाटलेन=अरुणेन, नखेन=कररुहेण; पाणिस्थितम्=करस्थितम्; नव्यम्=नवीनम्, केतकगुच्छस्य गर्भस्थम्=अन्तःस्थं पत्रम्=किसलयम्, अनङ्गस्य=मदनस्य, सन्देशम्=तदवस्थासूचकलेखम्, कर्तुम्=सम्पादयितुमिव, विलिलेख=उल्लिखितवती ॥ ७१ ॥

और कोई नवयौवना, तोते की चोंच की तरह अरुण नख से हाथ में लिये केतकी के फूल की पंखुड़ी पर मदनावस्थासूचक सन्देश लिखती हुई सी दिखायी दे रही थी ॥ ७१ ॥

आलेख्यलीलाफलकं सतूलिमेकं[1] दधाना करपल्लवेन।
आत्मानमालिख्य वराय तस्मै दातुं समुद्योगवतीव तस्थौ ॥ ७२ ॥

आलेख्येत्यादि। काचिच्च, करपल्लवेन=स्वकीयकरहस्तेन, आलेख्यलीलायै=चित्रक्रीडायै, फलकम्=पट्टम्, सतूलिम्=तूल्या=चित्रलेखोपकरणभूतया कूर्चिकया सहितम्, "तूली शय्याकूर्चिकयोः" इति वैजयन्ती। दधाना=धारयती, तत्र=पट्टे, आत्मानम्=निजम्, आलिख्य=लिखित्वा, तस्मै वराय=सिद्धार्थाय, दातुम्, समुद्योगवती=प्रयत्नवतीव, तस्थौ=अस्थात् ॥७२॥

तथा कोई हाथ में तूलिका (चित्र खींचने का उपकरण) लिये हुए चित्रपट पर उस वर के लिए अपने आपको समर्पित करती हुई का सा चित्र बनाने में तत्पर हो गयी ॥ ७२ ॥

चेतोभुवः पुष्पशिलीमुखानां परागवर्षैः पतताभजस्रम्।
कस्याश्चिदासीत् कलुषीकृतेव दृष्टिः समुद्यद्बहुलाश्रुपूरा ॥७३॥

चेतोभुव इति। कस्याश्चित्=प्रमदायाः, दृष्टिः=नेत्रम्, चेतोभुवः=मदनस्य, अजस्रम्=निरन्तरम्, पतताम्=पातमाप्नुवताम्, पुष्पशिलीमुखानाम्=पुष्पवाणानाम्, परागवर्षैः=धूलिवर्षाभिः। समुद्यन्=उद्गच्छन्, बहुलः=अत्यधिकः, अश्रुपूरः=वाष्पप्रवाहो यस्याः सा; सती, कलुषीकृता=कालुष्यमाप्ता, आसीत्=अभूत् ॥ ७३ ॥

तथा उनमें किसी नारी के, कामदेव के बाणों से निकली निरन्तर पड़ती धूल के कारण मुग्ध नयनों से सतत अश्रुधारा बह चली ॥ ७३ ॥

उद्भिन्नरोमोद्गमलोभनीया रराज कस्याश्चन गण्डपालिः।
धृताङ्कुरा[2] चित्तग्रहप्रवेशे मनोभुवो मङ्गलपालिकेव ॥ ७४ ॥

१. सतुलीं०—क०।
२. कृताङ्कुरा—त्रि०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उद्भिन्नेत्यादि । कस्याश्चन=प्रमदायाः, गण्डपालिः=कपोलप्रदेशः, उद्भिन्नेन=उद्गतेन, रोमोद्गमेन=रोमाञ्चेन, लोभनीया=पूरणीया सती, चित्तस्यैव गृहस्य प्रवेशे, मनोभुवः=मन्मथस्य, धृतांकुरा=अंकुरत्वमापन्ना, मङ्गलपालिका=अङ्कुरार्पणपात्रविशेषः, इव रराज=शुशुभे ॥ ७४ ॥

किसी के कपोल ही, राजकुमार के दर्शन से रोमाञ्च होने के कारण, ऐसे सुन्दर लगने लगे मानों वे कामदेव के लिये चित्त-गृह में प्रवेश के लिए मङ्गलमय शरणस्थल बन गये हों ॥ ७४ ॥

आकर्णमाकृष्टशरासनस्य कामस्य कादम्बकदम्बकानाम् ।
पक्षानिलेनेव विधूयमाना काचिच्चकम्पे स्खलदुत्तरीया ॥ ७५ ॥

आकर्णमिति । काचित्=प्रमदा च, आकर्णम्=कर्णपर्यन्तम्, आकृष्टम्=शरासनम्=धनुः, येन तस्य, कामस्य=मदनस्य, कादम्बानाम्=बाणानाम्, "कादम्बः कलहंसेष्वोः" इति हेमचन्द्रः । कदम्बकानाम्=समूहानाम्, "निकुरम्बं कदम्बकम्" इत्यमरः । पक्षानिलेन=पक्षजातेन वायुना, विधूयमाना=कम्पमाना, स्खलत्=भ्रश्यत्, उत्तरीयम्=उत्तरीयवस्त्रम्, यस्याः सा, जाता ॥

कोई कर्णपर्यन्त धनुष की डोरी खींचकर फेंके गये बाणसमूह की वायु से काँपती हुई तथा दुपट्टे के उड़ जाने के कारण स्तब्ध सी खड़ी रह गयी ॥ ७५ ॥

घर्मोदबिन्दुप्रकरैरुदीर्णैः करम्बिता काचन राजते स्म ।
कोदण्डवल्लीव दृढावकृष्टा निष्ठ्यूतमुक्ताङ्कुरिता स्मरस्य ॥७६॥

घर्मेत्यादि । उदकानां बिन्दवः उदबिन्दवः, "मन्थोदनसक्थबिन्दु" (पा० सू० ६.३.६०) इत्यादिना उदकशब्दस्योदादेशः, घर्मस्य=तापस्य, उदबिन्दवः=जलबिन्दवः, तेषां प्रकरैः=समूहैः, उदीर्णैः=उद्गतैः, करम्बिता=दृढावकृष्टा=दृढतया अवकृष्टा, निष्ठ्यूताभिः=दृढनिष्पीडनेन, बहिर्निर्गताभिः मुक्ताभिः, अंकुरिता=जनिं प्राप्ता, अञ्चितेत्यर्थः, कोदण्डवल्ली=इक्षुरूपा धनुर्लता इव, राजते स्म=शोभते स्म ॥ ७६ ॥

उनमें से कोई बहुत अधिक पसीना निकलने से नहायी हुई सी लगती थीं मानों पुष्पधन्वा कामदेव की धनुर्लताओं से अत्यधिक निचोड़ने के कारण मोतियों के अंकुर प्रस्फुटित हो गये हों ॥ ७६ ॥

मनःप्रतोलीं विशतः प्रकीर्णैर्मनोभुवः पादपरागजालैः ।
काचिद् दृशं कर्बुरविग्रहेव विवर्णभावं प्रतिपद्यते स्म ॥ ७७ ॥

मनः प्रतोलीमिति । काचित् प्रमदा, मनः=चित्तमेव प्रतोली=रथगमनार्हवीथिम्, "रथ्या प्रतोली विशिखा" इत्यमरः । विकीर्णैः=विस्तृतैः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनोभुवः=मदनस्य, पादपरागजालैः=चरणरजःसमूहैः, कर्बुरम्=शबलितम्, विग्रहः=शरीरं यस्याः सा इव। "चित्रं किर्मीर-कल्माष-शबलैताश्च कर्बुरे", शरीरं वर्ष्म विग्रहः" इत्युभयत्रामरः। विवर्णभावम्=वर्णमालिन्यम्, दृशम्=दृष्टिम्, प्रतिपद्यते स्म=प्राप्नोत्। "लट् स्मे" (पा० सू० ३.२.११८) इति भूतार्थे लट्॥ ७७॥

कोई मन को गली में प्रविष्ट हुए कामदेव के चलने से उठे धूलिसमूह से ढकी हुई और मैली सी दिखायी देने लगी।। ७७॥

कुमारमेनं कुलशैलधुर्यं भर्त्तारमाप्तुं परमाभिरूप्यम्।
बिम्बाधरेयं जननान्तरेषु किं वाऽकरोत् पुण्यमगण्यरूपम्॥ ७८॥

पञ्चभिः पद्यैः तं वीक्षमाणानां स्त्रीणां परस्परमालापमाह—**कुमार**मिति। परमाभिरूप्यम्=परमसौन्दयुतम्, कुलशैलधुर्यम्=कुलाचलवत् भारवाहिनम्, एनम्=इमम्, कुमारम्=सिद्धार्थम्, भर्त्तारम्=पतिरूपेण आप्तुम्=प्राप्तुम्, बिम्बाधरा=अरुणोष्ठी, इयम्=राजकन्या, जननान्तरेषु=अपरजन्मसु, अगण्यरूपम्=अगनेयम्, किं वा पुण्यम्=पुण्यजनकं कर्म=क्रियाम्, अकरोत्=व्यधात्। इत्यवदत्' इत्यध्याहार्यम्॥ ७८॥

कोई सोचने लगी कि कुलाचल के भारवाही, परमसुन्दर, इस कुमार को अपने भर्ता के रूप मे पाने के लिये इस बिम्बफलसदृश लाल अधर वाली सुन्दरी ने कितने अगणित पुण्य किये होंगे!॥ ७८॥

सुधानिधानं तुहिनांशुबिम्बं लक्ष्मीविमानानि च पङ्कजानि।
आतन्वता पूर्वममुष्य वक्त्रनिर्माणयोग्येव कृता विधात्रा॥ ७९॥

सुधेत्यादि। पूर्वम्=एतच्छरीरनिर्माणतः पूर्वम्, सुधानिधानम्=अमृतनिधिम्, तुहिनांशुबिम्बम्=चन्द्राकृतिम्; लक्ष्मीविमानानि=लक्ष्म्या वासयोग्यानि च पङ्कजानि=पद्मानि, आतन्वता=रचयता, विधात्रा=ब्रह्मणा, अमुष्य=कुमारस्य; वक्त्रनिर्माणस्य=मुखरचनायाः, योग्या=अभ्यासः; कृता=विहिता—इत्यवदत्। "योग्याऽभ्यासः परिचयः" इति वैजयन्ती। चन्द्रपङ्कजानां निर्माणाभ्यासवशादेव ब्रह्मा अस्य वदनं निर्ममे—इति भावः॥

और किसी ने सोचा, कि सुधानिधि चन्द्र और लक्ष्मी के वासयोग्य स्थानों का निर्माण कर सुन्दर वस्तुओं की सृष्टि का अभ्यास करते हुए विधाता ने विशेष योग्यता प्राप्त करके ही इस राजकुमार का शरीर निर्माण किया होगा!॥ ७९॥

निर्माणकाले भुवनत्रयस्य, सम्भृत्य सम्भृत्य समर्पितेन।
सौन्दर्यसारेण सरोजजन्मा प्रायेण चक्रे युवराजमेनम्॥ ८०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निर्माणकाल इति । सरोजजन्मा=ब्रह्मा; प्रायेण=प्रायशः, भुवनत्रयस्य=त्रिलोक्याः; निर्माणकाले=रचनासमये, सम्भृत्य सम्भृत्य=संगृह्य संगृह्य, समर्पितेन=विन्यस्तेन, सौन्दर्यसारेण=सौन्दर्यस्य स्थिरांशेन, एनम्=इमम्; कुमारम्=राजपुत्रम्, चक्रे=ससर्ज । त्रिजगत्सौन्दर्यसम्भूतोऽयं कुमार इति भावः ॥८०॥

एक बात और ! विधाता ने इस राजकुमार के निर्माण से पूर्व अपनी बनायी सभी रचनाओं से कुछ कुछ अंश लेकर उनका एकत्र सम्मेलन करते हुए इस राजकुमार के शरीर की रचना की होगी ! ॥ ८० ॥

युवानमेनं युगदीर्घबाहुं द्रष्टुं त्रिलोकस्पृहणीयशोभम् ।
अस्माकमक्ष्णामयुतं विरिञ्चस्त्रिलोकवेदी[1] न चकार कस्मात् ॥ ८१ ॥

युवानमिति । त्रिलोकवेदी=लोकत्रयज्ञः, विरिञ्चः=ब्रह्मा, "विरिञ्चोऽजः विरिञ्चिनः" इत्यमरः । युगपत्=ईषान्तबन्धनवत्, "युगमीषान्तबन्धनम्" इति वैजयन्ती । दीर्घौ=लम्बमानौ, बाहू=भुजौ यस्य तम्, त्रिलोक्या स्पृहणीया=ईर्ष्याकरणीया, शोभा=सौन्दर्यम् यस्य तम्, एनम्=इमम्, युवानम्=तरुणम्, द्रष्टुम्=अवलोकयितुम्, अस्माकम्, अक्ष्णाम्=नेत्राणाम्, अयुतम्=दशसहस्रसंख्याकम्, कस्मात्=कथम्, न अकरोत्=व्यधात् ॥ ८१ ॥

परन्तु उस विधाता से एक भूल तो हो ही गयी कि उसने इस त्रिलोकी के लिये सुन्दरता में ईर्ष्यायोग्य दीर्घबाहु राजकुमार की रचना करते समय हम लोगों की भी हजार आखें (इसे देखने के लिये) क्यों नहीं बनायीं ! ॥ ८१ ॥

अमुष्य वक्त्रामृतभानुबिम्बसम्भूतसौन्दर्यसुधोपयोगात् ।
आपद्यते दृष्टियुगं न केषामत्रैव जन्मन्यनिमेषभावम् ॥ ८२ ॥

अमुष्येति । अमुष्य=कुमारस्य; वक्त्रम्=मुखमेव, अमृतभानोः=चन्द्रस्य, बिम्बम्=मण्डलम्, तस्मात् सम्भूता=उत्पन्ना, सौन्दर्यम्=रमणीयता, एव सुधा=अमृतम्, उपयोगात्=सेवनात्, अत्रैव=अस्मिन्नेव, जन्मनि=लोके; केषाम्; दृष्टियुगम्=नेत्रयुगलम्, अनिमेषभावम्=निर्निमेषभावम्, न आपद्यते=प्राप्नोति । अनिमेषभावं विस्मयवशात् निमेषशून्यत्वं देवभूयं च । अस्य सौन्दर्यम् पश्यन्तः सर्वेऽपि जना निर्निमेषचक्षुषो भवन्तीत्यर्थः ॥ ८२ ॥

इसके मुखचन्द्र से निःसृत सौन्दर्यामृत के सेवन से किसके नेत्र अनिमेषभाव को प्राप्त नहीं होते और यों वह इसी जन्म में (निर्निमेष दृष्टि के कारण) देवभाव को प्राप्त नहीं होता; क्योंकि लोक में प्रसिद्ध है कि देवताओं की आँखें कभी नहीं झपकतीं ॥ ८२ ॥

१. विरिञ्चि०—पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यादिमासां गिरमत्युदारामाकर्णयन् कर्णसुखायमानाम् ।
प्रदक्षिणीकृत्य पुरीं कुमारः प्राविक्षदन्तर्भवनं नृपस्य ॥ ८३ ॥

इत्यादिमिति । इति आदिर्यस्यास्ताम् इत्यादिम्, अत्युदाराम्=अतिमहतीम्; कर्णसुखायमानाम्=श्रोत्रयोः सुखप्रदात्रीम्, कर्णप्रियामिति यावत्; आकर्णयन्=शृण्वन्, कुमारः=सिद्धार्थः; पुरीम्, कपिलानगरीम्; प्रदक्षिणीकृत्य=प्रदक्षिणां कृत्वा; नृपस्य=राज्ञः शुद्धोदनस्य; अन्तर्भवनम्, अन्तर्गृहम्; प्राविक्षत्=प्रवेशं कृतवान् ॥ ८३ ॥

लोगों द्वारा कही गयी इन कर्णप्रिय बातों को सुनते हुए राजकुमार सिद्धार्थ उस कपिलानगरी की परिक्रमा कर अपने पिता के विशिष्ट प्रासाद में पहुँचे ॥ ८३ ॥

प्रविश्य दूरावनतेन मूर्ध्ना बद्धप्रणामाञ्जलिकुड्मलेन ।
तया समेतः शकवंशदीपः प्रियोत्तरङ्गं पितरं ववन्दे ॥ ८४ ॥

प्रविश्येति । तया=स्वपत्न्या समेतः=सहितः; शकवंशस्य=शाक्यकुलस्य, दीपः=दीपकभूतः; कुमार इति शेषः । अन्तर्भवनम्, प्रविश्य=प्रवेशं कृत्वा, दूरावनतेन=दूरादेव नम्रेण; बद्धः प्रणामस्य=प्रणतेः, अञ्जलिः=करपुटम्; कुड्मलः=मुकुल इव यस्मिंस्तेन; "कुड्मलो मुकुलोऽस्त्रियाम्" इत्यमरः । मूर्ध्ना=शिरसा; प्रियोत्तरङ्गम्=सन्तोषेण पूर्णम्; पितरम्=शुद्धोदनम्; ववन्दे=प्रणनाम ॥ ८४ ॥

उस शकवंशभूषण सिद्धार्थ ने अपनी पत्नी के साथ पिता के प्रासाद में प्रवेश करते हुए दूर से ही हाथ जोड़ते हुए, शिर झुकाकर सन्तुष्ट मुद्रा में स्थित अपने माता-पिता को प्रणाम किया ॥ ८४ ॥

उत्थाप्य दूरानतमूढभार्यमुदञ्चिताभ्यां भुजपञ्जराभ्याम् ।
रोमोद्गमाध्यासितगात्रयष्टिरुर्वीपतिः सादरमालिलिङ्ग ॥ ८५ ॥

उत्थाप्येति । ऊढा=परिणीता, भार्या=पत्नी येन तम्; दूरेण=दूरत एवानतम्=नम्रम्; तम्=कुमारम्; उत्थाप्य, रोमोद्गमेन=रोमाञ्चेन, अध्यासिता=व्याप्ता, गात्रयष्टिः=देहयष्टिः (तनुलता) यस्य सः; उर्वीपतिः=पृथ्वीपतिः=राजा; उदञ्चिताभ्याम्=उद्धृताभ्याम्; भुजपञ्जराभ्याम्=भुजौ पञ्जराविव ताभ्याम्; सादरम्=ससम्मानम्; आलिलिङ्ग=आलिङ्गितवान् ॥ ८५ ॥

समग्र शरीर से रोमाञ्चित राजा शुद्धोदन ने उस समय अपनी भार्या सहित आते हुए राजकुमार को स्नेह के कारण, अपनी भुजाओं में बाँध लिया ॥ ८५ ॥

अनन्तरं काञ्चनपात्रसंस्थैः कर्पूरदीपैः परिवारनार्यः ।
अमुष्य भद्रासनमास्थितस्य नीराजनं मङ्गलमन्वतिष्ठन् ॥ ८६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनन्तरमिति। अनन्तरम्=प्रणामकृत्यानन्तरम्; परिवारस्य=कुलस्य; नार्यः=स्त्रियः; काञ्चनपात्रसंस्थैः=सुवर्णमयपात्रैः; कर्पूरज्वलितदीपैः; भद्रासनम्=शुभासनम्; आस्थितस्य=स्थितस्य; अमुष्य=कुमारस्य; मङ्गलम्=मङ्गलमयम्; नीराजनम्-आरार्तिकम्; अन्वतिष्ठन्=अनुष्ठितवन्तः ॥ ८६ ॥

तदनन्तर, परिवार की अन्य नारियों ने भद्रासन पर बैठे उस राजकुमार की कपूर से जलते दीपों से मङ्गलमय पूजा की ॥ ८६ ॥

इति विहितविवाहं विश्वविश्रान्तकीर्त्ति
त्रिजगदवनदीक्षाबद्धकक्षं कुमारम् ।
नरपतिरवलोक्य प्रीयमाणः स मेने
निजकुलमतितुङ्गं निहनुतारातिगर्वम् ॥ ८७ ॥

इति बुद्धघोषविरचिते पद्यचूडामणिनाम्नि महाकाव्ये चतुर्थः सर्गः ॥

इतीति। स नरपतिः=राजा शुद्धोदनः; विश्वस्मिन् विश्रान्ता कीर्तिर्यस्य तम्; त्रिजगतः=लोकत्रयस्य, अवनदीक्षायाम्=रक्षणव्रते; बद्धकक्षम्=बद्धकच्छम्; सन्नद्धमित्यर्थः; कुमारम्, अवलोक्य=दृष्ट्वा; प्रीयमाणः=प्रसीदन्; निजकुलम्=स्ववंशम्; अतितुङ्गम्=अत्त्चयुम्, निह्नुतः=तिरस्कृतः, अरातीनाम्=शत्रूणाम्, गर्वः-दर्पो येन तादृशम् । मेने=अभिमेने । **मालिनी** वृत्तम् । लक्षणं तु पूर्वमुक्तमेव ॥

पद्यचूडामणिमहाकाव्ये कीर्त्तिव्याख्यायां चतुर्थः सर्गः ॥

इस तरह राजा ने संसार में चारों ओर फैले कीर्तिसमूह से युक्त तथा तीनों लोकों की रक्षा में सतत सन्नद्ध एवं शत्रुओं का गर्व चूर्ण करने वाले सिद्धार्थकुमार को, विवाह करके आने के बाद, अपने कुल की उन्नति करने में ऊँचा पाया ॥ ८७ ॥

पद्यचूडामणिमहाकाव्य के चतुर्थ सर्ग का भाषान्तर पूर्ण ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चमः सर्गः

त्रयो महाप्रासादाः

ततः कुमारस्य समग्रवैभवो नराधिनाथो नवयौवनश्रियः ।
ऋतूत्सवानामुपसेवनक्षमानकारयत् त्रीनतुलान् महालयान् ।। १ ।।

तत इति । ततः=कुमारविवाहानन्तरम्; समग्रम्=पुष्कलम्, वैभवम्=ऐश्वर्यं यस्य सः; नराधिनाथः=सम्राट् शुद्धोदनः; नवा=नूतना, यौवनस्य=तारुण्यस्य श्रीः=सम्पत् यस्य तस्य; कुमारस्य=सिद्धार्थस्य कृते; ऋतूत्सवानाम्=हेमन्त-वसन्त-वर्षोत्सवानाम्; उपसेवनक्षमान्=उपभोगार्हान्; अतुलान्=अनुपमान्, त्रीन्=एतत्सङ्ख्याकान्; महालयान्=वृहत्प्रासादान्; अकारयत्=निर्मापितवान् ॥ १ ॥

तब समग्र ऐश्वर्यसम्पन्न राजा शुद्धोदन ने उस नवयुवक राजकुमार सिद्धार्थ के भोगविलासहेतु ऋतूत्सवों के मनाने योग्य तीन बड़े-बड़े राजप्रासाद बनवाये ॥१॥

स तेषु सद्मस्वधिराजनन्दनो विचित्रविन्यासविशेषशालिभिः ।
विनोद्यमानो वरवारयोषितां विलासनृत्तैर्विजहार हारिभिः ।। २ ।।

स इति । सः=असौ; अधिराजनन्दनः=चक्रवर्तिसूनुः; तेषु सद्मसु=उत्तमगृहेषु; विचित्रैः=आश्चर्यमयैः, विन्यासविशेषैः=हस्तपादादिन्यासभेदैः, शालन्ते=शोभन्ते इति तादृशैः; विनोद्यमानः=विनोदं प्राप्यमाणः; वरवारयोषिताम्=श्रेष्ठवेश्याङ्गनानाम्, "वारस्त्री गणिका वेश्या" इत्यमरः । हारिभिः=मनोहरैः; विलासनृत्तैः=क्रीड़ानर्तनैः; विजहार=विहृतवान् ॥ २ ॥

राजकुमार भी उन तीनों सदनों में समय समय पर तरह तरह की वेशभूषा धारण कर वारांगनाओं के साथ विहार करने लगा ॥ २ ॥

वर्षासमयवर्णनम्

बभूव वर्षासमयोऽथ मेदिनी कठोरघर्मज्वरशान्तिकर्मठः ।
अशेषकान्तारशिखण्डिमण्डलीविलासलास्यक्रमदेशिकेश्वरः ॥ ३ ॥

बभूवेति । अथ=तेषु प्रासादेषु विहारकाले; (कदाचित्) मेदिन्याः=भूमेः; कठोरः=कठिनः, यो घर्मज्वरः=उष्णतापः, तस्य शान्तौ=शमने, कर्मठः=कर्मवीरः, "कर्मशूरस्तु कर्मठः" इत्यमरः । अशेषकान्तारेषु=कृत्स्नवनेषु, या शिखण्डिमण्डली=मयूरसमूहः, "केकी शिखण्डी चित्रपत्रकः" इति वैजयन्ती । तस्य विलासलास्यस्य=क्रीड़ानृत्तस्य, क्रमे=सम्प्रदाये, देशिकेश्वरः=आचार्यवर्यः; वर्षासमयः=वर्षाकालः, बभूव=अभवत् ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तब उन प्रासादों में रहते हुए ही, पृथ्वी के निदाघताप को शान्त करने में चतुर एवं कामिनियों के साथ विलासनृत्यों में आचार्यभूत वर्षाऋतु आ पहुँची ॥ ३ ॥

पयोधराः केचन काचमेचकाश्चकाशिरे चण्डसमीरणेरिताः ।
शनैः शनैरम्बरकृष्णभोगिना विमुच्यमाना इव जीर्णकञ्चुकाः ॥ ४ ॥

पयोधरा इति । तत्र=तस्मिन् वर्षर्तुसमये, केचन=कतिपये, काचमेचकाः=काचमणिवत् नीलाः, "काचोऽक्षिरोगे शिक्ये मणौ मृदि" इति हेमचन्द्रः । चण्डेन=प्रबलेन, समीरणेन=वायुना, ईरिताः=प्रेरिता, पयोधराः=मेघाः, शनैः शनैः=मन्दं मन्दम्; अम्बरम्=गगनमेव, कृष्णभोगी=कृष्णसर्पः, तेन विमुच्यमानाः=त्यज्यमानाः, जीर्णकञ्चुकाः=जीर्णनिर्मोकाः, "समौ कञ्चुकनिर्मोकौ" इत्यमरः । चकाशिरे=शुशुभिरे ॥ ४ ॥

कुछ प्रचण्ड वायु द्वारा लाये गये काले मेघों से आकाश आच्छादित होने पर ऐसा लगने लगा मानों कञ्चुक छोड़े काले साँप हों ॥ ४ ॥

तदा समारुह्य विहारमण्डपं सहैव वध्वा सरसीरुहेक्षणः ।
प्रदर्शयन् मीनदृशः पयोधरान् प्रचक्रमे वर्णयितुं तपात्ययम् ॥ ५ ॥

तदेति । तदा=तस्मिन् वर्षाकाले, सः, सरसीरुहेक्षणः=कमलनेत्रः सिद्धार्थः; वध्वा=पत्न्या सहैव=साकमेव, विहारमण्डपम्=वर्षाकालोचितक्रीड़ाप्रासादम्, समारुह्य=समारोहणं (प्रवेशं) कृत्वा, मीनाविव दृशौ=नेत्रे यस्यास्तस्याः=सुन्दर्याः (यशोधरादेव्याः कृते) पयोधरान्=मेघान्, प्रदर्शयन्=प्रदर्शनं कारयन्, तपस्य=निदाघस्य, "उष्ण उष्णागमस्तपः" इत्यमरः । अत्ययः=नाशस्तम्, वर्षाकालमित्यर्थः । वर्णयितुम्=व्याख्यातुम्; प्रचक्रमे=प्रक्रमं कृतवान् ॥ ५ ॥

उस समय उस कमलनयन राजकुमार ने अपनी रानी सहित वर्षा ऋतु के प्रासाद के मण्डप में आकर वहाँ अपनी प्रियपत्नी के समक्ष वर्षा का वर्णन यों प्रारम्भ किया ॥ ५ ॥

इतः सरोजाक्षि ! विलोकयाम्बुदानुदन्वदम्भोभरपश्यतोहरान् ।
वियत्तलाभोगविलासदर्पणप्रविष्टभूमण्डलबिम्बसन्निभान् ॥ ६ ॥

इत इति । हे सरोजाक्षि=कमलनयने ! इतः=अस्मात् प्रदेशात्; उदन्वतः=समुद्रस्य, "उदन्वानुदधिः सिन्धुः" इत्यमरः । अम्भसाम्=जलानाम्, भरस्य=भारस्य, पश्यतोहरान्=चौरान्, पश्यत अनादृत्य हरतीति पश्यतोहरः; "वाग्दिक्पश्यद्भ्यो०" (पा०सू०वा० ६.३.२१) इति षष्ठ्या अलुक्, "पश्यतो यो हरत्यर्थं स चौरः पश्यतोहरः" इति वैजयन्ती । वियत्तलस्य=आकाशप्रदेशस्य,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आभोगः=विस्तार एव विलासः=क्रीडा, दर्पणः=क्रीडादर्शः, तस्मिन् प्रविष्टस्य=प्रतिफलितस्य, भूमण्डलस्य=पृथ्वीप्रदेशस्य, बिम्बेन=आकारेण, सन्निभान्=सदृशान्, अम्बुदान्=पयोधरान्, विलोकय=अवलोकय ॥ ६ ॥

हे कमलनयने ! इधर इन जल भरे बादलों को देखो ! ये ऐसे लग रहे हैं मानों आकाश में भूमण्डल का प्रतिबिम्ब हो ॥ ६ ॥

ऋतुश्रिया दीप्ततडित्प्रदीपिकासमार्जितैरञ्जनसञ्चयैरिव ।
नतभ्रु ! नव्यैः शकलैः पयोमुचां नभःस्थली पात्रमियं[1] विभाव्यते ॥ ७ ॥

ऋतुश्रियेति । हे नतभ्रू=नते भ्रुवौ यस्यास्तस्याः, तत्सम्बुद्धौ ! ऋतुश्रिया=ऋतुलक्ष्म्या, दीप्ताभिः=प्रदीप्ताभिः, तडिद्भिरेव प्रदीपिकाभिः=प्रकाशसाधिकाभिः, समार्जितैः=सम्पादितैः; अञ्जनसञ्चयैः=कज्जलसमूहैः; इवेति सादृश्ये । नव्यैः=नवीनैः, पयोमुचाम्=मेघानाम्, शकलैः=खण्डैः, इयम्=एषा; नभःस्थली=नभःप्रदेशः; पात्रम्=भाजनमिव, विभाव्यते=अनुमीयते ॥ ७ ॥

हे नतभ्रू ! वर्षाऋतु के जलभरे इन बिजली चमकते काले बादलों के टुकड़ों से यह आकाशस्थल भरा पड़ा है ॥ ७ ॥

पयोदकालेन चिरप्रवासिना समागतेनाभिनवं प्रिये ! दिशाम् ।
विमुच्यमाना इव केशवेणयो विभान्ति कामं नवमेघपंक्तयः ॥ ८ ॥

पयोदेत्यादि । हे प्रिये=प्रियदर्शिनि ! इमा नवमेघपंक्तयः-नवमेघमालाः; अभिनवम्=नवीनम्; तत्कालमित्यर्थः; क्रियाविशेषणमेतत्; समागतेन=प्राप्तेन, पयोदकालेन=मेघकालेन; विमुच्यमाना=मुच्यमानाः; दिशाम्=हरिताम्, विरहिणीनामिति च ध्वनिः । केशवेणयः=केशबन्धाः; कामम्=यथेच्छम्; विभान्ति=शोभन्ते । अत्र प्रियप्रवासेन वेणीकृतानां केशानामिदानी तदागमने संस्करणार्थमामुच्यमानत्वम् ॥ ८ ॥

हे प्रिये ! ये मेघपंक्तियाँ ऐसे शोभायमान हो रही हैं मानों वर्षाकाल में विदेश गये पति के घर वापस लौटने पर दिग्वधुओं ने केशसंस्करण हेतु अपनी वेणी (चोटी) खोल रखी हो ॥ ८ ॥

तपात्ययास्यागमनेन शाम्यतो निदाघरूपस्य कृपीटजन्मनः ।
विजृम्भमाणा इव धूमवीचयो विशन्ति मेघावलयो वियत्तलम् ॥ ९ ॥

तपात्ययेत्यादि । तपात्ययस्य=वर्षाकालस्य, अभ्यागमनेन=प्राप्त्या; शाम्यतः=शमं प्राप्नुतः; निदाघरूपस्य=उष्णकालरूपस्य; कृपीटात्=जलात्, जन्म=उत्पत्तिर्यस्य तस्य अग्नेः; "कृपीटमुदरे जले" इति रत्नकोशः । अग्नेः

१. पात्रमिदं—वि०, पा०, त्रि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जलजत्वम् "अद्भ्योऽग्निर्ब्रह्मतः क्षत्रम्" इति मनुवचनाज्ज्ञेयम् । "कूपीट-योनिर्ज्वलनः" इत्यमरः । विजृम्भमाणाः=वर्धमानाः; धूमवीचयः=धूमपरम्पराः; इवेति सादृश्ये; मेघावलयः=मेघपंक्तयः; वियत्तलम्=आकाशतलम्; विशन्ति=प्रविशन्ति ॥ ९ ॥

वर्षाऋतु के आने पर, आकाशस्थित ये मेघपंक्तियाँ ग्रीष्मर्तु की ऊष्मारूप शान्त होती अग्नि से उठी धूमावलि की तरह लग रही हैं ॥ ९ ॥

पुरन्दराक्रान्तिभयेन ये पुरा पयोनिधिं प्रापुरलूनपक्षकाः ।
समुत्पतन्तीव त एव भूधरास्ततः समुद्यन्नववारिदच्छलात् ॥ १० ॥

पुरन्दरेत्यादि । ये=पर्वताः, पुरा=पूर्वम्; पुरन्दरस्य=इन्द्रस्य; "पुरुहूतः पुरन्दरः" इत्यमरः; आक्रान्तेः=आक्रमणात्, पक्षच्छेदार्थमिति भावः । भयेन=भीत्या, अलूनाः=अच्छिन्नाः, पक्षाः=गरुतो येषां ते, सन्तः; पयोनिधिम्=समुद्रम्, प्रापुः=ययुः, त एव भूधराः=पर्वताः, ततः=समुद्रात्, समुद्यताम्=उज्जृम्भमाणानाम्, नववारिदानाम्=नीलमेघानाम्, छलात्=व्याजात्, "छलं छद्मस्खलितयोः" इति हेमचन्द्रः । समुत्पतन्ति=उद्गच्छन्ति । इवेत्युत्प्रेक्षायाम् ॥ १० ॥

इन मेघों को देखकर ऐसा लग रहा रहा है, मानों पहले कभी इन्द्र द्वारा पंख काट लेने के भय से जो पर्वत समुद्र में जा छिपे थे वे ही अब वहाँ से मेघों के रूप में बाहर आ रहे हों । (अर्थात् आकाश में पहाड़ों की तरह लम्बे चौड़े बादल मँडरा रहे हैं ।) ॥ १० ॥

मृगाक्षि ! विद्युल्लतिकाकरम्बितैर्नभोऽवकाशो जलदैर्विराजते ।
पयोनिधिर्विद्रुमवल्लिवेल्लितैर्युगक्षये कर्दमगोलकैरिव ॥ ११ ॥

मृगाक्षीति । हे मृगाक्षि=मृगनयने ! विद्युल्लतिकाभिः=तडिल्लताभिः, करम्बितैः=मिश्रितैः; जलदैः=मेघैः, नभोऽवकाशः=गगनप्रदेशः; युगक्षये=कल्पान्ते; विद्रुमवल्लिभिः=प्रवाललताभिः, वेल्लितैः=व्याप्तैः, कर्दमगोलकैः=पङ्कपिण्डैः; "गोलकस्तु जारतो विधवासुते । अलिञ्जरे गुडे पिण्डे" इति हेमचन्द्रः । पयोनिधिः=समुद्र इव; विराजते=शोभते । कल्पान्ते सर्वे समुद्राः शुष्यन्तीति आगमिकाः । इवेत्युत्प्रेक्षायाम् ॥११॥

हे मृगनयने ! इस समय बिजली चमकाते बादलों से गगन ऐसा शोभित हो रहा है मानों कल्पक्षय के समय सूखे समुद्र में प्रवाललताओं से घिरे हुए कीचड़ (कर्दम) के गोलक हों ॥ ११ ॥

शिखण्डिनामद्भुतताण्डवश्रियामरण्यरङ्गे मधुरप्रणादिनाम् ।
विलोक्य विद्युन्नयनेन विभ्रमान् प्रशंसतीव स्तनितेन तोयदः ॥ १२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिखण्डीत्यादि। तोयदः=मेघः; स्वस्तनितेन=गर्जितेन; "स्तनितं गर्जितं मेघनिर्घोषे" इत्यमरः। अद्भुता=आश्चर्यमयी, ताण्डवश्रीः=नृत्य-शोभा येषां तेषाम्; अरण्यरङ्गे=वने नृत्यस्थाने; मधुरं यथा स्यात् तथा प्रणादिनाम्=प्रणदताम्, शिखण्डिनाम्=मयूराणाम्; विद्युन्नयनेन=तडिद्विलोक-नेन; विभ्रमान्=विलासान्; प्रशंसति=प्रशंसां करोति। इवेत्युत्प्रेक्षायाम् ॥

इस समय इन बिजली से चमकते बादलों का गर्जन ऐसा लग रहा है मानों इनके द्वारा जंगल में नृत्यकुशल मयूरों की प्रशंसा हो रही हो ॥ १२ ॥

कलापिनः काञ्चनकाहलोपमान् फणीन्द्रलोकान् परिगृह्य चञ्चुभिः ।
गभीरकेकामुखरीकृताम्बरा नदन्ति चक्रीकृतबर्हमण्डलाः ॥ १३ ॥

कलापिन इति। कलापाः=बर्हा एषां सन्तीति कलापिनः=मयूराः; "कलापो भूषणे बर्हे" इत्यमरः। चञ्चुभिः=चञ्चूपुटैः; काञ्चनस्य=हेम्नः, यत् काहलम्=वाद्यविशेषः, तेनोपमान्=सदृशान्; फणीन्द्रलोकान्=सर्पसमूहान्, परिगृह्य=परितो गृहीत्वा। लोकशब्दः कविभिः समूहार्थेऽपि प्रयुज्यते; यथाह बाणः—"अरतिगृहीतश्च विसर्जयाम्बभूव राजलोकम्" इत्यादि। गभीरया=गम्भीरया, केकया=मयूरे वाण्याः; "केका वाणी मयूरस्य" इत्यमरः। मुखरी-कृतम्=ध्वनितम्, अम्बरम्=नभस्तलम्, यैस्ते, चक्रीकृतम्=वलयीकृतम्, बर्ह-मण्डलम्=पिच्छसमूहो यैस्ते; "पिच्छबर्हे नपुंसके" इत्यमरः। सन्तः, नदन्ति=ध्वनिं कुर्वन्ति ॥ १३ ॥

सोने से बने मृदङ्ग की ध्वनि के समान ही इन चोंच में पकड़े साँपों से युक्त नाचते मयूरों की कर्णप्रिय ध्वनि हो रही है ॥ १ ॥

सुवर्णकारेण तपात्ययात्मना पयोदपालीनिकषोपलान्तरे ।
निघृष्यमाणा इव हेमराजयस्तडिल्लता भान्ति चकोरलोचने ॥ १४ ॥

सुवर्णेत्यादि। हे चकोरलोचने=चकोरनेत्रे! तपात्ययात्मना=वर्षर्तु-रूपिणा; सुवर्णकारेण=सुवर्णमयाभरणशिल्पिना नाडिन्धमेन; "नाडिन्धमः स्वर्णकारः" इत्यमरः। पयोदपाल्याः=मेघपंक्तेरेव, निकषोपलस्य=शाण-प्रस्तरस्य; "शाणस्तु निकषः कषः" इत्यमरः। अन्तरे=मध्ये; निघृष्यमाणाः=विलिख्यमानाः, हेमराजयः=सुवर्णरेखाः; तडिल्लताः=विद्युल्लताः, आभान्ति=शोभन्ते। इवेत्युत्प्रेक्षायाम् ॥ १४ ॥

हे चकोरलोचने! इन बादलों में हो रही बिजली की चमक ऐसी दिखायी दे रही है मानों वर्षा ऋतु रूपी सुनार ने मेघपङ्क्तिरूपी शाण पर सुवर्णरेखा खींची हो ॥

मलीमसं केवलमङ्गमन्तरं विशुद्धमन्तःकरणं तु मामकम् ।
इति स्फुरच्चञ्चलदीधितिच्छलाद् विभिद्य तं दर्शयतीव वारिदः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मलीमसमिति । वारिदः=मेघः; मामकम्=मदीयम्; अन्तरम्=बाह्यम्; "अन्तरः परिधानीये बाह्ये स्वीयेऽन्तरात्मनि" इति वैजयन्ती। अङ्गम्=अवयव एव केवलं मलीमसम्=मलिनम्; अन्तःकरणम्=अन्तःप्रदेशं तु विशुद्धम्=विशेषेण स्वच्छम्; अस्तीति शेषः। इति=इत्थम्, तम्=उपर्युक्तम् विषयम्; स्फुरन्तीनाम्=तेजस्विनीनाम्; दीधितीनाम्=अचिरदद्युतीनाम्, तडिताम्=विद्युताम्; छलात्=व्याजात्, विभिद्य=विभज्य; दर्शयति=प्रदर्शयति। इवेत्युत्प्रेक्षायाम् ॥ १५ ॥

अपनी बिजली की चमक दिखाकर यह मेघ मानो यह कह रहा है कि भले ही मैं तुम्हें बाहर से काला दिखायी देता होऊँ, परन्तु मेरा अन्तःकरण तो अत्यन्त धवल (श्वेत) ही है ॥ १५ ॥

समुद्रनेमीवहनस्य भारिणश्चतुर्महासागरमध्यवर्तिनः।
कूलाद्रिकूटेषु तडिद्गणावृता विभान्ति सीता इव मेघपंक्तयः ॥ १६ ॥

समुद्रनेमीत्यादि । समुद्रः=अब्धिरेव नेमिः=चक्रप्रान्तो यस्याः सा समुद्रनेमी=भूमिः, तस्याः वहनस्य=धारकस्य; भारिणः=भारवहनशीलस्य; चतुर्णाम्=एतत्संख्याकानाम्; महासागराणाम्=महासमुद्राणाम्, मध्ये=अन्तः; वर्तिनः=वासं कुर्वतः, वराहमूर्तेरिति यावत्। कुलाद्रीणाम्=कुलपर्वतानाम्, कूटेषु=शिखरेषु; तडिताम्=विद्युताम्, गणैः=समूहैः, आवृताः=आवरणं प्राप्ताः; सीताः=लाङ्गलपद्धतय इव; मेघपंक्तयः=मेघराजयः; विभान्ति=शोभन्ते। व्योम्नः पर्वतेनोपमानं सुग्रहम्। तत्रस्थमेघपंक्तीनां हलकर्षणजातसीताभिरुपमानमधःस्थवराहस्य स्फुरत्येव। अतो विचार्यताम् ॥ १६ ॥

समुद्र की सीमा तक फैली पृथ्वी का भार धारण करने में समर्थ चारों महासागरों के बीच पड़े कुलपर्वतों पर बिजली की चमक सहित बैठे ये पंक्तिबद्ध मेघ ऐसे लग रहे हैं जैसे किसी खेत में हल जोत कर रेखाएं डाली गयी हों ॥ १६ ॥

विजित्य विश्वत्रयमद्भुतश्रिया प्रदानशौर्येण पयोमुचाऽमुना।
समुच्छ्रितानां तरलाक्षि ! विद्युतो जयध्वजानां जनयन्ति संशयम् ॥१७॥

विजित्येति । हे तरलाक्षि=चञ्चलनयने ! अमुना=अनेन; अद्भुतश्रिया=आश्चर्यमयशोभायुतेन पयोमुचा=मेघेन; प्रदानशौर्येण=दानबलेन; विश्वत्रयम्=जगत्त्रयम्; विजित्य=पराजित्य; तडितः=विद्युतः, जयध्वजानाम्=विजयपताकानाम्; संशयम्=सन्देहम्, जनयन्ति=उत्पादयन्ति ॥ १७ ॥

हे तरलाक्षि ! अपनी अद्भुत शोभा से तीनों लोकों को जीतकर दानवीर इस मेघ ने अपनी बिजलियाँ ऐसे फैला दीं मानो वे उसकी विजयपताकाएं हों ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सितच्छदोत्सारणवेत्रयष्टयो विलोलदृष्टे ! विलसन्ति विद्युतः ।
घनाघनैः प्रोषिततर्जनक्रियाविघूर्ण्यमानाः करशाखिका इव ॥ १८ ॥

सितच्छदेत्यादि । हे विलोलदृष्टे=चञ्चलनयने ! सितच्छदानाम्=हंसानाम्, उत्सारणे=निष्कासने, वेत्रयष्टयः=वेत्रदण्डाः; घनाघनैः=वर्षुकमेघैः; "वर्षुकाब्दो घनाघनः" इत्यमरः । प्रोषितानाम्=विरहिणाम्, तर्जनक्रियायाम्=भर्त्सनकर्मणि, विघूर्ण्यमानाः=चालिताः, करशाखिकाः=अंगुल्यः, "अंगुल्यः करशाखाः स्युः" इत्यमरः । इव; विद्युतः=तडितः, विलसन्ति=शोभन्ते । इवेत्युत्प्रेक्षायाम् ॥ १८ ॥

हे चञ्चलनयने ! हंसों को दूर भगाने में बेंत का काम देने वाले पतले मेघों की पंक्तियाँ ऐसी लग रही हैं मानो वे विरहिजनों को धमका रही हों ॥ १८ ॥

शतह्रदापादितचारुमौर्विकं सलीलमादाय महेन्द्रकार्मुकम् ।
पयोदकालः शबरः शरव्रजैरपुण्डरीकां विदधाति मेदिनीम् ॥ १९ ॥

शतह्रदेत्यादि । पयोदकालः=वर्षाकालः, शतह्रदाभिः=विद्युद्भिः, "शम्पा शतह्रदा ह्रादिनी" इत्यमरः । आपादिता=सम्पादिता, चारुः=मनोहरा, मौर्विका=ज्या, यस्य तत्, "ज्या जीवा मौर्विका द्रुणा" इति वैजयन्ती । महेन्द्रकार्मुकम्=इन्द्रधनुः, सलीलम्=अनायासेन, आदाय=गृहीत्वा, शबरः=किरातः, शरव्रजैः=बाणसमूहैः, "शरे जले"; "शरः पुनर्दधिसरे काण्डतेजनयोरपि" इति हेमचन्द्रः । अपुण्डरीकाम्=न विद्यन्ते पुण्डरीकाणि=सिताम्भोजान्येव पुण्डरीकाः=व्याघ्रा यस्यां ताम्, "पुण्डरीकः सिताम्भोजम्", "व्याघ्रेऽपि पुण्डरीको ना" इत्युभयत्रामरः । मेदिनीम्=पृथ्वीम्, विदधाति=करोति ॥१९ ॥

बिजलियों की सुन्दर डोरी से बनाये गये इन्द्रधनुष को अनायास उठाते हुए यह वर्षाकाल पृथ्वी को पुण्डरीक (कमल) रहित करता हुआ उसी तरह शोभित हो रहा है जैसे कोई शबर (किरात) अपने धनुष के सहारे सम्पूर्ण वन को व्याघ्ररहित कर दे रहा हो ॥ १९ ॥

भुजङ्गभुग्वान्तफणामणिश्रियः स्फुरन्ति भूम्ना पुरुहूतगोपकाः ।
प्रचण्डधाराहतरत्नसूदरप्रकीर्णरत्नोपलखण्डकान्तयः ॥ २० ॥

भुजङ्गेत्यादि । भुजङ्गान्=सर्पान्, भुञ्जन्तीति ते भुजङ्गभुजः=मयूराः, तैः; वान्तानाम्=उद्गीर्णानाम्, फणामणीनाम्=फणारत्नानाम्, श्रीः=शोभेव श्रीर्येषां ते, भूम्ना=अतिशयेन, पुरुहूतगोपकाः=इन्द्रगोपकाः, कीटविशेषाः, प्रचण्डधाराभिः=उग्रजलसन्ततिभिः, आहतायाः=ताडितायाः, रत्नसुवः=रत्नप्रसवभूमेः, उदरात्=गर्भात्, प्रकीर्णानाम्=विस्तीर्णानाम्, रत्नोपलखण्डा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाम्=रत्नशकलानाम्, कान्तिरिव कान्तिर्येषां ते, "अचला कीलिनी पेरा बीजसूः रत्नसूः स्वसूः" इति वैजयन्ती। सन्तः, स्फुरन्ति=शोभन्ते ॥ २० ॥

सम्पूर्ण पृथ्वी इस समय गोपकीटों से, मयूरों द्वारा मुक्त सर्पों की उगली गयी मणियों की तरह, शोभित हो रही है मानो मेघों की प्रचण्ड धारा से खुदी हुई पृथ्वी से लाल रत्नों के टुकड़े बाहर निकल आये हों ॥ २० ॥

शरन्निशाकाशतलोदरप्रभासहोदरे नूतनशाद्वलस्थले।
पतन्ति वज्रायुधगोपकीटकाः समग्रसन्ध्यारुणतारकोपमाः ॥ २१ ॥

शरन्निशेत्यादि। शरन्निशायाम्=शारदरात्र्याम्, आकाशतलोदरस्य=गगनमध्यभागस्य, प्रभायाः=कान्त्याः, सहोदरे=सदृशे, नूतनम्=नवीनं यत् शाद्वलस्थलम्=शादहरितप्रदेशः, तस्मिन्, "शाद्वलः शादहरिते", "शादो जम्बालशष्पयोः" इति चामरः। समग्रसन्ध्यायाम्=पूर्णसन्ध्यायाम्, अरुणानाम्=लोहितानाम्; तारकाणाम्=नक्षत्राणाम्, उपमा=सादृश्यं येषां ते; ऽवज्रायुधकीटकाः=इन्द्रगोपाख्यकीटविशेषाः, पतन्ति=शोभन्ते ॥ २१ ॥

शरदृतु के आकाश से तुलना करने वाले ये इन्द्रगोप कीट हरियाली भूमि पर पड़े ऐसे लग रहे हैं जैसे समग्र सन्ध्या लाल तारों से भरी हुई हो ॥ २१ ॥

'वियत्पृथिव्योः कियदन्तरं भवेत्' इति प्रमातुं प्रथमेन वेधसा।
प्रसार्यमाणा इव मानरज्जवः पतन्ति धाराः परितः पयोमुचाम् ॥२२॥

वियदित्यादि। इदानीम्; पयोमुचाम्=मेघानाम्, धाराः=जलप्रवाहाः, प्रथमेन वेधसा=आदिब्रह्मणा, वियत्पृथिव्योः=द्यावापृथिव्योः, कियदन्तरम्=कियानवकाशः, इति=इत्थम्, प्रमातुम्=परिच्छेत्तुम्, प्रसार्यमाणाः=विस्तीर्यमाणाः, मानरज्जवः=परिच्छेदकपाशाः, इव, पतन्ति=पतन्त्यश्शोभन्ते ॥ २२ ॥

मेघों से बरसती मोटी जलधारा, पृथ्वी और आकाश के बीच में कितना अन्तर है ! मानों यह नापने के लिये, दूरी मापने वाली रस्सी की तरह लग रही है ॥

इयं चकोराक्षि ! पयोदमालिका प्रकामवाचाटबकोटमण्डली।
उपात्तशङ्खा स्फुटमिक्षुधन्वनः प्रयाणमुद्घोषयतीव दिङ्मुखे ॥ २३॥

इयमिति। हे चकोराक्षि=चकोरनयने ! इयं पयोदमालिका=मेघपंक्तिः, प्रकामम्=अत्यन्तं यथा स्यात्तथा वाचाट=वाचालाः, बकोटानाम्=बकानाम्, मण्डली=समूहो यस्यां सा, "बको बकोटः कह्वः" इति वैजयन्ती। उपात्तः=गृहीतः, शङ्खो यया सा, सती, दिङ्मुखे=आशामुखे, स्फुटम्=स्पष्टम्, प्रयाणम्=गमनम्, उद्घोषयति=प्रथयति। इवेत्युत्प्रेक्षायाम् । २३ ॥

हे चकोराक्षि ! प्रसन्नतापूर्वक चहचहाती बकपंक्ति से युक्त यह मेघपंक्ति ऐसी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लग रही है मानों वह दिशाओं की ओर तेजी से जाते कामदेव के प्रयाण के समय शङ्खध्वनि कर रही हो ॥ २३ ॥

वकावलीविभ्रमकण्ठकम्बवो वितीर्णशक्रायुधचित्रकम्बलाः ।
नमन्ति शैलेषु नवाभ्रकुञ्जरास्तटाभिघातार्थमिवोढगर्जिताः ॥ २४ ॥

बकावलीति । बकावल्यः=बकपरम्परा एव विभ्रमाय=विलासाय, कण्ठकम्बवः=कण्ठबद्धशङ्खा येषां ते, "शङ्खः स्यात् कम्बुरस्त्रियाम्" इत्यमरः । वितीर्णम्=दत्तम्, शक्रायुधम्=इन्द्रधनुरेव, चित्रम्=विचित्रम्, कम्बलम्=कुथो येषां ते, नवाभ्राणि=नूतनमेघा इव कुञ्जराः=गजाः, शैलेषु=पर्वतेषु, तटाभिघातार्थम्=वप्रक्रीडार्थम्, ऊढगर्जिताः=विहितगर्जनाः, सन्तः; नमन्ति=नताः भवन्ति ॥ २४ ॥

उस समय वह वकपंक्ति पर्वतों पर बैठे नये मेघों के कण्ठ में बँधी शङ्खमाला की तरह लग रही थी, मानों वे मेघ वहाँ प्रतिद्वन्द्वियों को क्रीडा के लिये उच्च घोष से बुला रहे हों ॥ २४ ॥

क्षणप्रभाचम्पकदामभूषणा दिशः सुरेन्द्रायुधचारुशेखराः ।
पयोदशृङ्गैर्नववारिगर्भितैः[2] परस्पराभ्युक्षमिव[3] प्रकुर्वते ॥ २५ ॥

क्षणेत्यादि । क्षणप्रभाः=विद्युत एव चम्पकदामानि=चम्पकपुष्पमालाः, भूषणम्=अलङ्करणं यासां तयः, "ऐरावत्यः क्षणप्रभाः" इत्यमरः । सुरेन्द्रायुधम्=इन्द्रधनुरेव चारुः=मनोजः, शेखरः=शिरोभूषणं येषां ताः, दिशः=ककुभः, नववारीणाम्=नूतनजलानाम्; गर्भः सञ्जात एषामिति तादृशैः, जलपूर्णैरित्यर्थः; पयोदशृङ्गैः=मेघशृङ्गैः, परस्पराभ्युक्षम्=अन्योन्यसेचनम्, प्रकुर्वते=विदधति । इवेत्युत्प्रेक्षायाम् ॥ २५ ॥

विद्युद्-रूप चम्पक पुष्पमालाओं से अलंकृत एवं इन्द्रधनुष से शोभित सभी दिशायें जल से भरे नवमेघों के सहारे परस्पर जलक्रीडा कर रही थीं ॥ २५ ॥

विगाहमानस्य नभःस्थलीगृहं निदाघजिष्णोर्ऋतुचक्रवर्तिनः ।
घनेन बद्धा इव तोरणस्रजः सुरेन्द्रचापाः सुतरां चकासति ॥ २६ ॥

विगाहेत्यादि । नभःस्थलीगृहम्=गगनमन्दिरम्, विगाहमानस्य=आलोडयतः, निदाघस्य=ग्रीष्मस्य, जिष्णोः=जयनशीलस्य, ऋतुचक्रवर्तिनः=वर्षर्तोः; घनेन=मेघेन, बद्धाः=संयताः, सुरेन्द्रचापाः=इन्द्रधनुष्मत्यः, तोरणस्रजः=तोरणमालिकाः, चकासति=प्रकाशन्ते ॥ २६ ॥

---

१. विकीर्ण—क० ।
२. पाथोद०—म० ।
३. ०भ्युक्षिमिव—म० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेघों से बँधी हुई-सी तोरणमालायें एवं इन्द्रधनुष, गगन प्रदेश में प्रवेश करते हुये ग्रीष्मऋतु के शत्रुभूत उस वर्षाकाल का स्वागत करते हुए दोनों अत्यन्त शोभित हो रहे थे ।। २६ ।।

प्रकम्पितायां कठकाषलीलया दिगन्तभित्तौ स्तनयित्नुदन्तिना ।
विशीर्यमाणा इव तारकागणाः पलाण्डुभासः करकाः पतन्त्यमूः ।।२७।।

प्रकम्पितायामिति । कटस्य=गजगण्डस्य, "गजगण्डकटी कटौ" इत्यमरः । काषलीलया=कषणक्रीडया, "स्तनयित्नुर्बलाहकः" इत्यमरः । दिगन्ते एव भित्तौ=कुडचे, स्तनयित्नुः=मेघ एव दन्ती=गजस्तेन; "भित्तिः स्त्री कुडचम्" इत्यमरः । विशीर्यमाणाः=विकीर्यमाणाः, अमूः=करकाः=वर्षोपलाः, "वर्षोपलास्तुकरकाः" इत्यमरः । पलाण्डोः=श्वेतकन्दस्य, भाः=कान्तिरिव भाः येषां ते; "पलाण्डुस्तु श्वेतकन्दः" इति वैजयन्ती । पतन्ति=पतनमापद्यन्ते ।। २७ ।।

मेघरूपी हाथी द्वारा अपने गण्डस्थलों की खुजली मिटाने के लिये रगड़े जाने से काँपती हुई दिशाओं की दीवारों पर मेघों द्वारा डाली गयी जल की मोटी-मोटी बूंदें उसी तरह सुन्दर लग रही थी जैसे कोई मोटा पलाण्डु (प्याज) कन्द हो ।।

पयःप्रवाहैः सममेव वारिदः परं समादाय महापयोनिधेः ।
पुनर्विभक्ता इव मौक्तिकोत्कराः स्फुरन्ति वर्षोपलशर्कराः क्षितौ ।।२८।।

पयः प्रवाहैरिति । वारिदैः=मेघैः, पयः प्रवाहैः=जलप्रवाहैः, समम्=सहैव, महापयोनिधेः=महासमुद्रात्, परम्=अत्यन्तम् यथा स्यात् तथा समादाय=गृहीत्वा, पुनर्विमुक्ताः=विसृष्टाः, मौक्तिकोत्कराः=मुक्ताफलसमूहा इव, क्षितौ=पृथिव्याम्, वर्षोपलशर्कराः=करकखण्डाः, इवेति सादृश्ये, स्फुरन्ति=शोभन्ते ।

"शर्करा खण्डविकृतौ कर्परांशे रुगन्तरे ।
उपलायां शर्करायुग्देशे च शकलेऽपि च ।।" इति हेमचन्द्रः ।।२८।।

मेघों से पृथ्वी पर गिरती हुई जल की मोटी मोटी बूँदें ऐसी लग रही थी मानों मेघों ने महासमुद्रों से लाकर मुक्ताराशि को वहाँ पुनः उडेल दिया हो ।। २८ ।।

यथा यथा वृष्टिभिरभ्रमण्डले विजृम्भते वैद्युतहव्यवाहनः ।
तथा तथा पान्थमृगीदृशां ध्रुवं विजृम्भते चेतसि मन्मथानलः ।।२९।।

यथा यथेति । अभ्रमण्डले=आकाशप्रदेशे, वैद्युतहव्यवाहनः=विद्युत्सम्बन्धि अग्निः, यथा यथा=येन येन प्रकारेण, विजृम्भते=वर्धते, तथा तथा=तेन तेनैव प्रकारेण, पन्थानं नित्यं गच्छन्तीति पान्थाः=पथिकजनाः, तेषां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मृगीदृशाम्=हरिणेक्षणानां सुन्दरीणाम्, चेतसि=मनसि, मन्मथानलः=कामाग्निः, विजृम्भते=वर्धते ॥ २९ ॥

ज्यों ज्यों आकाशमण्डल में जलद मेघों से निकली बिजली की चमक बढ रही थी त्यों त्यों पथिक (विदेश गये पति) जनों की स्त्रियों के चित्त में कामाग्नि की भी वृद्धि होती जा रही थी ॥ २९ ॥

निदाघतापज्वलिता वनस्थली प्रसारयन्ती स्फुटकन्दलीकरम् ।
मयूरकेकाविरुतैर्मनोहरैः पयोदमभ्यर्थयतीव जीवनम् ॥ ३० ॥

निदाघेति । निदाघतापेन=ग्रीष्मोष्मणा, ज्वलिता=तापिता, वनस्थली=वनप्रदेशः, स्फुटाम्=पुष्पिताम्, कन्दलीम्=कन्दलीकुसुममेव करम्=हस्तम्, प्रसारयन्ती=विस्तारयन्ती, मनोहरैः=रमणीयैः, मयूराणां केकाविरुतैः=केकाध्वनिभिः, पयोदम्=मेघम्, जीवनम्=जलमिव; अभ्यर्थयति=याचते । "जीवनं भुवनं वनम्" इत्यमरः ॥ ३० ॥

गर्मी की ज्वाला से झुलसा हुआ सम्पूर्ण वनप्रदेश फूली कदली के पुष्परूप हाथों एवं मनोहर मयूरध्वनि द्वारा मेघों से जल या जीवन की याचना करता हुआ सा लग रहा था ॥ ३० ॥

विनिद्रकान्तारविनम्रवाटिकाप्रसूनकिञ्जल्कपरागवाहिनः ।
हरन्ति मन्दाः पवमानकन्दलाः शिखण्डिनां ताण्डवजं परिश्रमम् ॥ ३१ ॥

विनिद्रेत्यादि । विनिद्राणाम्=विकसितानाम्; कान्तारे वने, स्थितायाः कदम्बवाटिकायाः=नीपश्रेण्याः; प्रसूनानाम्=पुष्पाणाम्; किञ्जल्कपरागान्=केसरपांसून्, वहन्तीति तादृशाः; "नीपप्रियकदम्बास्तु किञ्जल्कः केसरोऽस्त्रियाम्"; "परागः कौसुमे रेणौ" इति चामरः, मन्दाः=मन्थरगतयः, पवमानकन्दलाः=वातांकुराः; ताण्डवजम्=विशिष्टनर्तनजन्यम्; परिश्रमम्=खेदम्, हरन्ति=नाशयन्ति ॥ ३१ ॥

वन में फूले कदम्बों के फूलों से उठी सुगन्धित वायु मयूरों के नृत्यजन्य श्रम को दूर हटाती हुयी सी लग रही थी ॥ ३१ ॥

विशङ्कटामम्बरराजवीथिकां बलाहकानामटतामितस्ततः ।
प्रतायमाना इव पादपांसवः पतन्ति मन्दं परितः पयःकणाः ॥ ३२ ॥

विशङ्कटेत्यादि । विशङ्कटाम्=विशालाम्; "विशङ्कटं पृथु बृहद् विशालम्" इत्यमरः । बलाहकानाम्=हंसानाम्, अम्बरम्=गगनमेव, राजवीथी=प्रधानवीथी, ताम्; इतस्ततः; अटताम्=सञ्चरताम्; सताम्; प्रतायमानाः=वितन्यमानाः, पादपांसवः=पादरजांसि; पयःकणाः=जलबिन्दवः, इव; परितः=अभितः, मन्दम्=शनैः; पतन्ति ॥ ३२ ॥

Acc. 32284
322845

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशाल गगनतल में इधर-उधर उड़ते बादलों की हल्की बूँदें उनके पैरों की धूल की तरह लग रही थीं ॥ ३२ ॥

विघुष्यमाणे तडिताऽभ्रमंडले विधाय साक्ष्ये नववैद्युतानलम् ।
ऋतुः पुरोधास्तटिनीसमुद्रयोः प्रवर्तयत्यूर्मिकरग्रहोत्सवम् ॥ ३३ ॥

विघुष्यमाण इति । तडिता = विद्युता; विघुष्यमाणे=शब्दायिते; अभ्रमण्डले=आकाशप्रदेशे; नवम्=विद्युत्सम्बन्धिनमग्निम्; साक्ष्ये=साक्षिकर्मणि; विधाय=कृत्वा, ऋतुः=वर्षर्तुः; पुरोधाः=पुरोहितः; इति व्यस्तरूपकम् । "पुरोधास्तु पुरोहितः" इत्यमरः । तटिनी=नदी, च समुद्रश्च=अब्धिश्च, तयोः, ऊर्मयः=वीचय एव कराः=हस्ताः, तेषां ग्रहः=ग्रहणम्, विवाह इत्यर्थः; स एव उत्सवः=क्षणस्तम्, प्रवर्तयति=निर्वर्तयति ॥ ३३ ॥

बिजली के गर्जन से युक्त गगनप्रदेश में नयी चमकती बिजली रूप अग्नि को साक्षी बनाकर मानों यह वर्षाकालरूपी पुरोहित नदियों और समुद्र के जल के तरङ्गरूप करों (हाथों) का ग्रहण (पाणिग्रहण=विवाह) करा रहा था ॥ ३३ ॥

अनेन कालेन विनाऽमृतद्रवैर्निकाममापादितसर्वसम्पदा ।
अशेषतो भूरपि सर्वथा भजेदपुत्रिणीनामधिदेवतापदम् ॥ ३४ ॥

अनेनेति । अमृतानाम्=जलानाम्, द्रवैः=निष्यन्दैः, निकामम्=अत्यन्तम्, आपादिताः=सम्पादिताः; सर्वसम्पदः=समग्रधान्यादिकम् येन तेन; अनेन कालेन विना=वर्षाकालेन विना; भूः=इयं पृथिवी, सर्वथा=साकल्येन; अपुत्रिणीनाम्=पुत्ररहितस्त्रीणाम्; अधिदेवतापदम्=प्रधानदेवतास्थानम्; भजेत्=सेवेत । यद्ययं वर्षाकालो नाभविष्यत् तदा जलाभावादियं भूमि सस्यादिरहिता सती बन्ध्याऽभविष्यदित्यर्थः ॥ ३४ ॥

यदि यह वर्षाकाल अपने प्रभाव से अमृत (जल) की बूँदें बरसा कर नये नये वृक्ष न पैदा करता तो जलाभाव से समग्र पृथ्वी धान्यरहित रहती हुई अपुत्रिणी (बन्ध्या) ही कहलाती ॥ ३४ ॥

इति प्रशंसामुखरे सकौतुकं स्ववृत्तिमुद्दिश्य नरेन्द्रनन्दने ।
उपोढलज्जा इव दिङ्मुखान्तरे तिरोबभूवुः सकलाः पयोधराः ॥ ३५ ॥

इतीति । स्वेषाम्=निजानाम्; वृत्तम्=चरितम्, उद्दिश्य=लक्ष्यं कृत्वा; इति=एवम्; प्रशंसया = श्लाघया, मुखरे=शब्दायमाने; नरेन्द्रनन्दने=राजकुमारे सति; सकौतुकम् = अश्चर्यसहितम्, उपोढा=धृता, लज्जा=व्रीडा, यैस्ते सकलाः=समग्राः, पयोधराः=मेघाः, दिङ्मुखान्तरे=दिशां मध्यभागे; तिरोबभूवुः=अन्तर्हिताः, बभूवुः ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इस तरह राजकुमार के मुखारविन्द से अपने विषय में निकले प्रशंसा-वचनों को सुनकर लज्जित से हुए सभी मेघ इधर-उधर दिशाओं में जाकर छिप गये ॥ ३५ ॥

शरत्समयवर्णन

दिगङ्गनावर्णघृतानुलेपनं सितच्छदस्वैरविहारवीथिका ।
सरोजिनीयौवनविभ्रमोदयः समाविरासीत् समयोऽथ शारदः ॥३६॥

द्रिमिति । अथ=वर्षाकालानन्तरम्; दिशामेवाङ्गनानाम्=स्त्रीणाम्, वर्णघृतानुलेपनम्=कान्तिजनकघृतनिर्मितलेपनभूतम्; दिशां प्रकाशकमिति यावत्; सितच्छदानाम्=श्वेतपक्षाणां हंसानाम्, स्वैरविहारस्य=स्वच्छन्दलीलायाः वीथिका=पक्तिः, "हंसो मरालो नीलाक्षश्चक्रपक्षः सितच्छदः" इति वैजयन्ती । सरोजिनीनाम्=कमलिनोनाम्; यौवनविभ्रमस्य=तारुण्यविलासस्य; उदयः=आविर्भावरूपः, शारदः=शरदृतुसम्बन्धी; समयः=कालः, समाविरासीत्=अविर्बभूव ॥ ३६ ॥

शरदृतुवर्णन—वर्षा ऋतु बीतने पर, आया शरत्काल ऐसा लग रहा था मानों वह दिग्वधुओं की मुखकान्ति का वर्धक घृत का लेपन हो, या स्वच्छन्द विहार करती हंसों की पंक्ति हो, या पद्मिनियों के तारुण्यविलास का आविर्भाव हो ॥ ३६ ॥

तडित्प्रियायाः सविलाससम्पदो बलाकिकायाश्च विशुद्धजन्मनः ।
वियोगदुःखादिव मौनमुद्रिताः प्रपेदिरे पाण्डरतां पयोधराः ॥ ३७ ॥

तडिदिति । पयोधराः=मेघाः; तडित्प्रियायाः=विद्युद्रूपकान्तायाः, सविलाससम्पदः=विभ्रमातिशयविशिष्टायाः; बलाकिकायाः=बिसकण्ठिकायाः; "बलाका बिसकण्ठिका" इत्यमरः । विशुद्धम्=धवलम्, पूतं च जन्म यस्यास्तस्याः; वियोगदुःखात्=विरहसञ्जातदुःखादिवेति हेतूत्प्रेक्षा । मौनेन=मौनभावेन, मुद्रिताः=प्रतिबद्धाः; शरदि मेघाडम्बराभावादिति भावः । सन्तः, पाण्डरताम्=धवलताम्, प्रपेदिरे=प्राप्नुवन् । वियोगकाले दशसु मदनावस्थासु पाण्डरत्वास्यानन्यतमत्वात् ॥ ३७ ॥

उस शरत्काल में मेघ विभ्रमाधिक्य से युक्त विद्युद्रूप पत्नी तथा श्वेत हंसिनियों के वियोगजन्य दुःख के कारण मौन चेहरे पर सफेदी लिये हुए थे ॥ ३७ ॥

कदर्थितात्मीयगुणप्रकाशने क्षयं प्रपन्ने सति वारिदागमे ।
प्रमोदहासा इव दिङ्मृगीदृशां समुद्बभूवुः कलहंसमण्डलाः ॥ ३८ ॥

कदर्थितेत्यादि । कदर्थितम्=विनाशितम्, आत्मीयगुणानाम्=स्वकीयगुणानाम्, प्रकाशनं येन तस्मिन्, वारिदागमे=वर्षाकाले, क्षयम्=नाशम्, प्रपन्ने=प्राप्ते सति, कलहंसमण्डलाः=राजहंससमूहाः, दिश एव मृगीदृशः=हरिणेक्षणा युवतयः, तासाम् प्रमोदहासाः=सन्तोषजनितहासाः, समुद्बभूवुः=समुत्पन्नाः बभूवुः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपने गुणों को विनष्ट किये हुए वर्षाकाल के बीत जाने पर दिग्वधुओं की मोदभरी हँसी वैसे ही लग रही थी जैसे श्वेत हंस नाच-कूद रहे हों ॥ ३८ ॥

सितच्छदानां श्रवणार्तिकारणं निशम्य कोलाहलमुत्कचेतसाम् ।
वियोगभाजस्तरुणीजना[1] भृशं निनिन्दुरन्तःकरणेन भार्गवम् ॥ ३९ ॥

सितेत्यादि । सितच्छदानाम्=श्वेतपक्षाणां हंसानाम्, श्रवणार्तिकारणम्=श्रवणपीडहेतुभूतम्, कोलाहलम्=कलकलम्, आकर्ण्य=श्रुत्वा, उत्कानि=उत्सुकानि, चेतांसि=येषां तेषाम्, वियोगभाजः=विरहिणः, तरुणीजनाः=युवतयः, अन्तःकरणेन=हृदा, भार्गवम्=भृगुकुलोत्पन्नं परशुरामम्, भृशम्=अत्यर्थम्, निनिन्दुः=निन्दां कृतवन्तः । हंसानां कोलाहलमाकर्ण्य विवृद्धविरहव्यथाः प्रोषितभर्तृकाः वर्षाकाले मानसं सरः प्रविष्टानां हंसानां पुनरागमनमार्गभूतं क्रौञ्चरन्ध्रं विहितवन्तं भार्गवं रामं निनिन्दुरित्यर्थः ॥ ३९ ॥

हंसों का कानों को पीड़ा देने वाला वह कोलाहल सुनकर पति के लिए उत्कण्ठित विरहिणी तरुणियाँ अन्तःकरण से उन हंसों को इधर आने का रास्ता खोलने वाले परशुराम की निन्दा करने लगी ॥ ३९ ॥

अनन्तरत्नाकरफेनमण्डलैरनङ्गकीर्तिस्तबकभ्रमावहैः[2] ।
मरालवृन्दैर्वलमानपक्षकैरपूरि सर्वं हरिदन्तकन्दरम् ॥ ४० ॥

अनन्तेत्यादि । अनन्तस्य=अमितस्य, रत्नाकरफेनस्य=समुद्रडिण्डीरस्य, मण्डलैः=समूहैरिव स्थिरैः, "डिण्डीरोऽब्धिकफः फेनः" इत्यमरः । अनङ्गस्य=मन्मथस्य, कीर्तीनाम्=यशसाम्, स्तबकस्य=गुच्छस्य, भ्रमम्=संशयम्, आवहन्तीति तादृशैः; मरालवृन्दैः=हंससमूहैः, वलमानाः=चञ्चलाः, पक्षा येषां तैः सद्भिः, सर्वम्=निखिलम्, हरिदन्तकन्दरम्=दिगन्तरूपं गह्वरम्, अपूरि=पूर्णम् ॥ ४० ॥

उस समय समुद्र की अनन्त फेनराशि, कामदेव के यशःसमूह का भ्रम पैदा करने वाली, पंख फैलाये हंसों की पंक्ति के कोलाहल से दिशाएँ व्याप्त थीं ॥ ४० ॥

विकासिनां सप्तपलाशभूरुहां विजृम्भमाणाः परितो रजोभराः ।
हरिन्मुखानामधिवासचूर्णकभ्रमं वितेनुः प्रथमानसौरभाः ॥ ४१ ॥

विकासिनामिति । विकासिनाम्=विकसितानाम्, सप्त पलाशानि=पर्णानि, पर्वसु येषां तेषाम्=रुहाम्=वृक्षाणाम्; तत्कुसुमानामिति यावत्; अन्यथा पुष्परजसोऽसम्भवात् । परितः=समन्तात्, रजोभराः=रजःकणाः, विजृम्भमाणाः=वर्धमानाः, प्रथमानम्=विस्तार्यमाणम्, सौरभं येषां ते;

१. वियोगजाताः—पा० । २. ०श्रियाश्रयैः—वि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हरिन्मुखानाम्=दिग्मुखानाम्, अधिवासानाम्=अधिकवासनायुतानां चूर्णानाम्; भ्रमम्=सन्देहम्; प्रवितेनुः=विस्तारयामासुः ॥ ४१ ॥

विकसित सप्तच्छदवृक्षों के पुष्पसमूह से गिरे रजःकण चारों दिशाओं में अपनी सुगन्ध फैलाते हुए दिग्वधुओं के मुख पर लगे सुगन्धित चूर्ण (पाउडर) का भ्रम पैदा कर रहे थे ॥ ४१ ॥

प्रवर्त्यमाने प्रमदैर्मदावलैः समुल्वणे दानजलाभिवर्षणे।
गतेऽपि वर्षासमये महापगा बभूवुरत्यन्तविवृद्धजीवनाः ॥ ४२ ॥

प्रवर्त्यमान इति । वर्षा समये=वर्षाकाले; गते=यातेऽपि; प्रमदैः=प्रकृष्ट-मदैः, मदावलैः=गजैः, समुल्वणे=अधिके; दानजलस्य=मदजलस्य, अभि-वर्षणे=सेचने; प्रवर्त्यमाने=क्रियमाणे; महापगाः=नद्यः, अत्यन्तम्=आधि-क्येन, विवृद्धम्=वृद्धिङ्गतम्, जीवनम्=जलम्, यासां ताः सत्यः; बभूवुः= जाताः ॥ ४२ ॥

मदोन्मत्त हाथियों द्वारा अधिक बरसाये गये अपने मदजल से, नदियाँ वर्षा ऋतु के बीत जाने पर भी, बढ़ी हुई लगती थीं ॥ ४२ ॥

कलाधिनाथः करजालमुज्ज्वलं प्रसारयामास हरित्सु[1] निर्भरम्।
चिरोत्सुकानां कुमुदाकरश्रियां दृढाङ्कपालीमिव[2] कर्तुमुन्मनाः ॥४३॥

कलाधिनाथ इति । कलाधिनाथः=चन्द्रः; शृङ्गारकलासु निपुणो नायक इति च गम्यते । हरित्सु=दिक्षु; उज्ज्वलम्=शुभ्रम्; करजालम्=किरणसमूहम्; हस्तौ चेति गम्यते । चिरोत्सुकानाम्=चिरमुत्कण्ठितानाम्, कुमुदाकराणाम्= कुमुदिनीनाम्; श्रीः=शोभा यासां तासाम्, कौ=भूमौ, मुदाम्=सन्तोषाणामा-कराः=निधानभूता, श्रीः=शोभा यासां तासां सुन्दरीणाम्, नायिकानामिति च । दृढं यथा स्यात् तथा अङ्कपालीम्=आलिङ्गनम्, "अङ्कपाली परीरम्भे" इति हेमचन्द्रः । कर्तुम्=विधातुम्, उन्मना=उत्सुक इव; निर्भरम्=अत्यन्तम्, प्रसारयामास=प्रसार कृतवान् : "अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरम्" इत्यमरः ॥ ४३ ॥

चन्द्रमा ने भी उस समय सब तरफ अपनी किरणें इस तरह प्रसारित कर दीं कि जैसे वह चिरकाल से उत्कण्ठित कमलिनियों की शोभा का आलिङ्गन करने जा रहा हो ॥ ४३ ॥

वितायमानैः स्मितचन्द्रिकाभरैस्तरङ्गिताः क्षौमविशेषपाण्डरैः।
विलज्जमाना द्विजराजदर्शनाद् धृतावगुण्ठा[3] इव दिग्वधूटिकाः ॥४४॥

१. सरित्सु—वि०, म० ।
२. दृशाङ्क०—वि०, म० ।
३. तूर्णाव०—वि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वितायमानैरिति । सितचन्द्रिकायाः, भरैः=समूहैः; क्षौमवत्=दुकूलवत्, विशेषेण=अतिशयेन, पाण्डरैः=धवलैः, वितायमानैः=प्रसार्यमाणैः, सद्भिः, द्विजराजस्य=चन्द्रस्य, दर्शनात् विलज्जमानाः=लज्जां प्राप्नुवन्त्यः; धृतः=कृतः, अवगुण्ठः=आवरणं याभिस्ताः । दिग्वधूटिकाः=दिग्युवतयः, इव, तरङ्गिताः ॥

चन्द्रमा के निकलने से सब तरफ फैली, सफेद दुपट्टे की तरह उसकी धवल चान्दनी से सभी दिशाएँ ऐसी लग रही थीं मानों द्विजराज के दर्शन से लजाती हुई दिग्वधुओं ने घूँघट कर लिया हो ॥ ४४ ॥

पतङ्गदावानललङ्घितात्मनां तमस्तमालद्रुमषण्डसम्पदाम् ।
मरुत्प्रकीर्णा इव भस्मधूलयः शशङ्किरे शारदमेघपंक्तयः ॥ ४५ ॥

पतंगेत्यादि । पतङ्गः=सूर्य एव दावानलः=वनवह्निः, "पतङ्गः पक्षि-सूर्ययोः" इत्यमरः । तेन लाङ्घिताः=भक्षिताः, आत्मानः=स्वरूपाणि, यासां तासाम्, सूर्यदग्धानामिति यावत् । लङ्घतिर्भक्षणार्थोऽपि प्रयुज्यते । यथा हि **कालिदासकविः मालविकाग्निमित्रे**—"एष बालाशोकवृक्षस्य पल्लवानि लङ्घयति हरिणः" इति । तमसामेव तमालद्रुमाणाम्=तमालवृक्षाणाम्, षण्डस्य=समूहस्य, सम्पदाम्=अतिशयानाम् । मरुता=वायुना; प्रकीर्णाः= विक्षिप्ताः, भस्मधूलयः=भस्मरजांसि; शारदमेघपंक्तयः=शरत्कालस्य मेघ-राशयः, इव, शशङ्किरे=शङ्कामुत्पादयामासुः ॥ ४५ ॥

शरद्ऋतु की मेघपंक्तियाँ ऐसे लग रही थीं कि जैसे सूर्य की किरणों से झुलसे हुए तमालवृक्षों के भस्म की धूल हवा में उड़ रही हो ॥ ४५ ॥

विसृत्वरैः शारदिकैः पयोधरैर्विडम्बयामास विकीर्णमम्बरम् ।
तरङ्गभङ्गैः कलशाम्भसां निधेर्युगान्तभिन्नैर्लवणोदधेर्द्युतिम् ॥ ४६ ॥

विसृत्वरैरिति । विसृत्वरैः=विसरणशीलैः, शारदिकैः=शरत्कालभवैः, पयोधरैः=मेघैः विकीर्णम्=व्याप्तम्; अम्बरम्=गगनतलम्; तरङ्गभङ्गैः= वीचिखण्डैः; विकीर्णस्येति विभक्तिविपरिणामेनान्वयः । कलशाम्भसां निधेः=क्षीरसमुद्रस्य; 'क्षीरोदः कलशोदधिः" इति तत्पर्यायकलशोदधिशब्दे वैजयन्तीकोशः । युगान्ते=प्रलयकाले; भिन्नैः=मिश्रैः, तरङ्गभङ्गैः=वीचिखण्डैः; लवणोदधेः=क्षारसमुद्रस्य; द्युतिम्=शोभाम्; विडम्बयामास=अनुचकार ॥

विस्तृत आकाश में इधर उधर जाते शरद्ऋतु के वे मेघ ऐसे लग रहे थे मानों क्षीरसमुद्र की तरङ्गों से लवणोदधि को तरंगें टकरा रही हों ॥ ४६ ॥

कृताभिषेकाः प्रथमं[1] घनाम्बुभिर्धृतोत्तरीयाः शरदभ्रसञ्चयैः ।
विलिप्तगात्र्यः[2] शशिरश्मिचन्दनैर्दिशो दधुस्तारकहारयष्टिकाम् ॥४७॥

१. प्रथमी—क० पा० ।　　२. गात्राः—क०, पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृताभिषेका इति। प्रथमम्=पूर्वम्, घनाम्बुभिः=वर्षाकालिकमेघजलैः; कृताभिषेकाः=कृतस्नानाः; (पुनः) शरदभ्रसञ्चयैः=शरत्कालिकघनसमूहैः, धृतमुत्तरीयम्=उत्तरीयवस्त्रं याभिस्ताः; शशिनः=चन्द्रस्य, रश्मिभिः=किरणैरेव चन्दनपङ्कैः; विलिप्तानि गात्राणि=शरीराणि यासां ताः; दिशः=काष्ठाः; तारकाणाम्=नक्षत्राणामेव, हाराणाम्=भूषणानाम्, यष्टिकाम्=मुक्तास्रजम्; "तारकं तारकाऽपि च" इति शाश्वतः। दधुः=धारयामासुः ॥ ४७ ॥

पहले वर्षा ऋतु के जल से नहायी और अब शरद्ऋतु के मेघों से घिरी दिशाएँ तारागणों से ऐसी शोभित हो रही थी मानों किसी नववधू ने पहले स्नान कर फिर श्वेत वस्त्र पहन कर, सुगन्धित लेप लगाकर, मोतियों का चमकीला हार पहन रखा हो ॥ ४७ ॥

कृताप्लवानामचिरेण[1] वारिदैर्दिशावधूनां रुचिराम्बरत्विषाम्।
शरीरलग्ना इव तोयविप्रुषश्चकाशिरे सातिशयेन तारकाः ॥ ४८ ॥

कृतेत्यादि। अचिरेण=सद्य एव, वारिदैः=मेघैः, कृतः=विहितः, आप्लवः=स्नानं यासां तासाम्। "स्नानं त्वाप्लाव आप्लवः" इति वैजयन्ती। (पुनः) रुचिरा=मनोहरा, अम्बरत्विट्=आकाशशोभा, वस्त्रशोभा च, यासां तासाम्, "अम्बरं व्योम्नि वाससि" इत्यमरः। दिशावधूनाम्=दिग्युवतीनाम्; तोयविप्रुषः=जलबिन्दवः, "बिन्दुपृषतः पुमांसो विप्रुषः स्त्रियः" इत्यमरः। सातिशयेन=आधिक्येन सह; तारकाः=तारागणा इव; चकाशिरे=शुशुभिरे ॥

शरद्ऋतु की चाँदनी (तारों भरी) रातें ऐसी लग रही थी मानों पहले नहायी और फिर तत्काल सुन्दर वस्त्र पहने दिशाओं के शरीर पर जलबिन्दु झलक रहे हों ॥ ४८ ॥

विकासिनश्चन्द्रकरोपलालनाद् विरेजिरे कैरवकोशराशयः।
शरत्प्रसन्नेषु तडाकवारिषु प्रविष्टबिम्बा इव तारकागणाः ॥ ४९ ॥

विकासिन इति। चन्द्रकराणाम्=चन्द्रकिरणानाम्, उपलालनात्=स्पर्शात्; विकासिनः=विसरणशीलाः; कैरवकोशराशयः=कुमुदकुड्मलराशयः, "सिते कुमुदकैरवौ" इत्यमरः। शरत्प्रसन्नाः=शरदि प्रसादम्=स्वच्छताम्; आप्ताः, तेषु; तडागानाम्=जलाशयानाम्, वारिषु=जलेषु, प्रविष्टाः=प्रवेशमाप्ताः; बिम्बाः=आकृतयः; तारकागणाः=तारासमूहा इव; विरेजिरे=शुशुभिरे ॥४९॥

चन्द्रकिरणों के स्पर्श से, शरदृतु के कारण स्वच्छजल वाले तालाबों में फूले कुमुदपुष्प ऐसे लग रहे थे मानों वहाँ आकाश से तारागण उतर आये हों ॥ ४९ ॥

---
१. कृताप्लुताना०—क०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विकस्वरा व्यञ्जितकण्टकांकुरा विमुक्तमाध्वीकमुदश्रुबिन्दवः।
सरोजषण्डाः शरदं समागताः विलोक्य विस्मेरमुखा इवाबभुः।५०॥

विकस्वरा इति। व्यञ्जिताः=प्रकटिताः, कण्टकानाम्=पूच्यग्राणाम्, एव रोमाञ्चानामङ्कुरा यैस्तादृशाः; "सूच्यग्रे क्षुद्रशत्रौ च रोमहर्षे च कण्टकः" इत्यमरः। विमुक्ताः=उन्मुक्ताः, माध्वीकानाम्=पुष्परसानामेव, मुदश्रूणाम्=आनन्दबाष्पाणाम्, बिन्दवः=विप्रुषो यैस्ते; विकस्वराः=विकसिताः; सरोजषण्डाः=कमलसमूहाः; समागताम्=सम्मुखे उपस्थिताम्; शरदम्=शरदृतुम्, विलोक्य=दृष्ट्वा; विस्मेरमुखाः=प्रसन्नवदनाः; बभूवुः ॥ ५० ॥

शरदृतु के आने पर, अपने काँटों से अपने में रोमाञ्च का, तथा झरते हुए पुष्परस से अपने हर्ष के आँसुओं का बोध कराते हुए प्रसन्नमुख कमल के फूल अत्यन्त सुन्दर लग रहे थे ॥ ५० ॥

विकासभाजामभितः सरोरुहां विलीयमानैर्मकरन्दनिर्झरैः।
अगाधतां प्रापुरतीव पूरिताः शरत्कृशा अप्यखिलाः सरोवराः ॥५१॥

विकासेत्यादि। अभितः=परितः; विकासभाजाम्=विकसितानाम्; सरोरुहाम्=पङ्कजानाम्; विलीयमानैः=स्यन्दमानैः, मकरन्दनिर्झरैः=पुष्परसनिर्झरैः; शरदि=शरदतौ; कृशाः=कृशतां प्राप्ताः, शुष्का इत्यर्थः, अपि, अखिलाः=समग्राः, सरोवराः=जलाशयाः; अतीव=अत्यधिकम्, पूरिताः=प्रपूरिताः सन्तः; अगाधताम्=गम्भीरताम्; प्रापुः=प्राप्नुवन् ॥ ५१ ॥

वर्षाऋतु के बीत जाने पर खाली हुए सरोवर चारों तरफ विकसित कमलों के फूलों से झरते हुए पुष्परस से भरे हुए दिखायी दे रहे थे ॥ ५१ ॥

विपक्वपुण्ड्रेक्षुपरुमुंखच्युतैर्निरन्तरा मौक्तिकसारसञ्चयैः।
उदारकैदारककुल्यकातटाः प्रपेदिरे ताम्रनदीतटोपमाम् ॥ ५२ ॥

विपक्वेत्यादि। विशेषेण पक्वानाम्=पाकं प्राप्तानाम्; पुण्ड्रेक्षूणाम्=इक्षुविशेषाणाम्, परुषाम्=पर्वणाम्, मुखेभ्यः=अग्रभागेभ्यः; च्युतैः=स्रस्तैः, "परुः पर्व पुमान् ग्रन्थिः" इति वैजयन्ती। मौक्तिकसाराणाम्=मुक्ताश्रेष्ठानाम्; सञ्चयैः=समूहैः; निरन्तराः=सान्द्राः; उदारस्य=महतः; कैदारकस्य=केदारसमूहस्य, कुल्यकानाम्=कृत्रिमाल्पसरिताम्, तटाः=तीराः, "उदारो दातृमहतोः". कैदारकं स्यात् कैदार्यं क्षेत्रं कैदारिकं गणे", "कुल्याल्पा कृत्रिमा सरित्" इति चामरः। ताम्रनद्याः=ताम्रपर्ण्याः, तटस्य=तीरस्य, उपमाम्=साम्यम्, प्रपेदिरे=प्रापुः। समुद्रसङ्गतायास्ताम्रपर्ण्याः मौक्तिकसम्बन्धः सुप्रसिद्धः ॥ ५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पके हुए किसी विशिष्ट जाति वाले इक्षु दण्ड के पर्व से निरन्तर गिरते हुए मोतियों के समूह से धान के खेतों को बड़ी बड़ी नालियाँ ताम्रनदी की बराबरी (तुलना) कर रही थीं ।। ५२ ।।

विपाकभूम्नाऽभिविदीर्णदाडिमीफलप्रकीर्णैर्नवबीजबालकैः[1] ।
करम्बिताः[2] काननभूमयो बभुः पुनः समुद्यत्सुरगोपका इव ।। ५३ ।।

विपाकेत्यादि । विपाकस्य=पाकस्य, भूम्ना=अतिशयेन, अभिविदीर्णेभ्यः=अभितः=परितः, विदलितेभ्यः=स्फुटितेभ्यः, दाडिमीफलेभ्यः=जम्बीरेभ्यः; प्रकीर्णैः=समन्तात् प्रक्षिप्तैः, करम्बिताः=व्याप्ताः, काननभूमयः=वनप्रदेशाः, पुनः=शरद्गतावपि, समुद्यन्तः=समुत्पद्यमानाः; सुरगोपकाः=इन्द्रगोपकाख्यकीट-विशेषाः, यासु ताः इवेत्युत्प्रेक्षायाम्; बभुः=शोभयामासुः ।। ५३ ।।

अधिक पक जाने से फटे हुए दाड़िम (अनार) के फलों में दिखायी देने वाले बीजों से भरी हुई वनभूमि ऐसी लग रही थी मानों फिर से शरदृतु में भी इन्द्रगोप (कीटविशेष) की वृष्टि हुई हो ।। ५३ ।।

अमन्दपाकोदयशालिभिः फलैरवाङ्मुखीनाः कलमा ललक्षिरे ।
उपस्थितामात्मविनाशविक्रियां विचिन्त्य शोकावनता इवाधिकम् ।।५४।।

अमन्देति । अमन्दपाकस्य=पूर्णपरिपाकस्य, उदयेन शालन्त इति तादृशैः, फलैः=शस्यैः, "फलं फले बीजे निष्पत्तौ भोगलाभयोः । सस्ये" इति केशवः । अवाङ्मुखीनाः=अधोमुखाः, कलमाः=शालिविशेषाः, आत्मनः=स्वस्य, विनाश-रूपां विक्रियाम्=विकारम्, उपस्थिताम्=सन्निहिताम्, विचिन्त्य=विचार्य, अधिकम्=अतिशयेन, शोकावनताः=दुःखनम्राः; ललक्षिरे=दृष्टाः । इवेत्यु-त्प्रेक्षायाम् ।। ५४ ।।

पूर्ण परिपाक तक पहुँचे धान के पौधे, फलों से झुकी शाखाओं के कारण, ऐसे लग रहे थे मानों वे अपने विनाश का समय आया हुआ जानकर हो रहे शोक से बहुत अधिक शिर झुकाये हों ।। ५४ ।।

विकीर्णपङ्काङ्कितशृङ्गकोटयः खुरार्धचन्द्र[illegible]कूलभूमयः ।
मुहुर्नदन्तो वृषभा मदोद्धतास्तटाभिघातं सरितां वितेनिरे ।। ५५ ।।

विकीर्णेति । विकीर्णैः=शीर्णैः, पङ्कैः=कर्दमैः, अङ्किताः=लाञ्छिताः, शृङ्ग-कोटयः=विषाणाग्राणि येषां ते, खुरैः=शफैः, अर्धचन्द्रैरिव स्थितैः, क्षताः=भिन्नाः, कूलभूमयः=तटप्रदेशाः यैस्ते, "शफः' क्लीबे खुरः पुमान्" इत्यमरः । मदोद्धताः=मदविह्वलाः, वृषभाः=गावः, मुहुः=पौनःपुन्येन, नदन्तः=गर्जन्तः,

१. विपक्त्रिमणावृन्तविकीर्ण०—पा०; नवक्रिमावृन्तविकीर्ण०—क० ।
२. सुरन्ध्रिताः—पा०; विरन्ध्रिताः—क० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सन्तः, सरिताम्=नदीनाम्, तटाभिघातम्=कूलघातम्, वितेनिरे=विस्तारयामासुः ।। ५५ ।।

उस शरदृतु में मदोन्मत्त साँड (वृषभ) सींगों पर कीचड़ लपेटे हुये, तथा खुरों से नदी के तट की भूमि को जहाँ तहाँ करोंदते हुए नदियों के तट पर इधर उधर घूम रहे थे ।। ५५ ।।

राज्ञः कुमारस्यास्त्रशिक्षाविलोकनम्

अत्रान्तरे राजकुमारमेनमाहूय पृथ्वीपतिराबभाषे ।
अयं जनः पुत्र ! तवास्त्रशिक्षाविलोकनं[1] प्रत्यभिवाञ्छतीति ।। ५६ ।।

अत्रान्तर इति । अत्रान्तरे=शरत्कालदर्शनावसरे, पृथ्वीपतिः=राजा शुद्धोदनः, एनम्=इमम्, राजकुमारम्=स्वपुत्रं सिद्धार्थम्, आहूय=आकार्य, "पुत्र=तात ! अयम्=उपस्थितो जनः=लोकः, तव=सिद्धार्थस्य, अस्त्राणाम्=आयुधानाम्, शिक्षायाः=अभ्यासस्य, विलोकनम्=दर्शनम्; प्रत्यभिवाञ्छति=इच्छति" —इति=इत्थम्, आबभाषे=उक्तवान् ।। ५६ ।।

पति-पत्नी के इस संवाद के मध्य में ही राजा शुद्धोदन ने राजकुमार सिद्धार्थ को बुलाकर कहा कि पुत्र ! जनसभा तुम्हारी अस्त्रशिक्षा को परखना चाहती है ।।

श्रुत्वा तु तत्सूर्यकुलावतंसः प्रत्युज्जगाद प्रथमं नृपाणाम् ।
आलोक्यतां तात ! ममास्त्रशिक्षा प्राप्ते दिने सप्तमसङ्ख्ययेति ।।५७।।

श्रुत्वेति । सूर्यकुलावतंसः=सूर्यकुलभूषणः, सिद्धार्थः, तत्=पितृवचनम्, श्रुत्वा=आकर्ण्य, नृपाणाम्=राज्ञाम्, प्रथमम्=प्रधानम्, (राजानं शुद्धोदनम्) "तात=हे पितः ! मम=सिद्धार्थस्य, अस्त्रशिक्षा=आयुधशिक्षा सप्तमसङ्ख्यया=एतत्संख्यया, दिने=दिवसे, प्राप्ते=आगते सति; (भवता) आलोक्यताम्=दृश्यताम्" इति=इत्थम्, प्रत्युज्जगाद=प्रत्युवाच ।। ५७ ।।

पिता का यह आदेश सुनकर उस सूर्यकुलभूषण राजकुमार ने उत्तर दिया कि पिताजी ! यदि आप लोगों की यही इच्छा है तो मैं आज से सातवें दिन अपनी सीखी अस्त्रविद्या के कुछ विशेष कार्य आप लोगों को दिखाऊँगा ।। ५७ ।।

अथागते सप्तमवासरान्ते प्रजापतिर्बन्धुजनेन[2] सार्धम् ।
तस्यास्त्रशिक्षाप्रविलोकनार्थम्[3] अध्यास्त भद्रासनमन्तरेण ।। ५८ ।।

अथागते इति । अथ=पितुरादेशानन्तरम्; सप्तमवासरस्य=सप्तमदिनस्य; अन्ते=अवसाने, आगते=प्राप्ते सति; प्रजापतिः=राजा शुद्धोदनः; बन्धुजनेन=

१. ० शिक्षणे—क० । २. ०बन्धुगणेन—म० ।
३. अस्यास्त्र०—म० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिवारजनेन, सार्धम्=सह; तस्य=स्वपुत्रस्य सिद्धार्थस्य; अस्त्रशिक्षाम्=आयुध-शिक्षाम्, प्रविलोकनार्थम्=विशेषेण दर्शनहेतवे, आदरेण=सम्मानेन सहितम्, भद्रासनम्=सिंहासनम्, अध्यास्त=व्यराजत ।। भद्रासनमित्यत्र "अधिशीङ्स्थासां कर्म" (पा० सू० १.४.४६) इत्यधिकरणस्य कर्मत्वाद् द्वितीया ।। ५८ ।।

तब सातवाँ दिन आने पर राजा शुद्धोदन अपने पार्षदों के साथ राजदरबार में आकर, अपने पुत्र की अस्त्रशिक्षा के कुछ आदर्श (नमूना=करतब) देखने के लिये, सिंहासन पर विराजमान हुए ।। ५८ ।।

एकेन बाणासनमाततज्यम्, अन्येन हस्ताम्बुरुहेण बाणम् ।
समाददानः स पिनद्धमूर्त्तिरग्रे गुरोराविरभूत् कुमारः ।। ५९ ।।

एकेनेति । एकेन=केवलेन, हस्ताम्बुरुहेण=करकमलेन, आतता=बद्धा, ज्या=मौर्वी, यस्मिंस्तत्; बाणाः अस्यन्ते=क्षिप्यन्ते इति तम् बाणाशनम्=धनुः; अन्येन=अपरेण; च, बाणम्=शरम्; समाददानः=गृह्णन्; पिनद्धा=कवचसंवृता, मूर्तिः=शरीरं यस्य सः; "स्त्रियां मूर्तिस्तनुस्तनूः" इत्यमरः । सः कुमारः=राजकुमारः सिद्धार्थः, गुरोः=पितुः, अग्रे=समीपम्; आविरभूत्=आजगाम ।। ५९ ।।

उधर कुमार भी, एक हाथ में डोरीबन्धा धनुष एवं दूसरे हाथ में बाण धारण किये, कवच कुण्डल पहने हुए, पिता के सम्मुख उपस्थित हुए ।। ५९ ।।

किं पुष्पधन्वा प्रतिलब्धमूर्तिः, किं वाऽवतीर्णो[1] मघवान् सधन्वा !
एवंविधा प्रादुरभूत् प्रजानां विकल्पना विस्मितमानसानाम् ।। ६० ।।

किं पुष्पेति । विस्मितमानसानाम्=आश्चर्यान्वितचित्तानाम्, प्रजानाम्=लोकानाम्; (चित्ते=मनसि-) किमयम्=राजकुमारः; प्रतिलब्धा=पुनः प्राप्ता, मूर्त्तिः=शरीरम्, येन सः, पुष्पधन्वा=पुष्पं धनुर्यस्य सः=मन्मथः; "पुष्पधन्वा रतिपतिः" इत्यमरः । किं वा=अथ वा; सधन्वा=धनुःसहितः; मघवान्=इन्द्रः; (पुनः) अवतीर्णः=अवतरितवान्, एवंविधा=ईदृशी; विकल्पना=संशयः; प्रादुरभूत्=प्रादुर्बभूव ।। ६० ।।

उस समय कुमार को देखने पर, प्रजाजन ऐसा समझ रहे थे कि या तो यह कामदेव की प्रतिमूर्ति है, या फिर धनुष-बाण हाथ में लिये स्वयं भगवान् इन्द्र इस राजसभा में उपस्थित है । इस तरह से कई तरह की कल्पनाएं उसे आश्चर्यचकित हो देखने वाले लोगों के मन में उठ रही थीं ।। ६० ।।

१. ०विकीर्णो—वि०, ०वितीर्णो—क० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अदृष्टपूर्वामतिलोकशिल्पाम्[1] अत्यद्भुतामप्रतिमप्रभावः ।
बहुप्रकारां[2] पितुरस्त्रशिक्षां सन्दर्शयामास स वीरवर्यः ॥ ६१ ॥

अदृष्टेति । अप्रतिमः=अनुपमः, प्रभावः=सामर्थ्यम्, यस्य सः, वीरवर्यः=वीरेषु श्रेष्ठः; सः राजकुमारः; पितुः-राज्ञः, अदृष्टपूर्वाम्=पूर्वमदृष्टाम्, अतिलोकशिल्पाम्=लोके यानि शिल्पानि=कलाः, तानि सर्वाण्यप्यतिक्रान्ताम्, लोकोत्तरशिल्पविशिष्टामित्यर्थः । अत्यद्भुताम्=आश्चर्ययुक्ताम्; बहुप्रकाराम्=बहुविधाम्; अस्त्रशिक्षाम्=आयुधज्ञानम्; सन्दर्शयामास=दर्शयामास ॥ ६१ ॥

पहले कभी कहीं न देखी और लोक में सभी कलाओं को अतिक्रान्त करने वाली नानाप्रकार की धनुर्विद्या की कलाएँ वीर राजकुमार ने उस सभा में अपने पिता के सम्मुख दिखायी ॥ ६१ ॥

दृष्ट्वाऽस्त्रशिक्षां जगदेकबन्धोरभूतपूर्वामवनीतलेषु ।
आत्मानमाखण्डलतुल्यधामा विशामधीशो बहु मन्यते स्म ॥ ६२ ॥

दृष्ट्वेत्यादि । आखण्डलस्य=इन्द्रस्य, तुल्यम्=सदृशम्, धाम=तेजो यस्य सः; विशाम्-प्रजानाम्; "द्वौ विशौ वैश्यमनुजौ" इत्यमरः । अधीशः=राजा; जगताम्=लोकानाम्; एकबन्धोः=प्रधानमित्रस्य, कुमारस्य; अवनीतलेषु-भूमिप्रदेशेषु; अभूतपूर्वाम्=पूर्वमभूताम्, अस्त्रशिक्षाम्=आयुधज्ञानम्, दृष्ट्वा=अवलोक्य, आत्मानम्=स्वम्; बहु=अधिकम्, मन्यते स्म-मेने ॥ ६२ ॥

अपने राजकुमार द्वारा, पृथ्वी पर पहले कभी न देखी गयी अस्त्रविद्या को देखकर राजा शुद्धोदन अपने को इन्द्र के समान प्रतापी समझकर अपने आप पर सात्त्विक गर्व करने लगे ॥ ६२ ॥

इत्थं धीरो दर्शयित्वाऽस्त्रशिक्षां
धानुष्काणामग्रगण्यस्तरस्वी ।
आगोपालं स्तूयमानापदानो
लोकैरुच्चैराससादात्मगेहम् ॥ ६३ ॥

इत्थमिति । धनुः प्रहरणमेषामिति धानुष्काः=धन्विनः, तेषाम्, "धन्वी धनुष्मान् धानुष्कः" इत्यमरः । अग्रगण्यः=श्रेष्ठः, तरस्वी=बलवान्, धीरा-गम्भीरः, आगोपालम्=गोपालपर्यन्तम्, उच्चैः-अत्यन्तम्, लोकैः=उपस्थितप्रजाभिः, स्तूयमानम्=प्रशस्यमानम्, अपदानम्=जीवनवृत्तम्, यस्य सः; कुमारः; इत्थम्=अनेन प्रकारेण, अस्त्रशिक्षाम्-आयुधज्ञानम्, दर्शयित्वा-प्रदर्श्य; आत्मगेहम्-स्वप्रासादम्, आससाद-प्रतिनिवर्तयामास । शालिनीवृत्तम् ॥६३॥

१. ०मवलोक—पा०, क० । २. बहुप्रकार—क० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इस तरह उस धीर, वीर, कुशल एवं धनुर्धारियों में श्रेष्ठ राजकुमार ने गुरुजनों से सीखी उस अस्त्रविद्या का प्रदर्शन करते हुये सभा में उपस्थित छोटे-बड़े सभी लोगों से प्रशंसा पाकर पुनः अपने प्रासाद की तरफ प्रस्थान किया ।। ६३ ।

सङ्गीतमङ्गलमहोत्सवसङ्गिनीभिः,
साकं वधूभिरनुरागतरङ्गिताभिः ।
क्रीडागृहेषु विहरन्[1] क्षितिपालसूनु-
र्वर्षाणि कानिचिदसौ क्षपयाञ्चकार ।। ६४ ।।

इति बुद्धघोषविरचिते पदयचूडामणिनाम्नि महाकाव्ये पञ्चमः सर्गः ।।

सङ्गीतेत्यादि । असौ=सः, क्षितिपालस्य=राज्ञः, सूनु=पुत्रः, सङ्गीतमेव मङ्गलमहोत्सवस्तेन सङ्गिन्यः=सङ्गता, ताभिः, अनुरागेण=स्नेहेन, सञ्जाततरङ्गाभिः=प्रवृद्धानुरागाभिरित्यर्थः; वधूभिः=स्त्रीभिः सह, क्रीडागृहेषु=विलासभवनेषु, विहरन्=विहारं कुर्वन्, कानिचित्=कतिपयानि, वर्षाणि=क्षयनानि, क्षपयाञ्चकार=यापयामास ।। ६४ ।।

पदयचूडामणिमहाकाव्यस्य कीर्तिन्याख्यायां पञ्चम सर्गः ।।

यों, उस राजकुमार ने सङ्गीत एवं मङ्गलमहोत्सवों में बराबर साथ देने वाली अनुरागमयी स्त्रीजनों के साथ उन क्रीड़ागृहों में विहार करते हुए कुछ वर्ष आनन्दपूर्वक बिताये ।। ६४ ।।

बुद्धघोषरचित पद्यचूड़ामणि काव्य के पञ्चम सर्ग का भाषान्तर सम्पन्न ।। ५ ।।

---

१. निवसन्—क० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षष्ठः सर्गः

वसन्तसमयवर्णनम्

प्रादुर्बभूव समयः सुभगो[1] वसन्तः
प्रस्तावनाऽलिकुलकोकिलकूजितानाम् ।
बाणाशयो मकरकेतनसायकानाम्
मौहूर्तिको मलयमारुतनिर्गमानाम् ॥ १ ॥

अस्मिन् सर्गे कविस्त्रिशतपद्यैर्वसन्ततुं वर्णयति—**प्रादुर्बभूवेति**। अलिकुलस्य=भ्रमरवर्गस्य, कोकिलस्य=पिकस्य च, कूजितानाम्=ध्वनीनाम्; प्रस्तावना=उपोद्घातः, मकरकेतनस्य=मदनस्य, सायकानाम्=बाणानाम् बाणा आशेरन्तेऽस्मिन्निति बाणाशयः=निषङ्गः; मलयमारुतस्य=दक्षिणानिलस्य निर्गमानाम्=बहिर्निष्क्रमणानाम्; मुहूर्तम्=उचितकालं वक्तीति तादृशो मौहूर्तिकः=दैवज्ञः; शैषिकष्ठक्। "स्युर्मौहूर्तिकमौहूर्तज्ञानिकार्तान्तिका अपि" इत्यमरः। सुभगःवसन्तः समयः=वसन्तकालः; प्रादुर्बभूव=प्रादुरासीत् ॥ १ ॥

वसन्तर्तु-वर्णन—उदयानों में भौंरे और कोयलों की मधुर ध्वनि से ऐसा लग रहा था मानों कामदेव की बाणरूपी दक्षिण वायु के साथ वसन्तकाल आ गया हो ॥ १ ॥

उच्चण्डदण्डधरकासरसौर्वभौम-
सन्नाहभीत इव चण्डमयूखमाली[2] ।
सद्यो विवर्तितहयो यमदिङ्मुखान्ताद्
यात्रामधत्त हिमभूधरसम्मुखीनाम् ॥ २ ॥

उच्चण्डेत्यादि। उच्चण्डस्य=अतिकोपनस्य, दण्डधरस्य=यमस्य, यः कासरसार्वभौमः=महिषश्रेष्ठः, तस्य सन्नाहात्=उद्यमाद्, भीतः=भयमाप्तः; कासराणां स्ववाहनाश्वशत्रुत्वादिति भावः; "महिषो वाहद्विषत्कासरसैरिभाः" इत्यमरः। चण्डमयूखमाली=चण्डकिरणः सूर्यः; सद्यः=सपदि; विवर्तिताः=निर्वर्तिताः, हयाः=अश्वा यस्य स तथाभूत; सन्; यमदिङ्मुखान्तात्=दक्षिणदिगन्तात्; हिमभूधरसम्मुखीनाम्=हिमाचलाभिमुखीम्; यात्राम्=गमनम्; अधत्त=चकारः। वसन्ते सूर्यस्योत्तरगतेः प्रसिद्धत्वात्। यद्यपि "यथामुखसम्मुखस्य दर्शनः खः" (पा० सू० ५.२.६) इति खप्रत्ययः आदर्शादिरूपदर्शनाधिकरणे एव सम्भवति, तथापि सम्मुखावस्थानमात्रेणादर्शादिसादृश्यादत्र यात्रायामौपचारिकः प्रयोगः; "संयुगे सम्मुखीनं तम्" इति भट्टिप्रयोगवत्; "सम्मुखीनमभिमुखीनम्" इति हेमचन्द्रश्च ॥ २ ॥

---

१. सुभगः समयो–वि० ।   २. उद्दण्ड०–वि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दण्ड हाथ में लिये यमराज के भैंसे के डर से अपने घोड़ों के बिदक जाने के कारण तत्काल उन्हें मोड़कर सूर्य ने भी अपना मार्ग बदल दिया (अर्थात् वसन्त के आने पर सूर्य भी दक्षिणायन छोड़कर उत्तरायण मार्ग पकड़ बैठे) ॥ २ ॥

चन्द्रोदयोज्ज्वलमुखेन झषध्वजाज्ञां
व्याकुर्वता विमलसूक्ष्मतराम्बरेण ।
वन्या वसन्तसमयेन परिग्रहत्व-
सम्भाविता सपदि पुष्पवती बभूव ॥ ३ ॥

चन्द्रोदयेत्यादि । चन्द्रोदयेन, चन्द्रोदयवद् वा उज्ज्वलं मुखम्=प्रारम्भः, वदनं च यस्य तेन; झषध्वजस्य=मकरध्वजस्य, आज्ञाम्=शासनम्; व्याकुर्वता=विशदयता; अनुरागं वर्धयतेत्यर्थः । विमलम्-निर्मलम्, सूक्ष्मतरम् = अतिसूक्ष्मम्, अम्बरम्=गगनम्, वस्त्रं च यस्य तेन तथोक्तेन; वन्या=वनसमूहः "वन्या वनसमूहे स्यात्" इत्यमरः । वसन्तसमयेन=वसन्तकालेन, नायकेन चेति प्रतीयते । परिग्रहत्वेन=स्त्रीकार्यत्वेन, पत्नीत्वेन च, सम्भाविता-मानिता, "पत्नीस्वीकारशपथमूल्येष्वपि परिग्रहः" इति वैजयन्तीकोशः । सपदि= तत्क्षणम्; पुष्पवती=पुष्पपूर्णा; भूम्नि मतुप् । बभूव=अभूत् । अर्थान्तरं स्पष्टम् । श्लेषानुप्राणिता समासोक्तिरलङ्कारः ॥ ३ ॥

चन्द्रोदय से उज्ज्वल कान्तिमय, एवं कामदेव की आज्ञा का पालन करते हुए साफ और पतले वस्त्र (या आकाश) वाला सा वनसमूह भी, वसन्तकाल आ जाने के कारण फूलों से लद गया ॥ ३ ।

कालेन गाढतरमानपरिग्रहाणां
प्राणानिलान् रसयितुं[१] प्रमदाजनानाम् ।
उल्लासितेव रसना कुसुमद्रुमाणाम्
उद्भासते स्म नवकोमलपल्लवश्रीः ॥ ४ ॥

कालेनेति । वसन्तकाल एव कालः=मृत्युस्तेन; गाढतरः=दृढतरः, मानपरिग्रहः=ईर्ष्याकोपधारणं यासां तासाम्; प्रमदाजनानाम्=कोपनयोषिताम्; प्राणानिलान्=प्राणवातान्, रसयितुम्=स्वादयितुम्; उल्लासिता=प्रकटिता; रसना=जिह्वा; "रसज्ञा रसना जिह्वा" इत्यमरः । इवेति सादृश्ये । कुसुमप्रधाना द्रुमाः=वृक्षास्तेषाम्, शाकपार्थिवादिमध्यमपदलोपी समासः । नवाः= नूतनाः, कोमलाः=मृदवः, पल्लवाः=किसलयास्तेषां श्रीः=शोभा; उद्भासते स्म=द्योतते स्म ॥ ४ ॥

१. ग्रसयितुं-म० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उस समय वन के वृक्षों के कोमल अरुण पल्लव ऐसे लग रहे थे मानों वसन्त-ऋतु से प्रचण्ड मान करती हुई प्रमदाजनों के लिये मृत्यु का कारण सा बनी मृत्यु की जीभ लपलपा रही हो ॥ ४ ॥

उन्मोचयन् परिणतच्छदकञ्चुलीका-
मुद्भावयन् मुकुलजालकरोमहर्षम् ।
उल्लोलयन् भ्रमरकेशभरं लतानाम्
उद्यानभूषु विजहार वसन्तकालः ॥ ५ ॥

उन्मोचयन्निति । उद्यानभूषु=उद्यानभूमिषु: परिणताः=परिपक्वाः, छदाः=पर्णाः ऐव कञ्चुलीकाः=कञ्चुकम्, "दलं पर्णं छदः, पुमान्" इत्यमरः । "चोलः कञ्चुलिका कूर्पासकोऽङ्गिका च कञ्चुके" इति हेमचन्द्रः । उन्मोचयन्; मुकुलजालकम्=कुड्मलसमूहमेव, रोमहर्षम्=पुलकम्, उद्भावयन्=प्रकटयन्, लतानाम्=वल्लरीणाम्, भ्रमराः=भृङ्गा एव केशभरः=कचकलापस्तम्, उल्लोलयन्=चालयन्; वसन्तकालः=वसन्तसमयः; विजहार=विहारं कृतवान् ॥

वसन्तऋतु में लताओं पर बैठे भौंरे ऐसे लग रहे थे मानों पके पत्र रूपी कञ्चुक (अंगिया) को इटाता हुआ, नव पल्लवों से रोमाञ्च सा करता हुआ और भ्रमर रूपी केशकलाप को अपने हाथों से इधर-उधर करता (सहलाता) हुआ वसन्तकाल आ ही पहुँचा हो ॥ ५ ॥

आरुह्य मन्दमलयानिलमौपवाह्य-
माशाजयप्रचलितस्य मनोभवस्य ।
सूनप्रसूतिरभवन्नवलाजवृष्टिः[1]
पुंस्कोकिलध्वनिरभूद् वरशङ्खघोषः ॥ ६ ॥

आरुह्येति । (तदा) मन्दमलयानिलम्=मन्दमलयवायुरूपिणम्, औपवाह्यम्=राजगमनार्हवाहनम्; "राजवाह्यस्त्वौपवाह्यः" इत्यमरः । आरुह्य=आरोहणं कृत्वा, आशाजयार्थम्=दिग्विजयार्थम्, प्रचलितस्य=प्रस्थितस्य, मनोभवस्य=मन्मथस्य कृते, सूनप्रसूतिव=पुष्पोद्गम एव, "प्रसूतिः प्रसवे च्योते" इत्यमरः । नवलाजानाम्=भ्रष्टधानानाम्, वृष्टिः=वर्षणम्; पुंसां कोकिलानाम्=पिकानाम्, ध्वनिः=शब्द एव, वरशङ्खस्य=श्रेष्ठशङ्खस्य घोषः=नादः, अभूत्=बभूव । ६ ॥

उस समय ऐसा लग रहा था मानों मन्द मलयपवन रूपी राजाओं के योग्य सवारी पर चढ़कर दिग्विजय करने चले कामदेव के स्वागत में नव पुष्प रूपी

१. पुष्पप्रसूति०-म०, पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लाजा (खील) की वृष्टि हो रही हो और कोयल की मीठी बोली ही उसकी विजय-सूचक शङ्खध्वनि हो ॥ ६ ॥

मन्दानिलेन वहता वनराजिमध्याद्
उत्थापितः कुसुमकोणकरेणुरुच्चैः ।
सेनापराग इव दिग्विजयोद्यतस्य
चेतोभुवः प्रसरति स्म दिगन्तरेषु ॥ ७ ॥

मन्देत्यादि । वहता=चरता, मन्दानिलेन, मन्दवायुना, वनराजिमध्यात्=वनपंक्तेर्मध्यभागात्, उच्चैरुत्थापितः=उड्डापितः=कुसुमानाम्=पुष्पाणाम्, कोरकाणाम्=कुड्मलानां च रेणुः=रजः, दिग्विजयार्थमुद्यतस्य=प्रकान्तस्य, चेतोभुवः=मनसिजस्य, सेनापरागः=सैन्यगमनेनोत्थितस्य धूलिः, इव, दिगन्तरेषु=दिशां कोणपर्यन्तम्, प्रसरति स्म=प्रससार ॥ ७ ॥

उस वसन्तकाल में, मन्द पवन द्वारा उड़ायी गयी वन में खड़े वृक्षों के पुष्पों की धूल से ऐसा लग रहा था मानों वह दिग्विजय पर निकले कामदेव की सेना के चलने से उठी हुई धूल हो ॥ ७ ॥

पुष्पायुधस्य नृपतेः परपुष्टवर्गः
संग्रामसम्भ्रमसहान् सहकारबाणान् ।
सञ्चेतुकाम इव सञ्चितचारुपत्रान्
बभ्राम विभ्रमवनेषु नवांकुरेषु ॥ ८ ॥

पुष्पेत्यादि । परपुष्टानाम्=कोकिलानाम्, वर्गः=समूहः, "परपुष्टः परभृते" इति मेदिनी । नृपतेः=राज्ञः, पुष्पायुधस्य=पुष्पधन्वनः, संग्रामे=युद्धेः, यः सम्भ्रमः, तस्य सहान्, अकुण्ठितानित्यर्थः, सञ्चितानि=सम्पादितानि, चारूणि=मनोहराणि, पत्राणि=दलानि, कङ्कादिपत्राणि च यैस्तान्, सहकारबाणान्=चूतपुष्परूपसायकान्, सञ्चेतुकामः=सम्पादयितुमना इव, नवाङ्कुरेषु=नवीनाङ्कुरयुक्तेषु, विभ्रमवनेषु=उद्यानवनेषु, बभ्राम=अभ्राम्यत् ॥ ८ ॥

उस समय मीठी बोली बोलता पिकसमूह वन में इस वृक्ष से उस वृक्ष पर जाता ऐसा लग रहा था मानों वह वहाँ कामदेव के अकुण्ठित बाणों का संग्रह कर रहा हो ॥ ८ ॥

वीरेण मारसुभटेन विभिद्य बाणै-
र्बद्धा महाविटपिनां विटपान्तरेषु ।
व्याकीर्णकेशनिचया इव शत्रुमुण्डा[1]
व्यालोलभृङ्गनिवहाः स्तबका विरेजुः ॥ ९ ॥

१. शत्रुमुग्धा—० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वीरेणेति । वीरेण=बलवता, मार एव सुभटः=युद्धवीरस्तेन, बाणैः=सायकैः, विभिद्य=भेदनं कृत्वा, व्याकीर्णः=विश्लथः, केशनिचयः=कचसमूहो येषां ते, बद्धाः=संयताः, शत्रुमुण्डाः=रिपुशिरांसीव, "मुण्डोऽस्त्री मस्तकोऽप्यस्त्री" इति वैजयन्ती । महाविटपिनाम्=महावृक्षाणाम्, विटपान्तरेषु=शाखान्तरेषु, व्यालोलः=चञ्चलः, भृङ्गनिवहः=भ्रमरवर्गो येषु ते स्तबकाः=पुष्पगुच्छाः, विरेजुः=शुशुभिरे ॥ ९ ॥

उस वसन्तकाल में फूलों के गुच्छों पर बैठा भ्रमरसमूह ऐसा लग रहा था मानों वीर कामदेव ने अपने शत्रुओं को मार कर उनका गला काट काट कर, एकत्र कर वहाँ बाँध दिया हो ॥ ९ ॥

भृङ्गाभिमुद्रितमुखा मकरन्दपूरैः
पूर्णोदरा रुरुचिरे सुमनोगुलुच्छाः ।
वीरस्य मारनृपतेर्विजयाभिषेकं
कालेन कर्तुमिव रत्नघटाः प्रणीताः ॥ १० ॥

भृङ्गेत्यादि । भृंगैः=भ्रमरैः, अभिमुद्रितानि=लाञ्छितानि, मुखानि=आननानि येषां ते, मकरन्दपूरैः=रसप्रवाहैः, पूर्णम्=व्याप्तमुदरं येषां ते तथा, सुमनोगुलुच्छाः=पुष्पगुच्छाः, "गुच्छस्तबकगुत्सकाः । गुलुच्छोऽथ" इति हेमचन्द्रः । वीरस्य=बलवतः, मारनृपतेः=मदनाधिपतेः, विजयाभिषेकम्=विजयस्नानम्, कर्तुम्=विधातुम्, प्रणीताः=सज्जिताः, रत्नघटाः=रत्नमयकलशाः, इव, रुरुचिरे=शुशुभिरे ॥ १० ॥

मकरन्द से भरे अतएव भँवरों द्वारा घिरे हुए फूलों के लाल गुच्छे ऐसे लग रहे थे मानों इस वसन्तकाल ने नृपति कामदेव का अभिषेक करने के लिये रत्नमय घट एकत्र कर रखे हों ॥ १० ॥

ओघीकृता मलयमारुतचन्दनेन
पुष्फोर पूगवननूतनपुष्पपालिः ।
चेतोभवस्य नृपतेर्मधुना सलीलम्
आन्दोलिता ललितचामरमालिकेव ॥ ११ ॥

ओघीकृतेति । मलयमारुतकन्दलेन=दक्षिणवातनवांकुरेण, मन्दमारुतेनेति यावत्, ओघीकृता=पुञ्जीकृता, पूगवनानाम्=क्रमुकवनानाम्, नूतनपुष्पपालिः=नवीनपुष्पपंक्तिः, मधुनः=वसन्तर्तुना, चेतोभवस्य=मनसिजस्य, नृपतेः=मन्मथस्य कृते, ललितचामरमालिका=मनोहरचामरपंक्तिः, आन्दोलिता=वीजिता इव, पुष्फोर=स्फुरितवती ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मलय पर्वत की तरफ से चलने वाली हवा द्वारा एकत्र की गयी सुपारी के वन के फूलों की पंक्ति ऐसी लग रही थी मानों वह वसन्तकाल राजा कामदेव पर चँवर डुला रहा हो ॥ ११ ॥

पुंस्कोकिलाः पुनरनङ्गजयापदान-
गाथासदृक्षकलपञ्चमकूजितानि ।
पेठुः प्रसन्नमधुरोज्ज्वलपेशलानि
प्रत्यग्रचूतकलिकासु वनस्थलीषु ॥ १२ ॥

पुंस्कोकिला इति । पुनः=भूयः, पुँसकोकिलाः=पुमांसः=पुरुषाः पिकाः, अनङ्गस्य=मदनस्य, जयापदानस्य=जयरूपवृत्तकर्मणः, गाथानाम्=पद्यानाम्, सदृक्षाणि=तुल्यानि, कलानि=अव्यक्तमधुराणि, पञ्चमकूजितानि=पञ्चमनादान्, प्रसन्नानि=स्वच्छानि, मधुराणि=श्रव्याणि, उज्ज्वलानि=गभीराणि, पेशलानि=श्लक्ष्णानि, प्रत्यग्राः=अभिनवाः, चूतकलिकाः=आम्रकोरकाः, "कलिका कोटकः पुमान्" इत्यमरः । यासु तासु, वनस्थलीषु=वनप्रदेशेषु, पेठुः=अपठन् ॥ १२ ॥

उस समय वनों में आम्रमञ्जरियों पर बैठीं कोयल ऐसे कूक रही थीं, मानों पञ्चम स्वर में मदनदेव के विजयगीत गाये जा रहे हों ॥ १२ ॥

उद्वेलसम्भृतमधुव्रतदानराजि-
रुच्छृङ्खलो मलयमारुतगन्धहस्ती ।
मानग्रहाद्रिकटकेषु मनस्विनीनां
वप्रक्रियाविहृतिमाचरति स्म मन्दम् ॥ १३ ॥

उद्वेलेत्यादि । उद्वेलम्=भृशम्, यथा स्यात् तथा सम्भृताः=सङ्गताः, मधुव्रताः=भृङ्गा एव, दानराजिः=मदरेखा यस्य सः, उच्छृङ्खलः=उद्धतः, मलयमारुत एव गन्धहस्ती=मत्तगजः, मानग्रहस्य=रोषपरिग्रहस्यैव, अद्रेः, कटकेषु=पर्वतनितम्बेषु, मानिनीनाम्=मानवतीनाम्, "कटकोऽस्त्री नितम्बोऽद्रेः" इत्यमरः । वप्रक्रियाविहृतिम्=उत्खातकेलिम्, मन्दम्, आचरति स्म=आचचार । मानिनीनां मानग्रहं मलयमारुतोऽच्छिनदित्यर्थः ॥ १३ ॥

उस समय मानिनी तरुणियाँ मानरूपी पर्वत पर ऐसे विहार कर रही थीं मानों मलय मारुतरूपी मदोन्मत्त हाथी अपने दाँतों से पर्वत की शिलाएँ उखाड़ रहा हो ॥ १३ ॥

मन्दानिलक्षितिपमङ्गलपाठकानां
माकन्दगन्धगजमण्डनडिण्डिमानाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उद्दामकामविजयोत्सवघोषणानाम्
उज्जृम्भते स्म रुतमुन्मदषट्पदानाम् ॥ १४ ॥

मन्देत्यादि । मन्दानिलः=मन्दवात एव, क्षितिपः=नृपः, तस्य मङ्गलपाठकानाम्=मङ्गलस्तुतिपाठकबन्दिभूतानाम्, माकन्दाः=चूता एव गन्धगजाः=मत्तगजास्तेषां मण्डनडिण्डिमानाम्=अलङ्करणभूतडिण्डिमाख्यवाद्यविशेषाणाम् । गजानां पृष्ठेषु अलङ्काराय निक्षिप्ताः डिण्डिमाख्या वाद्यविशेषाः मङ्गलार्थं ताड्यन्ते इति सम्प्रदायः । उद्दामस्य=प्रौढस्य यः कामविजय एव उत्सवस्तस्य घोषणानाम्=उद्घोषकाणाम्; कर्तरि युच् । उन्मदषट्पदानाम्=उन्मत्तभ्रमराणाम्, रुतम्=शब्दम्, उज्जृम्भते स्म=वर्धते स्म ॥ १४ ॥

उस समय भौंरों की गूँज ऐसी लग रही थी मानों मदनदेव के चारण रूप मलय वायु द्वारा स्तुतिमंगलगीत गाये जा रहे हों, या आम्रवृक्ष रूपी हाथियों पर रखे नगाड़े बजाकर कामविजयोत्सव की उच्चस्वर में घोषणा की जा रही हो ॥ १४ ॥

आमूलचूडमभितः प्रविजृम्भमाणो
बालप्रवाहनिवहो[1] वनपादपानाम् ।
मानान्धकारहरणाय मनस्विनीनां
बालातपप्रसरविभ्रममाललम्बे ॥ १५ ॥

आमूलेत्यादि । वनपादपानाम्=वनवृक्षाणाम्; मूलं च चूडा च मूलचूडे, आ मूलचूडाभ्यामित्यव्ययीभावः, आमूलचूडम्=आमूलाग्रम्, अभितः=परितः, प्रविजृम्भमाणः=वर्धमानः, बालप्रवालानाम्=बालविद्रुमाणाम्; निवहः=समूहः, मनस्विनीनाम्, बालातपस्य=बालसूर्यस्य, प्रसरविभ्रमम्=प्रसरणविलासम्, आललम्बे=आलम्बिततवान् ॥ १५ ॥

उस समय वन के वृक्षों पर मूल से शिखा तक उगे नये पल्लवों से ऐसा लग रहा था जैसे मानिनी तरुणियों का मान हरण करने के लिए बालसूर्य का उदय हो रहा हो ॥ १५ ॥

निरन्तरस्मेरमणीचकानां[2] निष्यन्दमानाभिरनोहकानाम् ।
मधूलकासारमहानदीभिर्वनं[3] नदीमातृकतामयासीत् ॥ १६ ॥

निरन्तरेत्यादि । निरन्तराणि=निविडानि, स्मेराणि=विकसितानि, मणीचकानि=पुष्पाणि येषां तेषाम्; "मणीचकं प्रसूनं च सूनं सुमनसः स्त्रियः" इति वैजयन्ती । अनोकहानाम्=वृक्षाणाम्; वनम्=काननम्; निष्यन्दमा-

---

१. शोणप्रवाह०—म० । २. मनीचकानां—म०; मनीवकानां—पा० ।
३. मधूलिका—पा०, वि०, क० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाभिः=प्रस्रवन्तीभिः; मधूलान्येव=मधूलकानि=मधूनि, तेषाम् आसाराणाम्=धारासम्पातानाम्; महानदीभिः; "मधूलं तु मधुर्न स्त्री" इति वैजयन्ती; "धारासम्पात आसारः" इत्यमरः। नदीमातृकताम्=नदीजलवर्धितसस्यादिकताम्; "स्यान्नदीमातृको देशो नद्यम्बूत्पादसस्यकः" इति वैजयन्ती। अयासीत्=अगमत् ॥ अत्र उपजातिर्वृत्तम् ॥ १६ ॥

निरन्तर फूल रहे पुष्प वृक्षों से झरता हुआ पुष्परस वन में इतना फैल गया था मानों उस बहते हुए पुष्परस से बनी नदियों के जल से ही सर्वत्र छोटे-छोटे पौधे उग आये हों ॥ १६ ॥

तटोपकण्ठं मकरन्दसिन्धोः प्रसूनधूलीपुलिनाभिरामे ।
आबद्धचक्राः सह कामिनीभिरारेभिरे पातुमलिप्रवीराः ॥ १७ ॥

तटेत्यादि । मकरन्दसिन्धोः=पुष्परसनद्याः; तटस्य=तीरस्य, उपकण्ठम्=समीपम्; प्रसूनानाम्=पुष्पाणाम्; धूलीभिः=रजोभिः, निर्मितैः; पुलिनैः=तटैः, अभिरामे=मनोहरे; कामिनीभिः=स्वपत्नीभिः; सह=साकम्; आबद्धचक्राः=बद्धमण्डलाः; अलिप्रवीराः=भ्रमरश्रेष्ठाः, पातुम्=पानं कर्तुम्; मधूनीति शेषः; आरेभिरे=आरभन्त ॥ १७ ॥

उस मकरन्दसिन्धु की पुष्प धूलि से भरे तट के समीप भौंरों ने मण्डलाकार में अपनी सहगामिनियों के साथ बैठकर वह पुष्परस पीना प्रारम्भ कर दिया ॥ १७ ॥

वीरुन्मयीं विभ्रमयन्त्रडोलामारोप्य भृङ्गीमविगीतगीताम् ।
समीरणैरात्मगरुत्समुत्थैः सानन्दमान्दोलयति स्म भृङ्गः ॥ १८ ॥

वीरुन्मयीमिति । भृङ्गः=भ्रमरः; अविगीतगीताम्=अनवद्यगीताम्; भ्रमरीम्=भृङ्गीम्; वीरुन्मयीम्=लतारूपाम्; विभ्रमाय=विलासाय, यन्त्र्यते इति तां यन्त्राम्=बद्धाम्; डोलाम्=प्रेङ्खोलिकाम्, आरोप्य=स्थापयित्वा; आत्मनः=स्वस्य, गरुद्भ्याम्=पक्षाभ्याम्; समुत्थैः=उत्थितैः; समीरणैः=वायुभिः, सानन्दम्=सहर्षम्; आन्दोलयति स्म=चालयति स्म ॥ १८ ॥

भौंरा लतारूपी हिण्डोले पर अपनी सहगामिनियों को बैठाकर अपने छोटे पंखों से उड़ी हवा से उन्हें हर्षपूर्वक सहलाने लगा ॥ १८ ॥

अशोकयष्टयाः स्तबकोपनीतमादाय पुष्पासवमाननेन ।
सम्भोगखिन्नां तरुणद्विरेफः सचाटुकं पाययति स्म कान्ताम् ॥ १९ ॥

अशोकेत्यादि । तरुणः=युवा चासौ द्विरेफः=भ्रमरः; अशोकयष्टयाः=अशोकलतायाः; स्तबकेभ्यः=गुच्छेभ्यः, उपनीतम्=समाहृतम्, पुष्पासवम्=मकरन्दम्; आननेन=स्वमुखेन, आदाय=गृहीत्वा, सम्भोगखिन्नाम्=रति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रान्ताम्, कान्ताम्=पत्नीम्, सचाटुकम्=प्रियवचनेन यथा स्यात्तथा, पाययति स्म=पानं कारयति स्म ॥ १९ ॥

भौंरा, अशोकलता के पुष्पगुच्छों से निकला मकरन्द मुख में भर कर रति-खेदखिन्न अपनी नायिका को तरह तरह की मनुहार कर पिलाता था ॥ १९ ॥

अङ्गं समासाद्य लताङ्गनानां षडंघ्रिडिम्भाः स्तबकस्तनेषु ।
प्रत्यग्रपुष्पासवदुग्धपानं प्रपेदिरे विस्मृतलोलभावाः[1] ॥ २० ॥

अङ्गमिति । षडंघ्रिडिम्भाः=भ्रमरशिशवः; "पोतः पाकोऽर्भको डिम्भः" इत्यमरः । लतानाम्=वीरुतामेवाङ्गनानाम्=स्त्रीणाम्, स्तबकस्तनेषु=गुच्छ-स्तनेषु, अङ्गम्=स्वशरीरम्, समासाद्य=सम्प्रापयित्वा, विस्मृतः लोलभावः=चापल्यं यैस्ते तथाभूताः सन्तः, प्रत्यग्राणाम्=नूतनानाम्, पुष्पासवानाम्=मकरन्दानाम्, पुष्परसानामेव, दुग्धानाम्=स्तन्यानाम्, पानम्=आस्वादः, प्रपेदिरे=अकार्षुः । भ्रमरशिशवो भ्रमरजातेः, शैशवस्य च स्वभावसिद्धमपि चाञ्चल्यं परित्यज्य निश्चलाः सन्तो लतास्तबकेषु स्थितानि मधून्यपि-बन्नित्यर्थः ॥ २० ॥

भौंरों के छोटे छोटे बच्चे लतारूपी स्त्री के शरीर पर पहुंच कर वहाँ फूलों का रस, अपनी चञ्चलता छोडकर स्तब्धता के साथ, दूध की तरह पीने लगे ॥ २० ॥

अनेकसंग्रामविमर्दशीर्णां पुराणमौर्वीमपनीय मारः ।
कोदण्डयष्टेर्मकरन्दयष्टेरपूर्वमौर्वीमकरोद् द्विरेफैः ॥ २१ ॥

अनेकेत्यादि । मारः=कामदेवः; कोदण्डयष्टेः=स्वधनुषः, अनेकेषु=बहुषु; संग्रामेषु=युद्धेषु, विमर्देन=सङ्घर्षेण, शीर्णाम्=शिथिलाम्; पुराणमौर्वीम्=प्राचीनज्याम्; अपनीय=त्यक्त्वा; द्विरेफैः=भ्रमरैः; 'नीतायाः' इति शेषः । मकरन्दयष्टेः=पुष्परसयष्टेः=इक्षुदण्डरूपधनुलतायाः; अपूर्वाम्=अदृष्टपूर्वाम्, मौर्वीम्=ज्याम्; अकरोत्=विहितवान् ॥ २१ ॥

मार (कामदेव) ने अनेक संग्रामों में सङ्घर्ष के कारण जीर्ण हुई अपने धनुष की डोरी को हटाकर भौंरों द्वारा पीये जाते हुए पुष्परस से अपूर्व (नयी) डोरी बना ली ॥ २१ ॥

अनन्ययोनेरपदानगाथां मधोः सकाशादिव शिक्षयन्तः ।
शाखासु शाखासु महीरुहाणां शनैः शिशिञ्जुः कलकण्ठशावाः ॥२२॥

अनन्येत्यादि । अनन्ययोनेः=मदनस्य, अपदानगाथाम्=निर्वृत्तकर्मप्रति-पादकं पद्यम्, मधोः=वसन्तस्य, सकाशात्=समीपतः, शिक्षयन्तः=शिक्षां लभ-

1. लोकभावाः—पा०, वि०, क० ।

प० चू० म० : १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानाः, कलकण्ठशाबाः=कोकिलशिशवः, महीरुहाणाम्=वृक्षाणाम्, शाखासु शाखासु=प्रतिशाखम्, शनैः=मन्दम्; शिशिञ्जुः=दध्वनुः ॥ २२ ॥

वृक्षों की शाखा पर बैठे पक्षी अपने मधुर कलरव से मानों कामदेव की चरित्रयुक्त गाथाएँ गा रहे थे ॥ २२ ॥

उत्क्षिप्तशाखाच्छलबाहुदण्डाश्चूतद्रुमाः[1] शूर्पकशासनाज्ञाम् ।
कर्णाभिरामैः कलकण्ठनादैरुद्घोषयामासुरिवाध्वगानाम् ॥ २३ ॥

उत्क्षिप्तेत्यादि । उत्क्षिप्ताः=ऊर्ध्वं प्रसारिताः, शाखाः=विटपाः, इति छलम्=व्याजो येषां ते बाहुदण्डाः=भुजदण्डाः येषां ते; चूतद्रुमाः=आम्रवृक्षाः, शूर्पकशासनाज्ञाम्=मदनसन्देशम्, कर्णाभिरामैः=कर्णप्रियैः, श्रोत्रसुखकरैरित्यर्थः, कलकण्ठनादैः=पिकध्वनिभिः, अध्वानं नित्यं गच्छन्तीति अध्वगाः=पथिकास्तेषां कृते, उद्घोषयामासुः=उच्चैः शब्दैः प्रकटीचक्रुः ॥ २३ ॥

मञ्जरियों से लदे आमवृक्ष अपनी ऊँची शाखाओं पर बैठी कोयल की मधुर कूक से मानों नृपति कामदेव का शासनादेश ऊंचे शब्दघोष से विरही पान्थजनों को सुना रहे हों ॥ २३ ॥

विनेतुकामस्य विलासिनीनां मानद्विपेन्द्रं मकरध्वजस्य ।
हेमांकुशानामवहन्नभिख्यामग्रे नताः[2] प्रौढपलाशकोशाः ॥ २४ ॥

विनेतुकामस्येति । अग्रे=अग्रभागे, नताः=नम्राः, प्रौढाः=परिणताः, ये पलाशकोशाः=पलाशमुकुलानि, विलासिनीनाम्=मानिनीनाम्, मानः=ईर्ष्याकोप एव द्विपेन्द्रः=गजश्रेष्ठस्तम्, विनेतुकामस्य=नाशयितुकामस्य, मकरध्वजस्य=मीनकेतोर्मदनस्य, हेमांकुशानाम्=सुवर्णमयसृणीनाम्, "अंकुशोऽस्त्री सृणिर्द्वयोः" इत्यमरः । अभिख्याम्=शोभाम्; अवहन्=वहन्ति स्म ॥ २४ ॥

आगे की ओर झुके बड़े बड़े पलाश वृक्षों के फूलों से ऐसा ज्ञात हो रहा था मानो वे मानिनी स्त्रियों के मानमर्दन के लिये सुवर्णमय अंकुश का काम दे रहे हों ॥ २४ ॥

परिभ्रमत्षट्पदकर्बुराणां पंक्तिः पलाशद्रुममञ्जरीणाम् ।
देदीप्यमानस्य शिखावलस्य दीप्तिं ययौ दर्शितधूमराशेः ॥ २५ ॥

परिभ्रमदित्यादि । परितो भ्रमद्भिः, षट्पदैः=भ्रमरैः, कर्बुराणाम्=शबलानाम्, "शबलैताश्च कर्बुरे" इत्यमरः । पलाशद्रुममञ्जरीणाम्=किंशुकस्तवकानाम्, देदीप्यमानस्य=अतिशयेन ज्वलतः, दर्शितधूमराशेः=दर्शितधूमसमूहस्य, शिखावलस्य=वह्नेः, शिखा अस्यास्तीति शिखावलः, तस्य,

१. ०श्चलद्रुमाः—क० ।
२. अग्रेतनाः—पा०, म० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"दन्तशिखात् संज्ञायाम्" (पा० सू० ५.२,११३) इति वलच्प्रत्ययः । दीप्तिम्=कान्तिम्, ययौ=प्राप ॥ २५ ॥

पलाश वृक्ष की मञ्जरियाँ. जिनपर कि भौंरे मडरा रहे थे, ऐसी दिखायी दे रही थीं जैसे धूएँ मे लिपटी अग्निशिखा हो ॥ २५ ॥

आमोदलुब्धैरलिनां कदम्बैराकृष्यमाणः सुमनोगुलुच्छः ।
ग्रासीकृतो राहुमुखेन राकाकलानिधेर्बिम्ब इवाबभासे ॥ २६ ॥

आमोदेत्यादि । आमोदलुब्धैः=गन्धलोलुपैः, अलीनाम्=भ्रमराणाम्, "मधुलिण्मधुपालिनः" इति वैजयन्ती । कदम्बैः=वर्गैः, आकृष्यमाणः=आक्रम्यमाणः, सुमनोगुलुच्छः=पुष्पगुच्छः; राहोः–तमसः, मुखेन=आननेन, ग्रासीकृतः=कवलीकृतः, राकाकलानिधेः=पूर्णिमाचन्द्रस्य, बिम्बः=आकार इव, आबभासे=भासितवान् ॥ २६ ॥

पुष्परस के लोभी भ्रमरसमूह से घिरे हुए पुष्पगुच्छ ऐसे दिखायी दे रहे थे मानो पूर्णिमा के चन्द्रमा को राहु ग्रस रहा हो ॥ २६ ॥

तटीपटीरद्रुमसङ्गभाजां सरीसृपाणामिव साहचर्यात्[1] ।
वियोगिनश्चन्दनशैलजन्मा विमूर्च्छयामास मुहुः समीरः ॥ २७ ॥

तटीत्यादि । तटयाम्=मलयाचलसानौ स्थितानाम्, पटीरद्रुमाणाम्=चन्दनवृक्षाणाम्, सङ्गभाजाम्=संसर्गं प्राप्नुवताम्, सरीसृपाणाम्–सर्पाणाम्, "चक्री व्यालः सरीसृपः" इत्यमरः । साहचर्यात्–सङ्गात्, चन्दनशैलजन्मा=मलयाचलजातः, समीरः=वायुः, वियोगिनः=पत्नीविरहिणो जनान्, मुहुः=पुनः, विमूर्च्छयामास–सम्मोहयामास ॥ २७ ॥

उस वसन्तकाल में, मलयाचल के तटप्रदेश में स्थित चन्दनवृक्षों पर लिपटे सर्पों के श्वास से सम्पृक्त वायु द्वारा विरही पान्थजन मूर्च्छित से हुए जा रहे थे ॥

मधुशीकरदुर्दिनान्धकारे वनलक्ष्मीरतिदूतिकोपितानाम् ।
भ्रमरीमभिसत्वरीं प्रमत्तः सचमत्कारमरीरमद् द्विरेफः ॥ २८ ॥

मध्वित्यादि । प्रमत्तः–मत्तः, द्विरेफः=भ्रमरः, मधुशीकराणाम्=मधुकणानाम्, दुर्दिनान्धकारे=वर्षान्धकारे, वनलक्ष्मीरेव रतिदूतिका=चेटी, तया उपनीताम्=समीपं प्रापिताम्, अभिसृत्वरीम्=अभिसरणशीलाम्, भ्रमरीम्; सचमत्कारम्=हेलया सहितम्, अरीरमत्=रमयति स्म । अत्र **वैतालीयम्** वृत्तम् ॥

मधुकणों की वर्षा होते समय, वनलक्ष्मी की दूती द्वारा समीप पहुँचायी गयी भ्रमरी नायिका से रमण करते हुए भ्रमर ने लोगों को चमत्कृत कर दिया ॥ २८ ॥

१. साहचर्यम्—पा०, क० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वकुलद्रुमवाटिका वरस्त्रीमुखगण्डूषमधुद्रवाभिषेकम् ।
अनुभूय नवांकुरापदेशादवहन्नञ्चितरोमहर्षशोभाम् ।। २९ ।।

वकुलेत्यादि । वकुलद्रुमवाटिकाः=केसरद्रुमपंक्तयः, वरस्त्रीणाम्=उत्तम-नारीणाम, मुखस्य=आननस्य यः गण्डूषमधुद्रवः=मुखपूरितमधुद्रवः, तेन अभिषेकम्=अभिषेचनम्, अनुभूय=स्वीकृत्य, नवांकुरापदेशात्=नवांकुरव्याजात्, अञ्चिताम्=प्राप्ताम्, रोमहर्षस्य=पुलकस्य, शोभाम्=द्युतिम्, अवहन्=वहन्ति स्म ।। २६ ।।

केसरवृक्षों के समूह पर नये खिले फूलों से ऐसा लग रहा था जैसे किसी नायिका के मुख से निःसृत गण्डूष से भीग जाने के कारण रोमाञ्चित हो आया हो ।। २९ ।।

सहकारवनीषु सञ्चरन्त्या मधुलक्ष्म्या इव नूपुरप्रणादाः ।
कलकण्ठभुवः कलप्रलापाः श्रवसः पारणमादधुर्जनानाम् ।। ३० ।।

सहकारेत्यादि । सहकारवनीषु=आम्राटवीषु, सञ्चरन्त्याः=सञ्चरण-शीलायाः, मधुलक्ष्म्याः=वसन्तलक्ष्म्याः, नूपुरप्रणादाः=मञ्जीरध्वनय इव, "मञ्जीरो नूपुरोऽस्त्रियाम्" इत्यमरः । कलकण्ठभुवः=पिकजाः, कलप्रलापाः=अव्यक्तमधुरालापाः, जनानाम्=लोकानाम्, श्रवसः=श्रोत्रस्य, "श्रुतिः स्त्री श्रवणं श्रवः" इत्यमरः । पारणम्=उपोषितभोजनम्, तृप्तिमिति यावत्, आदधुः=आदधति स्म ।। ३० ।।

उस समय, आम्र के वनों में मोदपूर्वक भ्रमण करती हुई मधुलक्ष्मी की नुपूर ध्वनि एवं कोयल की कूक राह चलते पथिकजनों के कानों को मधुर भोजन सा परोसती हुई तृप्त कर रही थी ।। ३० ।।

अङ्गनावदनपद्मपूरणीमादरेण परिपीय वारुणीम् ।
उद्ववाम पुनरेव केसरः स्यन्दमानमकरन्दकैतवात् ।। ३१ ।।

अङ्गनेत्यादि । केसरः=वकुलवृक्षः; अङ्गनानाम्=स्त्रीणाम्, वदनपद्मा-नाम्=मुखकमलानाम्, पूरणीम्=पूरयित्रीम्, गण्डूषरूपामित्यर्थः; वारुणीम्=मद्यम्; आदरेण=ससम्मानम्, परिपीय=पीत्वा; पुनः=भूयः; स्पन्दमानस्य=स्रवतः, मकरन्दस्य=पुष्परसस्य, व्याजात्=छलेन; उद्ववाम=उदगिरत् । अत्र गाथायां रथोद्धता वृत्तम्; "रात् परैर्न-र-ल-गैः रथोद्धता" इति लक्षणात् ।।

केसर की खिली क्यारियों को देखने से ऐसा लग रहा था मानो किसी मृगनयना के मुखकमल में भरी वारुणी (मदिरा) पुनः बाहर फेंक दी गयी हो ।। ३१ ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिमललहरीषु पादपानां भरितसमस्तदिगन्तरापगासु[1]।
जलविहरणमाचचार दीर्घं मलयमहीधरमन्दगन्धवाहः ॥ ३२ ॥

परिमलेत्यादि । मलयमहीधरस्य=मलयपर्वतस्य, मन्दगन्धवाहः=मन्दवातः; भरिताः=पूरिताः, समस्तानाम्=सकलानां दिशामन्तराण्येव आपगाः=नद्यो याभिस्ताः=समस्तदिगन्तव्यापिनीषु नदीषु; परिमललहरीषु=गन्धप्रवाहेषु; दीर्घम्=अतिशयेन; जलविहरणम्=जलविहारम्; आचचार=आचरितवान् । **पुष्पिताग्रा** वृत्तमेतत्; "अयुजि नयुगरेफतो यकारो युजि च न-जौ ज-र-गाश्च पुष्पिताग्रा" इति लक्षणात् ॥ ३२ ॥

उस समय ऐसा लग रहा था मानो मलय पर्वत से उठी मन्द वायु वृक्षों की परिमललहरी से पूर्ण समस्त दिशा रूप नदियों में जलविहार कर रही हों ॥ ३२ ॥

मनोभवो[2] मण्डलितास्त्रमौर्विकागभीरविष्फारविरावितावम्बरम् ।
अशेषसांसारिकशेमुषीमुषो ववर्ष चूतांकुरशातसायकान् ॥ ३३ ॥

मनोभव इति । मनोभवः=मदनः; मण्डलितम्=मण्डलीकृतम्, यदस्त्रम्=धनुः, तस्य मौर्विकायाः=ज्यायाः; गभीरेण; विष्फारेण=टङ्कारेण, "विष्फारो धनुषां स्वानः" इत्यमरः। विरावितम्=मुखरितम्, अम्बरम्=गगनं यस्मिन् कर्मणि तदिति क्रियाविशेषणम्; अशेषाणाम्=निखिलानाम्; सांसारिकाणाम्=संसारबद्धानाम्; शेमुषीमुषः=बुद्ध्यपहारकान्, भ्रामकानिति यावत् । चूतांकुराः=चूतकलिका एव, शाताः=तीक्ष्णाः, सायकाः=बाणाः, तान्, ववर्ष=अवर्षत् ॥ ३३ ॥

अपने धनुष की कान तक खींची गयी डोर की गम्भीर ध्वनि से समस्त गगनतल को प्रतिध्वनित करता हुआ मकरध्वज आम्रवृक्ष की मञ्जरी रूप बाणों से समस्त सांसारिक जनों की बुद्धि को डाँवाडोल कर रहा था ॥ ३३ ॥

कुमारस्योद्यानविहारः

इति प्रवृत्ते मधुमासवैभवे विधातुमुद्यानविहारमुत्सुकः ।
रथं समारुह्य नरेन्द्रनन्दनः[3] सहावरोधेन विनिर्जगाम सः ॥ ३४ ॥

इतीति । इति=एवम्, मधुमासस्य=वसन्तस्य, वैभवे=माहात्म्ये, "मधुश्चैत्रर्तुदैत्येषु" इति हेमचन्द्रः । प्रवृत्ते=समागते सति; उद्यानविहारम्=उपवनविहारम्, विधातुम्=कर्तुम्; उत्सुकः=उत्कण्ठितः; स नरेन्द्रनन्दनः=राजसूनुः सिद्धार्थः; अवरोधेन=अन्तःपुरेण सह; "शुद्धान्तश्चावरोधश्च" इत्यमरः। रथम्=स्यन्दनम्, समारुह्य=आरोहणं कृत्वा; तस्मात्=वसन्तर्तुप्रासादात्, निर्जगाम=बहिर्गतवान् ॥ ३४ ॥

१. ०न्तरासु गाढम्—म० ।
२. मनोभुवो—क०, म०, पा० ।
३. च राजनन्दनः—पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इस तरह से राजकुमार सिद्धार्थ अपनी पत्नी के सम्मुख वसन्तकाल का माहात्म्य वर्णन कर, उद्यानविहार के प्रति उत्सुकता दिखाते हुए अपने अन्तःपुर के परिजनों सहित रथ में वैठकर, उस वसन्त प्रासाद से वापस लौट चले ॥ ३४ ॥

वृद्धातुरमृतानां दर्शनम्

ततः कुमारस्य पुरन्दरश्रियः प्रबोधकालोऽयमिति प्रबोधितुम्[1]।
क्रमेण वृद्धातुरलुप्तजीवितान्[2] प्रदर्शयामासुरमुष्य देवताः ॥ ३५ ॥

तत इति। ततः=तदन्तरम्, पुरन्दरश्रियः=इन्द्रसमतेजसः; कुमारस्य=सिद्धार्थस्य; "अयम्=एषः; प्रबोधस्य=जागरणस्य (ज्ञानाविर्भावस्य), कालः=समयः"—इति प्रबोधितुम्=निवेदितुम्, देवताः=देवाः; अमुष्य=सिद्धार्थस्य कृते, क्रमेण=क्रमशः; काँश्चित् वृद्धः=जराजीर्णः, आतुरः=रोगी; लुप्तजीवितः=मृतश्चेति तान् पुरुषान्, दर्शयामासुः=प्रदर्शितवन्तः। एतान् दृष्ट्वा जरा-रोगाक्रान्तानि शरीराणि अनित्यानि चेति बुध्यतामिति तान् दर्शयामासुरित्यर्थः ॥

"इस इन्द्र के समान शोभावाले राजकुमार को अब तत्त्वज्ञान की ओर प्रवृत्त कराने का समय आ गया है"—यह सोचकर देवताओं ने उसके मार्ग में वृद्ध, रोगी एवं मृत-इस तरह तीन पुरुष दिखाये ॥ ३५ ॥

क्रमेण पश्यन् पुरतः स्थितानमून्, नितान्तमुद्विग्नमनाः नृपात्मजः।
किमेतदित्याहितविभ्रमः स्वयं[3] पुरोगतान् पर्यनुयुंक्त सारथीन् ॥ ३६ ॥

क्रमेणेति। नृपात्मजः=राजपुत्रः सिद्धार्थः, अमून्=एतान्, पुरतः=अग्रे, स्थितान्=उपस्थितान्, वृद्धातुरमृतान् पुरुषान्, क्रमेण=क्रमशः, पश्यन्=अवलोकयन्, नितान्तम्=भृशम्, उद्विग्नमनाः=निर्विण्णचेताः सन्, "एतत्=इदम्, किम् ?" इति=एवम्, आहितविभ्रमः=धृतसन्देहश्च, पुरोगतान्=पुरः स्थितान्, सारथीन्=सूतान्, पर्यनुयुङ्क्त=पर्यपृच्छत्। आगमशास्त्रस्यानित्यत्वात् अडागमाभावः ॥ ३६ ॥

राजकुमार ने भी उन तीनों पहले न देखे पुरुषों को देखकर, अत्यन्त उद्विग्न होते हुए, सम्मुख उपस्थित सारथियों से पूछा कि ये कौन है ? ॥ ३६ ॥

सविस्तरं तेऽपि सुरैरधिष्ठिता नरेन्द्रपुत्रस्य विरक्तिकारणम्।
क्रमेण तेषामतिमात्रदुःसहं जराविकारादिकमाचचक्षिरे ॥ ३७ ॥

सविस्तरमिति। ते=सूता अपि, सुरैः=देवैः, सविस्तरम्=सप्रपञ्चम्, अधिष्ठिताः=आविष्टाः; नरेन्द्रपुत्रस्य=राजसूनोः; विरक्तिकारणम्=वैराग्य-

१. प्रवेदितुम्—पा०, क०।
२. ०लुब्धजीवितान्—क०।
३. स्त्वयं—क० वि०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेतुकम्, तेषाम्=वृद्धातुरमृतानां पुरुषाणाम्, अतिमात्रदुःसहम्=अतिदुःसहम्, जराविकारादिकम्=जरा=वार्धकम्, विकारः=रोगः—एतौ आदी यस्य तत् "विकारो विकृतौ रुजि" इति मेदिनी। क्रमेण=क्रमशः, आचचक्षिरे=कथयामासुः ॥ ३७ ॥

देवगणों से आविष्ट उन सारथियों ने उक्त तीनों वृद्ध, रोगी एवं मृत पुरुषों के विषय में विस्तार से बता कर कहा कि श्रीमन् ! यह शरीर विनाशी है, अतः प्रत्येक पुरुष को बुढ़ापा, रोग एवं मृत्यु—इन तीनों का अवश्य सामना करना पड़ता है ॥

निशम्य तेषां वचनं नृपात्मजो निकामनिर्वेदविभाविताशयः।
नियन्त्रितोद्यानविहारकौतुको निवर्तयाश्वानिति सूतमब्रवीत् ॥३८॥

निशम्येति। तेषाम्=सारथीनाम्; वचनम्=पूर्वोक्तम्, निशम्य=श्रुत्वा; निकामम्=भृशम्, निर्वेदेन=विरक्त्या, विभावितः=संस्कृतः, आशयः=अभिसन्धिर्यस्य सः; नियन्त्रितम्=प्रतिबद्धम्, उद्यानविहारे=उपवनबिहारे, कौतुकम्=विस्मयो यस्य सः; नृपात्मजः=राजपुत्रः सिद्धार्थः; "अश्वान्=हयान्; निवर्तय=प्रत्यागमय" इति=इत्थम्; अब्रवीत्=अकथयत् ॥ ३८ ॥

सारथियों के ये वचन सुनकर राजकुमार सिद्धार्थ का चित्त अपने शरीर के प्रति ग्लानि से भर उठा, और उसे इस संसार के प्रति वैराग्य होने लगा। तब उसने आगे उद्यानविहार की बात छोड़कर सारथियों को अपना रथ वापस प्रासाद की तरफ लौटाने का आदेश दिया ॥ ३८ ॥

तपस्विदर्शनम्

अनन्तरं तस्य पुरः सुराधिपैरदर्शि शान्तानुशयस्तपोधनः।
विवृद्धकारुण्यसमुद्रवीचिकाविटङ्कविश्रान्तविशाललोचनः ॥ ३९ ॥

अनन्तरमिति। अनन्तरम्=अश्वनिवर्तननिर्देशानन्तरम्; तस्य=कुमारस्य; पुरः=अग्रे; सुराधिपैः=देवश्रेष्ठैः; शान्तानुशयः=प्रशान्तद्वेषः; "भवेदनुशयो द्वेषे पश्चात्तापानुबन्धयोः" इति विश्वः। कश्चित् तपोधनः=तपस्वी संन्यासीति यावत्; अदर्शि=अदर्श्यत। कीदृशः स तपोधनः? इत्याह—विवृद्धायाः=वृद्धिङ्गतायाः, कारुण्यसमुद्रस्य=करुणाब्धेः, वीचिकायाः=तरङ्गस्य; विटङ्के=कपोतपालिकायाम्, "कपोतपालिकायां तु विटङ्कं पुंनपुंसकम्" इत्यमरः। विश्रान्ते=व्याप्ते, विशाले=आयते, लोचने=नेत्रे यस्य सः; करुणापरिपूर्ण इत्यर्थः ॥ ३९ ॥

वापस प्रासाद की तरफ लौटते समय, देवताओं ने अपनी माया के प्रभाव से एक शान्तवृत्ति वाले तपस्वी, करुणामय चित्तवाले, विशालनेत्र, संसार से विरक्त पुरुष को उस राजकुमार के सामने खड़ा कर दिया ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतप्तचामीकरगौरविग्रहः प्रवालभङ्गारुणचारुचीवरः ।
प्रसन्नपूर्णेन्दुनिभाननद्युतिः प्रभूतमैत्रीपरिवाहिताशयः ॥ ४० ॥

तमेव तपोधनं स्तौति कविः-प्रतप्तेत्यादिना । प्रतप्तम्=द्रुतम्, यच्चामीकरम्=सुवर्णम्, तद्वत् गौरः=पीतलोहितः; विग्रहः=देहो यस्य सः। "पीतो गौरो हरिद्राभः"; "शरीरं वर्ष्म विग्रहः" इति चामरः । प्रवालभङ्गः= विद्रुमखण्ड इव अरुणम्-काषायम्, चारु=मनोहरम्, चीवरम्=वल्कलं यस्य सः। प्रसन्नस्य, पूर्णस्य च इन्दोः=चन्द्रस्य सदृशी, आननद्युतिः=मुखकान्तिर्यस्य सः। प्रभूतया=अधिकया, मैत्र्या=मैत्रीभावेन, स्नेहेनेत्यर्थः; परिवाहितः=तरङ्गितः, आशयः=चित्तवृत्तिर्यस्य सः। गौरशरीरः, काषायवस्त्रधरः, प्रसन्नमुखः, लोकं प्रति स्नेहसिक्तश्च स तपोवन आसीदिति भावः ॥

जिसका शरीर सुवर्ण की तरह गौर (पीतलोहित) वर्ण वाला, एवं शरीर पर पहने हुए वस्त्र काषाय रंग के थे और उसकी मुखाकृति पूर्णचन्द्रमा की प्रसन्न कान्ति से दीप्तियुक्त थी तथा चित्त मैत्रीभाव से परिपूर्ण था ॥ ४० ॥

तमेनमालोक्य च शाक्यनन्दनस्तपस्विनामग्रसरं सविस्मयः ।
क एष[1] का वाऽस्य चरित्रचातुरीत्यपृच्छदभ्याशजुषः स्वसारथीन् ॥ ४१ ॥

तमेवमिति । सविस्मयः-विस्मयमापन्नः; शाक्यनन्दनः=शाक्यराजपुत्रः, तमेनम्=इमम्; तपस्विनाम्-तपोधनानाम्, अग्रसरम्=श्रेष्ठम्, आलोक्य=दृष्ट्वा, अभ्याशम्=समीपम्; जुषन्ते=भजन्तीति तान्, स्वसारथीन्=स्वसूतान् प्रति; "एषः=अयम्, कः ?, अस्य का वा चरित्रचातुरी=चरित्रातिशयः ! इति= इत्थम्, अपृच्छत्=पृष्टवान् ॥ ४१ ॥

शाक्यकुमार सिद्धार्थ इस संन्यासी पुरुष को आश्चर्यमयी दृष्टि से देखकर उसके विषय में अपने सारथियों से पूछने लगे कि यह कौन है ! और इसके चरित्र का वैशिष्ट्य क्या है ! ॥ ४१ ॥

अयं महाभाग । विशुद्धमानसः पवित्रशीलः परमार्थदेशिकः ।
सवासनोन्मूलितसर्वकिल्विषस्तपोधनः[2] कश्चिदपश्चिमः सताम् ॥ ४२ ॥

अयमिति । हे महाभाग=हे महात्मन् ! अयम्=पुरोवर्ती, विशुद्धम्=रागद्वेषादिशून्यम्, मानसम्=चित्तं यस्य सः; पवित्रशीलः=पूतस्वभावः; "शीलं स्वभावे सद्वृत्ते" इत्यमरः। परमार्थस्य=तत्त्वस्य, देशिकः=उपदेष्टा, सवा-

१. एव—म० ।
२. ०नोन्मीलित०—पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सनम्=संस्कारसहितं यथा स्यात् तथा, उन्मूलितानि, सर्वाणि=सकलानि, किल्विषाणि=पापानि येन सः, "पापं किल्विषकल्मषम्" इत्यमरः। तपोधनः=तपस्वी, सताम्=सज्जनानाम्, अपश्चिमः=अचरमः, प्रधान इत्यर्थः। अस्तीति शेषः ॥ ४२ ॥

सारथियों ने उत्तर दिया—"महाभाग ! इस पुरुष का चित्त रागद्वेषादि से रहित होने के कारण विशुद्ध है, यह आचरण से पवित्र है, जगत् को परमार्थ तत्त्व का उपदेश करता है, इसने सांसारिक तृष्णा से दूर रह कर अपने को कायिक वाचिक मानसिक पापों से रहित कर लिया है, अतएव यह सज्जनों में भी श्रेष्ठ कहा जाता है ॥ ४२ ।

अमुष्य यः शासनमाश्रितो[1] जनो जराविकारादितरङ्गभङ्गुरम् ।
क्रमेण निस्तीर्य स जन्मसागरं प्रयाति निर्वाणपदं निरुत्तरम् ॥ ४३ ॥

अमुष्येति । यो जनः=जिज्ञासुः; एतस्य, जरा=जीर्णता, विकारः=रोगः आदिस्त एव तरङ्गाः वीचयो यस्मिन् तादृशं भङ्गुरं नश्वरं च, इति शासनम्=उपदेशम्, आश्रितः=सेवितः; सः=जिज्ञासुः, जन्मसागरम्=भवाम्बुधिम्; क्रमेण=क्रमशः, निस्तीर्य=तीर्त्वा, निरुत्तरम्=अनुत्तरम्, श्रेष्ठमिति यावत्; निर्वाणपदम्=कैवल्यस्थानम्; प्रयाति=गच्छति ॥ ४३ ॥

इसके उपदेशों का जिस मनुष्य ने अक्षरशः पालन किया वह जरा-मरण, रोग आदि विनाशकारी बातों से छुटकारा पा कर, संसारसागर को पार कर लोक में अद्वितीय निर्वाण (मोक्ष) पद प्राप्त कर लेता है ॥ ४३ ॥

इति प्रवीराः क्षितिपालनन्दनप्रबोधनार्थं विबुधानुभावतः ।
वितेनिरे वाङ्मनसाऽतिगोचरं[2] तपोनिधेस्तस्य चरित्रवर्णनम् ॥४४॥

इतीति । इति=एवम्, प्रवीराः=सारथिनः; विबुधानुभावतः=देवतामाहात्म्येन, क्षितिपालनन्दनस्य=राजसूनोः प्रबोधनार्थम्=ज्ञानाविर्भावार्थम्, वाक् च मनश्च वाङ्मनसे, गोचरमतिक्रान्तम्=अतिगोचरम्; वाचा वक्तुं मनसा च स्मर्तुं चाशक्यमिति भावः, तस्य=तपोनिधेः=तपस्विनः, चरित्रवर्णनम्, वितेनिरे=विस्तरेण कथितवन्तः ॥ ४४ ॥

इस प्रकार उन सारथियों ने राजकुमार के सम्मुख अपने में प्रविष्ट देवताओं के प्रभाव से वाणी और मन द्वारा अवर्णनीय व अस्मरणीय उस तपस्वी का चरित्र-चित्रण किया ॥ ४४ ॥

१. ०माद्दृतो—पा०; माहृता—वि० ।
२. तिगोचारं—पा०; मनसो त्रिगोचरं—म०; मनसोऽतिगोचरं—वि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्थं श्रुत्वा सारथीनां वचस्तल्लब्धोपायः संसृतेर्निष्क्रमाय ।
सन्तुष्टान्तर्मानसो राजसूनुर्भूयोऽप्यैच्छत् कर्तुमुद्यानलीलाम् ॥४५॥

इति बुद्धघोषविरचिते पद्यचूडामणिनाम्नि महाकाव्ये षष्ठः सर्गः ॥

इत्थमिति । इत्थम्=अनेन प्रकारेण, सारथीनाम्=सूतानाम्; तत्=ऋषिचरित्रवर्णनरूपम्; वचः=वचनम्, श्रुत्वा=आकर्ण्य; संसृतेः=संसारात्, निष्क्रमाय=निष्क्रमणाय, प्रव्रजनायेत्यर्थः; सन्तुष्टम्=सन्तोषमाप्तम्; अन्तर्मानसम्=अन्तःकरणं यस्य सः, राजसूनुः=राजपुत्रः, उद्यानलीलाम्=उपवनविहारं कर्तुम्; भूयोऽपि=पुनरपि, ऐच्छत्=इच्छाञ्चकार ॥ ४५ ॥

इति पद्यचूडामणिमहाकाव्यस्य कीर्त्तिव्याख्यायां षष्ठः सर्गः ॥

यों, राजकुमार ने सारथियों की उक्त बातें सुनकर संसार से छुटकारा-पाने का उपाय जान लिया सा मान कर सन्तुष्टचित्त हो, पुनः उद्यानविहार के लिये मन बनाया ॥ ४५ ॥

पद्यचूडामणि महाकाव्य के षष्ठ सर्ग का भाषान्तर पूर्ण ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तमः सर्गः

सिद्धार्थस्योद्यानप्रवेशः

प्रचोदिताश्वः पुनरेव सूतैः प्रतोदहस्तैर्नरलोकवीरः[1] ।
आखण्डलोद्यानमनोऽभिराममारामत्यद्भुतमाविवेश ॥ १ ॥

अथ युग्मकेनोद्यानप्रवेशमाह कविः—**प्रचोदिते**त्यादिना । नरलोकेषु=नरसमूहेषु, वीरः=श्रेष्ठः, (सिद्धार्थः); प्रतोदाः=तोत्राणि, हस्तेषु=करेषु येषां तैः; "प्रतोदः प्राजनं तोत्रम्" इति वैजयन्ती । सूतैः=सारथिभिः; प्रचोदिताः=प्रेरिताः, अश्वाः=हया यस्य सः; आखण्डलस्य=इन्द्रस्य; उद्यानम्=नन्दनमिव, मनोऽभिरामम्=चारु, अत्यद्भुतम्=अतिविस्मयकरम्; आरामम्=उपवनम्; आससाद=प्राप । **उपजातिर्वृत्तम्** ॥ १ ॥

तब वह सबसे श्रेष्ठ वीर राजकुमार चाबुक हाथ में लिये सारथियों द्वारा हाँके गये अश्वों से इन्द्रवन (नन्दनवन) के समान मनोरम अपने उद्यान में पहुँचा ॥

विद्यागृहं पञ्चमपाठकानां विकल्पतूणीरमनन्ययोनेः ।
गञ्जागृहं षट्पदकामिनीनां क्रीडागृहं किञ्च वसन्तलक्ष्म्याः ॥ २ ॥

विद्यागृहमिति । तद् उद्यानम्, पञ्चमपाठकानाम्=पञ्चमस्वराध्येतृणाम् पिकानाम्, विद्यागृहम्=विद्याशाला; अनन्ययोनेः=मदनस्य; विकल्पतूणीरम्=पर्यायशरधिम्; मदनसायकपुष्पाशयत्वात् तन्निषङ्गत्वेनोल्लेखः । षट्पदाः=भ्रमराः, तेषां कामिनीनाम्=भृङ्गीणाम्, गञ्जागृहम्=मदिरालयः, "गञ्जा तु मदिरागृहम्" इत्यमरः । किञ्च, वसन्तलक्ष्म्याः=वसन्तर्तुशोभायाः, क्रीडागृहमिव=क्रीडागार इव, आसीदिति शेषः । अत्रोल्लेखालङ्कारः;

"बहुभिर्बहुधोल्लेखादेकस्योल्लेख इष्यते ।
एकेन बहुधोल्लेखेऽप्यसौ विषयभेदतः ॥" इति लक्षणात् ॥ २ ॥

वह उद्यान ऐसा लग रहा था मानो वह पञ्चम स्वर में कुहकने वाली कोयल की विद्याशाला हो; मदन का बाण रखने के लिये दूसरा वैकल्पिक स्थान हो, या भ्रमरों की कामिनियों के लिये बनाया मदिरालय हो, अथवा वसन्तलक्ष्मी का क्रीडागृह हो ॥ २ ॥

चराचराणामभिवन्दनीयमागन्तुमुद्यानमहीरुहस्तम् ।
मरुद्वशादानमितैः शिरोभिर्बद्धप्रबालाञ्जलयः प्रणेमुः ॥ ३ ॥

---

१. ०वीर्यः–म०, पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चराचराणामिति । उद्यानमहीरुहः=उद्यानस्था वृक्षाः, चराचराणाम्=जङ्गम-स्थावराणाम्, अभिवन्दनीयम्=अभिप्रणमनीयम्, तम्=राजकुमारम्, आगन्तुम्=अतिथिम्, मरुद्वशात्, वायुप्रेरणात्, आनमितैः=प्रणतैः, शिरोभिः=शाखाग्रभागैः, बद्धाः=संयताः, प्रवालाः=किसलया एवाञ्जलयः-करपुटाः यैस्ते, सन्तः, प्रणेमुः=प्रणतिं चक्रुः ।। ३ ।।

जङ्गम एवं स्थावर सभी के लिये अभिनन्दनीय वहाँ आनेवाले उस अतिथि राजकुमार को वायु के चलने से झुके हुए, प्रवालनिर्मित थालों में बन्धे हुए वहाँ खड़े आम्रवृक्षों ने अपने शाखाग्र भाग रूपी बन्धे हाथों से प्रणाम किया ।। ३ ।।

परागसम्पत्सिकतावकीर्णे[1] पर्युक्षिते[2] पुष्परसैः पतद्भिः ।
कृतोपहारे गलितैः प्रसूनैरुद्यानमध्ये विजहार वीरः ।। ४ ।।

परागेत्यादि । स वीरः=बली राजकुमारः, परागाणाम्=रजसाम्, सम्पद्भिः=समृद्धिभिरेव सिकताभिः-बालुकाभिः, अवकीर्णे=व्याप्ते, पतद्भिः=पतनं प्राप्नुवद्भिः, पुष्परसैः-मकरन्दैः, पर्युक्षिते=सिक्ते, गलितैः-शाखाच्युतैः, प्रसूनैः=पुष्पैः; कृतोपहारे=दत्ताभृते सति, उद्यानमध्ये-उद्याने, विजहार=विहृतवान् । महात्मनस्तस्य आरामप्रवेशे प्रयत्नमन्तरेणैव राजोपचारः समभूदिति भावः ।। ४ ।।

तब वहाँ वह वीर परागरूप सम्पत्तिसमृद्धिसम्पन्न बालु से व्याप्त गिरते पुष्परस (मकरन्द) से सींचे गये एवं उपहार में दिये गये पृथ्वी पर गिरते हुए फूलों से विहार करने लगा ।। ४ ।।

उद्यानभूमिसौन्दर्यम्

लताङ्गहारैर्ललितालिगीतैर्वनप्रियामञ्जुरवैश्च वाद्यैः ।
आरामभूमिं स विलोक्य मेने सङ्गीतशालामिव शम्बरारेः ।। ५ ।।

लतेत्यादि । सः-सिद्धार्थः, आरामभूमिम्=उद्यानभूमिम्, विलोक्य=दृष्ट्वा, लतानाम्-वल्लरीणाम्, अङ्गहारैः=वाह्याङ्गभूताङ्गविक्षेपैः, "अङ्गहारोऽङ्गविक्षेपः" इत्यमरः । ललितैः-मनोज्ञैः, अलीनाम्=भृङ्गाणाम्, गीतैः=गायनैः, वनप्रियाणाम्=कोकिलानाम्, मञ्जुरवैः-मञ्जुलध्वनिभिः, "वनप्रियाः परभृतः कोकिलः" इत्यमरः । वाद्यैः=वाद्यघोषैः, शम्बरारेः=मनसिजस्य (मदनस्य), "शम्बरारिर्मनसिजः" इत्यमरः । सङ्गीतशालाम्=सङ्गीतगृहम्, इव, मेने=कल्पितवान् ।। ५ ।।

---

१. विकीर्णे-म० ।
२. पर्युक्षिते--म० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वह राजकुमार लतारूपी अङ्गहार, एवं कोयल के मधुर स्वर रूपी वाद्यध्वनि से गूँजते हुए उस उद्यान को देखकर ऐसा समझने लगा कि मानो वह साधारण उद्यान नहीं, अपितु कामदेव की कोई सङ्गीतशाला है ॥ ५ ॥

तरुप्रसूनान्यपचेतुकामा[१] वामालका मन्दपदं चरन्त्यः ।
कुमारसेवार्थमुपस्थितानां[२] शङ्कां वितेनुस्तरुदेवतानाम् ॥ ६ ॥

तरुप्रसूनानीति । तरूणाम्=वृक्षाणाम्, प्रसूनानि=पुष्पाणि, अपचेतुकामाः=अपचेतुमिच्छन्तः, वामालकाः=कुटिलकुन्तलाः सुन्दर्यः, मन्दानि=मन्थराणि, पदानि=पदविन्यासा यस्मिन् कर्मणि तत्, चरन्त्यः=कुर्वन्त्यो बालाः; कुमारस्य=सिद्धार्थस्य; सेवार्थम्=उपचारार्थम्, उपस्थितानाम्=सम्मुखमागतानाम्; तरुदेवतानाम्=वृक्षाधिष्ठातृदेवतानाम्; शङ्काम्=सन्देहम्; वितेनुः=विस्तारयामासुः ॥ ६ ॥

वहाँ घुँघराले बालों वाली चपल कन्याएँ धीरे धीरे इधर उधर विचरण कर फूल चुगती हुई ऐसी लग रही थी मानो वे कोई साक्षात् वृक्षदेवता हों ॥ ६ ॥

आलापमारामविहारिणीनामाकर्णयन्तो हरिणेक्षणानाम् ।
विलज्जमाना इव बद्धमौनास्तस्थुः क्षणं तत्र वसन्तघोषाः ॥ ७ ॥

आलापमिति । तत्र उदयाने, आरामविहारिणीनाम्=उदयाने क्रीडन्तीनाम्; हरिणेक्षणानाम्=मृगीदृशाम्; आलापम्=सँल्लापम्, आकर्णयन्तः=शृण्वन्तः; विलज्जामानाः=लज्जापन्ना इव, बद्धमौनाः=वाचंयमाः; वसन्ते घोषो येषां ते वसन्तघोषाः=पिका; क्षणम्=मुहूर्तम्, तस्थुः=स्थितिं चक्रुः ॥ ७ ॥

उस उद्यान में विहार करती मृगनयना बालाओं का परस्पर संलाप सुनकर वसन्तघोष (कोयल) की मधुर कूक भी कुछ देर के लिये फीकी पड़ गयी ॥ ७ ॥

मञ्जीरनादच्छलतो ममार्तिं न सुभ्रु ! कुर्या[३] इति नाथतेव ।
पदेन[४] पङ्केरुहकोमलेन पस्पर्श काचिच्छनकैरशोकम् ॥ ८ ॥

मञ्जीरेत्यादि । शोभने भ्रुवौ यस्यास्तस्यास्तत्सम्बुद्धौ हे सुभ्रु ! "ऊकारादप्यूङ्प्रवृत्तेः" इति वामनवचनात् भ्रूशब्दादूङ्, नदयन्तो ह्रस्वः । "मञ्जीरनादच्छलतः=नूपुरध्वनिव्याजेन; मम=मे; आर्तिम्=पीडाम्, न कुर्याः=विदध्याः" इति=इत्थम्; नाथता=प्रार्थयता; "आशिषि नाथः" (पा० सू० २. ३. ५५) इति नाथतेराशिष्येवात्मनेपदनियमादात्मनेपदा-

१. ०प्रसूतान्यप०—वि० ।
२. ०मुपागतानां—पाठा० ।
३. कुर्यादिति—म० पा० ।
४. पादेन—म० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावः। काचित्=सुन्दरी; पङ्केरुहकोमलेन=सरोजवन्मृदुना; पदेन=चरणेन; अशोकम्=एतन्नामकं वृक्षम्; शनकैः=शनैः; पस्पर्श=स्पृष्टवती। अन्यथा तत्कृतार्तिप्रार्थनावैयर्थ्यादिति भावः॥ ८॥

वहाँ किसी तरुणी ने—"हे सुभ्रु ! अपने नुपूरों की ध्वनि के व्याज से मेरी पीड़ा और अधिक न बढ़ाओ"—ऐसी प्रार्थना करते हुए अशोक वृक्ष को अपने कमलवत् कोमल चरण द्वारा बहुत धीरे से स्पर्श किया ॥ ८ ॥

अशोकयष्टिस्तरुणीजनस्य पादाम्बुजस्पर्शमिवासहिष्णुः।
नवप्रवालप्रसवापदेशात् कोपानलज्वालमिवोत्ससर्ज ॥ ९ ॥

अशोकेत्यादि। अशोकयष्टिः=अशोकलता, तरुणीजनस्य=युवतिजनस्य; पादाम्बुजस्पर्शम्=चरणकमलस्पर्शम्, असहिष्णुः=असहनशीलेव, नवप्रवालानाम्, नूतनपल्लवानाम्, प्रसवस्य=उत्पत्तेः, अपदेशात्=व्याजात्; कोपानलस्य=क्रोधाग्नेः, ज्वालाम्=शिखाम्, "वह्नेर्द्वयोर्ज्वालकीलौ" इत्यमरः। इवेति साद‍ृश्ये, उत्ससर्ज=उत्सृष्टवती॥ ९॥

वहाँ तरुणीजन के पादस्पर्श को सहन न करती अशोकलता नवकिसलय के उत्पाद के बहाने से अपनी क्रोधाग्नि प्रकट करती हुई सी लग रही थी ॥ ९ ॥

सुधामरीचिद्युतिशीतलेन कराम्बुजस्पर्शसुखेन काचित्।
उद्भिद्यमानांकुररोमहर्षं पुन्नागतां प्रापयति स्म चूतम् ॥ १० ॥

सुधेत्यादि। काचित्=नवयौवना, (तस्मिन् क्रीडोद्याने) सुधामरीचेः=चन्द्रस्य; द्युतिः=कान्तिरिव, शीतलम्=शीतम्, तेन; कराम्बुजस्य=करकमलस्य, स्पर्शे, जातं यत् सुखं तेन; उद्भिद्यमानाः=उद्गच्छन्तः, अङ्कुरा एव रोमहर्षः=रोमाञ्चो यस्मात्तम्, चूतम्=आम्रवृक्षम्; पुन्नागताम्=पुन्नागवृक्षत्वम्, पुरुषश्रेष्ठत्वं च; प्रापयति स्म=गमयति स्म। चूतस्य पुन्नागतानयनविरोधस्य युवतिजनकरस्पर्शजन्यरोमाञ्चोद्गमस्य पुरुषश्रेष्ठलक्षणत्वेन हेतुना पुरुषश्रेष्ठताकथनेन परिहाराद् विरोधाभासालङ्कारः॥ १०॥

और कोई तरुणी वहाँ चन्द्रकान्तिसम शीतल करस्पर्श से रोमाञ्चित हुए आम्र वृक्ष को पुंनाग वृक्ष सा बना रही थी ॥ १० ॥

असूत सद्यः सहकारशाखी नवांकुरान् पुङ्खितचारुपत्रान्।
अनन्ययोनेरभिमानहेतूनरुन्तुदान्[1] पान्थवधूजनानाम् ॥ ११ ॥

असूतेत्यादि। तदा=वसन्तकाले, सहकारशाखी=आम्रवृक्षः; पुङ्खितानि=आयोजितानि, चारूणि, पत्राणि=दलान्येव, पत्राणि=कङ्कपत्राणि येषां तान्,

१. बाणान् बहून्--म०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"पत्रं तु वाहने पर्णे पक्षे च शरपक्षिणोः" इति विश्वः। अनन्ययोनेः=मकरध्वजस्य; अभिमानहेतून्-गर्वहेतून्, "गर्वोऽभिमानोऽहङ्कारः" इत्यमरः। पान्थवधूजनानाम्=पथिकस्त्रीणाम्, विरहिणीनामित्यर्थः। अरुन्तुदान्=मर्मस्पृशः, "अरुन्तुदं तु मर्मस्पृक्" नवांकुरान्=नूतनप्ररोहान्; सद्यः=सदैव वसन्तकाले; असूत-प्रासूत ॥ ११ ॥

उस समय, आम्रवृक्ष के भी तीक्ष्ण अग्रभागयुक्त ऐसे कोमल किसलय निकल आये जो कामदेव के अभिमान को और अधिक बढ़ाने वाले थे; क्योंकि उन्हें देख कर प्रवासी कान्ताविरहित जनों की विरहवेदना बढ़ जाती थी ॥ ११ ॥

सौगन्धिकेन्दीवरवासितेन सलीलमन्तर्मुखसम्भृतेन।
पुराणमाध्वीकरसेन काचिदशोकतां केसरमानिनाय ॥ १२ ॥

सौगन्धिकेत्यादि। काचित्=तरुणी च; केसरम्-वकुलवृक्षम्, सौगन्धिकेन्दीवराभ्याम्=कल्हारोत्पलाभ्याम्, वासितेन=सुरभितेन; अन्तर्मुखम्=मुखस्यान्तर्भागः, तत्र सम्भृतेन=सम्पादितेन; पुराणेन=पुरातनेन; माध्वीकरसेन=मद्येन; अशोकवृक्षत्वमिति विरोधः, शोकरहिततामिति परिहारः; आनिनाय-नीतवती ॥ १२ ॥

किसी युवती ने कल्हार और कमल से सुवासित मद्य का गण्डूष (कुल्ला) कर केसर वृक्ष को अशोक (शोकरहित या अशोकवृक्ष) बना दिया ॥ १२ ॥

मनोज्ञगन्धैर्वकुलद्रुमाणां स्वयं विकीर्णैः सुमनोनिकायैः।
लताप्रतानेन विचित्रमेका सङ्कल्पयामास विकल्पकाञ्चीम् ॥ १३ ॥

मनोज्ञेति। एका-तरुणी; वकुलद्रुमाणाम्-केसरद्रुमाणाम्, मनोज्ञगन्धैः=मनोहरसुरभिभिः, स्वयम्=आत्मनैव; विकीर्णैः=पतितैः; सुमनसाम्=पुष्पाणाम्, निकायैः, राशिभिः, सम्बद्धेनेति शेषः; लताप्रतानेन=वल्लीतन्तुना; विकल्पकाञ्चीम्=पर्यायमेखलाम्; सङ्कल्पयामास=निर्ममे ॥ १३ ॥

और किसी युवती ने वकुल वृक्ष के अपने आप गिरे फूलों से युक्त लता की पतली शाखा को अपने कटिप्रदेश में मेखला के रूप में बाँध लिया ॥ १३ ॥

उपाहृतैः काञ्चनपुष्पजालैरुदारगन्धैर्नवमल्लिकायाः।
आपूरयन्ती निजकेशपाशमनङ्गतूणीरमिवाबबन्ध ॥ १४ ॥

उपाहृतैरिति। काचित् मनोज्ञा; नवमालिकायाः-सुगन्धायाः; "सुगन्धा ग्रैष्मिकातानामालिका नवमालिका" इति वैजयन्ती। उदारगन्धैः=उत्कृष्टसुरभिभिः; काञ्चनमयैः पुष्पराशिभिः; निजकेशपाशम्=स्वकीयकचकलापम्; अनङ्गतूणीरम्=मदनेषुधिमिव; आपूरयन्ती=समन्तात्पूरयन्ती; आबबन्ध-आनद्धवती ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

और वहाँ किसी तरुणी ने, नवमालिका के तीव्र गन्धवाले सुनहरे फूलों से अपनी वेणी सजाकर उसे कामदेव के तूणीर का रूप दे दिया ॥ १४ ॥

आवर्ज्य शाखां करपल्लवेन प्रसह्य पुष्पापचयोन्मुखायाः[1] ।
रुषेव कस्याश्चिदशोकयष्टिस्तिरस्करोति स्म दृशं परागैः ॥ १५ ॥

आवर्ज्येति । करपल्लवेन=स्वकरकिसलयेन, शाखाम्=विटपम्; आवर्ज्य=अवनमय्य, प्रसह्य=हठात्; पुष्पाणाम्=कुसुमानाम्=अपचयाय=शाखाभ्यो ग्रहणाय; उन्मुखायाः=ऊर्ध्वमुखायाः; "कोपक्रोधामर्षरोषप्रतिज्ञा रुट्क्रुधौ स्त्रियाम्" इत्यमरः । रुषा=क्रोधेन; परागैः=पुष्पधूलिभिः; तिरस्करोति-स्म=आच्छादयत् ॥ १५ ॥

और वहाँ अपने हाथों से लता की शाखा को झुकाकर उससे फूल तोड़ती किसी कन्या की दृष्टि (नेत्रकमल) का अशोकलता अपने फूलों का तिरस्कार करती हुई सी लग रही थी ॥ १५ ॥

करेण साकं मम कोमलेन स्पर्धामिदं किं परुषं भजेत ।
इत्यात्तरोषेव सलीलमेका चूतप्रवालस्य चकार भङ्गम् ॥ १६ ॥

करेणेति । "इदम्=चूतप्रवालम्, मम=मे; कोमलेन=मृदुना, करेण=हस्तेन. स्पर्धाम्=पराभिभवेच्छाम्, कृत्वेति शेषः, किम्=कीदृशम्, परुषम्=काठिन्यम्, भजेत=सेवेत" इति=इत्थम्; विचार्य, आत्तरोषा=जातकोपा, एका=काचित् तरुणी; सलीलम्=अनायासेन, चूतप्रवालस्य=आम्रकिसलयस्य, भङ्गम्=पराजयं छेदनं च, "भङ्गस्तरङ्गे भेदे च रुग्विशेषे पराजये । कौटिल्ये भयविच्छित्त्योः" इति हैमः । चकार=कृतवती ॥ १६ ॥

और कोई ईर्ष्यालु कन्या, "मेरे कोमल हाथ से यह स्पर्धा (ईर्ष्या) कर रहा है'—यह सोच कर क्रोध करती हुई सी अनायास ही आम्रवृक्ष के कोमल अरुण पल्लव को खण्ड-खण्ड करने लगी ॥ १६ ॥

सिन्दूरसौन्दर्यसहोदरेण शेफालिकापुष्परजःकणेन ।
चकार सख्याः सविलासमेका फालस्थले चारुतमालपत्रम् ॥ १७ ॥

सिन्दूरेत्यादि । एका=काचित्सुन्दरी; सिन्दूरस्य सौन्दर्ये=सौकुमार्ये, सहोदरः=भ्राता, तेन; सिन्दूरसदृशसौन्दर्येणेत्यर्थः शेफालिकापुष्पाणाम्=नीलसिन्धुवारकुसुमानाम्, रजःकणेन=धूलिकणेन, सख्याः=आलिजनस्य, फालस्थले=निटिलप्रदेशे, सविलासम्=सविभ्रमम्, चारु=शोभनम्, तमालपत्रम्=तमालकिसलयम्; चकार=धृतवती । "तमालपत्रतिलकचित्रकाणि विशेषकम्" इत्यमरः ॥ १७ ॥

---

१. ०न्मुखीनाम्—क०; ०न्मुखीयाम्—वि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

और किसी तरुणी ने, सिन्दूर के समान लाल, शेफालिका (=निर्गुण्डी=नील सिन्धुवार) के फूलों के रजःकण से अपनी सखी के ललाट पर तमालपत्र (की तरह का चिह्न) अंकित कर दिया ॥ १७ ॥

आकृष्य शाखाः सदयं लतानामालूय हस्तेन नवप्रवालम् ।
माणिक्यभूषामपसार्य कण्ठे निवेशयामास पतिः परस्याः ॥ १८ ॥

आकृष्येति । परस्या=अन्यस्याः, पतिः=कान्तः; लतानाम्=वल्लरीणाम्, शाखाः=विटपाः, सदयम्=प्रियाभुजसादृश्येन दयया सहितम् । आकृष्य=अवनमय्य; हस्तेन=करेण; नवप्रवालम्=नवकिसलयम्, आलूय=छित्वा; कण्ठे=ग्रीवायाम्; माणिक्यभूषाम्=माणिक्यालङ्करणम्; अपसार्य=अपहार्य; विवेशयामास=धृतवान् ॥ १८ ॥

और किसी परपति ने किसी तरुणी के कण्ठप्रदेश में लताओं की शाखा को दयापूर्वक धीरे से झुकाकर उससे एक नवांकुरित कोमल किसलय (पत्र) तोड़कर, उसका पहले से पहना माणिक्यजटित आभूषण हटाते हुए उसके स्थान पर रख दिया ॥ १८ ॥

काचित् प्रगल्भा रमणस्य कर्णे निवेशयन्ती किल कर्णपूरम् ।
आवेष्टय कण्ठं भुजबन्धनेन कपोलकान्ति परिचुम्बति स्म ॥ १९ ॥

काचिदिति । काचित्=अप्रसिद्धा, प्रगल्भा=प्रौढा; प्रगल्भालक्षणमुक्तं **साहित्यदर्पणे**—

"स्मरान्धा गाढतारुण्या समस्तरतकोविदा ।
भावोन्नता दरव्रीडा प्रगल्भाऽऽक्रान्तनायका" ॥ इति ।

रमणस्य=कान्तस्य; कर्णपूरम्=पुष्पनिर्मितं कर्णाभरणम्; "कर्णपूरस्तु पुष्पाद्यैः" इति वैजयन्ती । विवेशयन्ती=निक्षिपन्ती; किलेत्यलीके । तस्य कान्तस्य, कण्ठम्=ग्रीवाम्; भुजबन्धनेन=बाहुपाशेन; आवेष्ट्य=अलिङ्ग्य; कपोलकान्तिम्=गण्डश्रियम्; कान्तिमत् कपोलमिति यावत्; परिचुम्बति स्म=चुचुम्ब ॥ १९ ॥

और कोई प्रगल्भा (प्रौढा) अपने नायक को फूलों से बना कर्णफूल पहनाकर उसे बाहुपाश में जकड़कर उसका स्वच्छन्दतया चुम्बन करने लगी ॥ १९ ॥

नवप्रसूनैः सकलाङ्गनद्धैर्मनोहराः काश्चन वारिजाक्ष्यः ।
अयुग्मबाणायुधदेवतानामाविष्कृतानामवहन्नभिख्याम् ॥ २० ॥

नवेत्यादि । (तत्रोद्याने) काश्चन, वारिजाक्ष्यः=सरोजनयनाः; सकलाङ्गनद्धैः=समग्राङ्गबद्धैः; नवप्रसूनैः=नवकुसुमैः, मनोहराः=परेषां मनोहारिण्यः; भूत्वेति शेषः; पञ्चसङ्ख्याकत्वाद् अयुग्मबाणस्य=मदनस्य, आयुधानाम्=

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुष्परूपास्त्राणां या देवता:=अधिष्ठातृदेवता:, तासाम्; आविष्कृतानाम्=मूर्तिमतीनाम्, अभिख्याम्=शोभाम्, अवहन्=प्राप्नुवन् ॥ २० ॥

वहाँ कुछ मनोहर कमलनयनाएँ अपने समग्र शरीर पर लताओं और वृक्षों के कोमल रंग-विरंगे पत्र धारण कर ऐसा लग रही थी कि मानों वे कामदेव के पुष्पमय बाणों की अधिष्ठात्री देवता हों ॥ २० ॥

स्तनाभिरामस्तबकोज्ज्वलानां दन्तच्छदापाटलपल्लवानाम् ।
मध्ये लतानां निभृतं वसन्तीं सखीं विवेक्तुं न शशाक काचित् ॥ २१ ॥

स्तनेत्यादि । काचित्=मुग्धा तरुणी; स्तनवदभिरामैः स्तबकैः=गुच्छकैः, उज्ज्वलानाम्=शोभमानानाम्; दन्तच्छदवत्=अधरोष्ठवत्, आपाटलाः=अरक्ताः, पल्लवाः=प्रवालाः यासां तासाम्; "ओष्ठाधरौ तु रदनच्छदौ दशनवाससी" इत्यमरः। लतानाम्=वल्लरीणाम्, मध्ये, निभृतम्=निश्चलम्, वसन्तीम्=स्थितिं कुर्वन्तीम्, सखीम्=आलिम्; विवेक्तुम्='इयं लता', 'इयं सखी'–इति विविच्य ज्ञातुम्, न=नैव; शशाक=अशक्नोत् ॥ २१ ॥

कोई युवती, स्तनों की तरह सुन्दर गुच्छों से शोभित एवं अधरोष्ठ की तरह अरुण पल्लवों से युक्त लताओं के बीच में छिपी हुई अपनी सखी को पहचान ही सकी कि इनमें कौन लता है ? और कौन मेरी सखी ! ॥ २१ ॥

मध्याह्नसमयवर्णनम्

इत्थं कुमारस्य सहावरोधैः सलीलमारामविहारभाजः ।
आलोकनायेव सहस्रभानुराकाशमध्यं[1] परमध्यरुक्षत् ॥ २२ ॥

इत्थमिति । अवरोधैः=अन्तःपुरजनैः, सह=साकम्; सलीलम्=लीलया सहितम्, आरामविहारम्=उद्यानक्रीडाम्, भजतीति तस्य तथोक्तस्य=कुमारस्य=सिद्धार्थस्य; आलोकनाय=दर्शनाय, इव; परम्=अतिशयेन; आकाशमध्यम्=आकाशस्य मध्यभागे; अध्यरुक्षत्=अधिरूढवान् । मध्याह्नसमयः प्राप्त इत्यर्थः ॥

मध्याह्न-वर्णन—इस तरह, अन्तपुर के स्त्रीजन के साथ राजकुमार की वह उद्यानक्रीडा देखने के लिये मानों सूर्य भी चलते चलते आकाश के मध्य में ही रुक गया। (अर्थात् राजकुमार को उद्यानविहार करते-करते मध्याह्न हो आया) ॥२२॥

चण्डातपस्पर्शविवर्धमानमरीचिकावापिविहारदक्षः[2] ।
सन्धुक्षयंस्तापमतीव तासां मध्याह्नशंसी मरुदाजगाम ॥ २३ ॥

चण्डेत्यादि । चण्डातपस्य=सूर्यस्य, स्पर्शेन=सन्तापेन, विवर्धमानायाम्=वृद्धिं गच्छन्त्याम्; मरीचिकायां=मृगतृष्णायामेव वाप्यां विहारे दक्षः=कुशलः;

१. सहस्रबाहु०—म०, पा०, क० ।
२. ०विहारदक्षम्—क०, वि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"मृगतृष्णा मरीचिका" इत्यमरः। मध्याह्नशंसो=मध्याह्नसूचकः, मरुत्=वायुः; तासाम्=अन्तःपुरस्त्रीणाम्, तापम्=उष्णताम्; सन्धुक्षयन्=वर्धयन्, आजगाम=आगच्छत् ॥ २३ ॥

और इसी समय, सूर्य की प्रचण्ड किरणों से बढी मृगमरीचिका रूपी वापी-में स्नान करने में दक्ष वायु भी उन अन्तःपुरजनों का ताप बढ़ाता हुआ सा वहाँ उपस्थित हो गया। (अर्थात् उस समय गर्म हवा चलने लगी) ॥ २३ ॥

छायास्तरूणामभितः प्रवृत्ताश्चण्डातपे क्षन्तुमिवासमर्थाः।
मूलालवालं मुहुरम्बुसेकसञ्जातशैत्यं शनकैरुपेयुः ॥ २४ ॥

छाया इति। अभितः=समन्तात्; प्रवृत्ताः=रताः; चण्डातपे=प्रचण्डघर्मे; क्षन्तुम्=सोढुम्, असमर्थाः=असक्ताः; तरूणाम्=वृक्षाणाम्, छायाः=अनातपाः, "छाया त्वनातपे कान्तौ" इत्यमरः। मुहुः=पुनः; शनकैः=शनैः, मूले यत् आलवालम्=जलावापदेशः, तम्; "स्यादालवालमावालमावापः" इत्यमरः। अम्बुसेकेन=जलसेचनेन, सञ्जातम्=उत्पन्नम्, शैत्यम्=शीतता, यस्य तत्; उपेयुः=जग्मुः। वृक्षाणां छाया मध्याह्नकाले मूलमात्रमाश्रिता इति भावः ॥

चारों तरफ फैली वृक्षों की छाया भी, मानों सूर्य की उष्णता को सहन करने में असमर्थ होती हुई सी अपने जलसिञ्चित अतएव शीतप्रदेश वाले आलवाल (आवाप=थाला) में ही सिमट कर रह गयी। (मध्याह्न में किसी की छाया भी छोटी होती हुई उसके पैरों तक सीमित हो जाती है) ॥ २४ ॥

विहारसञ्जातपरिश्रमाणां विलासिनीनामलिकस्थलीषु[1]।
प्रादुर्बभूवुः श्रमवारिलेशाः प्रद्युम्नकीर्त्यङ्कुरनिर्विशेषाः ॥ २५ ॥

विहारेत्यादि। विहारेण=उद्यानक्रीडया; सञ्जातः=उत्पन्नः, परिश्रमः=खेदो यासां तासाम्; विलासिनीनाम्=स्त्रीणाम्; अलिकस्थलेषु=ललाटदेशेषु; "ललाटमलिकं गोधिः" इत्यमरः। श्रमवारिलेशाः=स्वेदकणाः; प्रदयुम्नस्य=मदनस्य, कीर्त्यङ्कुरात्=यशःप्ररोहात्, निर्विशेषाः=भेदशून्याः; तत्सदृशा इति भावः। "प्रद्युम्नो मीनकेतनः" इत्यमरः। प्रादुर्बभूवुः=उत्पादयामासुः ॥

उस समय उद्यानविहार करती हुई उन विलासिनियों के ललाट पर पैदा हुए श्रमजन्य स्वेदकण ऐसे चमकने लगे मानों प्रद्युम्न (कामदेव) की कीर्तिगाथा वहाँ लिखी गयी हो ॥ २५ ॥

घर्मोदबिन्दुप्रकरा[2] विरेजुः कपोलपालीषु नितम्बिनीनाम्।
स्नानार्थमानेतुममूः पुरस्तात् तडाकदूता इव सम्प्रयाताः ॥ २६ ॥

१. ०मलक०—पा०। २. प्रसराः—म०, पा०, वि०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घर्मोदेत्यादि। नितम्बिनीनाम्=कामिनीनाम्; कपोलपालीषु=गण्डस्थलीषु; घर्मोदबिन्दूनाम्=स्वेदजलकणानाम्, प्रकराः=संहतयः; "प्रकरः कीर्णपुष्पादौ संहतौ" इति हेमचन्द्रः। अमूः=अन्तःपुरस्त्रियः; पुरस्तात्=सपदि एव; स्नानार्थम्=आप्लवनार्थम्; आनेतुम्=प्रापयितुम्; तडाकस्य=सरोवरस्य, दूताः=सन्देशहराः; "स्यात् सन्देशहरो दूतः" इत्यमरः। सम्प्रयाताः=समायाता इव; विरेजुः=शुशुभिरे ॥ २६ ॥

उन सुन्दरियों के कपोलों पर धूप के कारण निकले पसीने (स्वेद) की बूँदें ऐसी लग रही थीं मानो स्नानहेतु आमन्त्रण देने के लिये उस जलाशय के दूत आये हों ॥ २६ ॥

वापीवर्णनम्

आरामभूमावतिवाह्य तापं माध्याह्निकं मध्यमलोकपालः।
आसेव्यमानो वरवर्णिनीभिरम्भोविहारार्थमवाप वापीम् ॥ २७ ॥

आरामेत्यादि। आरामभूमौ=उद्यानभूमौ, माध्याह्निकम्=मध्याह्ने भवम्; तापम्=सूर्यसन्तापम्, अतिवाह्य=नीत्वा; वरवर्णिनीभिः=वनिताभिः, "रामायां वरवर्णिनी" इति वैजयन्ती। आसेव्यमानः=सेवमानः; मध्यमलोकपालः=अग्निदेवः, अम्भोविहारार्थम्=जलक्रीडायै, वापीम्=दीर्घिकाम्, "सरो वापी तु दीर्घिका" इत्यमरः। अवाप=प्राप ॥ २७ ॥

उस उद्यानभूमि में दोपहर के समय की अतिशय गर्मी बढ़ाता हुआ अग्निरूप सूर्य भी मानों उन कामिनियों के साथ वापीस्नान के लिये चल पड़ा ॥ २७ ॥

मन्दानिलान्दोलितवीचिमालाडोलायमानोन्मदराजहंसीम्।
सम्फुल्लकल्हारविजृम्भमाणसौरभ्यपूरप्लवमानभृङ्गीम्[1] ॥ २८ ॥

तामेव वापीं चतसृभिर्गाथाभिर्विशिनष्टि—**मन्देत्यादि**। मन्दानिलेन=मन्दमारुतेन, आन्दोलितायाम्=चालितायाम्, वीचिमालायाम्=तरङ्गमालायाम्, डोलायमानाः=डोला इवाचरन्त्यः चञ्चलाः, उन्मदाः=मत्ताः, राजहंस्यः=वरटाः यस्यां ताम्; सम्फुल्लेभ्यः=विकचेभ्यः, प्रफुल्लेभ्य इत्यर्थः, कल्हारेभ्यः=सौगन्धिकपुष्पेभ्यः; विजृम्भमाणे=प्रवर्धमाने, सौरभ्यपूरे=गन्धप्रवाहे, प्लवमानाः=मज्जन्त्यो भृङ्ग्यः=भ्रमरस्त्रियो यस्यां ताम्। 'वापीमवाप' इति पूर्वेण सम्बन्धः ॥ २८ ॥

वापी-वर्णन—उस समय वह वापी ऐसी लग रही थी मानो मन्द पवन द्वारा आन्दोलित तरङ्गों से दोलायमान कोई उन्मत्त राजहंसी हो, या फूले हुए कल्हार के वृक्षों से बढ़ी हुई सुगन्ध में डूबती-उतराती कोई भ्रमरपत्नी हो ॥ २८ ॥

१. प्रफुल्ल०—म०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुमुद्वतीकोशपुटावतीर्णमाध्वीकधारामधुरप्रवाहाम्[1] ।
उत्तुङ्गकल्लोलवितानरत्नरङ्गस्थलीचंक्रममाणमत्स्याम् ॥ २९ ॥

कुमुद्वतीत्यादि । कुमुद्वत्याः=कुमुदिन्याः, कोशपुटेभ्यः=कुड्मलपुटेभ्यः, अवतीर्णाभिः=अवरूढाभिः, स्यन्दमानाभिरित्यर्थः, माध्वीकधाराभिः=मद्यधाराभिः, मधुराः=हृद्याः; प्रवाहाः=प्रवृत्तयो यस्यां ताम्; उत्तुङ्गानाम्=उन्नतानाम्, कल्लोलानाम्, वितानः=विस्तार एव, रत्नरङ्गस्थली=रत्ननिर्मिता नर्तनशाला, तस्यां चंक्रममाणाः=सञ्चरन्तः, नृत्यन्त इति यावत्, मत्स्याः=मीनाः, यस्यां ताम्, "क्रतुविस्तारयोरस्त्री वितानम्" इत्यमरः। 'वापीमवाप'—इति पूर्वेण सम्बन्धः ॥ २९ ॥

कुमुदिनी के कोशपुटों से बहती हुई माध्वीक (पुष्परस) की धाराओं से मधुर प्रवाह वाली उन्नत कल्लोलरूपी तम्बू से आच्छादित रत्नमय नाट्यशाला में घूमती मछलियों से वापी शोभित हो रही थी ॥ २९ ॥

एकत्र फुल्लैर्नवपुण्डरीकैर्गङ्गानुषक्तामिव[2] दृश्यमानाम् ।
रक्तारविन्दैरितरत्र भिन्नैः शोणोपगूढामिव शोभमानाम् ॥ ३० ॥

एकत्रेति । एकत्र=क्वचित् प्रदेशे; फुल्लैः=विकचैः, नवपुण्डरीकैः=नूतनसिताम्भोजैः; "पुण्डरीकं सिताम्भोजम्" इत्यमरः। गङ्गानुषक्ताम्=गङ्गासम्बद्धाम्; इव दृश्यमानाम्; इतरत्र=अन्यत्र प्रदेशे; भिन्नैः=फुल्लैः, रक्तारविन्दैः=कोकनदैः, शोणेन=शोणाख्येन नदेन; उपगूढाम्=सङ्गताम्; "शोणे हिरण्यबाहुः स्यात्" इति नदविशेषे अमरः। शोभमानाम्=विराजमानाम्। 'वापीमवाप' इति पूर्वेण सम्बन्धः। ३० ॥

कहीं वह वापी, एक जगह विकसित श्वेत कमलों के कारण गङ्गा की तरह लग रही थी और कहीं (दूसरी जगह) रक्त कमलों से आच्छादित हो शोणनद के सदृश लग रही थी ॥ ३० ॥

पतत्रिपक्षप्रविकीर्णपद्मपरागसिन्दूरितदिग्विभागाम् ।
स शीकरासूत्रितदुर्दिनाभामालोक्य वापीमधिकं ननन्द ॥ ३१ ॥

पतत्रीत्यादि । सः राजकुमारः, पतत्रिणाम्=पक्षिणाम्, पक्षैः=गरुद्भिः, प्रविकीर्णैः=विक्षिप्तैः, पद्मपरागैः=पद्मरेणुभिः, सिन्दूरिताः=सञ्जातसिन्दूराः, दिग्विभागाः=प्राच्यादिदिग्भेदाः यस्यां ताम्; "परागः कौसुमे रेणौ" इत्यमरः। शीकरैः=जलबिन्दुभिः, आसूत्रिता=उत्पादिता, दुर्दिनाभा=वर्षाश्रीर्यस्यां ताम्, वापीम्=दीर्घिकाम्, आलोक्य=दृष्ट्वा, अधिकम्=अतिशयेन, ननन्द=प्रससाद ॥ ३१ ॥

१. ०कोशपटा०—क० । ०कोशपटावकीर्ण०-पा० ।
२. गङ्गानुयातां परिदृश्य०—म० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पक्षियों के पंखों से उड़ती पुष्पों की धूलि से लाल हुए दिक्कोणों वाली और जलबिन्दुओं के बराबर उठते रहने से वर्षा ऋतु का सन्देह पैदा करने वाली उस वापी को देखकर वह राजकुमार बहुत ही आनन्दित हुआ ॥ ३१ ॥

दृढावबद्धायतकेशपाशैः शृङ्गानुषङ्गोज्ज्वलपाणिपद्मैः ।
सहावरोधैः स विहार वापीमवातरत् पाशधरप्रभावः[1] ॥ ३२ ॥

दृढावबद्धेत्यादि । पाशधरस्य=वरुणस्य प्रभाव इव प्रभावः=सामर्थ्यं यस्य सः, स सिद्धार्थः, दृढं यथा स्यात् तथा अवबद्धाः=संयताः, आयताः=दीर्घाः, केशपाशाः=कचकलापा यैस्तैः । शृङ्गाणाम्=क्रीडाम्बुयन्त्राणाम्, अनुषङ्गेण=सम्बन्धेन, उज्ज्वलानि=धवलानि, पाणिपद्मानि=करकमलानि येषां तैः, "शृङ्गं प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके" इत्यमरः । अवरोधैः=अन्तपुरजनैः सह, विहारवापीम्=क्रीडादीर्घिकाम्, अवातरत्=अवतरति स्म ॥ ३२ ॥

दृढ़ता से बँधे हुए होने के कारण संयत परन्तु लम्बे बालों वाली एवं जलयन्त्रों के सहारे निरन्तर जलक्रीड़ा करने के कारण श्वेत हुए हाथों वाली तरुणी नारीजनों के साथ, वरुण की तरह जल में भी अपना सामर्थ्य रखने वाला वह राजकुमार जलक्रीडा के लिए उस वापी में उतरा ॥ ३२ ॥

तत्पूर्वमभ्यागतमादरेण तमूर्मिहस्तैः परिरभ्य वापी ।
कर्णाभिरामैः कलहंसनादैर्वार्त्तानुयोगं[2] मधुरं चकार ॥ ३३ ॥

तत्पूर्वमिति । सा वापी=दीर्घिका, तदेव पूर्वम्=प्रथमम्, यस्मिन् कर्मणि तत्पूर्वम् । आगमनक्रियाविशेषणम् । अभ्यागतम्=अतिथिम्, ऊर्मिहस्तैः=तरङ्गकरैः, आदरेण=ससम्मानम्, परिरभ्य=आलिङ्ग्य, कर्णाभिरामैः=कर्णानन्दकरैः, कर्णप्रियैरित्यर्थः, कलहंसनादैः=कादम्बध्वनिभिः, "कादम्बः कलहंसः स्यात्" इत्यमरः । मधुरम्=प्रियम्, वार्तानुयोगम्=वृत्तान्तप्रश्नम्, "वार्ता प्रवृत्तिर्वृत्तान्तः", "प्रश्नोऽनुयोगो पृच्छा च" इत्युभयत्र अमरः ॥ ३३ ॥

उस वापी ने उस राजकुमार को स्नानहेतु आया हुआ पहला आदमी जानकर उसका अपने तरङ्गरूपी हाथों से आलिङ्गन किया और कर्णप्रिय हंसों के मधुर कलरव से मानों उससे कुशलक्षेम पूछा ॥ ३३ ॥

अन्तर्विगाढे सति सुन्दरीभिरुद्वेलतां प्राप महातडागः ।
जलाशयाः स्त्रीषु कृतानुषङ्गाः कथं नु वेलां[2] न विलङ्घयन्ति ॥ ३४ ॥

अन्तरिति । महातडागः=स महान् सरोवरः, सुन्दरीभिः=वरवर्णिनीभिः, अन्तः=जलमध्ये, विगाढे=प्रविष्टे सति, उद्वेलताम्=वेलाः=तीरम्, उद्गतः इति तस्य भावस्तत्ता ताम्, "वेला कूलेऽपि वारिधेः" इति विश्वः, "वेला कालमर्यादयोरपि" इत्यमरश्च । प्राप=प्राप्तवान् । स्त्रीषु-नारीषु, कृतानु-

१. ०प्रभावात्—वि० ।

२. वार्तानियोगं—म० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षङ्गाः=विहितसम्बन्धाः, जलाशयाः=तड़ागाः, डलयोरभेदात् जडाशयाः=मन्दाश्च, वेलाम्=मर्यादाम्, कथम्=केन प्रकारेण न विलङ्घयन्ति=नातिक्रामन्ति ! नु इति निश्चयार्थे, विलङ्घयन्त्येवेत्यर्थः। श्लेषानुप्राणितोऽत्रार्थान्तरन्यासोऽलंकारः ॥ ३४ ॥

सुन्दरियों के प्रवेश करने से वापी का जल अपने किनारों की सीमा लाँघने लगा। ऐसा हो भी क्यों न ! स्त्रियों से सम्बन्ध रखने वाले जलाशय (या जडाशय=मन्दमति) अपनी सीमा (=आचारसीमा) लाँघ ही जाते हैं ! ॥ ३४ ॥

कठोरकान्ताकुचमण्डलानामाघातभीता इव वेपमानाः।
कल्लोलमालाः कणिकापदेशान्मुक्तोपहारानुपनिन्युरासाम्[१] ॥ ३५ ॥

कठोरेत्यादि। कठोराणि=कठिनानि, यानि कान्तायाः पत्न्याः, कुचमण्डलानि=स्तनमण्डलानि, तेषाम्, आघाताद्=अभिघाताद्, भीताः=भयमाप्ताः, अतएव वेपमानाः=कम्पमानाः, कल्लोलमालाः=वीचिपरम्पराः, कणिकानाम्=बिन्दूनाम्, अपदेशात्=व्याजात्, मुक्तोपहारान्=मुक्ताफलरूपायनानि, आसाम्=अवरोधतरुणीनां कृते, आनिन्युः=आनयन्। तरङ्गशीर्णाः कणिका अवरोधस्त्रीणामङ्गेषु मुक्ताफलानीव विरेजुरिति भावः ॥ ३५ ॥

इन के कठोर कुचमण्डलों के आघात से डरकर काँपती हुई सी उस वापी की तरङ्गें उनपर मोतियों जैसी जलबिन्दु बरसाने लगीं, मानो उन्हें डर के मारे मोतियों का उपहार दे रही हों ॥ ३५ ॥

पद्माकरे पङ्कजलोचनाभिर्नरेन्द्रसूनुर्विजहार सार्धम्।
सलीलमन्तःपुरिकाङ्गनाभिः साकं प्रचेता इव वारिराशौ ॥ ३६ ॥

पद्माकरे इति। नरेन्द्रसूनुः=स राजपुत्रः; पङ्कजलोचनाभिः=कमलनेत्राभिः, सुन्दरीभिः, सार्धम्=सह, प्रचेताः=वरुणः, अन्तःपुरिकाङ्गनाभिः=शुद्धान्तवासिभिः, साकम्=सार्धम्, वारिराशौ=जलसमूहे इव, पद्माकरे=जलाशये (तस्यां दीर्घिकायाम्) विजहार=जलविहारं कृतवान् ॥ ३६ ॥

उस राजकुमार ने अपने अन्तःपुर के नारीजनों के साथ उस जलाशय में ऐसे स्नानक्रीड़ा की मानों साक्षात् वरुणदेव (जल-देवता) ही उस जलाशय में जलक्रीड़ा कर रहे हैं ॥ ३६ ॥

कान्ताकरोदञ्चितवारिधाराः कान्तस्य बाह्वोरुपरि प्रकीर्णाः।
अयत्नबालव्यजनोपचारचातुर्यधुर्याः क्षणमात्रमासन् ॥ ३७ ॥

कान्तेत्यादि। कान्तानाम्=स्त्रीणाम्, करैः=हस्तैः, उदञ्चिताः=ऊर्ध्वक्षिप्ताः, वारिधाराः=जलधाराः, कान्तस्य=स्वामिनः, बाह्वोः=भुजयोः, उपरि,

१. ०हारानिव—क०, पा०, वि०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकीर्णाः=प्रक्षिप्ताः, अयत्नस्य=यत्नशून्यस्य, बालव्यजनोपचारस्य=चामर-वीजनस्य, चातुर्यस्य=प्रावीण्यस्य, धुरं वहन्तीति तादृशाः, "चामरं बालव्यजनं रोमगुच्छः प्रकीर्णकम्" इति हेमचन्द्रः । क्षणमात्रम्=मुहूर्तमात्रमासन् ॥

वहाँ स्त्रीजनों के हाथों से राजकुमार के हाथ पर जलधारा ऐसे फेंकी जा रही थी मानों उस पर विना किसी श्रम के चँवर डुलाने की चातुर्यपूर्ण कला दिखायी जा रही हो ॥ ३७ ॥

परिस्फुरच्छीकरदन्तुराङ्गं पर्यायवल्गत्कुचकुम्भहारम् ।
काश्चित् करैः कान्तमिवापराद्धमास्फालयामासुरमन्दमम्भः ॥ ३८ ॥

परिस्फुरदित्यादि । काश्चित्=तारुण्यः, परिस्फुरद्भिः=प्रकाशमानैः, शीकरैः=जलबिन्दुभिः, दन्तुराणि=निम्नोन्नतानि, अङ्गानि=अवयवाः, यस्मिन् कर्मणि तत्, "दन्तुरं तून्नताननम्" इत्यमरः । पर्यायेण=क्रमेण, वल्गन्=लुठन्, कुचकुम्भयोः=स्तनरूपकलशयोः, हारः=भूषणम्, यस्मिन् कर्मणि तत्, अपराद्धम्=कृतापराधम्, कान्तम्=स्वामिनमिव, करैः=पाणिभिः, अम्भः=जलम्, अमन्दम्=शीघ्रतया, आस्फालयामासुः=ताडयामासुः ॥ ३८ ॥

वहाँ कुछ तरुणियाँ हाथों से ऊपर उछाले जाने से तीक्ष्ण हुए जलबिन्दुओं से राजकुमार पर ऐसे प्रहार करने लगी मानों वह कोई उनका बड़ा अपराधी हो । इस कार्य के बार-बार करने से उनके स्तनकलशों के अलङ्करण अस्त-व्यस्त (इधर-उधर) हो रहे थे ॥ ३८ ॥

तरङ्गरङ्गे[1] सह भृङ्गगानैः सरोरुहे ताण्डवमादधाने ।
हस्ताम्बुजैरात्तमृणालदण्डैरवादयन् वारिमृदङ्गमन्याः ॥ ३९ ॥

तरंगेत्यादि । अन्याः=अपरा नार्यः, तरङ्गरङ्गे=तरङ्गरूपरङ्गस्थले, सरोरुहे=जलाशये, भृङ्गगानैः=भ्रमरध्वनिभिः, सह, ताण्डवम्=उद्धतनर्तनम्, आदधाने=कुर्वति सति, आत्तानि=गृहीतानि, मृणालानि=कमलनालानि, एव दण्डाः=यष्टयः, यैस्तैः, हस्ताम्बुजैः=करकमलैः, वारिमृदङ्गम्=जलरूपं वाद्यविशेषम्; अवादयन्=वादयामासुः ॥ ३९ ॥

उस तरङ्गरूप रङ्गभूमि में भौंरों के गान से मत्त कमलों द्वारा ताण्डव नृत्य सा किया जा रहा था, और मृणालदण्डों से जलवाद्ययन्त्र बजाया जा रहा था ॥ ३९ ॥

निमज्जनोन्मज्जनरागिणीभिर्नितम्बिनीभिर्निविडस्तडागः[2] ।
अशुम्भदम्भोनिधिरन्तरान्तराविर्भवन्तीभिरिवाप्सरोभिः ॥ ४० ॥

निमज्जनेत्यादि । निमज्जने=अवगाहे, उन्मज्जने=ऊर्ध्वङ्गमने च रागिणीभिः=लोलुपाभिः, नितम्बिनीभिः=स्थूलनितम्बाभिः, निविडः=व्याप्तः,

१. तरङ्गभृङ्गे—क० ।
२. निविडं तटाकम्—क०; वि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ाकः=सरोवरः, अन्तरा अन्तरा=मध्ये मध्ये, आविर्भवन्तीभिः=उद्गच्छ‐ ‍ाभिः, अप्सरोभिः देवस्त्रीभिः, अम्भोनिधिः=समुद्रः। इवेति सादृश्ये। ‍ाभत्=अशोभत ॥ ४० ॥

उस जल में बार बार डूबने-उतराने में आनन्द लेती हुई उन तरुणियों से वह ाशय इस तरह पूर्ण दिखायी देने लगा मानों किसी समुद्र में कुछ अप्सराएँ बार-ऊपर नीचे आ जा रही हों ॥ ४० ॥

क्रीडातडाकं क्षितिपालसूनुः केयूरभोगीन्द्रवृतेन दोष्णा।
ममन्थ भूभारधुरन्धरेण मन्थाद्रिणा सिन्धुमिवाब्जनाभः[1] ॥ ४१ ॥

क्रीडेत्यादि। क्षितिपालस्य=राज्ञः, सूनुः=पुत्रः सिद्धार्थः, केयूरेण=अङ्ग-ा, भोगीन्द्रेण=सर्पराजेन, वृतेन=वेष्टितेन, भूभारधुरन्धरेण=भूभारवाहिना, ा=बाहुना, "भुजबाहू प्रवेष्टो दोः" इत्यमरः। अब्जनाभः=पद्मनाभः, ाुरिति यावत्; मन्थाद्रिणा=मन्थाचलेन, सिन्धुम्=समुद्रम्, इव, क्रीडा-ागम्=विहारसरोवरम्, ममन्थ=मथितवान् ॥ ४१ ॥

राजकुमार ने अपने सर्प के समान मोटे केयूर अलङ्कार से घिरी भुजाओं से क्रीडा-सरोवर को ऐसे मथ डाला मानो भगवान् बिष्णु मन्थाचल के सहारे समुद्र रहे हों ॥ ४१ ॥

क्षोणीभुजा कुंकुमवारिधारा यन्त्रप्रयुक्ता रमणीमुखेषु।
पपात पंकेरुहकाननेषु प्रभेव भानोः प्रथमावतारा ॥ ४२ ॥

क्षोणीत्यादि। क्षोणीभुजा=नृपेण, यन्त्रेण=शृङ्गेण जलयन्त्रेण, प्रयुक्ता=ाीर्णा, कुङ्कुमवारिधारा=कुंकुममिश्रा जलधारा, रमणीमुखेषु=प्रमदामुखेषु, रुहकाननेषु=कमलवनेषु, भानोः=सूर्यस्य, प्रथमः अवतारः=प्रवेशो यस्याः प्रभातोदिता इत्यर्थः। प्रभा=रश्मिरिव, पपात=पतितवती ॥ ४२ ॥

राजकुमार द्वारा पिचकारी (शृङ्गपत्र) से कामिनियों के मुख पर फैंकी गयी ारा ऐसे ज्ञात हो रही थी मानो कमलवनों पर प्रातःकाल की पहली सूर्यकिरण ाही हो ॥ ४२ ॥

वामभ्रुवस्तं मणिशृङ्गमुक्तैरवाकिरन् कुंकुमवारिपूरैः।
तथागतः सोऽयमतीव रेजे सपल्लवश्रीरिव पारिजातः ॥ ४३ ॥

वामेत्यादि। वामे=रमणीये, भ्रुवौ=नेत्रोपरिभागस्थे रोमराजी, सुन्दर्यः, ाकुमारम्, मणिशृङ्गमुक्तैः=मणिमयजलयन्त्रोत्थितैः, कुंकुमवारिपूरैः=ामिश्रितजलप्रवाहैः, अवाकिरन्=सिषिञ्चुः। तथागतः=तं प्रकारं प्राप्तः

[1] वज्रनाभिः—क०, वि०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा जलैः सिक्त इत्यर्थः । सोऽयम्=सिद्धार्थः, सपल्लवश्च :=पल्लवशोभायुक्तः, पारिजातः=पारिजातवृक्ष इव, अतीव=अत्यन्तम्; रेजे=शुशुभे ॥ ४३ ॥

मनोहर नेत्रों वाली रमणियों द्वारा पिचकारियों से कुंकुमयुक्त जलधारा फेंके जाने से वह राजकुमार ऐसे शोभित हो रहा था मानों पारिजात (कल्प) वृक्ष पर नये नये कोमल किसलय अंकुरित हो गये हों ॥ ४३ ॥

कस्याश्चिदाविष्कृतचन्द्रिकायाः कराब्जयन्त्रप्रहिताम्बुधारा ।
पपात पत्युर्मणिमौलिबन्धे गङ्गेव देवस्य जटाकलापे ॥ ४४ ॥

कस्याश्चिदिति । आविष्कृता=प्रकाशिता, चन्द्रिका=चन्द्रिकात्वेन अध्यवसितं स्मितं यया तस्याः, कस्याश्चित्=अप्रसिद्धायाः तरुण्याः, कराब्जे=करकमले, स्थितेन=निहितेन, यन्त्रेण=शृङ्गयन्त्रेण, प्रहिता=प्रेरिता, अम्बुधारा=जलधारा, पत्युः=स्वामिनः, मणिमौलिबन्धे=मणिभूषितधम्मिल्लबन्धे, "मौलि-किरीटे धम्मिल्ले चूडाकङ्केऽलिमूर्धसु" इति हेमचन्द्रः । देवस्य=महादेवस्य शिवस्य, जटाकलापे=कपर्दे; गङ्गानदी इव पपात=अपतत् ॥ ४४ ॥

चन्द्रकिरणों के समान उज्ज्वल स्मित हास्य (मन्द मुस्कान) वाली किसी मृगनयनी द्वारा शृङ्गयन्त्रों से फेंकी गयी जलधारा उस राजकुमार के शिर पर ऐसे गिर रही थी मानों भगवान् शङ्कर के शिर पर गङ्गा का प्रपात हो रहा हो ॥ ४४ ॥

स्वहस्तयन्त्रप्रहिताभिरद्भिः पिधाय कस्याश्चन नेत्रयुग्मम् ।
विटः परस्या विनिमीलिताक्ष्याश्चुचुम्ब बिम्बाधरमादरेण ॥ ४५ ॥

स्वहस्तेत्यादि । स्वहस्ते=निजकरे, स्थितेन, यन्त्रेण=जलयन्त्रेण, प्रहिताभिः=प्रेषिताभिः, अद्भिः=जलैः, कस्याश्चन=समीपस्थायाः नितम्बिन्याः, नेत्रयुग्मम्=लोचनद्वयम्, पिधाय=आच्छाद्य, विटः=कामी, नायकस्य कश्चित् सखा वा, विनिमीलिताक्ष्याः=मुकुलिताक्ष्याः, बिम्बाधरम्=अरुणाधरोष्ठम्, आदरेण=स्नेहेन, चुचुम्ब=चुम्बितवान् ॥ ४५ ॥

उस जलक्रीड़ा के अवसर पर, एक समय राजकुमार ने किसी पास खड़ी तरुणी की आँखें, जल फेंक कर बन्द करते हुए, दूसरा तरुणी के अधरोष्ठ का अत्यन्त मनोयोग से चुम्बन कर लिया ॥ ४५ ॥

कयाचिदभ्यर्णजुषः सलीलं कान्तस्य कण्ठे प्रहिताम्बुधारा ।
चेतोभुवा चित्तमृगं ग्रहीतुं व्यापारिता वागुरितेव रेजे ॥ ४६ ॥

कयाचिदिति । कयाचित्=कामिन्या, अभ्यर्णजुषः=समीपं प्राप्तस्य, कान्तस्य=पत्युः; कण्ठे=ग्रीवायाम्; सलीलम्=लीलया सहितम्; प्रहिता=प्रेषिता, अम्बुधारा=जलधारा, चेतोभुवा=मनसिजेन मदनेन; चित्तम्=मन एव मृगम्=

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हरिणम्, ग्रहीतुम्=बन्धुम्, व्यापारिता=विस्तारिता; वागुरिका=मृगग्रहणार्थं रज्जुनिर्मितो जालविशेषः, "वागुरा मृगबन्धनी" इत्यमरः। रेजे=शोभां प्राप्तवती ॥ ४६ ॥

और उस समय किसी रमणी द्वारा फेंकी गयी अन्य जलधारा ऐसी प्रतीत हो रही थी मानो मदनरूपी व्याध ने कामी जन रूप मृग को पकड़ने के जाल फेंका हो ॥ ४६ ॥

वक्त्रे मनोज्ञस्मितचन्द्रिकाऽभूद् वक्षोरुहे निर्झरकान्तिरासीत् ।
मध्ये बभूवाभ्रसरिद्विलासो वामभ्रुवां मज्जनवारिधारा ॥ ४७ ॥

वक्त्रे इति। वामभ्रुवाम्=रमणीयभ्रुवाम्, मज्जनेन जाता, एकाऽपि वारिधारा=जलधारा, त्रिधा अभूत्, यथा सा वक्त्रे=मुखे पतिता मनोज्ञा स्मितचन्द्रिकारूपा; सैव वक्षोरुहे=स्तने पतिता, निर्झरकान्तिः=गिरिप्रवाह-शोभारूपा, मध्ये=वलग्नप्रदेशे, अभ्रसरिद्विलासः=आकाशगङ्गाया विलास-रूपा। अत्र वक्त्र-वक्षोरुह-मध्यानां चन्द्र-शैलाकाशरूपत्वं व्यज्यते। उल्लेखा-लंकारः। लक्षणं तु पूर्वमस्यैव सर्गस्य द्वितीयश्लोकव्याख्यायामुक्तम् ॥४७॥

राजकुमार द्वारा रमणियों पर फेंकी गयी उस जलधारा का एक साथ ही रमणियों के तीन स्थानों पर प्रभाव पड़ रहा था, पहले उनके मुखमण्डलपर स्मित हास्य की चान्दनी फूट रही थी, दूसरे उनके स्तन अपूर्व कान्ति से शोभायमान हो रहे थे और तीसरे उनका मध्यदेश जलबिन्दुओं से ऐसा द्योतित हो रहा था मानो आकाशगङ्गा में तारासमूह झिलमिला रहा हो ॥ ४७ ॥

आप्लावयामास करोदकेन वक्त्रं स कस्याश्चन मानवत्याः ।
तदेव तन्मानपरिग्रहस्य जलाञ्जलिप्रक्रममाललम्बे ॥ ४८ ॥

आप्लावयामास इति। सः=राजकुमारः, कस्याश्चन मानवत्याः= मानिन्याः, वक्त्रम्=मुखम्, करोदकेन=प्रसृतिगतजलेन, आप्लावयामास= सेचयामास; तदेव=करोदकसेचनमेव, तस्याः मानपरिग्रहस्य=रोषस्वीकरण-स्य, जलाञ्जलिप्रक्रमम्=निवापाञ्जलिरीतिम्, "प्रक्रमः क्रमेऽवसरे" इति मेदिनी। आललम्बे=अङ्गीचकार। प्रियकरोदकसेचनसमकालमेव मानिन्या मानपरिग्रहो विनष्ट इति भावः ॥ ४८ ॥

उस राजकुमार ने जलक्रीडा के समय किसी मानिनी के मुखमण्डल पर अपने हाथ की अञ्जलियों से इस तरह जल फेंकना प्रारम्भ किया कि तत्काल ही उस मानिनी का मान विनष्ट हो गया। (अर्थात् राजकुमार ने उस मानिनी के मान को जलाञ्जलि देकर सदा के लिए विनष्ट कर दिया) ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निमज्य कासाञ्चिदुदञ्चितानां वक्षोरुहाः प्रक्षरदम्बुधाराः ।
चकाशिरे चञ्चुपुटापकृष्टमृणालनाला[1] इव चक्रवाकाः ॥ ४९ ॥

निमज्येति । कासाञ्चित्=प्रमदानाम्, निमज्य=अवगाह्य, उदञ्चितानाम्=उन्मग्नानाम्; प्रक्षरन्ती=गलन्ती, अम्बुधारा=जलधारा येभ्यस्ते; वक्षोरुहाः=स्तनयुग्मानि; चञ्चुपुटेन=त्रोटपुटेन, अपकृष्टाः=आकृष्टाः, मृणालनालाः=मृणालदण्डाः, यैस्ते; चक्रवाकाः=कोकपक्षिणः; "कोकश्चक्रश्चक्रवाकः" इत्यमरः । इवेति सादृश्ये । चकाशिरे=शोभितवन्तः ॥ ४९ ॥

जल में डुबकी लगाकर पुनः बाहर निकलने पर, स्तनों पर निरन्तर टपकती हुई जल की बूँदें ऐसी लग रही थीं मानो चक्रवाक पक्षी अपनी चोंच में मृणालदण्ड पकड़े हुए हों ॥ ४९ ॥

निराकृते काऽपि तरङ्गवातैः स्तनोत्तरीये सति लज्जमाना ।
कुचस्थलं नव्यनखव्रणाङ्कं डिण्डीरपिण्डेन तिरश्चकार ॥ ५० ॥

निराकृते इति । काऽपि=वराङ्गना, तरङ्गाणाम्=वीचीनाम्, वाताः=वायवस्तैः; स्तनोत्तरीये=स्तनाच्छादके संव्यानवस्त्रे, निराकृते=अपनीते सति; लज्जमाना=लज्जां प्राप्ता; नव्यनखव्रणाङ्कम्=नूतननखक्षतचिह्नम्; डिण्डीरपिण्डेन=फेनखण्डेन; "पिण्डीरोऽब्धिकफः फेनः" इत्यमरः । तिरश्चकार=आच्छादयामास ॥ ५० ॥

वहाँ वापी की प्रचण्ड तरङ्गों की वायु द्वारा स्तनों पर रखा हुआ वस्त्र उड़ जाने से लज्जित हुई किसी तरुणी ने अपने स्तनों पर नायक द्वारा कृत नखक्षत चिह्न को फेनपिण्ड से ही आवृत कर लिया ॥ ५० ॥

कस्याश्चिदन्तःसलिले निमज्य समुच्चलन्त्याः सरसं मुखाब्जम् ।
समुज्जिहानस्य समुद्रमध्यात् तारापतेर्बिम्बमिवाबभासे ॥ ५१ ॥

कस्याश्चिदिति । सलिले इति अन्तःसलिले=सलिलमध्ये; विभक्त्यर्थेऽव्ययीभावः । "तृतीयासप्तम्योर्बहुलम्" (पा० सू० २.४.८४) इति अमभावः पाक्षिकः । समुच्चलन्त्याः=बहिर्विनिर्गच्छन्त्याः; कस्याश्चित् तरुण्याः; सरसम्=रमणीयम्; मुखाब्जम्=मुखकमलम्, समुद्रमध्यात्=समुद्रतः; समुज्जिहानस्य=उद्गच्छतः; तारापतेः=नक्षत्राधिपस्य चन्द्रस्य, बिम्बम्=मुखमिव; आबभासे=प्रचकाशे ॥ ५१ ॥

वापी में गोता लगाकर पुनः अपना शरीर जल से बाहर निकालती हुई किसी तरुणी का मुखमण्डल ऐसा लग रहा था मानों समुद्र से निकलते तारापति चन्द्रमण्डल का आविर्भाव हुआ हो ॥ ५१ ॥

१. पुटोपलक्ष्य ०–वि०, म०; ०पुटोपकृष्टः०–पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अम्भोविहाराकुलितैः　　पयोभिरपाकृतेष्वञ्जनमण्डनेषु ।
रोषादिवान्तःपुरसुन्दरीणां　　नेत्रारविन्दान्यरुणीबभूवुः ॥ ५२ ॥

अम्भोविहारेत्यादि । अम्भोविहारेण=जलक्रीडया, आकुलितैः=क्षोभितैः; पयोभिः=जलैः; अञ्जनमण्डनेषु=कज्जलरूपालङ्कारेषु; अपाकृतेषु=क्षालितेषु; अन्तःपुरसुन्दरीणाम्=अन्तःपुरनारीणाम्; नेत्रारविन्दानि; नेत्रकमलानि, रोषादिव=क्रोधादिव, अरुणीबभूवुः=रक्तीबभूवुः ॥ ५२ ॥

उस जलक्रीड़ा के कारण किसी कामिनी के बारम्बार जल गिरने से धुले हुए आँजन के कारण लाल हुए नेत्रों से ऐसा लग रहा था मानो वे किसी पर क्रोध कर रही हों ॥ ५२ ॥

पयोधराः पङ्कजलोचनानां पाथोविहारे पतदम्बुधाराः ।
नागेन्द्रकुम्भा इव नद्धहाराः सनिर्झरौघा इव शैलशृङ्गाः ॥ ५३ ॥

पयोधरा इति । पाथोविहारे=जलक्रीडायाम्; पतन्त्य=स्रवन्त्यः, या अम्बुधाराः=जलधाराः, येभ्यस्ते; पयोधराः=स्तनाः, नागेन्द्रकुम्भाः=गजराजमस्तकप्रदेशाः, नद्धहाराः=बद्धमुक्ताहाराः, इव; अथवा निर्झरस्य=प्रस्रवणस्य, ओघेन=प्रवाहेण सह वर्तन्त इति तादृशाः, उस्रः प्रस्रवणं वारिप्रवाहो निर्झरो झरः", "ओघो वृन्देऽम्भसां रये" इत्युभयत्रामरः । शैलशृङ्गाः=पर्वतकूटा इव; "क्रीडाम्बुयन्त्रे शृङ्गोऽस्त्री पर्वताग्रप्रभृत्वयोः" इति वैजयन्ती । शुशुभिरे इति शेषः ॥ ५३ ॥

उन कमलनयना सुन्दरियों के स्तनमण्डल, उस जलक्रीड़ा के समय गिरने वाली जलधारा से, ऐसे प्रतीत हो रहे थे मानो मोतियों के हारों से अलंकृत हाथियों के मस्तक हों, या बहते हुए झरनों से युक्त कोई पर्वतकूट हो ॥ ५३ ॥

अनङ्गसाम्राज्यमहाभिषेककुम्भाविवाम्भोरुहलोचनायाः ।
वक्षोरुहौ मङ्गलशृङ्गसंस्थैरवाकिरन् वारिभरैः परस्याः ॥ ५४ ॥

अनङ्गेत्यादि । (तत्र) कस्याश्चित् अम्भोरुहलोचनायाः=कमलनेत्रायाः; अनङ्गस्य=मदनस्य, यः साम्राज्यमहाभिषेकः=चक्रवर्तित्वज्ञापकं महाभिषेचनम्, तत्सम्बन्धिनौ कुम्भौ=कलशौ; इवेति सादृश्ये; वक्षोरुहौ=स्तनौ, परस्याः=अन्यस्याः; मङ्गलशृङ्गसंस्थैः=मङ्गलकरक्रीडाम्बुयन्त्रस्थैः, वारिभरैः=जलदैः; अवाकिरन्=व्यक्षिपन्, अपूरयन्नित्यर्थः । काश्चिदिति शेषः ॥ ५४ ॥

और दूसरी किसी कमलनयना का स्तनमण्डल, उस जलक्रीड़ा के समय पिचकारियों से फेंकी जाती जलधारा से ऐसा प्रतीत हो रहा था जैसे कामदेव के राज्याभिषेक के लिए प्रयुक्त होने वाला महान् कलश हो ॥ ५४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विभूषणैर्विद्रुम-पुष्यराग-वैडूर्य-गारुत्मत-पद्मरागैः[1] ।
अङ्गच्युतैरम्बुजलोचनानां[2] रत्नाकरोऽभूत् कमलाकरोऽपि ॥ ५५ ॥

विभूषणैरिति । अम्बुजलोचनानाम्=कमलनयनाम्, अङ्गेभ्यः=अवयवेभ्यः, च्युतैः=जले पतितैः, विद्रुमेण, पुष्परागेण, वैदूर्येण, गारुत्मतेन, पद्मरागेण—इत्यादि रत्नजातिभेदैः, विभूषणैः=अलङ्करणैः, स कमलाकरः=पद्माकरोऽपि रत्नाकरः=समुद्रः, अभूत् = बभूव ॥ ५५ ॥

जलक्रीड़ा के समय, परस्पर संघट्टन के कारण गिरे हुए, प्रवाल, पुखराज, वैदूर्य, गारुत्मत एवं पद्मराग आदि मणि-रत्नों से वह वापी का जलाशय दूसरा रत्नाकर ही (समुद्र) प्रतीत हो रहा था ॥ ५५ ॥

एवं स कृत्वा सरसीविहारं सहावरोधैः सरसीरुहाक्षः ।
उत्तीर्य तस्यास्तटसन्निविष्टं बद्धोपचारं सदनं विवेश ॥ ५६ ॥

एवमिति । सरसीरुहाक्षः=कमलनयनः; सः=असौ कुमारः; अवरोधैः=अन्तःपुरजनैः सह, सरसीविहारम्=जलविहारम्; कृत्वा=विधाय , तत उत्तीर्य,=प्रस्थाय, तस्याः=वाप्याः; तटसन्निविष्टम्=तीरे निर्मितम्, बद्धोपचारम्=सन्निहितराजोपचारमित्यर्थः; सदनम्=गृहम्, "निशान्तवस्त्यसदनभवनागारमन्दिरम्" इत्यमरः । विवेश=प्रविष्टवान् ॥ ५६ ॥

यों, वह कमलतुल्य नेत्रों वाला राजकुमार अपने अन्तःपुरवासी स्त्रीजनों के साथ जलक्रीड़ा करने के बाद उस वापी से निकलकर उसी के किनारे पर बने हुए, जिसमें राजोचित सभी सामग्रियाँ विद्यमान थीं, विशिष्ट प्रासाद में प्रविष्ट हुआ ॥ ५६ ॥

तत्रानुरक्तैः सह मित्रवर्गैः सङ्कलिपताकल्पविकल्पवेषः ।
रसोत्तरव्यञ्जनपाकहृद्यमाहारमार्यः परमभ्यनन्दत् ॥ ५७ ॥

तत्रेति । तत्र=तीरसन्निविष्टगृहे, अनुरक्तैः=प्रेमयुतैः, मित्रवर्गैः=सुहृज्जनैः सह; सङ्कलिपताः=विरचिताः, आकल्पविकल्पाः=मण्डनविशेषाः यस्मिन् तादृशे, वेषः=परिधानम्, यस्य सः; आर्यः =श्रेष्ठः स राजकुमारः; "स्यादामण्डने; कल्पने चापि" इति हेमचन्द्रः । रसेन=समुचिततत्तद्रसेन, उत्तरः=श्रेष्ठो यो व्यञ्जनानाम्=तेमनादीनाम् पाकः=पचनम्, तेन हृद्यम्=हृदयप्रियम्; "व्यञ्जनंश्मश्रुचिह्नयोः । तेमनेऽवयवे कादौ" इति हेमचन्द्रः । परम्=विशिष्टम्; आहारम्=भोजनम्=अभ्यनन्दत्=अभिनन्दितवान् ॥५७॥

वहाँ वह, अपने सहचर मित्रवर्ग के साथ, नवीन वस्त्रों, अलङ्कारों एवं गन्धलेप आदि से शरीर को अलंकृत करने के बाद उत्तम-उत्तम भोज्य एवं पेय पदार्थों का ग्रहण (खा-पीकर) अत्यन्त आनन्दित हुआ ॥ ५७ ॥

१. पुष्पराग—पा० ।

२. अम्बुच्युतैः—पा०, क० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विचित्रपट्टास्तरणोपपन्नं विकीर्णपुष्पप्रकरं कुमारः ।
अभ्यन्तरस्थापितभद्रपीठमास्थानिकं मण्डपमध्यवात्सीत् ॥ ५८ ॥

विचित्रेत्यादि । ततः सः कुमारः=सिद्धार्थः; विचित्रैः=नानावर्णैः, पट्टा-
(णैः=कौशेयपरिस्तरणैः, उपपन्नम्=युक्तम्; विकीर्णः=विक्षिप्तः, पुष्पप्रकरः=
नराशिर्यस्मिंस्तम्; अभ्यन्तरे=अन्तर्भागे, स्थापितम्=प्रतिष्ठितम्,
पीठम्=भद्रासनं यस्मिंस्तम्; आस्थानिकम्=सभासम्बन्धिनम्, मण्डपम्=
ोष्ठविशेषम्, अध्यवात्सीत्=अवसत् ॥ ५८ ॥

भोजन कर चुकने के बाद, वह राजकुमार उस मण्डप में पहुँचा जहाँ नाना-
र की शय्याएँ बिछी हुई थीं, जिनपर कौशेय (रेशमी) वस्त्र आच्छादित थे
सुगन्धित फूल, लुभावने तरीके से सजे हुए थे ॥ ५८ ॥

तत्र क्षोणीरमणतनयो मण्डपे वाणिनीनां[1]
नृत्तारम्भैर्निरुपमरसैर्वाद्यघोषैर्मनोज्ञैः ।
वीणानादैः[2] श्रवणसुभगैर्वेणुनादैश्च हृद्यैः
श्रीमानह्नस्त्रिभुवनगुरुः शेषमेष व्यनैषीत् ॥ ५९ ॥

इति बुद्धघोषचरिते पद्यचूडामणिनाम्नि महाकाव्ये सप्तमः सर्गः ॥

तत्रेति । तत्र=मण्डपे, एषः=अयं श्रीमान्=लक्ष्मीवान्; त्रिभुवनगुरुः=लोक-
गुरुः; क्षोणीरमणस्य=पृथ्वीपतेः, तनयः=कुमारः; निरुपमाः=असदृशाः,
ाः=शृङ्गारादयो येषु तैः; वाणिनीनाम्=नर्तकीनाम्; "वाणिन्यौ नर्तकी-
ौ" इत्यमरः । नृत्यारम्भैः=नाटचप्रक्रमैः, मनोज्ञैः=मनोहरैः; वाद्यघोषैः=
द्यध्वनिभिः; श्रवणसुभगैः=कर्णप्रियैः; वीणानादैः=सुषिरवाद्यध्वनिभिः;
ः=दिवसस्य; शेषम्=शेषभागम्; व्यनैषीत्=व्यतीयाय ॥ ५९ ॥

इति पद्यचूडामणिनामके महाकाव्ये कीर्त्तिव्याख्यायां सप्तमः सर्गः ॥

वहाँ उस मण्डप में राजकुमार ने राजनर्त्तकियों के अदृष्टपूर्व नृत्यों से, मनोरथ
ारादि रसों से पूर्ण वाद्यों की ध्वनियों से,कर्णप्रिय वीणा की झङ्कार से, और हृदय
प्रसन्न करने वाली वांसुरी की तान से, मन को लुभाते हुए अपना शेष दिन
ाया ॥ ५९ ॥

पद्यचूडामणिमहाकाव्य के सप्तम सर्ग का भाषान्तर सम्पन्न ॥ ७ ॥

---

१. वाहिनीनाम्--पा० ।		२. वीणावादैश्च--क० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टमः सर्गः

सूर्यास्तकालवर्णनम्

तत्रान्तरे बिम्बममन्दरागं पपात भानोर्दिशि पश्चिमायाम् ।
आकाशकोशाद् गलितस्य नीलाद् आकृष्टलीलं मणिदर्पणस्य ॥ १ ॥

अथ पञ्चत्रिंशत्या पद्यैः सूर्यास्तगमनसमयं वर्णयति कविस्तत्रेत्यादिना। तत्रान्तरे=अह्नोऽवसाने; भानोः=सूर्यस्य; नीलात्=नीलवर्णात्; आकाशकोशात्=गगनरूपपिधानात्, गलितस्य=पतितस्य; मणिदर्पणस्य=मणिमुकुरस्य, आकृष्टा=प्राप्ता, लीला=शोभा, येन तम्; अमन्दरागम्=अतिरक्तम्, बिम्बम्=आकारम्, पश्चिमायाम्=चरमायाम्, दिशि=काष्ठायाम्; पपात=पतितवान् ॥

सूर्यास्तकालवर्णन—दिवसावसान के अनन्तर, सूर्य के रक्तवर्ण का आकार पश्चिम दिशा में जाकर ऐसे ही छिप गया जैसे कोई नीले वस्त्र में दर्पण छिपा हुआ हो। १ ॥

आकाशसिन्धोरपराह्णकर्णधाराधिपः संहृतरश्मिजालः ।
प्रक्षेपणीभिः स्फटिकात्मिकाभिर्दिगन्ततीरं तरणिं निनाय ॥ २ ॥

आकाशेत्यादि। आकाशः=गगनमेव सिन्धुः=समुद्रस्तस्य; "उदन्वानुदधिः सिन्धुः" इत्यमरः। अपराह्णः=सायङ्काल एव कर्णधाराधिपः—नाविकानाम्पतिः; संहृतम्=संक्षिप्तम्, रश्मीनाम्=सूर्यकिरणानामेव रश्मीनाम्=रज्जूनाम्; जालम्=समूहो येन सः; स्फटिकात्मिकाभिः=सूर्यकान्तशिलारूपाभिः; "स्फटिकोऽर्को रविग्रावा सूर्यकान्तोऽनलोपलः" इति वैजयन्ती। प्रक्षेपणीभिः=नौकादण्डैः, "नौकादण्डः क्षेपणी स्यात्" इत्यमरः। तरणिम्—सूर्यमेव नावम्; "द्युमणौ तरणिः पुंसि कुमारी-नौकयोस्त्रिषु" इति त्रिकाण्डशेषः। दिगन्ततीरम्=दिगन्ततटम्; निनाय=अनैषीत् ॥ २ ॥

आकाश-समुद्र के स्वामी संक्षिप्त किरण वाले सायङ्काल ने सूर्यकान्तशिलारूप नौका से सूर्य को समुद्र के किनारे पश्चिम दिशा में उसी तरह पहुँचा दिया जैसे कोई चतुर मल्लाह रस्सियों के सहारे दृढ़ नौकादण्डों (पतवारों) से किसी नाव को समुद्र के किनारे लगा देता है ॥ २ ॥

अशोकपुष्पस्तबकाभिताम्रमस्ताचले मण्डलमुष्णभानोः ।
बभार सिन्धोर्मथने विषक्तप्रवालवल्लीवलयस्य शोभाम् ॥ ३ ॥

अशोकेत्यादि। अस्ताचले—अस्ताद्रौ; अशोकस्य=अशोकवृक्षस्य, पुष्पस्तबक इव—पुष्पगुच्छ इव, अभिताम्रम्—अतिरक्तम्; उष्णभानोः—सूर्यस्य;

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लम्—वृत्तम्; सिन्वोः=समुद्रस्य, मथने=आलोडने; विषक्तस्य=लग्नस्य; लवल्लीवलयस्य=विद्रुमलतामण्डलस्य, शोभाम्=कान्तिम्; वभार=धार- ाम ॥ ३ ॥

उस समय अशोकवृक्ष के पुष्पगुच्छ के समान रक्तवर्ण होकर अस्ताचल की तरफ हुए सूर्य उसी तरह शोभित हो रहे थे मानो समुद्रमन्थन में प्रयुक्त हुआ कोई मलतामण्डल हो ॥ ३ ॥

भास्वानभीप्सुः परलोकयात्रां पद्माकरेषु प्रतिबिम्बलक्षात् ।
आप्रच्छनार्थं प्रियबान्धवानामम्भोजिनीनामिव सम्प्रविष्टः ॥ ४ ॥

भास्वानिति । परलोकयात्राम्=देशान्तरगमनम्, अभीप्सुः=प्राप्तुमिच्छुः; स्वान्—सूर्यः; पद्माकरेषु=पद्मसरःसु; प्रतिबिम्बलक्षात्=प्रतिबिम्बव्याजात्; क्षं व्याजशरव्ययोः" इति हेमचन्द्रः । प्रियाश्च ते बान्धवा =बन्धुजना यस्य म्; आप्रच्छनार्थम्=आलिङ्गनकुशलप्रश्नादिना सभाजनार्थम्; "आनन्दन- ाजने, आप्रच्छनम्" इत्यमरः । अम्भोजिनीनाम्=अम्भोजसमूहानाम्, लादिभ्य इनिर्वक्तव्यः" (पा० सू० वा० ४.२.५१) इति समूहार्थे इनि- ये, ङीप् । सम्प्रविष्टः=प्रवेशमाप्त इव । बभूवेति शेषः ॥ ४ ॥

देशान्तर गमन की इच्छा वाले सूर्य, कमलों के जलाशयों में अपने प्रतिबिम्ब याज (बहाने) से ऐसा लग रहे थे मानो वे कमलिनीवन में अपने प्रियजनों कुशलक्षेम पूछने के लिए प्रविष्ट हो रहे हो ॥ ४ ॥

क्रमेण मध्यं चरमाम्बुराशेः प्राभाकरं बिम्बमलञ्चकार ।
हरिन्मणिश्याममिवाच्युतस्य वक्षःस्थलं कौस्तुभनाम रत्नम् ॥ ५ ॥

क्रमेणेति । चरमाम्बुराशेः—पश्चिमसमुद्रस्य, मध्यम्=मध्यभागे; प्रभाकर- ं प्राभाकरम्=सूर्यसम्बन्धि, "तस्येदम्" (पा० सू० ४.३.१२०) इत्यण् ।यः । विम्बम्=मण्डलम्; "बिम्बोऽस्त्री मण्डलं त्रिषु" इत्यमरः । अच्यु- य=विष्णोः, वक्षःस्थलम्=वक्षःस्थानं; कौस्तुभ इति नाम—आख्या यस्य तत्; न्मणिवत्—नीलरत्नवत्, श्यामम्=श्यामवर्णम्, रत्नम्=मणिः; इवेति ।श्ये । क्रमेण=क्रमशः; अलञ्चकार=शोभयामास ॥ ५ ॥

सूर्य का बिम्ब पश्चिम समुद्र में डूबता हुआ उसी तरह सुन्दर लग रहा था जैसे मणितुल्य भगवान् विष्णु के वक्षःस्थल पर कौस्तुभमणि शोभित हो रही हो ॥

आवर्तवेगादपराम्बुराशेरावृत्तबिम्बं[1] हरिदश्वबिम्बम् ।
भूयोऽपि चक्रभ्रममुन्मृजार्थमारोपितं[2] विश्वसृजेव रेजे ॥ ६ ॥

१. ०रावर्तमानं—क०, पा० ।　　२. ०मुन्मार्जनार्थं०—क०, पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आवर्तेत्यादि। आवर्तस्य=जलभ्रमस्य, वेगात्=प्रवाहात् (जवात्); "आवर्तः पयसां भ्रमः", इति वैजयन्ती, "वेगः प्रवाहजवयोः" इति चामरः। अपराम्बुराशेः=पश्चिमसमुद्रस्य, आवृत्तम्=भ्राम्यत्, बिम्बम्=प्रतिबिम्बं यस्य तत्, "बिम्बं तु प्रतिबिम्बे स्यान्मण्डले बिम्बिकाफले" इति हैमाः। हरितः=नीलाः, अश्वाः=हयाः यस्य सः हरिदश्वः=सूर्यः "द्युमणिर्हरिदश्वोऽद्रिः", इति वैजयन्ती। तस्य बिम्बम्=मण्डलम्, विश्वसृजा=ब्रह्मणा, चक्रस्य=शाणचक्रस्य, भ्रमम्=भ्रमणम्, भ्राम्यच्चक्रमित्यर्थः, उन्मृजार्थम्=उत्तेजनार्थम्, भूयोऽपि=पुनरपि, आरोपितम्=चालितम्; इव; रेजे=शुशुभे ॥ ६ ॥

जलभ्रमण के वेग से पश्चिम समुद्र में आये आवर्त के कारण सूर्य के प्रतिबिम्ब का भी आवर्तन हो रहा था मानों विधाता उस बिम्ब में तेज धार लाने लिये चक्र घुमा रहे हों ॥ ६ ॥

मया विनाब्धिः[1] प्रलयप्रसङ्गं[2] वेला कदाचिन्न विलङ्घितेति।
सत्यं चकारेव तदङ्गहस्तैरादाय तप्तारुणलोहकूटम् ॥ ७ ॥

मयेति। अब्धिः=समुद्रः, मया=समुद्रेण, प्रलयप्रसङ्गं विना=प्रलयकालसम्बन्धं वर्जयित्वा, कदाचित्=कदापि, वेला=तीरम्, मर्यादा च, न विलङ्घिता=नातिक्रान्ता"—इति सत्यम्=शपथम्, "सत्यं शपथतथ्ययोः" इत्यमरः। तरङ्गाः=वीचय एव हस्ताः=कराः, तैः, तप्तम्=सन्दीप्तम्, अरुणम्=रक्तवर्णम्, सूर्यमेव लोहकूटम्=अयःपिण्डम्, "अयोघने शैलशृङ्गे सीराङ्गे कूटमस्त्रियाम्" इत्यमरः। आदाय=गृहीत्वा, चकार=कृतवान् ॥ ७ ॥

उस समय सूर्य को अपने में आत्मसात् कर, मानों समुद्र "मैंने (समुद्र ने) प्रलयकाल को छोड़कर अपनी सीमा का उलंघन कभी नहीं किया"—अपने इस सत्य वचन को हाथ में उष्ण लोहपिण्ड लेकर प्रमाणित कर रहा था ॥ ७ ॥

दिनावसानेन परीक्षकेण मन्दप्रदीप्तिर्द्युमणिर्महार्हः[3]।
और्वाग्निना तेजयितुं किलान्तरुदन्वदङ्गारभरे[4] निरस्तः ॥ ८ ॥

दिनेत्यादि। दिनावसानेन=परीक्षकेण=सायङ्कालरूपस्वर्णपरीक्षकेण, मन्दप्रदीप्तिः=मन्दप्रभोऽपि, महार्हः=महार्घः, द्युमणिः=सूर्यः, और्वाग्निना=वडवानलेन, तेजयितुम्=प्रकाशयितुम्, किलेति इवार्थे। अन्तः=अन्तभागे, स्थितेनेति शेषः, और्वाग्निना इत्यस्य विशेषणम्, समुद्र एव, अङ्गाराणाम्=निरग्नीनां दग्धकाष्ठानाम्, भरः=समूहः, तस्मिन्, निरस्तः=क्षिप्तः ॥ ८ ॥

---

१. विनासीत्—वि० ।
२. प्रसङ्गे—पा० ।
३. महार्हम्—क० ।
४. ०दङ्गारभरैः—क० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उस समय ऐसा लग रहा था मानो सन्ध्याकालरूपी सुवर्णकार ने अल्प आभा
ले परन्तु बहुमूल्य दिनमणि को समुद्रस्थित बाडवाग्नि से पुनः तपाकर चमकाने के
ए समुद्ररूपी भट्ठी में डाला हो ।। ८ ।।

अस्तङ्गते भर्तरि भृङ्गमालामङ्गल्यसूत्रं दिवसान्तधात्री ।
अम्भोजिनीनामपसौरभाणामपाकरोदम्बुरुहोपकण्ठात् ॥ ९ ॥

अस्तमिति । दिवसान्तधात्री=सन्ध्यारूपा उपमाता, भर्तरि=पत्यौ, सूर्ये
, अस्तं गते=अन्तमिते, नष्टे च; अपसौरभाणाम्=गन्धहीनानाम्, कुंकुम-
हृतानां वा, मृतभर्तृकानामित्यर्थः, "सौरभं घुसृणं च तत्" इति त्रिकाण्ड-
ः। अम्बुरुहोपकण्ठात्=पद्मरूपकण्ठसमीपात्, पद्मसमीपाच्च, भृङ्गमाला=
मरपंक्तिरेव मङ्गल्यसूत्रम्=मङ्गल्यतन्तुम्, अपसारयामास ॥ ९ ॥

सन्ध्यारूप उपमाता (धात्री) ने सूर्यरूप भर्ता के अस्त (मृत) हो जाने के
वहीन (भर्ता के मर जाने=कुंकुमरहित) कमलिनीरूप नारियों के कण्ठप्रदेश से
रावलिरूप मङ्गल्यसूत्र हटा दिया। (सन्ध्याकाल होने पर सूर्य के अस्त होने
भौंरों ने कमलों की गन्ध लेने के लिये प्रयास बन्द कर दिया)।। ९ ।।

विश्लेषदुःखादिव तिग्मभानोः सङ्कोचभाजां नलिनीवधूनाम् ।
शोकाग्निधूमालिरिवोज्जजृम्भे भृङ्गावली पङ्करुहाननेभ्यः ॥ १० ॥

विश्लेषेत्यादि । तिग्मभानोः=तीक्ष्णकिरणस्य सूर्यस्य, विश्लेषः=वियो-
य, दुःखात्=व्यसनात्, सङ्कोचभाजाम्=मुकुलीभाव प्राप्तानाम्, नलिनी-
नाम्=कमलिनीरूपवधूनाम्, पङ्करुहाण्येवाननानि=मुखानि, तेभ्यः, शोका-
: धूमपरम्परा, इव, भृङ्गावलिः=भृङ्गसमूहः, ऊज्जजृम्भे=उज्जृम्भणं प्राप ॥

सूर्य के वियोगजन्य शोक के कारण संकुचित हुई कमलिनियों के मुखकमलों
उड़ती हुई भृङ्गपंक्ति ऐसी लग रही थी मानों उन कमलिनियों का शोकाग्नि का
ग धूम के रूप में बाहर प्रकट हो रहा हो ।। १० ।।

सौरभ्यलोभात् सविधे चरन्ती भृङ्गावली पद्मवनेषु रेजे ।
वियोगिनीभिर्नलिनीवधूभिर्व्यापारितोद्बन्धनवागुरेव ॥ ११ ॥

सौरभ्येत्यादि । पद्मवनेषु=कमलवनेषु; सौरभ्यलोभात्=सुगन्धतृष्णया,
वधे=समीपे, चरन्ती=उड्डयनं कुर्वन्ती, भृङ्गावली=भृङ्गसमूहः; वियोगि-
भिः=विरहिणीभिः; नलिनीभिः=पद्मिनीभिरेव वधूभिः=स्त्रीभिः; व्यापा-
ा=सज्जीकृता; उद्बन्धनाय=मरणसाधनीभूतगलोर्ध्वबन्धनाय, कल्पिता
ुरा=जालम्; इवेति सादृश्ये; रेजे=शोभामाप ॥ ११ ॥

गन्ध लेने के लोभ से पद्मवनों पर घूमता हुआ भृङ्गसमूह ऐसे शोभित हो रहा
मानों वियोगिनी कमलिनियों ने उनको पकड़ने के लिये जाल (=वागुरा) फैल
। हो ।। ११ ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

**विहाय भास्वान् नलिनीं सरागामस्तङ्गतोऽभून्मम बाल्यमित्रम्[1]।
इत्यार्तियोगादिव चक्रवाकस्त्यक्त्वा प्रियां दीनतरं ररास॥ १२॥**

विहायेति। (अयं) भास्वान्=सूर्यः; सरागाम्=रक्तवर्णाम् अनुरक्तां च, विहाय=त्यक्त्वा; अस्तम्=अस्ताचलम्; गतः=प्राप्तः- इति=समानहेतुना; मम=चक्रवाकस्य; बाल्यात् प्रभृति मित्रम्=सखा; अभूत्=बभूव; इति=इत्थम्; आर्त्तियोगात् सुहृद्विरहदुःखसम्बन्धात्; प्रियाम्=पत्नीं चक्रवाकीं प्रति, दीनतरम्=अतिकरुणया, ररास=चुक्रोश॥ १२॥

"यह सूर्य भी, अपनी अनुरक्ता कमलिनियों को छोड़कर, अस्ताचल की तरफ चला गया, ऐसा करके इसने भी मेरे द्वारा बचपन से किये जा रहे कर्म (पत्नी-वियोगजन्य शोक) की ही पुनरावृत्ति की है"—यह सोचकर चक्रवाक, शोकपीड़ा के और अधिक बढ़ जाने से, अत्यन्त दीनतापूर्वक क्रन्दन करने लगा॥ १२॥

**प्रतायमाना[2] प्रथमेतरस्मिन् काष्ठान्तराले कनति स्म सन्ध्या।
दिवानिशान्योऽन्यनिपीड़नेन जाज्वल्यमाना ज्वलनप्रभेव॥ १३॥**

प्रतायमानेति। प्रथमात्=पूर्वदिशातः, इतरस्मिन्=पश्चिमदिशि, काष्ठान्तराले=दिगभ्यन्तरे; "दिशस्तु ककुभः काष्ठा", "अभ्यन्तरं त्वन्तरालम्" इति चामरः। प्रतायमाना=विस्तीर्यमाणा, सन्ध्या=रात्रिन्दिनसंयोजकसमयः, दिवा च निशा च तयोः, अन्योऽन्यनिपीडनेन=परस्परसम्मर्दनेन; जाज्वल्यमाना=अत्यन्तं ज्वलन्ती, ज्वलनप्रभा=वह्निद्युतिः; "कृपीटयोनिर्ज्वलनः" इत्यमरः। इवेति सादृश्ये। कनति स्म=बभासे॥ १३॥

पूर्व दिशा से पश्चिम दिशा तक फैली हुई सन्ध्या रात और दिन के परस्पर सम्मर्दन (टकराहट) से निकली देदीप्यमान अग्निकान्ति से अत्यधिक शोभित हो रही थी॥ १३॥

**अस्तङ्गतं भास्करमम्बरश्रीरालोक्य[3] शोकातिशयाकुलेव।
नक्षत्रमुक्ताक्षवटं दधाना सन्ध्यातपं चीवरमाललम्बे॥ १४॥**

अस्तमिति। भास्करम्=सूर्यम्, अस्तम्=अस्ताचलम्, गतम्=यातम्, आलोक्य=दृष्ट्वा, शोकातिशयेन=दुःखातिशयेन, आकुला=व्याकुला, इव, अम्बरश्रीः=गगनलक्ष्मीः; नक्षत्राणाम्=तारकाणाम्, एव, मुक्ताक्षाणाम्=मुक्तामयानामक्षाणाम्, वटम्=सूत्रम्; "गुणो वराटो रज्जुः स्त्री न ना

१. बालमित्रम्—म०, पा०।
२. प्रतायमाने—म०, पा०।
३. भास्वर०—म० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वा वटी त्रयी" इति वैजयन्ती । दधाना=धारयित्री, सन्ध्यातपम्=सन्ध्या-
ाशरूपम्, चीवरम्=वल्कलम्, आललम्बे=शिश्रिये ॥ १४ ॥

सूर्य को अस्तङ्गत हुआ जानकर अत्यन्त शोकाकुल हुई आकाशलक्ष्मी ने नक्षत्र-मुक्तामय जपमाला एवं सन्ध्याप्रकाशरूप वल्कल धारण कर लिया ॥ १४ ॥

रुद्राक्षमालावलयोज्ज्वलानि तपोधनानां करपल्लवानि ।
सन्ध्याप्रणामाय सभृङ्गचक्रैः सङ्कोचमापुः सह पद्मषण्डैः ॥ १५ ॥

रुद्राक्षेति । रुद्राक्षमालानां वलयेन=मण्डलेन, उज्ज्वलानि=दीप्राणि; ोधनानाम्=तपस्विनाम्, करपल्लवानि=करकिसलयानि; सभृङ्गचक्रैः=ृङ्गसमूहसहितैः; पद्मषण्डैः=पद्मसमूहैः; सहः; सहोक्तिरलङ्कारः; "सहोक्तिः ःभावश्चेद् भासते जनरञ्जनः" इति लक्षणात् । सन्ध्याप्रणामाय=सन्ध्या-स्काराय; सङ्कोचम्=संयमनम्; आपुः=प्रापुः ॥ १५ ॥

तपस्वियों के रुद्राक्षमाला के मण्डल से शोभित करपल्लव, देवताओं को सान्ध्य-लेक प्रणामहेतु, भृङ्गसमूहसहित कमलपुष्पों के साथ बँध गये । (अर्थात् तपस्वि-भी सन्ध्याकाल में हाथों में कमल लेकर देवताओं को प्रणाम करने लगे) ॥

आकाशनीलोत्पलभृङ्गभङ्गिराशावधूनीलपटोत्तरीयम् ।
विश्वम्भराभूमिगृहप्रवेशोऽप्यजृम्भतान्धङ्करणी[1] तमिस्रा ॥ १६ ॥

आकाशेत्यादि । आकाशस्यैव नीलोत्पलस्य भृङ्गभङ्गिः=भृङ्गश्रीः;आशानाम् ्शामेव वधूनां नीलपटोत्तरीयम्=नीलवर्णसंख्यानवस्त्रम्; विश्वम्भरायाः=ाः, भूमिगृहे=भूमेरन्तर्भागे निर्मितं तमोव्याप्तं गृहं तद्रूपः प्रवेशः=प्रवेश-ानम्; विश्वम्भराच्छादकत्वसाम्यात् नभसः भूमिगृहत्वेनोल्लेखः । अन्ध-रणी=अन्धं कुर्वती; अनन्धमन्धं क्रियतेऽनयेत्यर्थे "आढ्यसुभगस्थूल०" ा० सू० ३.२.५६) इति करणे ख्युन्प्रत्यये, "अरुर्द्विषदजन्तस्य मुम्" ा० सू० ६.३.६७) इति मुमि, "नञ्स्नञीकक्ख्युंस्तरुण०" इति (पा० वा० ४.१.१५) ख्युन्नन्तत्वात् ङीप् । तमिस्रा=गाढं तमः; "तमिस्रा ो ध्वान्तनिशि निश्यन्धतमसे न ना" इति वैजयन्ती । अजृम्भत=वृद्धि ा ॥ १६ ॥

उस समय रात्रि उसी तरह अन्धकारपूर्ण हो गयी मानों आकाशरूपी नीलकमल काले भौंरे मँडरा रहे हों, या दिग्वधुओं ने काला वस्त्र ओढ़ रखा हो, या समग्र ी भूमिगृह में प्रविष्ट हो गई हो ॥ १६ ॥

१. ०म्भराभूरि०—म० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निष्यन्दमानैरिव चन्द्रकान्तैर्निर्वापितानां तपनोपलानाम् ।
समीरणोत्था इव धूमसार्थास्तमोभरास्तस्तरुरन्तरिक्षम् ॥ १७ ॥

निष्यन्दमानैरिति । निष्यन्दमानैः=स्रवद्भिः, चन्द्रकान्तैः=चन्द्रकान्तमणिभिः; निरग्नीकृतानामित्यर्थः । तपनोपलानाम्=सूर्यकान्तशिलानाम्; समीरणोत्थाः=वायुना उद्गताः; तमोभराः=तमोयुक्ताः, धूमसार्थाः=धूमराशयः; अन्तरिक्षम्=गगनम्, तस्तरुः=आवव्रुः ॥ १७ ॥

चन्द्रकान्त मणियों से झरते हुए जल से ठण्ढी होती सूर्यकान्त शिलाओं की हवा से उड़ते धूमसमूह ने समग्र आकाश को आवृत कर लिया ॥ १७ ॥

प्रदोषवेधाः[1] प्रवरस्य ताराप्रशस्तिवर्णान् लिखितुं हिमांशोः ।
पयोदवीथीफलकं तमिस्रमषीप्रकारैर्मलिनीचकार[2] ॥ १८ ॥

प्रदोषेत्यादि । प्रदोषः=सायङ्काल एव वेधाः=कलाभिज्ञः; "वेधसो विष्णुधातृज्ञाः" इति वैजयन्ती । प्रवरस्य=श्रेष्ठस्य; हिमांशोः=चन्द्रस्य; ताराः=नक्षत्ररूपान्, प्रशस्तिवर्णान्=प्रशंसाव्यञ्जकाक्षराणि, लिखितुम्; संज्ञापूर्वकविधेरनित्यत्वाद् गुणाभावः कथञ्चित् साधनीयः । पयोदवीथीम्=आकाशमेव, फलकम्=पट्टम्; तमिस्रमषीप्रकारैः=अन्धकाररूपमषीभेदैः; मलिनीचकार=मलिनं कृतवती ॥ १८ ॥

सन्ध्याकाल रूप ब्रह्मा ने चन्द्रमा की तारागणरूप अक्षरों से प्रशस्ति लिखने हेतु आकाशरूप पट्ट को नाना प्रकार की अन्धकाररूपी काली स्याहियों से रंग दिया ॥ १८ ॥

शर्वस्य सन्ध्याधृतताण्डवस्य कण्ठप्रभापुञ्ज इवान्धकारः ।
ज्वलिष्यतामोषधिपादपानां किञ्चावृणोद् धूम इवान्तरिक्षम् ॥ १९ ॥

शर्वस्येति । सन्ध्यायां धृतम्=कृतम्, ताण्डवम्=नर्तनं येन सः तस्य; शर्वस्य=रुद्रस्य; कण्ठप्रभापुञ्जः=कण्ठस्य नीलकान्तिसमूहः; इवेति सादृश्ये; अन्धकारः=तमः, ज्वलिष्यताम्=ज्वलनमापत्स्यताम्; ओषधिपादानाम्=ज्योतिर्लतानाम्; धूमः, अन्तरिक्षम्=गगनम्, इव; आवृणोद्=आवृतवान् ॥ १९ ॥

सन्ध्या में ताण्डव नृत्य करते हुए भगवान् शङ्कर के नीले कण्ठ की तरह लगने वाले घोर अन्धकार ने, जलते हुए औषधिक्षुप (ज्योतिर्लता) के काले धूँए की तरह समग्र आकाश को आवृत कर लिया ॥ १९ ॥

आवव्रुराकाशमतिप्रभूता आशान्तपर्यस्ततमःसमूहाः[3] ।
कूलङ्कषाः प्रावृषि वारिराशिं कलिन्दपुत्र्या इव वारिपूराः ॥ २० ॥

---

१. ०वेधः—क०, पा० ।
२. ०मषीविकारै०—म० ।
३. ०तास्तमःसमूहाः शतशः समन्तात्—म० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आवव्रुरिति । अतिप्रभूताः=अत्यधिकाः, आशान्ते=दिगन्ते, पर्यस्ताः=
ताः, तमसाम्=अन्धकाराणाम्, समूहाः=राशयः; आकाशम्=गगनम्,
षि=वर्षर्तौ, कलिन्दपुत्र्याः=यमुनायाः, वारिराशिम्=जलसमूहम्, कूल-
=तीरद्वयव्यापिनः, कूले कषन्तीति विग्रहे "सर्वकूलाभ्रकरीषेषु कषः"
सू० ३.२.४२) इति खशि "अरुर्द्विषदजन्तस्य मुम्" (पा० सू० ६.३६७)
मुम् । वारिपूराः=जलौघा इव; आवव्रुः=आवृतवन्तः ॥ २० ॥

उस सन्ध्याकाल में दिशाओं के कोणों तक अतिशयेन व्याप्त अन्धकारसमूह ने
श को ऐसे आवृत कर लिया जैसे वर्षाऋतु में यमुना नदी का नील जल उसके
तक फैल जाता है ॥ २० ॥

विभावरीचम्पककर्णपूरा बभासिरे वेश्मसु दीपलेखा ।
पलायमानस्य रवेः पटिष्ठैर्बन्दीकृता भास इवान्धकारैः ॥ २१ ॥

विभावरीत्यादि । विभावर्याः=रात्र्या एव स्त्रियः, चम्पककर्णपूराः=
ककुसुमकर्णावतंसाः, वेश्मसु=गृहेषु, दीपलेखाः=दीपराजयः, पलाय-
स्य=धावतः, रवेः=सूर्यस्य, पटिष्ठैः=अतिशयेन पटुभिः, अन्धकारैः=
भिः, बन्दीकृताः=कारागृहीकृताः, भासः=कान्तयः, इवेति सादृश्ये; बभा-
=चकाशिरे ॥ २१ ॥

घरों में रात्रिसुन्दरी के कर्णफूल के समान शोभित जलते हुए दीपकों का टिम-
ता प्रकाश ऐसा लग रहा था मानो भागते सूर्य की कुछ कान्ति बन्दी बना ली
हो ॥ २१ ॥

ज्ञासमानास्तिमिरप्रवृत्तिमर्कस्य चारा इव सञ्चरन्तः ।
ध्याकृशानोरिव विष्फुलिङ्गास्तमोमणीनां[1] व्यरुचन् निकायाः ॥२२॥

जिज्ञासेत्यादि । तिमिरस्य=तमसः स्वशत्रोः, प्रवृत्तिम्=वृत्तान्तम्,
समानाः=ज्ञातुमिच्छन्तः, जानातेः सन्नन्ताच्छानच् "ज्ञाश्रुस्मृदृशां
" (पा० सू० १.३.५७) इत्यात्मनेपदम् । अर्कस्य=सूर्यस्य, चाराः=
पुरुषाः, दूता इत्यर्थः, "अपसर्पश्चरः स्पशः" इत्यमरः । सन्ध्याकृशानोः=
रूपवह्नेः, विष्फुलिङ्गाः=अग्निकणाः, "त्रिषु स्फुलिङ्गोऽग्निकणः"
रः । तमोमणीनाम्=खद्योतानाम्, "अथ तमोमणिः, ध्वान्तोन्मेषश्च
तः" इति त्रिकाण्डशेषः । निकायाः=समूहाः, "स्यान्निकायः पुञ्जराशी"
रः । इव, व्यरुचन्=रुरुचिरे ॥ २२ ॥

उस समय "अन्धकार अब आगे क्या करने जा रहा है ?"—यह जानने के
सूर्य के दूत बने खद्योत सन्ध्यारूप वह्नि के स्फुलिङ्ग की तरह चमक रहे थे ॥

[1] च स्फुलिङ्गाः—म० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निशान्धकारप्रकराम्बुवाहनिष्ठ्यूतधाराकरकाभिरामैः[1] ।
तारागणैर्दन्तुरमन्तरिक्षं कान्ति दधौ कैरवकाननस्य ॥ २३ ॥

निशेत्यादि । निशायाम्=रात्रौ, ये अन्धकारप्रकराः=तमोनिकराः, त एवाम्बुवाहाः=मेघाः, तैर्निष्ठ्यूताः=उद्गीर्णाः, ये धारारूपाः करकाः=उपलाः, त इवाभिरामाः=मनोहरास्तैः, तारागणैः=नक्षत्रसमूहैः, दन्तुरम्=व्याप्तम्, अन्तरिक्षम्=गगनम्; कैरवकाननस्य=कुमुदवनस्य, कान्तिम्=श्रियम्, दधौ=धारयामास ॥ २३ ॥

रात्रि के समय व्याप्त अन्धकारसमूह-रूपी मेघों से गिरी हुई धारा के हिमोपल (ओले) को तरह देदीप्यमान नक्षत्रसमूह से समग्र आकाश कमलवन की तरह व्याप्त था ॥ २३ ॥

निरंकुशानां तिमिरद्विपानां शुण्डाविकीर्णैरिव शीकरौघैः ।
उद्दामशोभैर्निकरैरुडूनां तारापथः शर्करिलो बभूव ॥ २४ ॥

निरंकुशानामिति । निरंकुशानाम्=निरर्गलप्रवृत्तीनाम्, तिमिरद्विपानां=तमोगजानाम्, शुण्डया=गजकरेण, विकीर्णैः=विक्षिप्तैः, शीकरौघैः=जलबिन्दुसमूहैः, उद्दामशोभैः=प्रकृष्टप्रकाशैः, उडूनाम्=तारकाणाम्, निकरैः=समूहैः, "तारकाऽप्युडु वाऽस्त्रियाम्" इत्यमरः । ताराणां=नक्षत्राणाम्, पन्थाः=मार्गः, आकाशमित्यर्थः । शर्कराः=शिलाभेदाः सन्त्यत्रेति शर्करिलः, "देशे लुबिलचौ च" (पा० सू० ५.२.१०५) इतीलच्प्रत्ययः । "शर्करा तु शिलाभेदे", "शार्करः शर्कराधिकः । देशः शर्करिलोऽप्येवम्" इति च वैजयन्ती । बभूव=अभूत् ॥ २४ ॥

अन्धकाररूपी निरंकुश हाथियों के शुण्डों से गिरे जलबिन्दुओं के समान तारागणों से आकाश अत्यन्त शोभायमान था ॥ २४ ॥

तमालनीलं तगरावदातैस्तारागणैर्दन्तुरमन्तरिक्षम् ।
अगस्त्यपीतस्य जहार सिन्धोराकीर्णमुक्तानिकरस्य शोभाम् ॥ २५ ॥

तमालेत्यादि । तमालनीलम्=तमालपुष्पवन्नीलम्; तगरवत्=नन्दयावर्तपुष्पवत्, अवदातैः=श्वेतैः, तारागणैः=नक्षत्रसमूहैः, दन्तुरम्=व्याप्तम्, अन्तरिक्षम्=गगनम्, अगस्त्येन=एतन्नामकेन=ऋषिणा, पीतस्य=चुलुकितस्य, आकीर्णः=विक्षिप्तः, मुक्तानिकरः=मौक्तिकसमूहो यस्मिंस्तस्य, सिन्धोः=समुद्रस्य, शोभाम्=कान्तिम्, जहार=अहार्षीत् ॥ २५ ॥

१. निशाम्बुवाहप्रकरान्धकार०—क० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमाल पत्र की तरह अत्यन्त कृष्णवर्ण आकाश तगर की तरह श्वेत तारागणों इसी तरह शोभायमान था मानों अगस्त्य के द्वारा जल पी लिये जाने के कारण समुद्र की तलहटी में मोती चमक रहे हों ॥ २५ ॥

चन्द्रोदयवर्णनम्

समुद्रगर्भान्तरमाश्रयन्तं तमोऽपहं चन्द्रमसं तनूजम् ।
समुद्वहन्ती शतमन्युकाष्ठा शनैर्मुखे पाण्डरतामयासीत् ॥ २६ ॥

अथैकविंशत्या पद्यैश्चन्द्रोदयं वर्णयति कविः—**समुद्रे**त्यादिना । समुद्र= धिः, एव गर्भः=प्रसवस्थानम्, तस्यान्तरम्=अन्तर्भागम्; आश्रयन्तम्=सेव- म्, तमः=अन्धकारम्, पुत्राभावजन्यं शोकं चापहन्तीति तम्; "तमो ध्वान्ते शोके" इति वैजयन्ती । तनूजम्=पुत्रम् चन्द्रमसम्=शशिनम्; समुद्व- ी=धारयन्ती; उत्थापयन्तीत्यर्थः; शतमन्युकाष्ठा=ऐन्द्री दिक्, प्राचीत्यर्थः; =प्रारम्भभागे, आनने च, पाण्डरताम्=धवलताम्; अयासीत्=प्राप ॥२६॥

चन्द्रोदयवर्णन—समुद्ररूप गर्भस्थान का आश्रयण किये हुए, अन्धकार एवं भावजन्य शोक को नष्ट करने वाले पुत्र चन्द्रमा को धारण करती हुई पूर्व दिशा कान्तिमय हो गयी ॥ २६ ॥

चकाशिरे चन्द्रमसः समुत्थाः समुद्रगूढस्य मयूखमालाः ।
पीत्वा प्रवाहं तिमिभिः सरन्ध्रैः शिरोभिरूर्ध्वप्रहिता इवापः ॥ २७ ॥

चकाशिरे इति । समुद्रे=अब्धौ, गूढस्य=अन्तर्वर्तिनः, चन्द्रमसः=शशिनः, त्थाः=उत्थिताः, मयूखमालाः=रश्मिमालाः; तिमिभिः=मत्स्यविशेषैः; हम्=पूरम्; पीत्वा=निपीय, सरन्ध्रैः=सच्छिद्रैः, शिरोभिः=मस्तकैः, भूतैः, ऊर्ध्वं प्रहिताः=प्रेषिताः; आपः=जलानीव; चकाशिरे=शुशुभिरे । यो नाम महाकायाः सरन्ध्रशिरस्काः सामुद्रा मत्स्यविशेषाः । एषां सर- शिरस्कत्वं महाकविना **कालिदासेन रघुवंशे**ऽप्युक्तम्; यथा हि—

सत्त्वमादाय नदीमुखाम्भः सम्मीलयन्तो विवृताननत्वात् ।
ी शिरोभिस्तिमयः सरन्ध्रैरूर्ध्वं वितन्वन्ति जलप्रवाहान्" ॥ इति ॥२७॥

समुद्रान्तर्वर्ती चन्द्रमा की धवल किरणें ऐसे शोभित हो रही थीं, मानों मत्स्य- ष (तिमी) द्वारा पीया हुआ जल अपने छिद्रयुक्त मस्तक भाग से पुनः बाहर गया हो ॥ २७ ॥

ोदितः शीतकरस्य बिम्बः किञ्चित् समाविष्कृतलाञ्छनश्रीः ।
ङ्गारयोनेस्त्रिजगज्जिगीषोर्विषाङ्कितो बाण इवार्धचन्द्रः ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्धोदित इति । शीतकरस्य=शीतकिरणस्य, चन्द्रमसः, अर्धोदितः=अर्धोद्गतः; बिम्बः=आकारः; किञ्चित् समाविष्कृता=प्रकटिता, लाञ्छनश्रीः=चिह्नशोभा येन सः; त्रिजगज्जिगीषोः-त्रिभुवनं विजेतुमिच्छोः; शृङ्गारयोनेः=मदनस्य, "शृङ्गारयोनिः श्रीपुत्रः" इत्यमरः; विषाङ्कितः=विषेण चिह्नितः; अर्धचन्द्रः=अर्धचन्द्राकारो बाणः। इवेति सादृश्ये। शुशुभे इति शेषः ॥ २८ ॥

चन्द्रमा का अर्धोदित बिम्ब (मण्डल), कुछ कुछ शश का चिह्न दिखायी देने से ऐसा प्रतीत हो रहा था मानों त्रिलोकविजय के लिये निकले कामदेव का कोई विषदिग्ध (जहर-बुझा) अर्धचन्द्राकार बाण हो ॥ २८ ॥

तमालनीलस्य समुद्रविष्णोस्ताराधिभूमण्डलपुण्डरीकम् ।
आवर्तनाभीविवरादुदस्थादालक्ष्यचिह्नभ्रमराभिरामम् ॥ २९ ॥

तमालेत्यादि। तमालपुष्पवत् नीलवर्णस्य; समुद्रविष्णोः=समुद्ररूपविष्णोः, ताराधिभुवः=नक्षत्रराजस्य चन्द्रस्य मण्डलमेव पुण्डरीकम्=सिताम्भोजम्; "अधिभूर्नायको नेता", "पुण्डरीकं सितोम्भोजम्" इति चामरः। आलक्ष्येण=दृश्येन, चिह्नेनैव भ्रमरेण, अभिरामम्=मनोहरम्, आवर्तस्य=भ्रमेः, एव, नाभ्याः-तुन्दकूप्याः, विवरात्=रन्ध्रात्; उदस्थात्-उदतिष्ठत् ॥ २९ ॥

तमालवृक्षवत् श्यामायमान आकाश में चन्द्रमण्डल का बिम्ब उसी तरह प्रतीत हो रहा था मानों भगवान् विष्णु के आवर्तयुक्त नाभि-छिद्र से सुन्दर कमल प्रस्फुटित हो रहा हो ॥ २९ ॥

समुज्जिहानं लवणाब्धिमध्यात् तारापतेर्मण्डलमुत्तरङ्गात् ।
उवाह तस्मादभिमथ्यमानादुन्मज्जदैरावतकुम्भलीलाम् ॥ ३० ॥

समुज्जिहानमिति। तस्मात्-अमुष्मात्, उद्गताः=उत्थिताः; तरङ्गाः=वीचयो यस्मात्; अभिमथ्यमानात्=प्रमथ्यमानात्; लवणाब्धिमध्यात्-लवणसमुद्रान्तर्भागात्; तारापतेः=नक्षत्रराजस्य चन्द्रस्य; मण्डलम्=वृत्तम्; समुज्जिहानम्-वर्धमानम्; उन्मज्जतः=उद्गच्छतः; ऐरावतस्य=इन्द्रगजस्य; कुम्भलीलाम्=मस्तकशोभाम्, उवाह=वहति स्म ॥ ३० ॥

उद्धत तरङ्गों वाले क्षारसमुद्र से चन्द्रमण्डल उसी तरह ऊपर उठ रहा था मानो मथे जाते हुए समुद्र में ऐरावत हाथी अपने सुन्दर मस्तक से जलक्रीड़ा कर रहा हो ॥ ३० ॥

उद्यच्छमानस्तुहिनांशुमाली यतः प्रवालारुणमण्डलोऽभूत् ।
तद्वाडवेनार्णवमूषिकायामावर्जितैराहित एव रत्नैः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदयच्छमान इति । उद्यच्छमानः=उद्गच्छन्, तुहिनानाम्=हिमानाम्, ।ाम्=किरणानाम्, माला अस्यास्तीति तथोक्तः, यतः=यस्मात् कारणात्, ंवत्=विद्रुमवत्, अरुणमण्डलः=रक्तमण्डलः, अभूत्=अभवत्; तत्=कारणं ।डवेन=बडवाग्निना, "बाडवो बडवानलः" इत्यमरः। अर्णवः=समुद्र एव, एव मूषिका=तैजसावर्तनी, आवर्जितैः=द्रावितैः, रत्नैः=मणिभिः, ।तः=कृतः। समुद्रमूषायां बडवाग्निना रत्नानि विद्राव्य विनिर्मितत्वादेव यारुणकान्तिरिति भावः ॥ ३१ ॥

ऊपर उठता हुआ चन्द्रमण्डल प्रवाल की तरह रक्तवर्ण इसलिए लग रहा था वाडवाग्नि से समुद्ररूपी भूषायन्त्र में रत्नों को द्रावित कर उसकी रचना की ो ॥ ३१ ॥

सधैर्यमादाय¹ तटेषु पादं पूर्वाद्रिमारोहति राजसिंहे ।
भूता इव ध्वान्तमतङ्गजेन्द्रा महीभृतां गह्वरमाश्रयन्ते ॥ ३२ ॥

ाधैर्यमिति । तटेषु=सानुषु, "प्रपातस्तु तटी भृगुः" इत्यमरः। पादम्=ाम्, चरणं च, "पादरश्म्यंघ्रितुर्यांशाः" इत्यमरः। सधैर्यम्=धैर्यसहितम्, य=निक्षिप्य, राजसिंहे=चन्द्ररूपसिंहे, पूर्वाद्रिम्=उदयाचलम्, आरोहति=हणं कुर्वति, सति, ध्वान्तानि=तमांसि एव, मत्तगजेन्द्राः=उन्मत्तगजा-, भीताः=भयमाप्ताः, सन्तः, महीभृताम्=पर्वतानाम्, गह्वरम्=गुहाम्, रं कन्दरे दम्भे" इति वैजयन्ती। आश्रयन्ते=सेवन्ते ॥ ३२ ॥

न्द्ररूपी सिंहराज के पूर्वाचल पर धीरे धीरे पदक्रम करने से अन्धकार ऐसे भागा जा रहा था मानों बड़े-बड़े हाथी उसके भय से डरकर पर्वतों की गुफाओं ने के लिए भागे जा रहे हों ॥ ३२ ॥

अस्ताद्रिशृङ्गस्खलिताग्रपादः पपात भास्वानपराम्बुराशौ ।
इतीव भीतः² कटकान् करेण स्पृष्ट्वारुरोह प्रथमाद्रिमिन्दुः ॥ ३३ ॥

अस्ताद्रीत्यादि। अस्ताद्रेः=अस्ताम्बलस्य, शृङ्गात्=शिखरात्, स्खलितः=ः; अग्रपादः=पादाग्रम्, रश्म्यग्रं च यस्य सः, भास्वान्=सूर्यः, अपरा-ौ=पश्चिमसमुद्रे पतितः=पतनमाप्तः-इतीव=इति मत्वा, इन्दुः=चन्द्रः, न्=अद्रिनितम्बान्, "कटकोऽस्त्री नितम्बोऽद्रेः" इत्यमरः। करेण=किर-हस्तेन च, "बलिहस्तांशवः कराः "इत्यमरः"। स्पृष्ट्वा=अवलम्ब्य, द्रिम्=उदयपर्वतम्, आरुरोह=आरूढवान्। अन्यविपद्दर्शनेनान्यस्य कता भवतीति भावः ॥ ३३ ॥

---

¹ सधीरमादाय—म०, क०, पा० ।
² भीरुः—वि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"अस्ताचल से पैर फिसल जाने के कारण ही सूर्य पश्चिम समुद्र में गिर गया"—यह कल्पना करके चन्द्रमा भी उदयाचल के शृङ्गों को हाथों (=किरणों) से पकड़ पकड़ कर उस पर धीरे-धीरे चढ़ रहा था ॥ ३३ ॥

नवोदयालोहितमिन्दुबिम्बं विदिद्युते पार्वणमम्बरान्ते ।
सायाह्नमुद्राधिकृतेन धातुद्रवेण संन्यस्तमिवैकचिह्नम् ॥ ३४ ॥

नवोदयेति । अम्बरान्ते=गगनतले, पर्वणि भवं पार्वणम्=पूर्णम्, नवोदयेन नूतनाविर्भावेन, आलोहितम्=सम्यग्ररक्तम्, इन्दुबिम्बम्=चन्द्रबिम्बम्, सायाह्नेन=सायङ्कालेनैव मुद्रायां कोशादीनामङ्कने, अधिकृतेन=नियुक्तेन, कर्त्रा, धातुद्रवेण=गैरिकेण करणेन, संन्यस्तम्,=निक्षिप्तम्, एकचिह्नम्=एकाङ्कनम्, इवेत्युत्प्रेक्षायाम्, विदिद्युते=द्युतिमाप ॥ ३४ ॥

उस समय आकाश में पूर्ण चन्द्रमा उसी तरह शोभित हो रहा था मानों सायङ्काल रूप राजा के द्वारा अधिकृत किसी अधिकारी द्वारा गैरिक धातु से कोई विशिष्ट चिह्न (मुद्रा=मोहर) लगाया गया हो ॥ ३४ ॥

विभावरीशः करपल्लवेन भृङ्गावलीमङ्गलसूत्रमालाम् ।
कुमुद्वतीनां कुमुदोपकण्ठे संयोजयामास सकौतुकानाम् ॥ ३५ ॥

विभावरीश इति । विभावरीशः-निशाधिपतिश्चन्द्रः, करपल्लवेन=स्वकीयकरकिसलयेन, सकौतुकानाम्=विकासिनीनां प्रतिसरसूत्रसहितानां च "कौतुकं विषयाभोगे हस्तसूत्रे कुतूहले" इति वैजयन्ती । कुमुद्वतीनाम्=कुमुदिनीनाम्, भृङ्गावली एव मङ्गलसूत्रमाला, ताम्; कुमुदोपकण्ठे=कुमुदरूपकण्ठे, कुमुदसमीपे च, संयोजयामास=नियोजयामास ॥ ३५ ॥

निशाधिपति चन्द्रमा भृङ्गावलीरूप मङ्गलसूत्रमाला का विकसित कुमुदिनियों के कण्ठप्रदेश में संयोजन कर रहा था ॥ ३५ ॥

आकर्ण्य गानं मधुपाङ्गनानां कर्णामृतं पीत इवामृतांशुः ।
दिदेश ताभ्यो मकरन्दगर्भमामुद्रितं कैरवकोशजातम् ॥ ३६ ॥

आकर्ण्येति । मधुपाङ्गनानाम्=भ्रमरीणाम्, कर्णामृतम्=कर्णयोरमृतत्वात् प्रीतिजनकम्, गानम्=गीतम्, आकर्ण्य=श्रुत्वा; प्रीतः=प्रसन्न इव, अमृतांशुः=चन्द्रः, ताभ्यः=गायिकाभ्यः, आमुद्रितम्=ईषन्मुकुलितम्, लाञ्छितं च, मकरन्दः=पुष्परसः, गर्भे=अन्तःप्रदेशे यस्य तत्, कैरवकोशाः=कुमुदमुकुला एव कोशाः=धनराशयः, तेषां जातम्=समूहम्, "कोशोऽस्त्री कुड्मले दिव्ये शास्त्रेऽर्थौघे गृहे तनौ" इति वैजयन्ती । दिदेश=प्रदत्तवान् ॥ ३६ ॥

भ्रमरियों का कर्णप्रिय गान सुनकर प्रसन्न हुए चन्द्रराज ने उन गायिकाओं को मकरन्दयुक्त कमलवनरूपी अटूट धनराशि बिना माँगे दान कर दी ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पत्युः करस्पर्शपरिश्लथस्य तमिस्रकेशस्य निशाङ्गनायाः ।
नवप्रसूनैरिव विप्रकीर्णैर्नक्षत्रजालैः शुशुभे नभःश्रीः ॥ ३७ ॥

पत्युरिति । पत्युः=चन्द्रस्य, कराणाम्=हस्तानां किरणानां च, स्पर्शेन=
र्शेण, परिश्लथस्य=शिथिलस्य, निशाङ्गनायाः=रात्रितरुण्याः, तमिस्र-
य=तमोरूपकचस्य, विप्रकीर्णैः=अभितः पतितैः, नवप्रसूनैः=नूतनपुष्पैः,
। सादृश्ये, नक्षत्रजालैः=तारागणैः, नभःश्रीः=गगनशोभा; शुशुभे=
॥ ३७ ॥

इस समय निशाकामिनी के पति द्वारा बारम्बार स्पर्श किये जाने के कारण,
हुए केशपाश से बिखरे हुए पुष्परूपी तारागण के कारण आकाशमण्डल अत्यन्त
त हो रहा था ॥ ३७ ॥

विपक्वताराधिपबिम्बशङ्खविमुक्तमुक्ताफलदन्तुरेव[1] ।
व्योमापगाशीकरराजितेव विदिद्युते तारकिता नभःश्रीः ॥ ३८ ॥

विपक्वेत्यादि । विपक्वम्=फलोन्मुखम्, अविकलसञ्जातमिति यावत्,
ताराधिपबिम्बम्=चन्द्रमण्डपम्, तदेव शङ्खः, तेन विमुक्तैः=अभिवृष्टैः,
फलैः, दन्तुरा=व्याप्ता, व्योमापगायाः=स्वर्णद्याः, शीकरैः=बिन्दुभिः,
ता=प्रकाशिता, इवेति सादृश्ये; तारकिता=सञ्जाततारका, नभःश्रीः=
द्युतिः, विदिद्युते=विशेषेण द्युतिमाप्तवती ॥ ३८ ॥

इस समय आकाशमण्डल, तत्काल उदय होने के लिए उद्यत चन्द्रमा की
ों के समान श्वेत किरणों से उसी तरह शोभित हो रहा था जैसे आकाशगङ्गा
बिन्दुरूप तारागण से उसकी शोभा होती है ॥ ३८ ॥

आकाशशय्यातलमश्नुवाने सुधाकरे भर्तरि सानुरागे ।
श्यामाङ्गनायास्तिमिरान्तरीयमाकाशमध्यादपयातमासीत् ॥ ३९ ॥

आकाशेत्यादि । सानुरागे=अनुरागेण=रत्या, रक्तवर्णेन च सहिते,
=स्वामिनि, सुधाकरे=चन्द्रे, आकाशरूपि शय्यातलम्=शयनप्रदेशम्,
वाने=अधितिष्ठति, सति, श्यामायाः रात्रिरूपिण्या एव यौवनमध्य-
श्च स्त्रियः, तिमिरान्तरीयम्=तमोरूपपरिधानीयम्, आकाशमध्यात्=
मध्यात्, आकाशतुल्यमध्यभागाच्च, अपयातम्=गलितम्, आसीत्=
॥ ३९ ॥

अनुरक्त पति (चन्द्रमा) के आकाशरूप शय्यातल पर विराजमान रहते,
ङ्गनारूप रात्रि का अन्धकाररूप परिधानीय वस्त्र स्खलित हो (नीचे खिसक)
। ३९ ॥

---

[1] ०तारापति०—म० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पतिः पशूनामिव कालकूटं पतिं नदीनामिव कुम्भयोनिः ।
आदाय चन्द्रः करपल्लवेन गाढान्धकारं कवलीचकार ॥ ४० ॥

पतिरिति । पशूनां पतिः=रुद्रः, कालकूटम्=हालाहलमिव; कुम्भयोनिः=अगस्त्यः; नदीनाम्=सरिताम्, पतिम्=समुद्रमिव, चन्द्रः=शशी; करपल्लवेन=करकिसलयेन, गाढम्=निविडम्; अन्धकारम्=तमः; कवलीचकार=भक्षयामास ॥ ४० ॥

उस समय चन्द्रमा ने अपने करपल्लव (किरणों) से पकड़कर अन्धकार को उसी प्रकार अपना भोजन-ग्रास बना लिया जैसे भगवान् शङ्कर ने अपने हाथ में लेकर कालकूट (हालाहल) का या अगस्त्य मुनि ने अपनी अंजलि में भर कर समग्र समुद्र का पान कर लिया था ॥ ४० ॥

वियोगदुःखादिव पाण्डराङ्गीं विलम्बमानभ्रमरालकान्ताम् ।
कुमुद्वतीमासवपुष्पदिग्धामाश्वासयामास करेण चन्द्रः ॥ ४१ ॥

वियोगेत्यादि । चन्द्रः=शशी; वियोगदुःखात्=विरहखेदात्; इव, पाण्डराङ्गीम्=धवलावयवाम्; विलम्बमानः=परिलम्बमानः; भ्रमरा एवालकान्तो यस्यास्ताम्; आसवभरितैः पुष्पैः=कुसुमैः, दिग्धाम्=व्याप्ताम्, शैत्योपचाराय सर्वाङ्गेषु निक्षिप्तपुष्पामिति यावत्; कुमुद्वतीम्=कुमुदिनीम्; करेण=किरणेन, हस्तेन च; आश्वासयामास=आश्वस्तां कृतवान् ॥ ४१ ॥

विरहजन्य वेदना से श्वेत हुए अङ्गों वाली, चारों ओर मण्डराते भौंरों से घिरी हुई और मकरन्दपूर्ण पुष्पों से लदी हुई कुमुदिनी को चन्द्रमा ने अपने करों (किरणों) से स्पर्श कर आश्वस्त किया ॥ ४१ ॥

वेलाजलेषु मणिदर्पणविभ्रमेषु च्छायागतेन शशलाञ्छनमण्डलेन ।
वाराकरो वरुणभूपतिना मणीनामेकाकरो रचितमुद्र इवाशशङ्के ॥ ४२ ॥

वेलाजलेष्विति । वरुणभूपतिना=वरुणमहाराजेन; मणिदर्पणस्य विभ्रम इव विभ्रमो येषां तेषु; वेलाजलेषु=प्रवृद्धजलेषु; छायागतेन=प्रतिबिम्बितेन; शशलाञ्छनमण्डलेन=चन्द्रमण्डलेन; वाराम्=जलानाम्; आकरः=समुद्रः; "आपः स्त्री भूम्नि वार्वारि" इत्यमरः । मणीनाम्=रत्नानाम्, एकाकरः=एकखनिः; रचिता=कृता, मुद्रा=चिह्नम्, यस्मिन् सः, इव, आशशङ्के=आशङ्कितः ॥ ४२ ॥

मणिदर्पण का भ्रम पैदा करने वाले, तट के किनारों तक भरे जल वाले समुद्र में चन्द्रमा की छाया प्रतिबिम्बित होने के कारण, उसको जलाधिष्ठात्री देवता वरुण रत्नों का बहुत बड़ा कोश (खजाना) ही समझ बैठे ॥ ४२ ॥

अन्तःपरिस्फुरितबालतमालकान्तिरालक्ष्यते स्म रजनीकरमण्डलश्रीः ।
आसृक्वभागविवृताननसैंहिकेयदंष्ट्राकरालगरलद्रवमुद्रितेव ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्तरित्यादि। अन्तः=अभ्यन्तरे, परिस्फुरिता, बालतमालस्य=बाल-
ाच्छकुसुमस्य, कान्तिरिव कान्तिर्यस्य सः; आसृक्वभागम्=ओष्ठप्रान्त-
तम्, विवृताननस्य=व्यावृत्तमुखस्य, सैंहिकेयस्य=राहोः, दंष्ट्रयोर्यः करालः=
ङ्कुरः, गरलद्रवः, तेन मुद्रिता=चिह्निता, "प्रान्तावोष्ठस्य सृक्वणी"
हिकेयो विधुन्तुदः" इति चामरः, "करालं दन्तुरे तुङ्गे भीषणे चाभिधेयवत्"
मेदिनी। इवेति सादृश्ये। रजनीकरस्य=चन्द्रस्य, मण्डलश्रीः=मण्डल-
ा, आलक्ष्यते स्म=दृश्यते स्म। कलङ्कः ग्रहणकालिकराहुमुखसम्बन्ध-
ान्तविषमिव बभाविति भावः ॥ ४३ ॥

मध्यभाग में शशलाञ्छन के कारण नव तमालपुष्प की कान्ति वाले रक्त
मण्डल की शोभा ऐसी लग रही थी मानों ओठों के किनारों तक खुले राहु के
की भयंकर दाढों से गिरता हुआ भयङ्कर विष हो ॥ ४३ ॥

वं प्रदर्शितकुरङ्गकलङ्करेखं व्यक्तं बभौ कुमुदिनीकुलदैवतस्य।
र्तमण्डलमिवाचलसार्वभौमकन्याकलिन्दतनयामिलनोपजातम् ॥४४॥

बिम्बमिति। प्रदर्शिता=प्रकटिता, कुरङ्गरूपा कलङ्करेखा यस्य तत्,
दिनीकुलदैवतस्य=चन्द्रस्य, व्यक्तम्=स्पष्टम्, बिम्बम्=मण्डलम्, अचला-
=पर्वतानाम्, सार्वभौमः=चक्रवर्ती हिमवान्, तस्य कन्यायाः=गङ्गायाः,
न्दतनयायाः=यमुनायाश्च, मिलनेन=सङ्गमेन, उपजातम्=उत्पन्नम्,
र्तमण्डलम्=जलभ्रमचक्रमिव, बभौ=शुशुभे ॥ ४४ ॥

उस समय चन्द्रमण्डल, स्पष्ट दिखायी पड़ते मृगलाञ्छन के कारण, ऐसा लग
ा मानों वह हिमालय से निकली गङ्गा एवं यमुना नदियों के संगम से उत्पन्न
आवर्त हो ॥ ४४ ॥

ःस्फुरन्मृगकलङ्कमभंगुराभमत्यर्थमेव शुशुभे द्विजराजबिम्बम्।
ङ्कचक्रमिव दन्तमयं तमिस्रावामभ्रुवो मरकताङ्कितमध्यदेशम् ॥४५॥

अन्तरित्यादि। अन्तः=मध्यभागे, स्फुरत्=भासमानः, मृगकलङ्कम्=मृग-
यस्य तत्, अभङ्गुराभम्=अनश्वरद्युति, द्विजराजबिम्बम्=चन्द्रमण्डलम्,
ावामभ्रुवः=निशाङ्गनायाः, दन्तमयम्=दन्तानां विकारस्तादृशम्, मरक-
रिन्मणिना, अङ्कितः=चिह्नितो मध्यदेशो यस्य तम्; ताटङ्कचक्रम्=कर्ण-
म्; "ताटङ्कस्तु तालपत्रं कुण्डलं कर्णवेष्टकः" इति हेमचन्द्रः। अत्यर्थम्=
तम्, शुशुभे=बभौ ॥ ४५ ॥

ध्यभाग में शोभित मृगचिह्न के कारण वह चन्द्रमण्डल ऐसा लग रहा था
निशानारी का हाथी दाँत से बना एवं बीच में मरकतमणि लगा कर्णफूल हो ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्तर्मलीमसमभादमृतांशुबिम्बमम्भोदवातमलिनोदरदर्पणाभम् ।
कण्ठप्रभप्रसरकर्बुरितान्तरालं भिक्षाकपालमिव किञ्च कपालपाणेः ॥४६॥

अन्तरित्यादि । अम्भोदवातेन=मेघवायुना, मलिनाम्, उदरम्=मध्यम्, यस्य, तादृशस्य, दर्पणस्य=मुकुरस्य, आभा=कान्तिरिव कान्तिर्यस्य तत्, "दर्पणे मुकुरादर्शौ" इत्यमरः । अन्तर्मलीमसम्=अन्तर्मलीनम्, अमृतांशो=चन्द्रस्य, बिम्बम्-मण्डलम्, कण्ठप्रभायाः=गलकान्तेः, प्रसरेण=व्यापनेन, कर्बुरितम्=शबलितम्, अन्तरालम्=मध्यम्, यस्य तत्, कपालं पाणौ यस्य तस्य कपालपाणेः=भगवतः शिवस्य, भिक्षायाः कपालम्=शिरोऽस्थि, "शिरोऽस्थिन तु कपालोऽस्त्री" इत्यमरः । इवेति सादृश्ये । अभात्=शोभते स्म ।। ४६ ॥

बरसाती हवा से मैले हुए मध्यभाग वाले दर्पण की तरह शोभायुक्त, अन्दर से श्यामवर्णयुक्त चन्द्रमण्डल ऐसा लग रहा था मानों मनुष्य के शिर की हड्डी से बनाया गया कपाल हाथ में लिए भगवान् शङ्कर के विषदिग्ध श्यामकण्ठ की छाया (प्रतिबिम्ब) पड़ने के कारण उनका अन्तःश्याम भिक्षापात्र (कपाल) हो ॥ ४६ ॥

स्पष्टे प्रदोषसमये नरपालसूनुस्त्वष्ट्रा समारचितमङ्गलमण्डनश्रीः ।
वाराङ्गनाभिरभितो मणिदीपिकाभिरासेवितः स्वभवनं पुनराजगाम॥४७॥

इति बुद्धघोषविरचिते पद्यचूडामणिनाम्नि महाकाव्ये अष्टमः सर्गः ।।

स्पष्टे इति । प्रदोषसमये=सन्ध्यासमये, स्पष्टे=प्रकाशमाने सति, त्वष्ट्रा=देवशिल्पिना, "देवशिल्पिन्यपि त्वष्टा" इत्यमरः । समारचिता=कृता, मङ्गलमण्डनस्य=शुभालङ्कारस्य, श्रीः=शोभा यस्य सः, अभित=परितः; वाराङ्गनाभिः=वेश्याभिः, परिवृतः; नरपालसूनुः=राजकुमारः; पुनः=भूयोऽपि, स्वभवनम्-स्वप्रासादम्, आजगाम=आगमत् ।। ४७ ।।

इति पद्यचूडामणिमहाकाव्ये कीर्त्तिव्याख्यां सप्तमः सर्गः।।

इस तरह सन्ध्याकाल के स्पष्ट प्रतीत होने पर, विधाता द्वारा सभी सद्गुणयुक्त अवयवों से शुभ रचना वाला, गणिकाओं से घिरा हुआ, एवं दोनों पार्श्व में अनुचरों द्वारा दीपमाला दिखाया जाता हुआ वह राजकुमार वापस अपने राजभवन में लौट आया ।। ४७ ।।

पद्यचूडामणि महाकाव्य के अष्टम सर्ग का भाषान्तर पूर्ण ।। ८ ।।

*

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवमः सर्गः

कुमारस्य नीराजनम्

आगत्य[1] गेहमध्यास्य कुमारो भद्रपीठिकाम् ।
आरब्धं मातृधात्रीभिरारात्रिकमुपाददे ॥ १ ॥

आगत्येति । कुमार=राजपुत्रः सिद्धार्थः, गेहम्=स्वप्रासादम्, आगत्य=उद्यानतः प्रतिनिवर्त्य, भद्रपीठिकाम्=सिंहासनम्, अध्यास्य=उपविश्य; मातृस्वरूपाभिर्धात्रीभिः=उपमातृभिः, "धात्री स्यादुपमाता" इति हेमचन्द्रः। आरब्धम्=उपक्रान्तम्; आरात्रिकम्=नीराजनम्, उपाददे=स्वीचकार ॥ १ ॥

प्रासाद में वापस आकर राजकुमार ने सिंहासन पर बैठकर, उसके सम्मान में उपमाताओं द्वारा की गयी आरती (पूजा) स्वीकार की ॥ १ ॥

महाराजाधिराजस्य तनयो मण्डपस्थितः ।
सिंहासनमियायैष सिंहसंहननस्ततः ॥ २ ॥

महाराजेति । ततः=नीराजनस्वीकारानन्तरम्, एषः=अयम्, सिंहस्य=केसरिण इव, संहननम्=शरीररचना यस्य स तथोक्तः, "गात्रं वपुः संहननम्" इत्यमरः । "वराङ्गरूपोपेतो यः सिंहसंहननो हि सः" इत्यप्यत्रामरः । मण्डपे=जनानामाश्रये, "मण्डपोऽस्त्री जनाश्रयः" इत्यमरः। स्थितः, महाराजाधिराजस्य=राज्ञः शुद्धोदनस्य, तनयः=पुत्रः सिद्धार्थः, सिंहासनम्=भद्रासनम्, "नृपासनं तु यद् भद्रासनं सिंहासनं तु तत्" इत्यमरः । इयाय=प्राप ॥ २ ॥

उसके बाद, सिंह की तरह सुगठित शरीर वाले वे राजकुमार मण्डप में स्थित सिंहासन पर विराजमान हुए ॥ २ ॥

वारवामालकास्तस्य मधुराकृतयः पुरः ।
आरेभिरे दर्शयितुमद्भुतं नृत्तविभ्रमम्[2] ॥ ३ ॥

वारेत्यादि । तस्य=राजपुत्रस्य, पुरः=अग्रे; मधुराकृतयः=मनोज्ञाकाराः; वारवामालकाः=वेश्याङ्गनाः; अद्भुतम्=आश्चर्यमयम्; नृत्तविभ्रमम्=नर्तनविलासम्, विलासबिब्बोकविभ्रमा ललितं तथा" इत्यमरः ॥ ३ ॥

वहाँ उसके सामने वारवनिताओं ने अनेक प्रकार के आश्चर्यमय एवं विमुग्धकारी नृत्य प्रारम्भ किये ॥ ३ ॥

---

१. अगस्त्य—क० । २. ०विक्रमम्—क०, पा० ।

..., Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असक्तहृदयस्तासाम् अङ्गहारमनोहरे ।
सङ्गीते नवगीतेऽपि स चिन्तामन्तरा ददौ[1] ॥ ४ ॥

असक्तेत्यादि । स कुमारः, तासाम्=वारगणिकानाम्; अङ्गहारेण=अङ्गविक्षेपेण; मनोहरे=सौम्ये, "अङ्गहारोऽङ्गविक्षेपः" इत्यमरः । नवम्=नूतनम्, गीतं यस्मिंस्तस्मिन्, सङ्गीते=सहगाने; असक्तहृदयः=अलग्नमनाः, सन्, अन्तरा=अन्यत्र कस्मिंश्चित्प्रसङ्गे, चिन्ता=मनश्चिन्तनम्, ददौ=अदात् ॥ ४ ॥

परन्तु विविध प्रकार के अङ्गविक्षेपों से प्रस्तुत उस सङ्गीतमय नृत्य में भी उस राजकुमार की उपेक्षा ही दिखायी दी, और वह अन्य बातों पर चिन्तन करता रहा ॥ ४ ॥

तदा बभौ कुमारोऽसौ चामरैरमरोच्छ्रितैः ।
समीरणसमुद्धूतैस्तरङ्गैरिव सागरः ॥ ५ ॥

तदेति । तदा=तस्मिन् काले, असौ=कुमारः, अमरैः=देवैः, उच्छ्रितैः=उद्धृतैः, चामरैः=चमरीबालव्यजनैः, समीरणेन=वायुना, समुद्धूतैः=ऊर्ध्वंप्रेरितैः, तरङ्गैः=वीचिभिः, सागरः=समुद्र इव, बभौ=शुशुभे ॥ ५ ॥

तब वह राजकुमार, देवताओं द्वारा चँवर ढुलाये जाते समय, ऐसा शोभित हुआ मानों समुद्र में मनोहर तरङ्गें उठ रही हों ॥ ५ ॥

ध्वजरत्नपताकाभिः[2] शुशुभे क्षोणिमण्डलम् ।
अन्तरिक्षमिवानेकविद्युद्वल्लीभिरावृतम् ॥ ६ ॥

ध्वजेति । (तदा) ध्वजरत्नानां रक्तवर्णाभिः पताकाभिः=वैजयन्तीभिः, "पताका वैजयन्ती स्यात् केतने ध्वजमस्त्रियाम्" इत्यमरः । क्षोणिमण्डलम्=पृथ्वीमण्डलम्; अनेकाभिः, विद्युद्वल्लीभिः=तडिल्लताभिः, आवृतम्=आच्छादितम्, अन्तरिक्षम्=आकाशमिव, शुशुभे=बभौ ॥ ६ ॥

और उस समय समग्र पृथ्वीमण्डल पर अनेक रक्तध्वज ऐसे फहराने लगे मानो आकाश में बिजलियाँ चमक रही हों ॥ ६ ॥

कालागरुमहाधूमवल्लीवेल्लितमम्बरम् ।
कृष्णोरगशताकीर्णं[3] रसातलमिवाबभौ ॥ ७ ॥

कालेत्यादि । कालागरोः=अगरुखण्डस्य, महाधूमवल्लीभिः=लतासदृशमहाधूमैः, वेल्लितम्=वेष्टितम्; अम्बरम्=गगनम्, कृष्णोरगाणाम्=कृष्णसर्पा-

---

१. ददे—वि० ।
२. ०वताकाभिः—क०, पा० ।
३. ०मिवाकीर्णं—क०, पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्, शतेन=एतत्संख्यया, आकीर्णम्=व्याप्तम्; "उरगः पन्नगो भोगी" ग्रमरः। रसातलम्=पातालमिव, आ समन्तात्, बभौ=शुशुभे ॥ ७ ॥

उस समय उसके सम्मान में जलाये गये गन्धद्रव्यों के धूएँ की रेखाएँ सम्पूर्ण नमण्डल में ऐसे फैल गयीं जैसे पाताललोक में हजारों सर्प रेंग रहे हों ॥ ७ ॥

ब्रह्माण्डकुक्षिम्भरिभिर्बधिरीकृतदिङ्मुखैः ।
अनेकपटहध्वानैराध्मातमभवन्नभः ॥ ८ ॥

ब्रह्माण्डेत्यादि। ब्रह्माण्डेन कुक्षिम्=उदरम्, बिभ्रति=पूरयन्तीति तैस्ता-ः, ब्रह्माण्डव्यापकैरित्यर्थः, "उभौ त्वात्मम्भरिः स्वोदरपूरके" इत्यमरः। धिराणि बधिराणि सम्पद्यमानानि=कृतानि बधिरीकृतानि=शब्दग्रहणा-ट्कृतानि; दिशाम्=काष्ठानाम्, मुखानि=प्रारम्भभागाः, यैस्तैः; अनेकैः=भिः, पटहध्वानैः=आनकध्वनिभिः; "आनकः पटहोऽस्त्री" इत्यमरः। ः=अन्तरिक्षम्; आध्मातम्=मुखरितम्; अभूत्=बभूव ॥ ८ ॥

उस समय त्रिलोकी की जनता ने हर्षित होकर इस तरह नगाड़े (पटह) बजाने भ किये कि उनकी गूँज (प्रतिध्वनि) सम्पूर्ण आकाश में फैल गयी ॥ ८ ॥

कुमारस्य देवैराराधनम्

ऐरावत्य इवाकाशरङ्गेष्वमरयोषितः ।
घनवाद्यरवाश्चक्रुरखण्डं ताण्डवक्रमम् ॥ ९ ॥

ऐरावत्य इति। आकाशरङ्गेषु=आकाशरूपनर्तनस्थलेषु; ऐरावत्यः=द्युतः, "शम्पाशतह्रदा ह्रादिन्यैरावत्यः क्षणप्रभा" इत्यमरः। इवेति श्ये; अमराणाम्=देवानाम्, योषितः=नार्यः, घनः=मेघः, कांस्यादिमय-नश्च तद्रूपं यद्वाद्यम्, तस्य रवः=ध्वनिः, यासां ताः; "कांस्यतालादिकं]" इत्यमरः। सत्यः; अखण्डम्=अविच्छिन्नम्; ताण्डवस्य=नर्तनविशे-, क्रमम्=पद्धतिम्; चक्रुः=अकार्षुः ॥ ९ ॥

और उधर अप्सराएँ भी नाना प्रकार के मनोमुग्धकारी वाद्यों के साथ अखण्ड करने लगी कि मानों आकाश में निरन्तर गड़गड़ाहटभरी बिजलियाँ चमक हों ॥ ९ ॥

तासां तरलसञ्चारदृष्टिभिर्मुखमण्डलैः ।
तारापथस्थलमभूत् सहस्रमृगलाञ्छनम् ॥ १० ॥

तासामिति। तासाम्=अमरस्त्रीणाम्; तरलसञ्चाराः=चञ्चलगतयः; =नयनानि येषु तैः; मुखमण्डलैः=मुखबिम्बैः; तारास्थलम्=गगनप्रदेशः; म्=एतत्सङ्ख्याकाः; मृगलाञ्छनाः=चन्द्राः यस्मिंस्तत्; अभूत्=बभूव ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उन चञ्चलदृष्टि अप्सराओं के मुखमण्डल से आकाशमण्डल ऐसे शोभित हो रहा था, मानों वहाँ हजारों चन्द्रमा एक साथ उदित हो गये हों ॥ १० ॥

विद्याधराश्च गन्धर्वा वीणागर्भितपाणयः ।
पूर्वापदानमुखराः पुरस्तस्य प्रतस्थिरे ॥ ११ ॥

विद्याधरा इति । वीणाभिः सञ्जातगर्भा पाणयः=हस्ताः, येषां ते=पाणिगृहीतवीणाः; पूर्वापदानेन=पूर्वचरितेन, मुखराः=शब्दं कुर्वन्तः; अपादानं गायन्त इत्यर्थः विद्याधराः, गन्धर्वाश्च, तस्य कुमारस्य; पुरः=अग्रे; प्रतस्थिरे=प्रस्थानमकार्षुः ॥ ११ ॥

राजकुमार के सामने, हाथ में वीणा लिये, उसकी विरुदावलि का गान करते हुए विद्याधर एवं गन्धर्व भी बैठे हुए थे ॥ ११ ॥

महेन्द्रकरविक्षिप्ता मन्दारसुमनोभराः[1] ।
भुवनक्षोभगलिताः पुष्फुरुस्तारका इव ॥ १२ ॥

महेन्द्रेत्यादि । महेन्द्रहस्तात्=महेन्द्रकराद्; विकीर्णाः=विक्षिप्ताः, मन्दारसुमनसाम्=पारिजातकुसुमानाम्; भराः=समूहाः; भुवनक्षोभेण=जगदुत्पातेन; गलिताः=पतिताः, तारकाः=नक्षत्राणि; इव=सदृशम्; पुष्फरुः=प्रचकाशिरे ॥

उस समय, राजकुमार पर इन्द्र द्वारा की गयी पुष्पवृष्टि से आकाश दिन में भी तारागण से शोभित सा लग रहा था ॥ १२ ॥

कुमारस्यानवमानदीं प्रति गमनम्

इत्थमाराधितो देवैर्दशत्रितययोजनम् ।
अतीत्य पन्थानमसावगादनवमां[2] नदीम् ॥ १३ ॥

इत्थमिति । असौ=सिद्धार्थकुमारः; दशानां त्रितयं योजनानि यस्य तम्=त्रिंशद्योजनविस्तृतम्; पन्थानम्=मार्गम्, अतीत्य=अतिक्रम्य; अनवाम्=एतदाख्यां नदीम्=सरितम्, अगात्=अगच्छत् ॥ १३ ॥

इस तरह देवताओं द्वारा सम्मानित राजकुमार सिद्धार्थ कपिलानगरी के प्रासाद से चलकर तीस योजन दूर अनवमा नदी के तट पर पहुँचे ॥ १३ ॥

अनवमानदीमाहात्म्यम्

मरालमहिलालीढमृणालदलमेदुराम् ।
गम्भीरमकरारावमुखरीकृतदिङ्मुखाम्[3] ॥ १४ ॥

अथ चतुर्भिः पद्यैरनवमां नदीं वर्णयति—**मरालेत्यादिना** । मरालमहिलाभिः=हंसीभिः, आलीढैः=आस्वादितैः, मृणालदण्डैः=बिसखण्डैः, मेदु-

१. ०सुमनोहराः—म०, पा० ।
२. ०वागादन०—म० ।
३. गम्भीरमुखरा०—क्र०, पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राम् =पूर्णाम्; "हंसो मरालो नीलाक्षः" इति वैजयन्ती; "मृणालं तन्दुलं विसम्" इति हेमचन्द्रश्च। गभीरेण=गम्भीरेण, मकराणाम्=जलजन्तुविशेषाणाम्, भष णामित्यर्थः, आरावेण=शब्देन, मुखरीकृतानि=मुखरितानि, दिग्मु-खानि=दिग्भागाः यस्यास्ताम्। "नदीमुदतरत्" इत्यग्रिमेणाष्टादशश्लोकेन सम्बन्धः ॥ १४ ॥

वह अनवमा नदी ऐसी थी जहाँ जगह-जगह हंसों की पत्नियों द्वारा चबाये गये मृणालदण्ड पड़े थे, और उसमें रहने वाले मगरमच्छों को गम्भीर ध्वनि आकाश तक फैल रही थी ॥ १४ ॥

तरङ्गशीकरासारतारादन्तुरिताम्बराम् ।
सरसीरुहसौरभ्यसुरभीकृतमारुताम् ॥ १५ ॥

तरङ्गेत्यादि। तरङ्गशीकराणाम्=वीचिकणानाम्, आसारैः=प्रसरणैरेव "आसारः स्यात् प्रसरणे" इति विश्वः। ताराभिः=नक्षत्रैः, दन्तुरितम्=सुद्रतम्, अम्बरम्=गगनं यस्यास्ताम्; सरसीरुहाणाम्=पद्मानाम्, सौरभेण=सुगन्धेन, सुरभीकृतः=सुगन्धीकृतः, मारुतः=वातो यस्यास्ताम् 'नदीमुदतरत्' इत्यग्रिमेण श्लोकेन सम्बन्धः ॥ १५ ॥

समग्र आकाश, उसकी तरङ्गों से उठी जलबिन्दुरूप तारागण से भीगा हुआ सा, पुष्पित कमलों की सुगन्ध से वहाँ का वायुमण्डल व्याप्त था ॥ १५ ॥

कल्लोलवल्लीवलयसमुल्लासितसारसाम् ।
कलहंसकलत्राणां कण्ठदघ्नोर्मिमण्डलीम् ॥ १६ ॥

कल्लोलेत्यादि। कल्लोला=तरङ्गिता वल्ल्य इव तासां बलयेषु=कटकेषु, समुल्लासिताः=भासमानाः, सारसाः=सारसपक्षिणो यस्यां ताम्; कलहंस-कलत्राणाम्=कादम्बयोषिताम्; "कादम्बः कलहंसः स्यात्" इत्यमरः। कण्ठः प्रमाणमस्या इति कण्ठदघ्नी, ऊर्मिमण्डली=कल्लोलमाला यस्यां ताम्; "प्रमाणे द्वयसज्दघ्नञ्मात्रचः" (पा० सू० ५.२.३७) इति दघ्नच्प्रत्ययः। "नदीमुदतरत्" इति सम्बन्धः ॥ १६ ॥

उसके तटों पर तरङ्गों के लहराने से मुग्ध हुई सारसपंक्ति प्रसन्न हो इधर उधर टहल रही थी। और हंसिनियों के कोमल कण्ठ से निकली मधुर ध्वनि सर्वत्र गूँज रही थी ॥ १६ ॥

मीनविक्षिप्तकल्हारपुञ्जकिञ्जल्करञ्जिताम् ।
विनिद्रकमलोदीर्णमधुव्रतरङ्गिताम् ॥ १७ ॥

मीनेत्यादि। मीनैः=मत्स्यैः, विक्षिप्तस्य=कम्पितस्य, कल्हारपुञ्जस्य=सौगन्धिकपुष्पराशेः; किञ्जल्कैः=केसरैः, रञ्जिताम्=चित्रिताम्, "किञ्जल्कः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कसरोऽस्त्रियाम्' इत्यमरः। विनिद्रेभ्यः=विकचेभ्यः, कमलेभ्यः=पङ्कजेभ्यः, उदीर्णेन=निःसृतेन, मधुद्रवेण=मकरन्दप्रवाहेण, तरङ्गिताम्=सञ्जाततरङ्गाम्, प्रवृद्धामित्यर्थः। "नदीमुदतरत्" इत्यग्रिमेण सह सम्बन्धः ॥ १७ ॥

उसके जल में इधर-उधर चलती मछलियों के टकराने से हिलते हुए कल्हारपुष्पों का पराग बिखरा हुआ था। और विकसित पद्मों के पुष्पों से झरते हुए मधुद्रव से यह नदी और बढ़ी हुई ज्ञात होती थी ॥ १७ ॥

तारणाय महाम्भोधेस्तन्वन् गुणनिकामिव।
चिन्तायुक्तेन वाहेन तां नदीमुदतीतरत् ॥ १८ ॥

तारणायेति। महाम्भोधेः=महासागरस्य, तारणाय=तरणक्रियायै, गुणनिकाम्=असकृत् परिशीलनम्, तन्वन्=विस्तारयन्, चिन्तायुक्तेन वाहेन=अश्वेन, ताम्=अनवामाख्याम्, नदीम्=सरितम्, उदतीतरत्=उत्तरति स्म ॥

इस संसारसमुद्र को पार करने के लिए बार-बार चिन्तन करते हुए उस राजकुमार ने अश्व की सहायता से उन अनवमा नदी को पार किया ॥ १८ ॥

उत्तीर्य तस्याः पुलिने तुरगादवतीर्य सः।
छन्नं निवर्तयामास दत्वा भूषाश्च वाहनम् ॥ १९ ॥

उत्तीर्येति। तस्याः=नद्याः, पुलिने=तटे, उत्तीर्य, तुरगात्=अश्वात्, अवतीर्य=अवरुह्य, सः=राजकुमारः, भूषाः=अलङ्करणानि, वाहनम्=अश्वं च दत्वा=प्रदाय, छन्नम्=एतन्नामकं सूतम्, निवर्तयामास=कपिलां प्रति प्रस्थापयमास ॥ १९ ॥

उस नदी को पार कर दूसरे किनारे पर पहुँचकर, घोड़े से उतरकर राजकुमार ने अपना वह घोड़ा तथा शरीर पर पहने हुए वस्त्र और आभूषण साथ चलते हुए छन्न नामक अश्ववाहक को सौंप दिये ॥ १९ ॥

तपश्चर्यावर्णनम्

आदिकल्पसमुद्भूतामादिब्रह्मसमाहृताम्।
अग्रहीदग्रणीः पुंसां तपोधनपरिष्क्रियाम् ॥ २० ॥

आदीत्यादि। पुंसाम्=जनानाम्, अग्रणीः=श्रेष्ठः, आदिकल्पे=प्रथमकल्पे, समुद्भूताम्=समुत्पन्नाम्, आदिब्रह्मणा=प्रधानब्रह्मणा, समाहृताम्=गृहीताम्, तपोधनानाम्=मुनीनाम्, परिष्क्रिया=परिष्कारम्, वेषभूषामित्यर्थः, अग्रहीत्=गृहीतवान् ॥ २० ॥

और प्रथम कल्प में आदिब्रह्मा द्वारा उन्हीं के लिये बनायी गयी तपस्वियों के लिये उपयुक्त वेषभूषा को धारण कर लिया ॥ २० ॥

आदाय तापसाकल्पमनल्पगुणगुम्भितम्।
आच्छादय तेन चात्मानमधत्त तपसि स्थितिम् ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रादायेति। (सः=सिद्धार्थः) अनल्पगुणगुम्फितम्=बहुगुणपूर्णम्, तापसा-
म्=तापसवेषम्, गृहीत्वा, तेन=वेषेण च, आत्मानम्=स्वम्, आच्छाद्य=
छादनं कृत्वा, तपसि=तपश्चर्यायाम्, स्थितिम्=स्थानम्, अधत्त=
ञकार ॥ २१ ॥

उस बहुगुणमय तपस्विवेष को धारण कर वे राजकुमार तपश्चर्या के लिये सन्नद्ध
ये ॥ २१ ॥

ग्रथावलोक्य लोकेशं दीक्षितं शक्रदिङ्मुखम्।
ग्रानन्दमन्दहसितैरिव पाण्डरतामयात् ॥ २२ ॥

ग्रथ=तपोनिष्ठाग्रहणानन्तरम्, शक्रदिङ्मुखम्=इन्द्रदिक्प्रारम्भभागः, लोके-
लोकश्रेष्ठं तम्, दीक्षितम्=तपोदीक्षायुक्तम्, अवलोक्य=दृष्ट्वा; आनन्दजैः,
ृसितैः=स्मितहास्यैः, इवेत्युत्प्रेक्षायाम्, पाण्डरताम्=धवलताम्, अयात्=
ा। प्रभातकालः सन्निहित इति भावः ॥ २२ ॥

पस्या करते हुए उस राजकुमार को दीक्षित अवस्था में देखकर, पूर्व दिशा
त हास्य करती हुई सर्वत्र अपनी धवलता बिखेरने लगी ॥ २२ ॥

समस्तलोकनाथस्य तस्य शास्तुरिवाज्ञया।
शतमन्युदिशाऽधत्त सन्ध्यापाटलमम्बरम् ॥ २३ ॥

मस्तेत्यादि। तस्य=अमुष्य, समस्तलोकनाथस्य=समस्तजनश्रेष्ठस्य,
=सिद्धार्थस्य, आज्ञया=आदेशेनेव, शतमन्युदिशा=प्राची दिक्, अम्बरम्=
;, आकाशं, सन्ध्या=सन्ध्यावच्च, पाटलम्=श्वेतरक्तवर्णम्, "श्वेतरक्तस्तु
" इत्यमरः। अधत्त=धारितवती। सिद्धार्थाज्ञया प्राची दिगपि कषाय-
धत्त इति श्लेषमूलकहेतूत्प्रेक्षा ॥ २३ ॥

स समस्त लोकों के स्वामी शास्ता की आज्ञा से प्राची दिशा का आकाश
या की तरह श्वेत रक्त वर्ण वाला हो गया। (अर्थात् सिद्धार्थ की आज्ञा
ो दिशा ने भी कषाय वस्त्र धारण कर लिये) ॥ २३ ॥

तस्यावलोकनायैव शाक्यवंशशिखामणेः।
ग्रध्यास्त कूलकूटस्थः प्रथमाद्रिं गभस्तिमान् ॥ २४ ॥

स्येति। शाक्यवंशस्य=शाक्यकुलस्य, शिखामणेः=शिरोमणेः, तस्य=
र्थस्य, अवलोकनाय=दर्शनाय, इवेत्युत्प्रेक्षायाम्, कुलस्य=शाक्यवंशस्य,
=मूलपुरुषः, गभस्तिमान्=सूर्यः, प्रथमाद्रिम्=उदयगिरिम्, अध्यास्त=
थौ ॥ २४ ॥

ा अवस्था में स्थित शाक्यवंशशिरोमणि, सिद्धार्थ को देखने के लिये शाक्य-
प्रथम पुरुष सूर्य उदय-पर्वत पर आ पहुँचे ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अज्ञानमेवं जगतामपसार्यं त्वयेत्यपि ।
अस्यादिशन्निव रविरन्धकारमपाकरोत् ॥ २५ ॥

अज्ञानमिति । रविः=सूर्यः, "त्वया=सिद्धार्थेन, एवम्=तपसा बोधिमुपलभ्य तया, जगताम्=लोकानाम्, अज्ञानम्=अविद्यान्धकारः, अपसार्यम्=अपसारणीयम्," इत्यपि=एतदपि, अस्य=सिद्धार्थस्य कृते, आदिशन्=आज्ञां कुर्वन्, स्वप्रवृत्त्या सूचयन् इत्यर्थः । इवेत्युत्प्रेक्षायाम्; जगताम्=लोकानाम्, अन्धकारम्=तमः, अपाकरोत्=अपाकृतवान् ॥ २५ ॥

तब उस सूर्य ने समस्त संसार का अन्धकार हटाते हुए मानों सिद्धार्थ को भी आज्ञा दी कि तुम भी मेरी तरह सम्पूर्ण संसार का अज्ञानान्धकार नष्ट करने के लिए सन्नद्ध हो जाओ ॥ २५ ॥

ज्ञानालोकस्त्रिजगतामेवमेव त्वयेति च ।
अस्यादिशन्निवालोकमाविश्चक्रे विकर्तनः ॥ २६ ॥

ज्ञानेत्यादि । त्वया=सिद्धार्थेन, त्रिजगताम्=लोकत्रयस्य, ज्ञानालोकः=ज्ञानरूपप्रकाशः, "आलोको दर्शनोद्द्योतौ" इत्यमरः, एवमेव=इत्थमेव, आविष्करणीय इति शेषः, इति=इत्थञ्च, अस्य=सिद्धार्थस्य कृते, आदिशन्=आदेशं कुर्वन्निव, स्वप्रवृत्त्या सूचयन्निव । इवेत्युत्प्रेक्षायाम् । विकर्तनः=सूर्यः; "विकर्तनार्कमार्तण्डमिहिरारुणपूषणः" इत्यमरः । आलोकम्=प्रकाशम्, आविश्चक्रे=आविष्कृतवान् ॥ २६ ॥

और उस सूर्य ने समग्र संसार में अपना प्रकाश फैलाते हुए सिद्धार्थ को उत्साहित सा किया कि आप भी मेरी तरह समग्र संसार में ज्ञानालोक के विस्तारहेतु सन्नद्ध हो जाइये ॥ २६ ॥

दीक्षिते भूभृतां नाथे निर्विण्णा इव भूभृतः ।
अरुणातपलक्षेण चक्रिरे वल्कधारणम्[1] ॥ २७ ॥

दीक्षिते इति । भूभृताम्=राज्ञाम्, पर्वतानां च; नाथे=स्वामिनि, दीक्षिते=दीक्षां प्राप्ते सति; भूभृतः=राजानः, पर्वताश्च; निर्विण्णाः=निर्वेदयुक्ताः, विरक्ता इव सन्तः, अरुणातपलक्षेण=अरुणातपव्याजेन; वल्कधारणम्=चीरधारणम्, चक्रिरे=अकार्षुः ॥ २७ ॥

इस तरह राजाधिराज सिद्धार्थ के तपोदीक्षा ग्रहण करने से दुःखी राजाओं (तथा पर्वतों) ने अरुणातप के बहाने से चीर (वल्कल) धारण कर लिया ॥ २७ ॥

आदित्यबन्धोर्बोधैकसिन्धोः समुदयादिव ।
प्रबोधमुद्रामभजन् सकलाः कमलाकराः ॥ २८ ॥

१. ०धारणा–म० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदित्येत्यादि। बोधैकसिन्धोः=ज्ञाननिधेः; आदित्यबन्धोः=सिद्धार्थस्य, ंश्यत्वात्; समुदयात्=उद्गतेः; सकलाः-समग्राः, कमलाकराः=नलिन्यः; ोधमुद्राम्=ज्ञानमुद्राम्, अभजन्=प्राप्नुवन्। सतामसाधारणा गुणाः स्व-श्यानतुसरन्तीति गम्यते ॥ २८ ॥

उधर सूर्यवंशी एवं ज्ञाननिधि सिद्धार्थ को ज्ञानमुद्रा में बैठा हुआ देखकर कमल-ों ने भी प्रबोध (विकास) मुद्रा धारण कर ली ॥ २८ ॥

कृतकृत्यं तमुद्दिश्य कृताञ्जलिपुटा इव।
आबद्धमुकुलास्तस्थुरशेषाः कुमुदाकराः ॥ २९ ॥

कृतकृत्यमिति। तम्=सिद्धार्थम्, कृतकृत्यम्=कृतार्थम्, उद्दिश्य=लक्ष्यी-त्य; अशेषाः=निखिलाः, कुमुदाकराः=कुमुदिन्यः, आबद्धमुकुलाः=धृत-ड्मलाः, सन्तः, तस्थुः=स्थिताः। इवेत्युत्प्रेक्षायाम् ॥ २९ ॥

इसी तरह कुमुदवन भी, सिद्धार्थ को कृतकृत्य मानकर, अपने कुड्मल के रूप में, न्हें हाथ जोड़ते हुए से लग रहे थे ॥ २९ ॥

सन्मार्गदेशिकस्यास्य तीर्थिका इव तेजसा।
तपनस्य समाक्रान्तास्तारका निस्त्विषोऽभवन् ॥ ३० ॥

सन्मार्गेत्यादि। सताम्=सज्जनानाम्, मार्गस्य=मुक्तिमार्गस्य, आकाश-ार्गस्य च; देशिकस्य=उपदेष्टुः, अस्य=सिद्धार्थस्य; तेजसा=प्रतापेन; ीर्थम्=शास्त्रमेषामस्तीति तीर्थिकाः="तीर्थं शास्त्रे गुरौ यज्ञे" इति मचन्द्रः। तपनस्य=सूर्यस्य; "तपनः सविता रविः" इत्यमरः। समा-ान्ताः=आक्रान्ताः, तारकाः=नक्षत्राणि, निर्गताः=नष्टाः, त्विषः=कान्तयो ाभ्यस्ताः=कान्तिरहिताः, अभवन्=बभूवुः ॥ ३० ॥

सन्मार्ग के उपदेशक इस सिद्धार्थ के प्रभाव (प्रताप) से अन्य धर्माचार्य सी तरह निष्प्रभाव हो गये जैसे सूर्य के उदित होने पर उसके अप्रतिम तेज के ारण तारागण निस्तेज हो जाते हैं ॥ ३० ॥

अवकाशप्रदानार्थमिव तत्कीर्तिसंहतेः।
अशेषमाशाविवरमानशेऽतिविशालताम् ॥ ३१ ॥

अवकाशेति। तस्य=सिद्धार्थस्य, कीर्तिसंहतेः=यशःसमूहस्य; अवकाश-स्य=अवस्थानदेशस्य, प्रदानार्थम्=प्रदानहेतवे; अशेषम्=निखिलम्; आशानाम्=दिशाम्, विवरम्=भागः, अतिविशालताम्=अतिवैपुल्यम्; आनशे=प्राप ॥ ३१ ॥

उस ज्ञाननिधि के गुणों और कृत्यों के यश को विस्तार प्रदान करने हेतु दिशाएँ और अधिक फैल गयीं ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिद्धार्थमुखशीतांशुं दृष्ट्वा दीप्तं दिवाऽपि च ।
व्रीडावशादिव विधुर्बभूव विगतच्छविः ॥ ३२ ॥

सिद्धार्थेत्यादि । दिवाऽपि=दिवसेऽपि; अपिशब्देन रात्रिमात्रदीप्तात् चन्द्राद् व्यतिरेकी व्यज्यते । सिद्धार्थस्य मुखरूपिणं शीतांशुम्=चन्द्रम्, दृष्ट्वा=अवलोक्य, विधुः=चन्द्रः, व्रीडावशात्=लज्जावशात्; इवेत्युत्प्रेक्षायाम्; विगतच्छविः=विनष्टकान्तिः, अभवत्=बभूव ॥ ३२ ॥

सिद्धार्थ के मुखचन्द्र को दिन में भी इतना तेजोमय देखकर लज्जित हुए से आकाशस्थ चन्द्रमा की कान्ति विनष्ट हो गयी ॥ ३२ ॥

जगदेकगुरोस्तस्य दर्शनादिव दीप्तिमान् ।
विगतोदयरागश्रीर्विवेशाकाशमाश्रमम् ॥ ३३ ॥

जगदित्यादि । जगतः=लोकस्य, एकगुरोः=एकमात्राधिष्ठायकस्य, तस्य=सिद्धार्थस्य; दर्शनात्=अवलोकनात्; दीप्तिमान्=कान्तिमान्; सूर्य इति शेषः; विगता=विनष्टा, उदये स्थिता, रागश्रीः=अरुणकान्तिर्यस्मात् सः; अन्यत्र—विगतोदया=उत्पत्तिशून्या, रागश्रीः=विषयाभिलाषसम्पत् यस्मात् सः; आकाशम्=गगनम्, अन्यत्र=शून्यम्; आश्रमम्=स्थानम्; विवेश=प्रविष्टवान् ।

जगत् के एकमात्र स्वामी के दर्शन कर दीप्तिमान् सूर्य उदय होने के समय प्राप्त अरुणिमा को त्याग कर अपने स्थान (आश्रम) आकाश में पहुँच गया ॥ ३३ ॥

मनोरथशतप्राप्तप्रव्रज्यारसनिर्वृतः ।
दिनानि कानिचित् तस्यास्तीरे चिक्षेप देशिकः ॥ ३४ ॥

मनोरथेति । मनोरथानाम्=सङ्कल्पानाम्, शतेन=एतत्सङ्ख्यया, प्राप्तायाः=अधिगतायाः; प्रव्रज्यायाः=संन्यासस्य, रसेन=आनन्देन, निर्वृतः=सुखितः, देशिकः=गुरुः=सिद्धार्थः; तस्याः=अनवमानद्याः, तीरे=तटे; कानिचित्=कतिपयानि; दिनानि=दिवसानि; चिक्षेप=निनाय ॥ ३४ ॥

इस तरह जगद्गुरु ने सैकड़ों कठोर सङ्कल्पों से प्राप्त होने वाली प्रव्रज्या (लोक संन्यास) का आनन्द-उपभोग करते हुए, उस नदी के तट पर ही कुछ दिन विताये ॥ ३४ ॥

अन्येद्युरथ भिक्षार्थमादिभिक्षुर्बुभुक्षितः ।
व्यतीत्य दूरमध्वानं बिम्बसारपुरीमगात् ॥ ३५ ॥

अन्येद्युरिति । अथ=अनन्तरम्; अन्येद्युः=अन्यस्मिन् दिने; बुभुक्षा अस्य सञ्जातेति बुभुक्षितः=क्षुधित ; "बुभुक्षितः स्यात् क्षुधितो जिघत्सुरशनायितः", इत्यमरः । आदिभिक्षुः=भिक्षुश्रेष्ठः; दूरम्=नातिसमीपम्;

Nepal Sanskrit University, Balmeeki Campus, Kathmandu .

CC-0. In Public Domain. Digitization by eGangotri

ानम्=मार्गम्, व्यतीत्य=अतिक्रम्य; विम्बसारस्य=एतदाख्यस्य राज्ञः; ्=नगरीम्; अगात्=इयाय ॥ ३५ ॥

फिर किसी दिन उस आदिभिक्षु ने, भूख लगने के कारण, भिक्षा के लिये क मार्ग पारकर बिम्बसारपुरी की तरफ प्रस्थान किया ॥ ३५ ॥

बिम्बसारपुरीवर्णनम्

विशङ्कटशिलासालविजितावधिभूधरान् ।
पातालागाधपरिखापल्वलीकृतसागराम् ॥ ३६ ॥

कीदृशी सा बिम्बसारपुरी ?—इति जिज्ञासायां तामेव विवृणोति कविः भिः श्लोकैः कुलकेन—**विशङ्कटेत्यादिना**। विशङ्कटेन=पृथुना; शिला- ान=शिलामयप्राकारेण, विजितः=अवधिभूतः, भूधरः=लोकालोको यस्या- म्; "विशङ्कटं पृथु बृहत्", "प्राकारो वरणः सालः" इति चामरः। पाता- र्यन्तम्=रसातलपर्यन्तम्, अगाधया=अतिगभीरया, परिखया=खेयेन, "खेयं परिखा" इत्यमरः। पल्वलीकृतः=अल्पसरःकृतः; "वेशन्तः पल्वलं ल्पसरः" इत्यमरः। सागरः=समुद्रो यस्यास्ताम्। "बिम्बसारपुरीमगात्" पूर्वेण सम्बन्धः ॥ ३६ ॥

वह बिम्बसारपुरी बड़े बड़े शिलाखण्डों से निर्मित प्राकार (परकोटा) से घिरी थी, ऊँचाई में संसार के बड़े बड़े पहाड़ों को भी तिरस्कृत करती थी, उसके प्राकार ारों ओर खुदी हुई खाई पाताल तक गहरी थी, और उसके सामने समुद्र एक ा सा तालाब लगता था ॥ ३६ ॥

घोटीखुरपुटीकोटिक्रोडीकृतधरातलाम् ।
मादद्यन्मदावलाधीशमदपङ्किलवीथिकाम् ॥ ३७ ॥

घोटीत्यादि। घोटीनाम्=अश्वजातीनाम्; जातिवाचित्वान्ङीष्। "घोट- श्वगन्धर्वा हय-वाजि-तुरङ्गमाः" इति रभसः। खुरपुटीनाम्=शफप्रदेशा- ; कोटिभिः=एतत्सङ्ख्याभिः, क्रोडयाम्=भुजान्तरे कृतम्; "न ना क्रोडं ान्तरम्" इत्यमरः। व्याप्तमिति यावत्; धरातलम्=भूतलम्, यस्यां तां क्ताम्; माद्यताम्=मदयुक्तानाम्; मदावलाधीशानाम्=गजाधिपानाम्; =दानजलैः; पङ्किलाः=कर्दमवत्यः; वीथिकाः=रथ्याः, यस्यां तां तथो- म्। 'बिम्बसारपुरीमगात्' इति पूर्वेण सम्बन्धः ॥ ३७ ॥

वह करोड़ों घोड़ों के खुरों से आक्रान्त थी, और उसकी गलियाँ तथा सड़कें ाले हाथियों के मद से पङ्किल सी हुई रहती थी। (अर्थात् वहाँ हाथी-घोड़ों की या करोड़ों में थी) ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माणिक्यसौधवलभीवलमानमरालिकाम् ।
वातायनमुखोदीर्णधूमराजिविराजिताम् ॥ ३८ ॥

माणिक्येत्यादि । माणिक्यानां सौधवलभीषु=प्रासादगोपानसीषु; वलमानाः=सञ्चरन्त्यः; मरालिकाः=हंसयोषिता यस्यां ताम् । वातायनानाम्=गवाक्षाणाम्; मुखेभ्यः=विवरेभ्यः, उदीर्णया=उद्गतया; धूमराज्या=धूमपंक्त्या, विराजिताम्=शोभिताम्; 'बिम्बसारपुरीमगात्' इति पूर्वेण सम्बन्धः ॥ ३८ ॥

वहाँ माणिक्य निर्मित ऊँची ऊँची महल और अटारियों पर हंसों के जोड़े बैठे रहते थे। और उन महलों के गवाक्षों से सुगन्धित धूमराशि निकलती रहती थी ॥ ३८ ॥

बालाचलतुलाकोटिवाचालहरिदञ्चलाम्[2] ।
मन्दानिलसमाधूतध्वजचूडालमन्दिराम् ॥ ३९ ॥

बालाचलेति, बालानाम्=स्त्रीणाम्, चलाभिः=चञ्चलाभिः, तुलाकोटिभिः=नूपुरैः; वाचालानि=मुखराणि; हरिदञ्चितानि=दिगन्तानि, यस्यां ताम्; "पादाङ्गदं तुलाकोटिमञ्जीरो नूपुरोऽस्त्रियाम्" इत्यमरः । मन्दानिलेन=मन्दवायुना, समाधूतेन=कम्पितेन, ध्वजेन=पताकया, चूडालानि=शिखावन्ति, मन्दिराणि=गृहाणि यस्यां ताम् । "बिम्बसारपुरीमगात्" इति पूर्वेण सम्बन्धः ॥ ३९ ॥

वहाँ चञ्चल स्त्रियों के नूपुरों से निकली ध्वनि से दिशाएँ गूँजती रहती थीं। और ऊँचे-ऊँचे महलों पर लम्बी-लम्बी पताकाएँ फहराती रहती थीं ॥ ३९ ॥

बलारिकार्मुकस्मेरमणितोरणमांसलाम् ।
वल्लीकिसलयारब्धरथ्यावन्दनमालिकाम् ॥ ४० ॥

बलारीत्यादि । बलारिकार्मुकेण=इन्द्रधनुषा, स्मेरेण=प्रकाशमानेन, मणितोरणेन=मणिमयबहिर्द्वारेण, मांसलाम्=वृद्धाम्; प्रवृद्धकान्तिमित्यर्थः । वल्लीकिसलयैः=लतापल्लवैः, आरब्धाः=कृताः, रथ्यासु=प्रधानवीथिषु; उत्तोलिताः, वन्दनमालिकाः=तोरणस्रजो यस्यां ताम्, "तोरणाग्रे तु मङ्गल्यं दामवन्दनमालिका" इति हेमचन्द्रः । 'बिम्बसारपुरीमगात्' इति पूर्वेण सम्बन्धः ॥

इन्द्रधनुष से प्रकाशमान मणिमय तोरणों से वह नगरी जगमगा रही थी। और प्रधान राजपथों पर स्थान स्थान में लताकिसलयों से बने तोरणों पर मालायें (वन्दनवार) शोभित हो रही थीं ॥ ४० ॥

विशालविशिखाभोगमेखलोज्ज्वलमध्यमाम् ।
विहारवापिकावीचीसमीचीनोपशाखिकाम्[3] ॥ ४१ ॥

१. ०वरालिकाम्—म० ।
२. वालाचलत्तुला०—म० ।
३. पशल्यकाम्—म० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशालेत्यादि। विशालानाम्=विस्तृतानाम्, विशिखानाम्=रथ्यानाम्, थ्या प्रतोली विशिखा" इत्यमरः। आभोग एव=विस्तार एव, मेखला=ची, तया उज्ज्वलः=प्रकाशमानः; मध्यमः=मध्यभागो यस्यास्ताम्, विहार-पिकानाम्=क्रीडावापीनाम्, वीचीभिः=समीचीनाः=क्षालिता, उपशाखिनः=ीपस्थवृक्षाः यस्यास्ताम्। "बिम्बसारपुरीमगात्" इति पूर्वेण सम्बन्धः॥

उस नगरी का मध्यभाग बड़े-बड़े राजपथों एवं बड़ी बड़ी गलियों, उद्यानस्थ पेयों, कूओं और हरे-भरे फलयुक्त वृक्षों से व्याप्त था॥ ४१॥

तत्र भिक्षां समादातुं तपोधनशिखामणिः।
वीथीषु वीथीषु शनैर्विजहार विनायकः॥ ४२॥

तत्रेति। तत्र=बिम्बसारपुर्याम्, तपोधनशिखामणिः=ऋषिश्रेष्ठः, विनाकः=सिद्धार्थः; "दशबलोऽद्वयवादी विनायकः" इत्यमरः। वीथीषु वीथीषु=तिवीथि, शनैः=मन्दम्; विजहार=विहार कृतवान्॥ ४२॥

ऐसी उस नगरी में उस तपस्विप्रधान ने भिक्षाहेतु गली-गली में मन्द गति से चरण किया॥ ४२॥

मोहापनोदमप्येनं मुनीन्द्रमभिवीक्षिताः।
मुग्धा विदग्धाः सकला मोहनिद्रां प्रपेदिरे॥ ४३॥

मोहेत्यादि। एनम्=इमम्, मोहापनोदम्=अज्ञाननिवर्तनम्; मोहमपनुद-ोति "कर्मण्यण्" (पा० सू० ३. २. १) इत्यण् प्रत्ययः। मुनीन्द्रम्=मुनि-ेष्ठम्; अभिवीक्षिताः=अभितो वीक्षितुमारब्धवत्यः, आदिकर्मणि कर्त्तरि-कः। सकलाः=समग्राः, विदग्धाः=चातुर्यमय्यः; मुग्धाः=रमणीयाः, योषितः=स्त्रियः; मोहनिद्राम्=मोहरूपां निद्राम्; प्रपेदिरे=पायुः। सिद्धार्थस्य सर्व-मोहनिवर्तकत्वेऽपि रूपलावण्यादिवस्तुशक्तेरन्यथाकर्तुमशक्यत्वात् स्त्रीणां मोहप्राप्तिः—इत्यादिना प्रतीयमानस्य विरोधस्य परिहाराद् विरोधाभासो-लङ्कारः॥ ४३॥

वहाँ अज्ञाननिवर्तक इस तपस्वी के दर्शनों को लालायित सुन्दर स्त्रियाँ भी न्हें देखकर मुग्ध हो गयीं॥ ४३॥

विगतोन्मेषसम्मेषविष्फारीकृतचक्षुषाम्।
मनोभवारिरप्यासां मनोभवमजीजनत्॥ ४४॥

विगतेत्यादि। विगतौ=विनष्टौ, उन्मेष-सम्मेषौ=उन्मीलन-निमीलने, यस्मिन् कर्मणि तद् यथा स्यात् तथा; विष्फारीकृतानि, चक्षूंषि=नेत्राणि, याभिस्तासाम्; आसाम्=बिम्बसारपुरनारीणाम्; मनोभवम्=कामविकारम्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनोभवस्य=मदनस्य, अरिः=शत्रुः, सिद्धार्थः; अजीजनत्=अजनयत्। विरोध-परिहारः पूर्ववत् ॥ ४४ ॥

इस कामविजयी को आँखें फाड़-फाड़ कर देखती हुई उन स्त्रियों के मन में इसके प्रति कामभाव जाग्रत हो उठा ॥ ४४ ॥

तत्र भिक्षां समादाय शिक्षापादविचक्षणः ।
तदभ्यर्णगतं तूर्णं शिलोच्चयमशिश्रियत् ॥ ४५ ॥

तत्र=बिम्बसारपुर्याम्; भिक्षाम्=भिक्षान्नम्; समादाय=सम्यग्गृहीत्वा; शिक्षायाः=तपोऽभ्यासस्य, आपादे=सम्पादने, विचक्षणः=कुशलः; तस्याः= बिम्बसारपुर्याः; अभ्यर्णम्=समीपम्; गतम्=स्थितम्; तूर्णम्=उन्नतम्; शिलो-च्चयम्=पर्वतम्; "अद्रि-गोत्र-गिरि-ग्रावाचल-शैल-शिलोच्चयाः" इत्यमरः; अशिश्रियत्=आरुरोह ॥ ४५ ॥

तपोऽभ्यास में कुशल उस तपोधन ने ऐसी उस बिम्बसारपुरी में जाकर भिक्षा ग्रहण कर उस भिक्षान्न को खाने के लिये पास के एक पर्वत पर आसन लगाया ॥

पाण्डरपर्वतवर्णनम्

उपकण्ठकलालापकालकण्ठमनोहरम् ।
कण्ठीरवकराघातचूर्णीकृतगजाकुलम् ॥ ४६ ॥

अथ पञ्चभिः पद्यैस्तमेव पर्वतं कुलकेन विशिनष्टि कविः—**उपकण्ठे-त्यादिना**। उपकण्ठम्=समीपे, कलाः=मनोहराः, आलापाः=वाचो येषां तैः, कालकण्ठैः=नीलकण्ठैः मयूरैः, मनोहरम्=रम्यम्, कण्ठीरवाणाम्=सिंहानाम्, कराघातैः=हस्तताडनैः, चूर्णीकृतैः=श्लथगात्रैः, गजैः=हस्तिभिः, आकुलम्= व्याप्तम्। 'शिलोच्चयमशिश्रियत्' इति पूर्वेण सम्बन्धः ॥ ४६ ॥

उस पर्वत पर नाचते हुए सुन्दर नीलकण्ठ मयूर मन को प्यारी लगने वाली बोली बोल रहे थे। और सिंहों के भय से वहाँ आकर छिपे हाथियों से वह पर्वत व्याप्त था ॥ ४६ ॥

वेतण्डशुण्डादण्डाभकुण्डलीश्वरमण्डितम् ।
शिखण्डिमण्डलारब्धताण्डवं पाण्डराह्वयम्[1] ॥ ४७ ॥

वेतण्डेत्यादि। वेतण्डानाम्=गजानाम्, शुण्डादण्डानाम्=करिहस्तानाम्, आभेव आभा=कान्तिर्येषां तैः, कुण्डलीश्वरैः=सर्पश्रेष्ठैः, मण्डितम्=अलंकृतम्, "वेतण्डः करटी गजः" इति त्रिकाण्डशेषः। "शुण्डापि जलहस्तिन्याम् मदिरा-करि-हस्तयो" इति विश्वः; कुण्डली गूढपाच्चक्षुःश्रवाः" इत्यमरः।

१. वाण्डरा०—म०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खण्डः=वर्हम्, एषामस्तीति शिखण्डिनः=मयूराः, तेषां मण्डलेन=समूहेन, रब्धम्=प्रकान्तम्, ताण्डवम्=उद्धतनर्तनम्, यस्मिन् तम्, "शिखण्डो वर्ह-ड्योः" इति हेमचन्द्रः। पाण्डराह्वयम्=पाण्डरनामकम्। "शिलोच्चय-शिश्रियत्" इति पूर्वेण सम्बन्धः ॥ ४७ ॥

और वह पर्वत हाथियों की शूण्ड की तरह विशाल सर्पों से आकीर्ण था, तथा एक तरफ प्रसन्नता से भरे मयूर ताण्डवनृत्य कर रहे थे। उस पर्वत का नाम पाण्डर ॥ ४७ ॥

विशालशिखरोद्देशविश्रान्तजलदाध्वगम् ।
विहरन्मत्तमातङ्गपुनरुक्तमहोपलम् ॥ ४८ ॥

विशालेत्यादि। विशाले=विस्तृते, शिखरोद्देशे=शृङ्गदेशे, विश्रान्ताः=मपाकुर्वन्तः, जलदाः=मेघा एव अध्वं गच्छन्तीति अध्वगाः=पथिकाः, प तम्; विहरद्भिः=क्रीडद्भिः, मत्तमातङ्गैः=उन्मत्तगजैः, पुनरुक्ताः=द्विगु-ताः, महोपलाः=बृहच्छिलाः यस्मिंस्तम्। "शिलोच्चयमशिश्रियत्" इति ग सम्बन्धः ॥ ४८ ॥

उसके विशाल शिखरों पर, यात्रियों की तरह, जल से भरे बड़े-बड़े मेघ विश्राम रहे थे ॥ ४८ ॥

विशङ्कटशिलाकोटिपाटिताम्बरकोटरम् ।
पञ्चास्यपाणिपर्यस्तगजमौक्तिकविस्तृतम् ॥ ४९ ॥

विशङ्कटेत्यादि। विशङ्कटाभिः=पृथुभिः, शिलाकोटिभिः=पाषाणाग्रैः, टितम्=विदारितम्, अम्बरम्=गगनमेव, कोटरम्=छिद्रम् यस्य तम्, ष्कुहः कोटरं वा ना" इत्यमरः। पञ्चानि=विस्तृतानि, आस्यानि=मुखानि तेषाम्, सिंहानाम्, पाणिभिः=हस्तैः, पर्यस्तैः=विकीर्णैः, गजानाम्=हस्ति-, मौक्तिकैः=मुक्तासमूहैः, विस्तृतम्=आच्छादितम्, "शिलोच्चयमशि-त्" इति पूर्वेण सम्बन्धः ॥ ४९ ॥

बड़ी-बड़ी शिलाओं से उसका आकाश व्याप्त था (पर्वत की चोटियाँ आकाश ऊँची थीं)। सिंहों द्वारा मारे गये गजराजों के मस्तकों से निकले मोती वहाँ जगह बिखरे पड़े थे ॥ ४९ ॥

निर्झरीपूरनिर्धौतकलधौतशिलातलम् ।
मेखलोपान्तविलसत्पुलिन्दपृतनापतिम् ॥ ५० ॥

निर्झरीत्यादि। निर्झरीणाम्=गिरिनदीनाम्, पूरेण=प्रवाहेन, निर्धौतम्=तम्, कलधौतस्य=सुवर्णस्य, शिलातलम्=शिलातटं यस्य तम्, मेखलायाः=

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गिरिनितम्बस्य, उपान्ते=समीपे, विलसन्=बिभ्राजन्, पुलिन्दस्य=किरातस्य, पृतनायाः=सेनायाः, पतिः=स्वामी यस्य तम्; "मेखलाद्रिनितम्बे स्याद् रसना-खड्गबन्धयोः" इति हेमचन्द्रः। "शिलोच्चयमशिश्रियत्" इति पूर्वेण सम्बन्धः ॥ ५० ॥

उसका सुनहरा शिलातट पहाड़ी नदियों से बने झरनों से निरन्तर धुलता रहता था। और उस की उपत्यका में एक तरफ किरातों ने भी डेरा डाल रखा था ॥५०॥

तडाके तस्य सिद्धार्थः स्नात्वा निकटवर्तिनि।
स्थित्वा तटशिलापट्टे भिक्षान्नरसमन्वभूत् ॥ ५१ ॥

तडाके इति। सिद्धार्थः=राजकुमारः, तस्य=पर्वतस्य, तडाके=सरसि, स्नात्वा=स्नानं कृत्वा, निकटवर्तिनि=समीपवर्तिनि, तटशिलापट्टैः=तटस्थित-शिलाफलके, भिक्षान्नरसम्=भिक्षासम्पादितान्नरसम्, अन्वभूत्=अनुबभूव ॥

ऐसे उस पर्वत के किसी एक जलाशय के किनारे बैठकर, स्नान करने के बाद, उस तपोधन ने भिक्षान्न-रस का ग्रहण किया ॥ ५१ ॥

अपरेद्युर्विनिर्गत्य तस्मादेष पुरान्तरे।
पिण्डपातविधिं कृत्वा प्रापदभ्यर्णकाननम् ॥ ५२ ॥

अपरेद्युरिति। अपरेद्युः=अन्यस्मिन् अहनि, एषः=सिद्धार्थः, तस्मात् पाण्डरपर्वतप्रदेशात्, विनिर्गत्य=निष्क्रम्य, पुरान्तरे=अन्यस्मिन्नगरे ग्रामे वा, पिण्डस्य=भिक्षान्नस्य, पातविधिम्=उदरे पातनकर्म, भिक्षान्नभोजनमित्यर्थः, कृत्वा=विधाय; अभ्यर्णकाननम्=सन्निहितवनम्; प्रापत्=प्राप्नोत् ॥ ५२ ॥

फिर दूसरे दिन वहाँ से भी चलकर किसी दूसरे नगर में जाकर उन्होंने भिक्षा-चर्या की। और भिक्षाचर्या कर पुनः वे पास के एकान्त वन में चले गये ॥ ५२ ॥

तडाकनिकटे नद्यास्तटे शैले च कानने।
निवसन् दिवसानेष निन्ये मान्यो बहूनपि ॥ ५३ ॥

तडाकेत्यादि। एषः=तपस्वी सिद्धार्थः, मान्यः=जगतां पूज्यः सन्, कदाचित्, तडाकनिकटे=कस्यचित् सरोवरस्य निकटे, कदाचित्, नद्याः=कस्याश्चित् सरितस्तटे=तीरे, कस्मिंश्चित् शैले=पर्वते वा, कानने=वने वा, निवसन्=वासं कुर्वन्, बहून्=अनल्पान्, दिवसान्=दिनानि, निन्ये=यापयामास ॥ ५३ ॥

इस तरह उस पूज्य तपोधन ने कभी किसी तालाब (तडाग) के निकट, कभी किसी नदी के किनारे पर, या कभी किसी पर्वत पर या कभी किसी एकान्त वन में रहते हुए बहुत सा समय बिताया ॥ ५३ ॥

तपोवनेषु धन्येषु दुःसाधानि तपांस्यपि।
चचार धीरहृदयः संसारक्लेशशान्तये ॥ ५४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तपोवनेष्विति । अयं धीरहृदयः=धैर्यशाली, सिद्धार्थः, धन्येषु=सिद्धार्थ-
बन्धरूपधनं लब्धवत्सु, महाभाग्यवत्स्वित्यर्थः, तपोवनेषु=तपःस्थलभूत-
ननेषु, संसारे=जगति, ये क्लेशाः=जरामरणादयस्तेषां शान्तये=निवृत्त्यैः,
साधानि=इतरैः साधयितुमशक्यानि, तपांसि=क्लिष्टकर्माणि, चचार=
चरितवान् ॥ ५४ ॥

सिद्धार्थ द्वारा तप करने के कारण महाभाग्यवान् उन तपोवनों में उस धीर
ष ने संसार की दुःखनिवृत्ति के लिये दुष्करचर्यायुक्त तप किया ॥ ५४ ॥

अप्राप्य निर्वाणपदं दुश्चरैश्चरितैरपि ।
को वाऽभ्युपायस्तस्यार्थे भवेदित्याकुलोऽभवत् ॥ ५५ ॥

अप्राप्येति । (सः सिद्धार्थः) दुश्चरैः=आचरितुमशक्यैः; चरितैः=
नुष्ठानैः; भावे क्तः; निर्वाणपदम्=मुक्तिपदम्, अप्राप्य=अलब्ध्वा, तस्य=निर्वा-
स्य; अर्थे=विषये; "अर्थो विषयार्थकारणवस्तुषु" इत्यमरः । को वा,
यः, अभ्युपायः=साधनम्; भवेत्=स्यात्—इति=एवम्; आकुलः=व्यग्रः,
न्तित इत्यर्थः; अभवत्=अभूत् ॥ ५५ ॥

परन्तु इतनी दुष्कर चर्या करने पर भी जब उन्हें निर्वाण का मार्ग नहीं मिला तो
का हृदय अत्यन्त व्याकुल हो उठा कि संसार की दुःखनिवृत्तिहेतु अब कौन
ाय किया जाय कि उससे निर्वाण अधिगत हो सके ! ॥ ५५ ॥

एकदा पारमीभाग्यपरिपाकप्रकाशनम् ।
स्वप्नपञ्चकमद्राक्षीत् सुचरित्रनिधिः[1] प्रगे[2] ॥ ५६ ॥

एकदेति । एकदा=एकस्मिन् काले; सुचरितानाम्=शोभनचरित्राणाम्,
धिः=आकरः, सिद्धार्थः; परमस्य भावः पारमी, "गुणवचनब्राह्मणादिभ्यः
र्मणि च" (पा० सू० ५.१.१२४) इति भावे ष्यञ्, षित्वान्ङीषि,
लस्तद्धितस्य" (पा० सू० ६.४.१५०) इति यलोपे सिद्धं रूपम्; तस्यै
 भाग्यम्=अदृष्टविशेषः, तस्य परिपाकस्य=फलोन्मुखत्वस्य; प्रकाशनम्=
वकम्; स्वप्नपञ्चकम्=पञ्च स्वप्नान्; प्रगे=प्रातःकाले; "प्रगे प्रातः
ाते च" इत्यमरः । अद्राक्षीत्=द्रष्टवान् ॥ ५६ ॥

एक बार उन्हें किसी दिन ब्राह्म मुहूर्त के समय अपनी असीमित तपस्या के
लबोधक पाँच स्वप्न दिखायी दिये ॥ ५६ ॥

दृष्ट्वाऽवबुध्य स्वप्नार्थं प्रत्यवेत्य विचक्षणः ।
निश्चिकायाहमद्यैव निर्वृतिं प्राप्नुयामिति ॥ ५७ ॥

१. ०सुधीः—क० । २. प्रभुः—म० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्ट्वेति। (सः=तपोधनः) दृष्ट्वा=अवलोक्य, स्वप्नमिति शेषः, अवबुध्य=जागरित्वा; स्वप्नार्थम्=स्वप्नदृष्टस्वप्नप्रयोजनम्, प्रत्यवेत्य=ज्ञात्वा; "अहम्=सिद्धार्थः, अद्यैव=अस्मिन्नेव दिने, निर्वृतिम्=निर्वाणम्, प्राप्नुयाम्=लभेयम्" इति=इत्थम्, निश्चिकाय=निरचिनोत् ॥ ५७ ॥

उन स्वप्नों को देखने के बाद उस तपस्वी के हृदय में दृढ़ निश्चय हो गया कि मैं आज निर्वाण अवश्य अधिगत कर लूँगा ॥ ५७ ॥

कृत्वा दिनमुखाचारं भिक्षावेलां प्रतीक्ष्य सः ।
आसाञ्चक्रे वटस्याधः पूजाविहितसत्कृतेः[1] ॥ ५८ ॥

कृत्वेति। सः=तपोधनः; दिनमुखे=प्रत्यूषे, य आचारः=कर्म, तम्; कृत्वा=विधाय, भिक्षावेलाम्=भिक्षासमयम्; प्रतीक्ष्य=प्रतीक्षां कृत्वा; पूजाभिः=अर्चनाभिः, विहिता=कृता, सत्कृतिः=सत्कारो यस्य तस्य, वटस्य=वटवृक्षस्य (पिप्पलस्य ?), अधः=अधःप्रदेशे; आसाञ्चक्रे=तस्थौ ॥ ५८ ॥

तब उन्होंने दिन का नित्य कर्म कर, भिक्षा का समय होने की प्रतीक्षा करते हुए एक वट वृक्ष के नीचे जाकर, उसकी पूजा करने के बाद, वहीं आसन लगा लिया ॥

पायसभोजनम्

अथ काचिद् विशालाक्षी देवतां तन्निवासिनीम् ।
अधिकृत्य तदा निन्ये पायसं प्रार्थनापरा ॥ ५९ ॥

अथेति। अथ=वटमूलस्थित्यनन्तरम्; तदा=तस्मिन् काले; तन्निवासिनीम्=वटवृक्षाधिष्ठात्रीम्, देवताम्=देवविशेषम्; अधिकृत्य=उद्दिश्य; काचित्; विशालाक्षी=विशालनयना, प्रार्थनापरा=अभीप्सितसिद्धियाचनपरा, पायसम्=क्षीरेण सम्पृक्तं पक्वमोदनम्, निन्ये=अनैषीत् ॥ ५९ ॥

उस समय कोई विशाल नेत्रों वाली तरुणी, उस वट वृक्ष की अधिष्ठात्री देवता की पूजा के लिये, खीर भरा पात्र हाथ में लेकर वहाँ आयी ॥ ५९ ॥

तच्छङ्कयैव सा तस्मै ददौ पात्रेण पायसम् ।
तदादाय महासत्त्वो ययौ नैरञ्जरातटम् ॥ ६० ॥

तदित्यादि। तच्छङ्कयैव=वटाधिष्ठितदेवतासन्देहेनैव, सा=नारी, तस्मै=सिद्धार्थाय; पात्रेण=भाजनेन; उपलक्षितमिति शेषः, ददौ=दत्तवती। तत् पायसम्=क्षीरपक्वौदनम्; स महासत्त्वः=महाव्यवसायः; "सत्त्वं द्रव्ये गुणे चित्ते व्यवसायस्वभावयोः" इति हेमचन्द्रः। आदाय=गृहीत्वा; नैरञ्जरातटम्=नैरञ्जरानदीतीरम्; ययौ=अयासीत् ॥ ६० ॥

१. प्रजाविहित०—म०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वहाँ उसने उस तपस्वी को बैठा देखकर, उसे ही उस वट वृक्ष की अधिष्ठात्री ाता मानते हुए, वह खीर (पायस) भरा पात्र उसे भेंट कर दिया। वह महाप्राण स्वी उस पात्र को लेकर नेरञ्जरा नदी के तट की तरफ चल दिया ॥ ६० ॥

तस्याः शरन्निशाकाशविमले सलिले मुनिः ।
स्नात्वा सुवर्णपात्रस्थं बुभुजे पायसं बुधः ॥ ६१ ॥

तस्या इति । मुनिः-सिद्धार्थः; तस्याः=नैरञ्जरानद्याः, शरन्निशायाम्=ारद्यां रात्रौ, आकाशवद्=गगनवत्, विमले=पर्यवदाते; सलिले=जले; ात्वा=स्नानं विधाय; सुवर्णपात्रस्थम्=सुवर्णमयभाजने स्थितम्, पायसम्=ारमिश्रितौदनम्; बुभुजे-भुक्तवान् ॥ ६१ ॥

उस तपस्वी ने नेरञ्जरा नदी के शरदृतु की रात्रि के आकाश की तरह निर्मल ल में स्नान कर उस सुवर्णपात्र में रखी खीर को भिक्षान्न के रूप में ग्रहण किया ॥

सालकाननवर्णनम्

ततः किसलयालोकबालातपविलासिनि ।
मनोज्ञकोकिलालापवाचालहरिदञ्चले ॥ ६२ ॥

तत इति । ततः=पायसभोजनानन्तरम्; किसलयानाम्=पल्लवानाम्, ालोकः=प्रकाश एव बालातपः-बालसूर्यः, तेन विलसतीति तस्मिन्; मनोज्ञैः-न्दरैः; कोकिलालापैः=पिकध्वनिभिः; वाचालानि=मुखराणि, हरिदञ्च-ानि=दिगन्तानि, यस्य तस्मिन्; "सालकानने तापं निनाय" इत्यग्रिमेण लोकेन सह सम्बन्धः ॥ ६२ ॥

उस पायसरूप भिक्षान्न को ग्रहण करने के बाद वे तपोधन उस सालवन में वेष्ट हुए जहाँ वृक्षों के कोमल पत्रों से अरुणिमा फैली हुई थी, और मनोहर कोयल । कूक से वहाँ की सारी दिशाएँ प्रतिध्वनित थीं ॥ ६२ ॥

मन्दानिलाधूतलताडोलादुर्ललितालिनि ।
बालचूतांकुरास्वादमोदमानवनप्रिये ॥ ६३ ॥

मन्देत्यादि । मन्दानिलेन=मन्दवायुना; आधूतासु=कम्पितासु, लतासु=ल्लरीष्वेव, डोलासु=क्रीडायन्त्रेषु; दुर्ललिताः=गर्विताः, अलयः=भ्रमराः; ास्मिस्तस्मिन्; बालचूतांकुराणाम्=नव्याम्रपल्लवानाम्, आस्वादेन=रसेन, ोदमानाः=तुष्यन्तः; वनप्रियाः-पिकाः, यस्मिस्तस्मिन्; "वनप्रियः परभृतः ोकिलः पिक इत्यपि" इत्यमरः । यस्मिस्तस्मिन् । "सालकानने तापं नेनाय" इत्यग्रिमेण सह सम्बन्धः ॥ ६३ ॥

जहाँ मन्द मन्द वायु से लहराती लताओं को डोला (झूला) समझ कर बैठे हुए ामरसमूह अपने को गर्वित समझ रहे थे। और कोकिलसमूह नवप्रसूत आम्र-ञ्जरियों पर बैठे हुए आनन्दित हो रहे थे ॥ ६३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मन्दारकोरकस्यन्दिमकरन्दसुगन्धिनि ।
मदगन्धवहस्पन्दकन्दलीकृतकौतुके ॥ ६४ ॥

मन्दारेत्यादि । मन्दारकोरकेभ्यः=पारिजातकलिकाभ्यः, स्यन्दिभिः= प्रस्रवद्भिः, मकरन्दैः=पुष्परसैः, सुगन्धिनि=सुरभिणि; मदगन्धवहस्य=मद-जनकवायोः; स्पन्देन=स्पर्शेन, कन्दलीकृतम्=वर्धितम्, कौतुकम्=सन्तोषो यस्मिंस्तस्मिन् । "सालकानने तापं निनाय" इत्यग्रिमेण सह सम्बन्धः ॥ ६४ ॥

जहाँ पारिजात की कलियों से झरने वाले पुष्परस से वायुमण्डल सुगन्धित हो रहा था । और मदोत्पादक वायु के झोंकों से सर्वत्र सन्तोष व्याप्त था ॥ ६४ ॥

उत्फुल्लमञ्जरीपुञ्जपिञ्जरीकृतसत्पथे ।
भ्रमद्भ्रमरझङ्कारहुङ्कारचकिताध्वगे ॥ ६५ ॥

उत्फुल्लेत्यादि । उत्फुल्लेन=विकचेन, मञ्जरीपुञ्जेन=पुष्पस्तबक-राशिना, पिञ्जरीकृतः=पिङ्गलीकृतः, सत्पथः=आकाशमार्गो यस्य तस्मिन्; भ्रमताम्=भ्रमणं कुर्वताम्, भ्रमराणां झङ्कारादेव=हुङ्कारादेव, चकिताः= भीताः, अध्वगाः=पथिकाः, यस्मिंस्तस्मिन् । "सालकानने तापं निनाय" इत्यग्रिमेण सह सम्बन्धः ॥ ६५ ॥

जहाँ विकसित मञ्जरीसमूह ने आकाशमार्ग को पिङ्गलवर्णमय बना दिया था, और उन पर भ्रमरसमूह द्वारा ऐसी झङ्कार हो रही थी कि उसे सुनकर पथिकजन चकित से हो रहे थे ॥ ६५ ॥

विहङ्गपक्षविक्षिप्तपरागभरपांसुले ।
माकन्दमधुसन्दोहजम्बालितमहीतले ॥ ६६ ॥

विहङ्गेत्यादि । विहङ्गानाम्=पक्षिणाम्, पक्षैः=छदैः, विक्षिप्तेन=विकीर्णेन, परागभरेण=धूलिभारेण, पांसुले=धूसरे, माकन्दानाम्=आम्राणाम्, मधुसन्दोहेन=मधुप्रवाहेण, जम्बालितम्=कर्दमितम्, महीतलम्=भूप्रदेशो यस्मिंस्तस्मिन् । "सालकानने तापं निनाय" इत्यग्रिमेण सह सम्बन्धः ॥ ६६ ॥

उस वन का भूमिप्रदेश पक्षियों के पंखों से उड़कर बिखरी हुई धूल से धूसरित एवं आम्रवृक्षों की नवप्रसून मञ्जरियों के मधुप्रवाह के कारण कीचड़ से भरा हुआ था ॥ ६६ ॥

प्रफुल्लसुमनोवल्लीमतल्लीयुतमारुते ।
वसन्तकालसामन्तसाम्राज्यमणिमण्डपे ॥ ६७ ॥

प्रफुल्लेत्यादि । प्रफुल्लाः=विकचाः, सुमनसः=पुष्पाणि, तेषां वल्लीमतल्लिभिः=लताश्रेष्ठैः, युतः=सङ्गतः, मारुतः=वायुः, यस्मिंस्तस्मिन्; वसन्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽ एव, सामन्तः=सन्निहितराजः, तस्य यत् साम्राज्यम्=आधिपत्यम्, । मणिमण्डपे-मणिमयमण्डपे। "सालकानने तापं निनाय" इत्यग्रिमेण सम्बन्धः ॥ ६७ ॥

वहाँ फूली हुई लताओं से सम्पृक्त वायु सुगन्धित था। और वह वनप्रदेश उस । ऐसा लग रहा था मानों वह वसन्तराज के आधिपत्य का सञ्चालन करने के मणिमय मण्डप हो ॥ ६७ ॥

ताली-तमाल-हिन्तालबहुले सालकानने।
स्थित्वा माध्यन्दिनं तापं निनाय नरनायकः॥ ६८ ॥

तालीत्यादि। तालीतमालहिन्तालबहुले-तालादिवृक्षविशेषैः पूर्णे, सालःाने=सालवृक्षाणां वने, स्थित्वा, नरनायकः=नरश्रेष्ठः सिद्धार्थः, माध्यन्दि=मध्याह्नभवम्, तापम्-उष्णम्, निनाय-दूरीचकार॥ ६८ ॥

उस ताल, तमाल आदि वृक्षों से भरे-पूरे सालवन में बैठकर उस नरनायक रुषश्रेष्ठ) ने अपना दोपहर की गर्मी का समय बिताया॥ ६८ ॥

बोधिप्राप्तिः

दिनावसाने सम्प्राप्ते याममात्रावधौ यतः।
उत्थाय भगवान् बोधिं प्रपेदे प्राज्यविक्रमः॥ ६९ ॥

दिनावसान इति। दिनावसाने=सायङ्काले, सम्प्राप्ते-आगते सति, भूतं प्रचुरं प्राज्यम्" इत्यमरः। प्राज्यविक्रमः-प्रभूतविक्रमः, भगवान्=ास्वामी, याम एव याममात्रम् अवधिः=सीमा, यस्य तस्मिन्, उत्थाय=थतो भूत्वा; बोधिम्=अश्वत्थवृक्षम्, "पिप्पलो बोधिरश्वत्थः" इति ।कोशः। प्रपेदे=गतवान् ॥ ६९ ॥

उस प्रभूत पराक्रमशाली भगवान् ने, दिन के व्यतीत होने पर, एक प्रहर के , एक बोधि (पीपल) वृक्ष के नीचे, बोधि प्राप्त करने के लिये, दृढ़ आसन ।या॥ ६९ ॥

ब्रह्मणोपहितान् दर्भान् आदाय निजपाणिना।
चिक्षेप देशिकवरः प्राच्ये बोधिमहीतले॥ ७० ॥

ब्रह्मणेति। स देशिकवरः=उपदेशकश्रेष्ठः सिद्धार्थः, ब्रह्मणा=आदिदेवेन, हितान्=आनीतान्, दर्भान्=कुशसमूहान्, आदाय-गृहीत्वा, निजपाणिना=हस्तेन, प्राच्ये-प्राग्भवे, बोधिमहीतले=अश्वत्थावृतभूप्रदेशे, चिक्षेप=ापत् ॥ ७० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उस जगद्गुरु ने ब्रह्मा द्वारा भेजी गयी पवित्र कुश(डाभ)राशि को आसन के रूप में उस बोधिवृक्ष के नीचे अपने हाथों से बिछाया और उस पर वे पूर्व दिशा की तरफ मुख करके विराजमान हुए ॥ ७० ॥

तत्र कन्दर्पदर्पाणामभेद्यमतिकोमलम् ।
अपराजितपर्यङ्कम् आविरासीन्महासनम् ॥ ७१ ॥

तत्रेति। तत्र=बोधितलप्राच्यभागे; कन्दर्पदर्पाणाम्=मदनाहङ्कारैः; "कृत्यानां कर्तरि वा" (पा० सू० २. ३. ७१) इति षष्ठी; अभेद्यम्=भेदयितुमशक्यम्; अपराजितः=अविजितः, पर्यङ्कः=आसनविशेषो यस्मिस्तत्; महासनम्=श्रेष्ठासनम्; आविरासीत्=आविर्बभूव ॥ ७१ ॥

वे बोधिसत्व उस बोधि तल के प्राच्य भाग में कामदेव के अभिमान को चूर्ण करने वाले अपराजित श्रेष्ठ आसन पर विराजमान हुए ॥ ७१ ॥

आरुरोहासनं तुङ्गम् अनङ्गरिपुमद्भुतम् ।
अंशुमानिव पूर्वाद्रिम् अशेषजनबोधकः ॥ ७२ ॥

आरुरोहेति। अशेषाणाम्=निखिलानाम्, जनानाम्=लोकानाम्; बोधकः=अज्ञाननिवर्तकः, निद्रानिवर्तकश्च; स तपस्वी सिद्धार्थः; तुङ्गम्=उन्नतम्, अनङ्गरिपुम्=मदनशत्रुम्, निर्वेदजनकमित्यर्थः; आसनम्=पीठम्; अंशुमान्=सूर्यः; पूर्वाद्रिम्=उदयाद्रिम्, इव; आरुरोह=आरूढवान् ॥ ७२ ॥

वे बोधिसत्व उन उन्नत एवं मदनशत्रु (वैराग्यजनक) आसन पर उसी तरह विराजमान हुए जैसे सभी जनों को अज्ञानरूपी निद्रा से जगाने वाले भगवान् सूर्य पूर्व दिशा के उदयाद्रि पर विराज रहे हों ॥ ७२ ॥

आरूढबोधिपर्यङ्कम् अभंगुरगुणं सुराः ।
अमुमारेभिरे स्तोतुम् अवाङ्मनसगोचरम् ॥ ७३ ॥

आरूढेत्यादि। सुराः=देवाः, आरूढः=उपविष्टः, बोधिपर्यङ्कः=बोधिमूलस्थः पर्यङ्को येन तम्; अभंगुराः=अविनाशिनः, नित्या इति यावत्; गुणाः=सद्गुणाः यस्य तम्; वाक् च मनश्च वाङ्मनसे, तयोः गोचरः=विषयो न भवतीति तादृशम्, अमुम्=सिद्धार्थम्, स्तोतुम्=स्तुतिं कर्तुम्, आरेभिरे=प्रारब्धवन्तः ॥ ७३ ॥

इस अनश्वर गुण वाले बोधि-आसन पर विराजमान हुए उस वाणी एवं मन से अवर्णनीय बोधिसत्त्व की देवगण यों स्तुति करने लगे ॥ ७३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुद्धस्तोत्रम्

नमः सुगुणमाणिक्यसिन्धवे[1] रविबन्धवे ।
नमः संसारपाथोधिसेतवे मुनिकेतवे ॥ ७४ ॥

अथाष्टभिः पद्यैः स्तोत्रप्रकारमाह—**नम** इत्यादि । सुगुणानाम्=सद्गुणा-
ाेव, माणिक्यानाम्=रत्नानाम्, सिन्धवे=समुद्राय; "सिन्धुः समुद्रे नद्यां च"
त विश्वः । रविबन्धवे=आदित्यबन्धवे; तद्वंश्यत्वात्; संसार एव पाथोधिः=
ारः, तस्य सेतवे=पुलिनभूताय; उत्तारकायेत्यर्थः, मुनिकेतवे=मुनिश्रेष्ठाय;
ः=प्रणामः । अस्त्विति शेषः ॥ ७४ ॥

हे सद्गुणरूप रत्नों के सागर ! आदित्यबन्धो ! संसार-समुद्र को पार करने के सेतुभूत ! एवं मुनिश्रेष्ठ ! आप को प्रणाम है ॥ ७४ ॥

नमः सकलसंक्लेशहारिणे गुणहारिणे ।
नमः समस्ततत्त्वार्थवेदिनेऽद्वयवादिने ॥ ७५ ॥

नम इति । सकलान्=समग्रान्, संक्लेशान्=दुःखानि हरतीति तस्मै; गुणैः=
ुणैः, हारिणे=मनोज्ञाय, "चारु हारि रुचिरम्" इति हेमचन्द्रः ।
स्ततत्त्वानाम्=सकलतत्त्वानाम्, अर्थवेदिने=अर्थज्ञाय; अद्वयवादिने=बुद्धाय;
द्वयवादी विनायकः" इत्यमरः । नमः=प्रणामः । अस्त्विति शेषः ॥७५॥

सभी दुःखों के निवर्तक ! सद्गुणों के कारण सबके प्रियभूत हे मुनिश्रेष्ठ ! ाको प्रणाम है ॥ ७५ ॥

करुणापूरलहरीपरीवाहितचक्षुषे ।
भागधेयनिधानाय भगवन् ! भवते नमः ॥ ७६ ॥

हे भगवन्=ऐश्वर्यशालिन् ! करुणापूरस्य=दयाप्रवाहस्य, लहरीभिः=महो-
र्मिभिः, परीवाहिते=परीवाहवत् जलोच्छ्वासवत् कृते, चक्षुषी=नेत्रे यस्य
ै, "तस्मिंस्त्वेव महत्यषण् । ऊर्मिः कल्लोल उल्लोल लहर्युत्कलिकेति च"
वैजयन्ती । भागधेयनिधानाय=भाग्यनिधये, भवते=सिद्धार्थाय; नमः=
ामः । अस्त्विति शेषः ॥ ७६ ॥

हे भाग्यशालिन् ! आपकी दृष्टि से सभी के लिये अजस्र करुणा-प्रवाहित हो है, अतः हे भगवन् ! आपको प्रणाम है ॥ ७६ ॥

कन्दर्पदर्पनिर्भेदकर्मठस्त्वं न चापरः ।
पञ्चाननं विना को हि कुञ्जरं शासितुं क्षमः ! ॥ ७७ ॥

कन्दर्पेत्यादि । कन्दर्पदर्पस्य=मन्मथगर्वस्य, निर्भेदे=निःशेषेण भेदने,
ठः=कर्मशूरः; "कर्मशूरस्तु कर्मठः" इत्यमरः । कर्मणि घटते इति विग्रहे

१. सद्गुण०—म० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"कर्मणि घटोऽठच्" (पा० सू० ५.२.३५); इति अठच्प्रत्ययः । जितेन्द्रिय इत्यर्थः, त्वमेव=सिद्धार्थः, असि; न तु कश्चिद् अपरः=अन्यः । पञ्चाननम्=सिंहं विना, कुञ्जरम्=गजम्, शासितुम्=अनुशासनं कर्तुम्, को हि क्षमः=समर्थः । अस्तीति शेषः ॥ ७७ ॥

हे भगवन् ! कन्दर्प (वासनाओं) के गर्व को दमन करने में आप ही समर्थ हैं, और कोई नहीं; जैसे मन्दोन्मत्त हाथी पर अनुशासन रखने में सिंह ही समर्थ होता है, अन्य कोई नहीं ॥ ७७ ॥

शूरस्त्वमेव दुर्वारगर्वतीर्थिकमर्दने ।
मन्दरेण विना सिन्धुं मथितुं केन पार्यते ! ॥ ७८ ॥

दुर्वारेत्यादि । दुर्वारः=कष्टेन वारयितुं शक्यः, गर्वः=अभिमानम्, येषां तेषाम्, तीर्थिकानाम्=मतान्तराचार्याणाम्, मर्दने=भञ्जने, त्वमेव=भवानेव, शूरः=वीरः, समर्थ इति यावत् । मन्दरेण=एतन्नामकेन पर्वतेन विना, सिन्धुम्=समुद्रम्; मथितुम्=विलोडितुम्, केन=अन्येन, पार्यते=शक्यते ॥ ७८ ॥

और कठिनता से पीछे हटाये जाने योग्य विरोधी धर्मोपदेशकों का मर्दन करने में भी आप ही समर्थ हैं; क्योंकि मन्दराचल के अतिरिक्त समुद्र के मन्थन में कौन समर्थ हो सकता है ! ॥ ७८ ॥

चुलुकीकरणे शूरस्त्वमेव भववारिधेः ।
कुम्भयोनिं विना को हि कोविदः सिन्धुचूषणे[1] ॥ ७९ ॥

चुलुकीत्यादि । भववारिधेः=संसारसागरस्य, चुलुकीकरणे=आचमने; त्वमेव=भवानेव, शूरः=समर्थः; असीति शेषः; हि=यतः; कुम्भयोनिम्=अगस्त्यर्षिं विना, कः=अन्यः, सिन्धोः=समुद्रस्य, चूषणे=पाने, कोविदः=समर्थः । अस्तीति शेषः ॥ ७९ ॥

संसारसागर को एक अञ्जलि में रखकर पी जाने में आप उसी तरह समर्थ हैं जैसे कभी अगस्त्य ऋषि ने पूरे समुद्र को पी डाला था ॥ ७९ ॥

कुशलोऽत्र भवानेव क्षोणीवलयबोधने ।
को वा विधुर्विना चन्द्रं कुमुदाकरहासने ! ॥ ८० ॥

कुशल इति । अत्रभवान्=पूज्यः; अथवा-अत्र=लोके; भवान्=त्वमेव; क्षोणी वलयस्य=भूमण्डलस्य, तत्स्थजनस्येति यावत्; बोधने=ज्ञानोपदेशे, कुशलः=समर्थोऽस्ति; कुमुदाकरस्य=कुमुदिन्याः; हासने=विकचीकरणे, चन्द्रम्=शशिनं विना, को वा कुशलः=चतुरः । अस्तीति शेषः ॥ ८० ॥

समग्र भूमण्डल के दुःखी जनों को ज्ञानोपदेश करने में आप ही समर्थ हैं; कुमुदिनी को विकसित करने में चन्द्रमा के अतिरिक्त कौन समर्थ है ! ॥ ८० ॥

१. ०शोषणे—क० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवक्लेशं त्वमेवेश ! निःशेषयितुमीशिषे ।
हर्तुमन्यः किमीशीत हरिदश्वादृते तमः ॥ ८१ ॥

वेत्यादि । हे ईश=प्रभो ! भवक्लेशम्=संसारदुःखम्, निःशेषेण शेषयितुम्=
ाशयितुम्, त्वमेव=भवानेव, ईशिषे=प्रभवसि । हरिदश्वादृते=सूर्यं विना,
=अन्धकारम्, हर्तुम्=नाशयितुम्; अन्यः=अपरः; किमीशीत=प्रभवेत् ॥८१॥

जैसे सूर्य के विना सकल संसार के अन्धकार का नाश करने में और कोई समर्थ
उसी तरह भवक्लेशों को बिनष्ट करने में केवल आप ही क्षम हैं ॥ ८१ ॥

एताभिरेषां स्तुतिभिरेधमानगुणोदयम् ।
बोधिमूलतलारूढं बुद्धं शुश्राव मन्मथः ॥ ८२ ॥

एताभिरिति । मन्मथः=कामः; एषाम्=देवानाम्, एताभिः=एभिः,
ाभिः=बुद्धमुद्दिश्य कृताभिः स्तुतिभिः; एधमानः=वर्धमानः, गुणस्योदयः=
ाभावो यस्य तम्; बोधिमूलतलम्=अश्वत्थमूलदेशम्, आरूढम्=उपविष्टम्,
; शुश्राव=अशृणोत् ॥ ८२ ॥

इस तरह देवताओं द्वारा स्तुत बोधि वृक्ष के नीचे बोधि आसन पर विराजमान
सत्त्व के गुणों की देवताओं द्वारा प्रशंसा कामदेव (मार) ने भी सुनी ॥ ८२ ॥

वा मनोभूः क्षुभितान्तरात्मा विरक्तबुद्धापशदं विजेतुम् ।
वाऽभ्युपायो भुवने मम स्यादित्याशु चिन्ताज्वरनिर्दुतोऽभूत्[1] ॥ ८३ ॥

इति श्रीबुद्धघोषविरचिते पद्यचूडामणिनाम्नि महाकाव्ये नवमः सर्गः ॥

श्रुत्वेति । क्षुभितः=कलुषितः, अन्तरात्मा=अन्तःकरणं यस्य सः;
भूः=मन्मथः, तां पूर्वोक्तां सुरैः कृतां बुद्धस्तुतिं श्रुत्वा=आकर्ण्य;
रक्तः=निःस्पृहः, यो बुद्धापशदः=बुद्धनीचः, तम्; "विहीनोऽपशदो जाल्मः"
रः । विजेतुम्=पराभवितुम्, भुवने=लोके, कः, अभ्युपायः=सामादिः,
ायः सामभेदादौ" इति मेदिनी । मम=मन्मथस्य; स्यात्=भवेत्"-इति=
; आशु=शीघ्रम्; चिन्ताज्वरेण=चिन्तारूपज्वरेण, निर्दुतः=निःशेषेण
प्तः; अभूत्=बभूव ॥

इति पद्यचूडामणिमहाकाव्यस्य कीर्त्तिव्याख्यायां नवमः सर्गः ॥

प्रशंसा सुनकर कामदेव हृदय से जलता-बुझता-बोधिसत्त्व को अपशब्द कहता
सोचने लगा कि कौन उपाय किया जाय कि समग्र संसार पर मेरा ही एकच्छत्र
रहे और मेरे विरुद्ध कोई खड़ा न हो सके ॥ ८३ ॥

पद्यचूडामणि महाकाव्य के नवम सर्ग का भाषान्तर पूर्ण । ९ ॥

[1] ज्वरजर्जरो०—म० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दशमः सर्गः

मारसन्नद्धतावर्णनम्

**अत्रान्तरे निविडमास्थितबोधिमूलमावेगवानभिषिषेणयिषुर्मुनीन्द्रम् ।
अध्यास्य मत्तकरिणं गिरिमेखलाख्यमाहूतसैन्यनिवहो निरगादनङ्गः ॥१॥**

अत्रेति । अत्रान्तरे=बुद्धस्य देवकृतस्तुत्यवसरे; निविडम्=अत्यन्तम्, क्रियाविशेषणमेतत् 'अभिषिषेणयिषुः' इत्यत्रान्वेति । आस्थितम्=आश्रितम्, बोधिमूलम्=अश्वत्थमूलं येन तम्, मुनीन्द्रम्=मुनिश्रेष्ठम्; अभिषेणयितुम्=सेनया अभिगन्तुमिच्छुः =अभिलाषुकः; " यत्सेनयाऽभिगमनमरौ तदभिषेणनम्" इत्यमरः । आवेगवान्=सम्भ्रमवान्, "आटोपावेगसंरम्भसम्भ्रमास्तु" इति वैजयन्ती । आहूतः=आकारितः, सैन्यनिवहः=सैन्यसमूहो येन सः; अनङ्गः=मदनः; 'गिरिमेखलः' इति आख्या यस्य तम्; मत्तकरिणम्=मत्तगजम्; अध्यास्य=आरुह्य; निरगात्=निश्चक्राम । सर्गेऽस्मिन् **वसन्ततिलका** वृत्तम् । तल्लक्षणं पूर्वमुक्तम् ॥ १ ॥

बुद्ध पर आक्रमणहेतु मार की सन्नद्धता—देवताओं द्वारा भावी बुद्ध की स्तुति किये जाने की बात ज्यों ही मार (कामदेव) को ज्ञात हुई त्यों ही उसने बुद्ध पर आक्रमण करने के लिये गिरिमेखल नामक हाथी पर चढ़ कर तपस्या से च्युत करने हेतु अपनी सेनासहित उनकी ओर प्रस्थान किया ॥ १ ॥

**निर्गत्य निह्नुतदिगन्तरकन्दरेण निर्घातभीमजयदुन्दुभिनिःस्वनेन ।
सन्त्रासिताखिलजनेन महाबलेन साकं शनैरवततार धरामनङ्गः ॥२॥**

निर्गत्येति । निह्नुताः=आच्छादिताः, दिगन्तराण्येव=दिग्भागा एव, कन्दराः=गुहाः, येन तेन; "दरी तु कन्दरो वाऽस्त्री" इत्यमरः । निर्घातः=वाय्वभिघातशब्दः, तद्वत्, भीमः=भयङ्करः, जयदुन्दुभिनिःस्वनः=विजयभेरीशब्दो यस्य तेन; "वातापातस्तु निर्घातः" इति वैजयन्ती । सन्त्रासितः=उद्वेजितः, अखिलजनः=सकललोको येन तेन; महाबलेन=महासैन्येन, साकम्=सह; अनङ्गः=मदनः; धराम्=पृथ्वीम्; अवततार=अवतीर्णवान् ॥ २ ॥

समग्र दिशाओं की कन्दराओं में फैले भयङ्कर विजयदुन्दुभि के शब्द से तीनों लोकों को उद्विग्न करते हुए भारी सैन्यबल के साथ वह पृथ्वीलोक में उतरा ॥ २ ॥

**सम्भ्रान्तशाङ्खिकशताननपूर्यमाणो मारस्य सान्नहनिको वरशङ्खघोषः ।
संग्रामशश्वदुपलालितपाञ्चजन्यनादस्य न व्यसन मब्धिशयस्य चक्रे ॥३॥**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सम्भ्रान्तेत्यादि । सम्भ्रान्तानाम्=परिभ्रान्तानाम्, शाङ्खिकानाम्=शङ्ख-मानं शिल्पं येषां तेषाम्; शतस्य=एतत्संख्याकानाम्, आननैः=मुखैः, र्यमाणः=आध्मायमानः; सन्नहनम्=युद्धसन्नाहः प्रयोजनमस्येति तथोक्तः, रशङ्खघोषः=श्रेष्ठशङ्खध्वनिः; अब्धौ शेते इति अब्धिशयस्तस्य=विष्णोः; ंग्रामे=युद्धे, शश्वत्=असकृत्, उपलालितः=आदृतो यः पाञ्चजन्यनादः=ाञ्चजन्यशङ्खः, तस्य नादः=ध्वनिः तस्य; व्यसनम्=आसक्तिम्, न चक्रे=ा कृतवान् । मदनशङ्खघोषः पाञ्चजन्यनादमपि विजयत इति भावः ॥ ३ ॥

उस समय, सेना के आगे-आगे चल रहे शाङ्खिकों द्वारा किया गया उस युद्ध में त्साहवर्धक शङ्खनाद भगवान् विष्णु के पाञ्चजन्य शङ्खनाद को भी अतिक्रान्त कर हा था ॥ ३ ॥

निस्साणघोरनिनदो[1] निखिलान्तरिक्षकुक्षिम्भरिः प्रसृमरो मकरध्वजस्य ।
म्भोलिघोषजनितश्रवणोत्सवस्य देवस्य केवलमजायत दत्तहर्षः ॥ ४ ॥

निस्साणेत्यादि । मकरध्वजस्य=मदनस्य; प्रसमरः=प्रसरणशीलः; 'सृघस्यदः क्मरच्' (पा० सू० ५. २. १६०) इति क्मरचि रूपम्; निस्सा-ास्य=वाद्यविशेषस्य, घोरः=भयङ्करः, निनदः=ध्वनिः । निस्साणलक्षणं तु ङ्गीतरत्नाकरे इत्थं प्रतिपादितम्—

"कांस्यजस्ताम्रजो लौहो वोत्तमो मध्यमोऽधमः ।
एकवक्त्रो महान् वक्त्रे स्वल्पोऽधोर्ध्वयवाकृतिः ॥
भृतगर्भः कांस्यपात्रभारैर्महिषचर्मणा ।
छन्नाननो बद्धचर्मा तद्रन्घ्रन्यस्तवर्धकैः ॥
क्षिप्तोऽधो वध्रवलये निवेश्यावर्तितैर्मुहुः ।
द्विषद्वित्रासजननो निस्साणः शार्ङ्गिणोदितः ॥" इति ।

"शब्दे निनाद-निनद-ध्वनिध्वान-रव-स्वनाः" इत्यमरः । निखिलेन=सकलेन, अन्तरिक्षेण=गगनेन, कुक्षिं बिभर्त्तीति तादृशः; गगनव्यापीत्यर्थः । दम्भोलेः=शनेः, घोषेण=शब्देन, उत्पादितः=जनितः, श्रवणोत्सवः=श्रोत्रानन्दः, यस्य तस्य; देवस्य=इन्द्रस्य; केवलम्=अत्यन्तम्, दत्तः हर्षो येन सः, अजायत=जायते स्म । निस्साणध्वनिरिन्द्रस्यापि विस्मयमकरोदिति भावः ॥ ४ ॥

कामदेव (की सेना) द्वारा बजाये गये नगाड़े की गम्भीर ध्वनि सभी दिशाओं में व्याप्त होती हुई, वज्रध्वनि से आनन्दित इन्द्र के लिये भी हर्षप्रद हो गयी ॥ ४ ॥

मारसेनावर्णनम्

वेतण्डमण्डलविडम्बितचण्डवायुवेगावखण्डितकुलाचलगण्डशैलम् ।
संवर्तसागरसमुद्गतभङ्गतुङ्गत्वङ्गत्तुरङ्गमतरङ्गितसर्वदिक्कम्[2] ॥ ५ ॥

---

१. ०घोषनिनदो—क० । २. ०भङ्गतुङ्ग०—म० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तभिः पद्यैः मदनस्य चतुरङ्गबलं कुलकेन वर्णयति—वेतण्डेत्यादिना । वेतण्डमण्डलेन=गजसमूहेन, विडम्बिताः=अनुकृताः, चण्डवायोः=प्रबलमारुतस्य, बेगेन=प्रवाहेण, अवखण्डिताः=विभक्ताः (च्युताः), कुलाचलानाम्=कुलाद्रीणाम्, गण्डशिलाः=स्थूलशिलाः यस्य तत्; "गण्डशैलास्तु च्युताः स्थूलोपला गिरेः" इत्यमरः । संवर्ते=प्रलयकाले, सागरात्=समुद्रात्, समुद्गताः=समुच्छ्रिताः ये भङ्गाः=तरङ्गाः, तद्वत्, तुङ्गाः=उच्चाः, त्वङ्गन्तः=चलन्तश्च ये तुरङ्गमाः=अश्वाः, तैः तरङ्गिताः=व्याप्ताः, सर्वाः=अखिलाः, दिशः=काष्ठाः यस्य तत्; "भङ्गस्तरङ्ग ऊर्मिः", "संवर्तः प्रलयः कल्पः" इति चामरः । "चतुरङ्गबलं चचाल" इत्यग्रिमेण सम्बन्धः ॥ ५ ॥

मारसेना-वर्णन—कामदेव की सेना में, प्रबल वायु के आघात से पर्वतों के विखण्डित बड़े-बड़े शिलातलों के समान गजसमूह एवं प्रलयकाल में उठी सागर की तरंगों के समान उच्चाकार वाले चपल अश्व चारों तरफ दिखायी दे रहे थे ॥ ५ ॥

आढौकमानरथमण्डलचक्रनेमिधाराविदारितधरातलसन्निवेशम् ।
पादातपादपतनाशनिपाटचमानपातालसन्तमससान्द्ररजोऽन्धकारम् ॥ ६ ॥

आढौकेत्यादि । आढौकमानस्य=गच्छतः, रथमण्डलस्य=रथचक्रस्य, नेमिधाराभिः=प्रधिरेखाभि; "नेमिः स्त्री स्यात् प्रधिः पुमान्" इत्यमरः । विदारितः=विभिन्नः, धरातलसन्निवेशः=भूप्रदेशविन्यासो यस्य तत्; पदातीनां समूहः पादातम्=पदातिसैन्यसमूहः, तस्य पादपतनेन=चरणाघातेनैव, अशनिना=वज्रेण, पाटचमानात्=विदार्यमाणात् पातालात् उत्थितं सन्तमसम्=अन्धभूतमिव स्थितम्, सान्द्रम्=निविडम्, रजः=धूलिरेव अन्धकारो यस्य तत् । "चतुरङ्गबलं चचाल" इत्यग्रिमेण सह सम्बन्धः ॥ ६ ॥

उसके सैन्यबल में चलने वाले रथों के पहियों से समग्र भूप्रदेश फटा जा रहा था, और साथ चलती पैदल सेना के पदाघातों से फूटे हुए पाताल से उठी धूल से समग्र आकाश अन्धकारावृत सा हो गया था ॥ ६ ॥

आधूयमानकरवालकरालकालच्छायासमुच्चलनशाद्वलितान्तरिक्षम् ।
हेलावकुण्डलितकार्मुककाननज्याविष्फारवेगबधिरीकृतविश्वलोकम् ॥७॥

आधूयमानेत्यादि । आधूयमानानाम्, करवालानाम्=खड्गानाम्, याः करालाः=दन्तुराः, कालच्छायाः=कृष्णकान्तयः, तासां समुच्चलनेन=प्रसरणेन, शाद्वलितम्=शादा अस्मिन् सन्तीति तादृशं कृतम् "शाद्वलः शादहरिते" इत्यमरः । अन्तरिक्षम्=गगनं यस्य तत्; हेलया=अनायासेन, अवकुण्डलितस्य=वलयीकृतस्य, कार्मुकाणाम्=धनुषाम्, काननस्य=पुञ्जस्य, ज्यानाम्=मौर्वीणाम्, विष्फारवेगेन=धनुष्टङ्कारबलेन, बधिरीकृतः विश्वलोको यस्य तत् । "सैन्यबलं चचाल" इत्यग्रिमेण सह सम्बन्धः ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वहाँ चलती तलवारों की काली छाया से समग्र आकाश व्याप्त था; और उसके
ारियों द्वारा बार-बार की गयी धनुष्टङ्कार तीनों लोकों में गूँज रही थी ।। ७ ।।

ःफालिताप्रतिमभैरवभेरिघोरकोलाहलध्वनियथार्थनभोऽभिधानम् ।
ड़ाकरण्डविवरप्रवितन्यमानशूत्कारशीकरकरालितमेघमार्गम् ।। ८ ।।

ग्रास्फालितेत्यादि । आस्फालितानाम्=ताडितानाम्, अप्रतिमानाम्=
दृशानाम्, भैरवाणाम्=भयङ्कराणाम्, भेरीणाम्=दुन्दुभीनाम्, घोरेण=दारु-
कोलाहलध्वनिना=उच्चघोषेण, यथार्थम्, नभसः=आकाशस्य, अभिधा-
=वाचकशब्दः 'शब्दगुण' इति शब्दो यस्य तत्; "भैरवं दारुणं भीषणं
मम्" इत्यमरः । शुण्डाकरण्डस्य=करिहस्तपुटस्य, "शुण्डापि जलहस्तिन्यां
ाकरिहस्तयोः" इति विश्वः । विवरात्=सुषिरात्, प्रवितन्यमानानाम्=
तार्यमाणानाम्; शूत्काराणाम्=ध्वनिविशेषाणाम्, शीकरैः=जलकणैः,
लितः=दन्तुरितः, मेघमार्गः=आकाशो यस्मिंस्तत् । "सैन्यबलं चचाल"
ग्रिमेण सह सम्बन्धः ।। ८ ।।

उस समय बड़े जोर से बजती हुई दुन्दुभियों की भीषण ध्वनि से आकाश का
ग्गुणक' यह अन्वर्थ नाम प्रमाणित हो रहा था । और हाथियों की शूण्ड से
ी 'सू सू' की ध्वनि के साथ फेंकी गयी जलबिन्दुओं से समग्र आकाश
था ।। ८ ।।

ीतलान्तरनिरन्तरजृम्भमाणधूलीनिकायचुलुकीकृतसिन्धुपूरम् ।
ीरवीरसमुदीरितसिंहनादसन्नाहगर्जितसमस्तगुहान्तरालम् ।। ९ ।।

क्षोणीतलेत्यादि । क्षोणीतलान्तरे=भूमध्ये, निरन्तरम्=सततम्, यथा
् तथा, जृम्भमाणैः=वर्धमानैः, धूलिनिकायैः=रजःपुञ्जैः, चुलुकीकृतः=
षितः; सिन्धुपूरः=सागरजलसमृद्धिः, यस्य तत्; नासीरे=सेनामुखे ये
ाः=बलशालिनः, तैः समुदीरितैः=कृतैः, सिंहनादसन्नाहैः=क्ष्वेलासमूहैः,
तम्=मुखरितम्, समस्तानाम्=अखिलानाम्, गुहानाम्=कन्दराणाम्, अन्त-
म्=मध्यम् यस्य तत्; "क्ष्वेला तु सिंहनादः स्यात्" इत्यमरः । "चतुरङ्ग-
चचाल" इत्यग्रिमेण स सम्बन्धः ।। ९ ।।

जिसके कारण, पृथ्वी से निरन्तर उड़ते धूलसमूह के गिरने से समुद्र सूख गया
और वीरों के सिंहनाद से समस्त दिशारूपी गुफाएँ प्रतिध्वनित हो रही थीं ।। ९ ।।

्यमानसितचामरिकानिकायसम्पादिताद्भुतशरत्समयावतारम्[1] ।
ाधपुष्पशरशासनचोदयमानचक्रं क्रमेण चतुरङ्गबलं[2] चचाल ।।१०।।

---

१ इतः पूर्वं म० क० पुस्तकयोरेतत् श्लोकार्धमधिकमुपलभ्यम्—
"तिर्यक्परागनिकराम्बुदकम्पमानशम्पायितात्मविजयध्वजचक्रवालम्" इति ।
२ ०युतं—म० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दोधूयमानेत्यादि । दोधूयमानानाम् = भृशं वीज्यमानानाम्, सितानाम्= धवलानाम्, चामरिकाणाम्=चामरसम्बद्धानाम्, निकायेन-राशिना, सम्पादितः=विहितः, अद्भुतः=आश्चर्यमयः, शरत्समयस्य=शरत्कालस्य, अवतारः= प्रवेशो यस्मिस्तत्, श्वेतचामराणां शरत्कालिकाकाशपुष्पसादृश्यादिति भावः । संरब्धस्य = क्रुद्धस्य, पुष्पशरस्य=मदनस्य, शासनेन=आज्ञया, चोद्यमानानि= प्रेर्यमाणानि, चक्राणि=गणाः, यस्य तत्; "चक्रं प्रहरणे गणे" इति हेमचन्द्रः । चतुरङ्गबलम् = चत्वारि=एतत्सङ्ख्याकानि, अङ्गानि-अवयवाः, बलानि=रथ-गज-तुरग-पदातिरूपाणि यस्य तत्, बलम्=सैन्यम्; "बलं रूपे स्थामनि स्थौल्य-सैन्ययोः" इति हेमचन्द्रः । चचाल=प्रतस्थे ॥ १० ॥

वहाँ ढुलाये जाते चवरों के समूह से शरत्-काल का भ्रम पैदा करने वाले सेनाधिपति मार की आज्ञा से सञ्चालित सैन्यबल ने, जिसमें कि रथ हाथी घोड़े एवं पैदल सैनिक सम्मिलित थे, प्रस्थान किया ॥ १० ॥

कल्पान्तकालघटमानघनाघनौघगम्भीरघोरघनगर्जितनिर्विशेषैः[1] ।
आपादितैर्मकरकेतनवाद्यकारैराध्मातमण्डमभवत् पटहप्रणादैः ॥११॥

कल्पान्तेत्यादि । कल्पान्तकाले=प्रलयकाले, घटमानः=मिलितो यो घनाघनौघः=वर्षुकमेघवृन्दः, तस्य गम्भीरम्-मन्दम्, घोरम्-भयङ्करम्, घनम्= अविच्छिन्नम्, च यद् गर्जितम्=स्तनितम्, तस्मात् निर्विशेषैः=भेदरहितैः, तत्सदृशैरित्यर्थः । "वर्षुकाब्दो घनाघनः" "घोरं भीमं भयानकम्", घनो मेघे मूर्तिगुणे । त्रिषु मूर्ते निरन्तरे", "स्तनितं गर्जितं मेघनिर्घोषः" इति सर्वत्रामरः । आपादितैः-उत्पादितैः; मकरकेतनस्य=मीनध्वजस्य, वाद्यकारैः= वाद्यशिल्पज्ञैः, पटहप्रणादैः=आनकध्वनिभिः; अण्डम्=ब्रह्माण्डम्; आध्मातम्= मुखरितम्, अभवत् = अभूत् ॥ ११ ॥

प्रलयकाल में आकाश में उठे जल बरसाने वाले मेघों के गम्भीर भयङ्कर एवं निरन्तर गर्जन के समान, काम सेनापति की आज्ञा से बजाये जाने वाले नगाड़ों की गड़गड़ाहट से सकल ब्रह्माण्ड गूँज उठा ॥ ११ ॥

अभ्युद्गतैरमितसैन्यपरागजालैरन्धीकृताकुलदृशामहिपुङ्गवानाम् ।
आविश्चकार भुवनेषु परं निपीड़ामाडम्बरः पटहजो मदनप्रयाणे ॥१२॥

अभ्युद्गतैरिति । मदनस्य-कामदेवस्य, ससैन्यं बुद्धं प्रति, प्रयाणे-प्रयाते सति, अभ्युदगतैः-उत्थितैः; अमितानाम्=असङ्ख्यानाम्, सैन्यानाम्= सेनायां समवेतानां हस्त्यश्वपदातीनाम्, परागजालैः=धूलिसमूहैः, अन्धीकृते=

१. ०निर्विशेषम्—क० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टशून्यीकृते, आकुले दृशौ=लोचने येषां तेषाम्; पुमांसो गावः=वृषभा इव
वाः, अहिषु पुङ्गवाः अहिपुङ्गवास्तेषामहिपुङ्गवानाम्=सर्पश्रेष्ठानाम्;

"स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः ।
सिंहशार्दूलनागाद्यास्तल्लजश्च मतल्लिका ।
मर्चिका प्रकाण्डो द्वौ प्रशस्यार्थप्रकाशकाः" ॥ इति हेमचन्द्रः ।

पटहाज्जायत इति पटहजः=दुन्दुभिजः, आडम्बरः=गम्भीरध्वनिः, परम्=न्तम्; निःशेषेण पीडाम्=व्यथाम्; आविश्चकार=जनयामास। सर्पाणां श्रवस्त्वेन रजोभिः पटहनिनादेन च चक्षुषः पीडा द्विगुणिता बभूवेति ः ॥ १२ ॥

उस सैन्यप्रयाण के समय अपरिमित सेनाओं के चलने से उठी धूल के कारण उस की सेनाओं द्वारा बजाये गये नगाड़ों को भयंकर ध्वनि से सर्पराजाओं के नेत्रों अत्यधिक पीड़ा होने लगी ।। १२ ।।

न्तमन्धयति दिङ्मुखमम्बुवाहसन्दोहरोचिषि चमूरजसां समूहे ।
का इवोद्धुरसरस्वति नष्टमार्गा भ्रेमुर्भृशं सुरपथे सुमनोविमानाः ॥१३॥

अत्यन्तमिति । अम्बुवाहानाम्=मेघानाम्, सन्दोहस्य=समूहस्येव, रोचिः=न्तिर्यस्य तस्मिन्; चमूरजसाम्=सैन्यधूलीनाम्, समूहे, दिङ्मुखम्=दिक्प्रा-, अन्धयति=अन्धीकुर्वति सति; उद्धरे=अभिवृद्धे, सरस्वति=सागरे, रस्वान्=सागरोऽर्णवः" इत्यमरः । नष्टमार्गाः=अदृष्टमार्गाः, नौकाः= इव, सुरपथे=गगने, सुमनोविमानाः=देवानां यानानि, भृशम्=अत्यन्तम्, =भ्रमणं चक्रुः ।। १३ ॥

मेघों का भ्रम पैदा करने वाली, सेनाओं के चलने से उठी धूल से समस्त ओं के आच्छादित हो जाने पर, बढ़े समुद्र में चलती दिग्भ्रान्त नौकाओं की देवताओं के विमान भी आकाश में अपने अपने मार्ग से भटक गये ॥ १३ ॥

तोत्थितं महति सैनिकधूलिमध्ये सञ्चारिणस्सुमनसां व्यरुचन्विमानाः ।
रताण्डवितसागरवारिपूरे पारिप्लवा इव मुहुः जगदण्डखण्डाः ॥१४॥

वातोत्थिते इति । तस्मिन् महति, सैनिकैरुत्थापितायाः धूलेर्मध्ये, चारिणः=गगनशीलाः, सुमनसाम्=देवानाम्, विमानाः=यानानि; संहारे=काले, ताण्डवितः=वृद्धिङ्गतो यः सागरस्य=समुद्रस्य, वारिपूरः=पयसां हस्तस्मिन् पारिप्लवाः=चञ्चलाः, "चञ्चलं तरलं चैव पारिप्लवपरि-", इत्यमरः । जगताम्=अण्डस्य=लोकप्रदेशस्य, खण्डाः=शकलाः, इव न्=शोभयामासुः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उस समय, मदनसेना के चलने से उठी धूल के कारण देवताओं के विमान ऐसे लग रहे थे मानों प्रलयकाल के समय भयङ्कर रूप से बढ़े हुए समुद्र में जहाँ तहाँ ब्रह्माण्ड के कुछ टुकड़े बिखरे हुए हों।।१४।।

कल्पक्षयक्षुभितमारुतवेगभीमकन्दर्पसैन्यकबलीकृतभीतभीताः ।
अभ्युल्लसद्बहलरेणुभरापदेशादम्भोधयो गगनमुत्पतिता इवासन् ।।१५।।

कल्पक्षयेत्यादि । कल्पक्षये=कल्पान्ते, क्षुभितस्य=सञ्चलितस्य, मारुतस्य=वायोः, वेग इव वेगो यस्य तस्य, अत एव भीमस्य=भयङ्करस्य, कन्दर्पसैन्यस्य=मदनसेनायाः, कबलीकृतात्=ग्रासीकरणात्, भीतभीताः=भृशं भीताः; अम्भोधयः=समुद्राः; समुल्लसताम्=उत्पतताम्, बहलानाम्=सान्द्राणाम्, रेणूनाम्=धूलीनाम्, भरस्य=समूहस्य, अपदेशात्=व्याजात्; गगनम्=आकाशं प्रति, उत्पतिताः=उड्डयनं कृतवन्तः। इवेत्युत्प्रेक्षायाम् । आसन्=बभूवुः ।। १५ ।।

कल्पक्षय (प्रलय) के समय उठे प्रबल वायु के वेग की तरह भयङ्कर मदनसेना द्वारा खा जाने के भय से डरे हुए अन्धकार के समान समग्र समुद्र निरन्तर बढ़ती हुई मदनसेना की धूल के बहाने आकाश में उड़ने से लगे ।। १५ ।।

प्रत्यर्थिदन्तिजयसिन्धुरदन्तभिन्नक्ष्माभृद्गुहान्तरगता इव चान्धकाराः ।
आवव्रुरम्बरमभङ्गुरजृम्भमाणाः सेनापरागनिकरा भ्रमराभिरामाः ।।१६।।

प्रत्यर्थीत्यादि । प्रत्यर्थिदन्तिनः=शत्रुगजान् जयन्ति=विजयन्ते इति तादृशानाम्, सिन्धुराणाम=गजानाम्, दन्तैः=दशनैः, भिन्नानाम्=विदारितानाम्; क्ष्माभृताम्=पर्वतानाम्, गुहान्तराणि=गुहामध्यानि, गताः=प्राप्ताः; अन्धकाराः=तमांसि, इवेत्युत्प्रेक्षायाम् । भ्रमराभिरामाः=भ्रमरवन्मनोहराः, नीलवर्णत्वात्, अभङ्गुरम्=अविच्छिन्नं यथा स्यात् तथा प्रवर्धमानाः, सेनायाः परागाणाम्=धूलीनाम्, निकराः=समूहाः, अम्बरम्=आकाशम्; आवव्रुः=आच्छादयामासुः ।। १६ ।।

शत्रुविजयी हाथियों के दाँतों से विदारे गये पहाड़ों की गुफाओं को आवृत करने वाले अन्धकार की तरह, भ्रमरों के सदृश काली एवं निरन्तर वृद्धिङ्गत होती हुई मदनसेना के पैरों से उठी धूल आकाश को आच्छादित कर रही थी ।। १६ ।।

अत्युल्बणैरमितसैन्यपरागपूरैरापूरितं गगनकन्दरमाबभासे ।
आप्लाविताखिलपथैर्यमुनाप्रवाहैराश्लिष्यमाणमिव लावणसिन्धुमध्यम्[1] ।।

अत्युल्बणैरिति । अत्युल्बणैः=अभ्यधिकैः, अमितानाम्=असङ्ख्यानाम्, सैन्यानाम्=सेनानाम्, परागपूरैः=धूलिपटलैः, आपूरितम्=व्याप्तम्, गगन-

१—१. अर्धश्लोकोऽयं म० पुस्तके नोपलब्धः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्=गुहारूपमम्बरम्; आप्लावितः=निमज्जितः, अखिलः=सकलः, ःमार्गो यैस्तैः, यमुनायाः=कालिन्द्याः, प्रवाहैः=वेगैः, आश्लिष्यमाणम्=ङ्कुचमानम्; लावणसिन्धोः=क्षारसमुद्रस्य; लवण एव लावणः; प्रज्ञादि- स्वार्थे अण्। मध्यम्=मध्यभाग इव, आबभासे=शुशुभे ॥ १७॥

बहुत ऊँचे उठे, मदनसेना के धूलिपराग से गगनमण्डल ऐसे शोभित हो रहा ानो सब तरफ से जल में डूबे मार्गों से यमुना नदी क्षारसमुद्र का आलिङ्गन जा रही हो ॥ १७ ॥

ुच्छ्रितैरवनिमांसलपांसुजालैरत्युल्बणं गगनमण्डलमास्तृणानैः[1] ।
ाङ्गना मदनसायकपातभीतेरामुक्तनीलघनकञ्चुलिका इवासन् ॥१८

अभ्युच्छ्रितै रिति । अभ्युच्छ्रितैः=अभित उद्गतैः; अवनेः=भूमेः, यानि लानि=प्रवृद्धानि, पांसुजालानि=धूलिसमूहाः, तैः; अत्युल्बणम्=अत्य- म्, यथा स्यात् तथा; गगनमण्डलम्=नभस्तलम्, आस्तृणानैः=व्याप्नु- ः; आशाङ्गनाः=दिगङ्गनाः; मदनसायकस्य=मारबाणस्य, पातात्=आक्रम- भीतेः=भयात्; आमुक्ताः=धृताः, नीलाः=श्यामाः, घनाः=निबिडाः, ुलिकाः=कवचानि, याभिस्ताः; इवेति उत्प्रेक्षायाम्; आसन्=अभवन् ॥

भूमि पर ऊँचे उठे धूलि-समूह से आवृत सभी दिशाएँ ऐसे लग रही थीं मानों के बाणों की बौछार के भय से उन्होंने नीला कवच पहन लिया हो ॥ १८ ॥

भरे चुलुकितार्णवतोयपूरे स्वैरप्रचारमभितः प्रतिपद्यमाने ।
क्षयोऽयमिति कैटभजिद् भ्रमेण भूयोऽपि विश्वमुदरे परिहर्तुमैच्छत् ॥

धूलीभरे इति । धूलिभरे=परागभरे; चुलिकितः=आचान्तः; अर्णवस्य= स्य, तोयपूरः=जलप्रवाहो येन स तस्मिन्; अभितः=समन्तात्; स्वैरम्= श्रम्, यथा स्यात् तथा, प्रचारम्=सञ्चारम्, प्रतिपद्यमाने=प्राप्यमाणे, कैटभं जयतीति कैटभजित्=विष्णुः, 'अयम्=एषः रेणुव्यापनसमयः, कल्प- =कल्पान्तसमयः' इति भ्रमेण=शङ्कया, भूयः=पुनरपि, विश्वम्=लोकम्, =जठरे; परिहर्तुम्=लीनं कर्तुम्; ऐच्छत्=इच्छाञ्चकार ॥ १९ ॥

जिसने कि सकल समुद्र को आवृत सा कर लिया था और जो इधर उधर चारों स्वच्छन्दतापूर्वक फैलता ही जा रहा था, ऐसे मदनसेना के द्वारा उठाये उस मूह के कारण भगवान् विष्णु को भी यह भ्रम हो गया कि अब यह प्रलय- आ गया है, अतः क्यों न समस्त विश्व को अपने उदर में रख लिया जाय ! ॥

तत्तुरगखण्डितभूसमुत्थैः पाथोधयः कबलिताः परुषैः परागैः ।
गण्डगलितैर्मदवारिपूरैर्भूयो बभूवुरधिकं पुनरुक्ततोयाः ॥ २० ॥

---

[1] पाठोऽयं म० पुस्तके नोपलब्धः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पर्यापतदित्यादि : पर्यापतद्भिः=आगच्छद्भिः, तुरगैः=अश्वैः, खण्डितायाः=विदीर्णायाः, भुवः=पृथिव्याः, समुत्थैः=उत्थितैः; परुषैः=रूक्षैः, परागैः=धूलिभिः, पाथांसि=जलानि एषु धीयन्ते इति पाथोधयः=सागरः, "कबन्धमुदकं पाथः" इत्यमरः। कबलिताः=ग्रसिताः, शोषिता इत्यर्थः; मत्तेभानाम्=मत्तगजानाम्, गण्डेभ्यः=कटेभ्यः, गलितैः=स्रुतैः; मदवारिणाम्=मदजलानाम्; प्रवाहैः=पूरैः; पुनरुक्तानि=द्विगुणितानि, तोयानि=जलानि येषां ते; अधिकम्=अत्यन्तम्; बभूवुः=अभवन्। अश्वैरुत्पादितं समुद्रशोषणं द्विगुणमदजलपूरणेन गजैः व्यर्थीकृतमिति भावः ॥ २० ॥

यद्यपि मदनसेना के अश्वों द्वारा उड़ायी गयी धूल से आवृत समुद्र सूखता सा लग रहा था, परन्तु उसी सेना के हाथियों के झरते मद से वह पुनः भरता हुआ सा भी दिखायी दे रहा था ॥ २० ॥

अम्भोधिसम्पदवलुण्ठनकुम्भयोनिरभ्युद्गतो मकरकेतनसैन्यरेणुः ।
अम्भोजिनीपतिरसौ मम वैरिबन्धुरित्यन्तराहितरुषेव तिरश्चकार ॥२१॥

अम्भोधीत्यादि । मकरकेतनसैन्यरेणुः=मन्मथसेनाधूलिः; अम्भोधिसम्पदः=सागरजलसमृद्धेः, अवलुण्ठने=अपहरणे, कुम्भयोनिः=अगस्त्यः, इव, असौ अम्भोजिनीपतिः=सूर्यः, मम=सेनारेणोः, वैरिणः=सिद्धार्थस्य, बन्धुः=वंश्यः, इति=इत्थं मत्वा, अन्तः=मनसि, आहितया=धृतया, रुषा=कोपेन, तिरश्चकार=आच्छादयामास। सिद्धार्थस्य सूर्यवंश्यत्वात्, मदनसेनायाः सिद्धार्थविजयाय प्रवृत्तायाः वैरिबन्धुत्वं सूर्यस्येति भावः ॥ २१ ॥

मदनसेना का धूलिसमूह सागर की जलसमृद्धि के अपहरणकृत्य में अगस्त्य के समान समझकर सूर्य को अपने शत्रु का भाई मानता हुआ उसे तिरस्कार की दृष्टि से देखता रहा ॥ २१ ॥

अभ्युद्गतं परिभवं निजवंशकेतोरत्युग्रमीक्षितुमशक्त इवांशुमाली ।
कन्दर्पसैन्यघनधूलिपरम्परासु गाढान्धकारितदिशासु तिरोबभूव ॥२२॥

अभ्युद्गतमिति । निजवंशकेतोः=स्वकुलध्वजरूपस्य सिद्धार्थस्य; अभ्युद्गतम्=आभिमुख्येनागतम्; अत्युग्रम्=अतिभीषणम्, परिभवम्=तिरस्कारम्; ईक्षितुम्=द्रष्टुम्; अशक्तः=असमर्थः; अंशुमाली=सूर्यः; गाढं यथा स्यात्तथा, अन्धकारिताः=तमसावृताः, दिशा याभिस्तासु; कन्दर्पसैन्यस्य=मदनसेनायाः, धूलिपरम्परासु=रेणुराशिषु, तिरोबभूव=आच्छन्नोऽभवत् ॥ २२ ॥

उस समय सूर्य भी अपने कुल में उत्पन्न पुरुष के पराजय की सम्भावना करता हुआ कन्दर्पसेना की धूलि से अन्धकारावृत दिशाओं में छिप गया ॥ २२ ॥

आतन्यमानबलरेणुघनान्धकारैराकम्पमानकरिकेतुशतह्रदाभिः ।
अश्वीयफेनकणिकाकरकाकदम्बैर्वर्षावतार इव[1] हर्षकरो बभूव ॥ २३ ॥

१. आश्वीय०—म० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आतन्यमानेत्यादि । (अयं सेनाप्रयाणसमयः) आतन्यमानैः=विस्तीर्यमाणैः
ास्य=मदनसैन्यस्य, रेणुभिः=धूलिभिरेव धनान्धकारैः=निबिडतमोभिः;
कम्पमानैः=चञ्चलैः, करिषु=गजेषु स्थितैः, केतुभिः=ध्वजैरेव शतह्रदाभिः=
ड्भिः, "शम्पा शतह्रदा ह्रादिनी" इत्यमरः । अश्वानां समूहः अश्वीयम्;
शाश्वभ्यां यञ्छावन्यतरस्याम्" (पा० सू० ४.१.४८) इति छः; "वृन्दे
वीयमाश्ववत्" इत्यमरः । "अश्वीयमश्वनिवहे" इति हेमचन्द्रश्च । तस्य=
वृन्दस्य, फेनकणिकानाम्=फेनबिन्दूनामेव, करकाणाम्=वर्षोपलानाम्,
म्बैः =समूहैः; वर्षावतारः=वर्षर्तुप्रारम्भः, इव, हर्षं करोतीति हर्षकरः=
ोषजनकः, बभूव=अभूत् । इवेत्युत्प्रेक्षायाम् ॥ २३ ॥

मदनसेना के साथ चलते हाथियों के पैरों से उड़ी धूल से चारों दिशाओं में
ंकार छा गया था । उन हाथियों पर फहराती ध्वजायें भी ऐसी लग रही थीं मानों
ाश में बिजली चमक रही हो । अश्वों के मुह से निकली झाग से वर्षा में गिरने
ओलों का भ्रम हो रहा था, और ऐसा लग रहा था कि वर्षाऋतु प्रारम्भ हो
है ॥ २३ ॥

ान्धकारितदिशावलये प्रसर्पत्युच्छृङ्खले रजसि रुद्धनभोऽवकाशे ।
ाललोक इव भूवलयो बभूव भूसन्निवेश इव पुण्यकृतां निवासः ॥२४॥

प्रौढेत्यादि । प्रौढान्धकारितः=गाढान्धकारवान् कृतः, दिशावलयः=दिग्म-
म्, येन तस्मिन्; उच्छृङ्खले=निरर्गले, प्रसर्पति=व्याप्नुवति, तथा च,
=अवरुद्धः, नभोऽवकाशः=गगनप्रदेशः, येन तस्मिन्, रजसि=रेणौ, सति,
यः=भूमण्डलम्, पातालकम्=रसातलम्, इव, भूसन्निवेशः=भूलोकश्च
कृतां निवासः=स्वर्ग इव, बभूव=अभूत् । अन्धकारस्य मृत्सम्बन्धस्य च
ः पाताल-भूम्य साधारणगुणत्वादिति भावः ॥ २४ ॥

हाथियों के पैरों से उड़ी धूल के कारण पृथ्वी के खाली हो जाने के कारण वह
ा के समान खड्डा बन गयी थी, और समग्र धूल के गगन में चले जाने से गगन
र्ग) पृथ्वी की तरह लग रहा था ॥ २४ ॥

ीयपाददलितादवनीतलान्तादभ्युच्छ्रिते च नितरां[1]निखिले परागे ।
धराः परमभूमिधरा बभूवुः शेषोऽपि केवलमभूत् फणमालभारो ॥

अश्वीयेत्यादि । अश्वीयस्य=अश्वसमूहस्य, पादैः=चरणैः, दलितात्=विदारि-
अवनीतलान्तात्=भूतलमध्यात्, नितराम्=अत्यन्तम्, निखिले=सकले,
=धूली अभ्युच्छ्रिते=अभ्युद्गते सति, भूमिधराः=पर्वताः, परम्=अति-

१. नितरामखिले—म० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शयेन, अभूमिधराः=भूमिधरणकर्तृत्वरहिताः; भूमेः परागरूपेण उद्गतत्वाद्, भूमेरेवाभावेन पर्वतानां भूधारकत्वम् न सम्बभूवेत्यर्थः। शेषः=एतन्नामा नागराजोऽपि, फणमालां बिभर्तीति फणमालभारी, बभूव=अभूत्। "इष्टकेषीकामालानां चिततूलभारिषु (पा० सू० ६. ३. ६४) इति ह्रस्वः। भूमेः परागरूपेणोद्गमनात् शेषशिरसि न कोऽपि भूमेर्भारोऽवशिष्ट इति भावः॥

मदनसेना के अश्वसमूह के पैरों से उड़ी धूल के कारण उस समय भूधर (पर्वत) नाममात्र के रह गये, क्योंकि सारी धूल (मिट्टी) उड़ जाने के कारण पृथ्वी की कोई वास्तविक सत्ता ही नहीं रह गयी थी। इसी तरह, इसी कारण; शेष नाग भी केवल अपने फणों को ही धारण करने वाला रह गया; पृथ्वी में धूल न होने से, उसमें भार ही कहाँ रह गया था कि वह उसे धारण करता! ॥ २५ ॥

दिग्दन्तिनां मुखपटप्रकटोपमेये सेनापरागनिकरे सति जृम्भमाणे।
पाथोधयः सपदि पङ्कधयस्तदासन् पाथोधरा नभसि पङ्कधरा बभूवुः॥२६॥

दिग्दन्तिनामिति। दिग्दन्तिनाम्=दिग्गजानाम्, मुखपटेन=मुखालंकारवस्त्रेण, प्रकटं यथा स्यात् तथा उपमेये=उपमातुं योग्ये, दिग्गजमुखपटतुल्ये इत्यर्थः; सेनापरागनिकरे=सैन्यधूलसमूहे, जृम्भमाणे=वर्धमाने सति; तदा=तस्मिन् काले; पाथोधयः=समुद्राः, सपदि=तत्क्षणमेव; पङ्का धीयन्ते एष्विति तादृशाः=पङ्किलाः; बभूवुः; तेन च पाथोधराः=अम्बुदाः मेघाः, पङ्कधराः=कर्दमधराः; समुद्रे कर्दमस्य सत्त्वात् कर्दमस्यैव ग्रहणसम्भवो न तु जलस्येति भावः। बभूवुः=अभवन्॥ २६॥

सेना में चल रहे हाथियों के गण्डस्थलों पर डाले गये पट (झूल) के कारण मदप्रवाह के पृथ्वी पर न गिरने से मानों समुद्र के सूख जाने के कारण वहाँ केवल कीचड़ रह गया था, अतः वहाँ जल भरने के लिये जाने वाले मेघ अपने में जल की जगह कीचड़ ही भर कर लाने लगे॥ २६॥

आपीतसर्वमकराकरवारिराशेराशावकाशगगनेष्वमितस्य रेणोः।
चक्राचले बहिरिव प्रसराय चक्रुराशागजा विवरमादृतवप्रघाताः॥२७॥

आपीतेत्यादि। आपीतः=शोषितः, सर्वमकराकराणाम्=चतुःसमुद्राणाम्, वारिराशिः=जलराशिः, येन तस्य; आशावकाशगगनेषु=दिङ्मध्याकाशेषु; अमितस्य=अपरिच्छिन्नस्य, रेणोः=रजसः; चक्राचले=लोकालोकपर्वते; बहिरेव=बाह्यप्रदेशेष्वि, प्रसराय=गमनाय; इवेत्युत्प्रेक्षायाम्; आदृतः=सत्कृतः, वप्रघातः=उत्खातकेलिर्यैस्ते; आशागजाः=दिग्गजाः, विवरम्=छिद्रम्, चक्रुः=कृतवन्तः। रेणूनामाशावकाशगगनमपर्याप्तमित्यवेक्ष्य तेषां बहिःसञ्चारसम्पादनार्थमिव दिग्गजा लोकालोकपर्वते वप्रघातमकुर्वंतेति भावः॥२७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जिसने चारों समुद्रों का शोषण कर लिया था, ऐसी मदनसेना के पैरों की धूल समग्र आकाश के भर जाने पर उस धूल को मानो और अधिक अवकाश (स्थान) ान करने के लिये सेना के उन्मत्त हाथियों ने अपने दाँतों से पहाड़ों में छिद्र ना प्रारम्भ किया ॥ २७ ॥

ाम्बुधौ जयिपदातिमहाप्रवाहे मग्नाः कुलक्षितिधरा इव वारणेन्द्राः ।
ङ्गत्तरङ्गनिवहा इव तुङ्गवाहा नौमण्डला इव रथाः सुतरां विरेजुः ॥

सेनाम्बुधाविति । सेनाम्बुधौ=सेनारूपसमुद्रे; जयिनः=जयनशीलाः, पदा- ा एव महाप्रवाहो यस्य तस्मिन्; वारणेन्द्राः=गजेन्द्राः, मग्नाः=मज्जनं ाः, कुलक्षितिधराः=मैनाकादयः कुलपर्वताः; तुङ्गवाहाः=उन्नताश्वाः, ङ्गन्तः=चलन्तो ये तरङ्गनिवहाः—वीचिराशयः, इव; रथाः=स्यन्दनानि; मण्डलाः=तरणिसमूहा इव; सुतराम्=सुखेन, अतिशयेनेत्यर्थः; विरेजुः= ासिरे ॥ २८ ॥

उस मदनसेना के सब से बड़े भाग पदातिसेना के बीच चलने वाले हाथी ऐसे ा रहे थे मानों समुद्र के बीच में मैनाक आदि कुल पर्वत हों, और घोड़ों से ऐसा ा रहा था मानों समुद्र में बड़ी बड़ी तरंगें उठ रही हों तथा उस सेना के रथ भी ाँ बड़ी बड़ी नौकाओं की तरह लग रहे थे ॥ २८ ॥

ध्ये लसन्मकरलाञ्छनदर्शनीया मारस्य रेजुरमला जयकेतुपट्टाः ।
म्भोनिधिं निजबलोदधिना विजित्य बन्दीकृता इव तदीयपुरन्ध्रिवर्गाः ॥

मध्ये इति । मध्ये=सेनामध्ये; लसता=प्रकाशमानेन, मकरलाञ्छनेन= ाराङ्केन, मकरिकया च दर्शनीयाः=मनोहराः; मारस्य=कामदेवस्य; मलाः—निर्मलाः, जयकेतुपट्टाः=विजयध्वजचोनांशुकाः निजबलौदधिना ासेनासमुद्रेण; तदोयानाम्=समुद्रसम्बन्धिनीनाम्, पुरन्ध्रीणाम्=कुटुम्बिनी- ाम्, वर्गाः=समूहाः; "स्यात्तु कुटुम्बिनी पुरन्ध्री" इत्यमरः । विजित्य=जित्वा; ात्युत्प्रेक्षायाम् ॥ २६ ॥

उस सेना के आगे चलने वाले ध्वज ऐसे शोभित हो रहे थे जैसे उसकी सेना रा जीते गये समुद्रपर्यन्त विरोधी देशों का नारीगण हो ॥ २९ ॥

न्तःसमुद्भवदमर्षमहाग्निजातधूमावलीमलिनकञ्चुकसञ्चिताङ्गम् ।
ात्यन्तभीषणमनेकसहस्रबाहुमात्मानमात्तविविधास्त्रमसावकार्षीत् ॥३०॥

अन्तरिति । असौ=मारः, अन्तः=हृदये, समुद्भवतः=जायमानात्, अम- ात्=कोपादेव, महावह्नेः=प्रदीप्ताग्नेः, जातया=उत्पन्नया, धूमावल्या=धूम- मूहेन, मलिनेन=मलदूषितेन, कञ्चुकेन=कवचेन, सञ्चितानि=संवृतानि, ङ्गानि=शरीरावयवाः, यस्य तम्; "कञ्चुको वारवाणोऽस्त्री", "कोपक्रोधा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मर्षरोषप्रतिघाः" इति चामरः। अत्यन्तभीषणम्=अत्यन्तभयङ्करम्; अनेके सहस्राणि बाहवो यस्य तम्; आत्मानम्=स्वम्; आत्तानि=गृहीतानि, विविधानि=नानाप्रकाराणि, अस्त्राणि=आयुधानि येन तम्, अकार्षीत्=चकार ॥ ३० ॥

अपने हृदय में बुद्ध के प्रति जलती ईर्ष्याग्नि से काले पड़े कवच वाले उस कामदेव ने अपने आप को युद्धहेतु नानाविध अस्त्रों से सज्जित कर लिया ॥ ३० ॥

आप्लाविताखिलदिगन्तमहीध्ररन्ध्रमाकृष्टकल्पविलयक्षुभितार्णवाभम् ।
आकारितं मकरकेतुरदृष्टपारमाकारभीषणमकारयदात्मसैन्यम् ॥३१॥

आप्लावितेत्यादि। मकरकेतुः=मकरध्वजो मारः, आप्लावितानि=सम्पूरितानि, अखिलानाम्=समस्तानाम्, दिगन्तमहीध्राणाम्=दिगन्तेषु विद्यमानानां पर्वतानाम्, रन्ध्राणि=छिद्राणि, येन तत्; आकृष्टा कल्पनिलये=प्रलयकाले, क्षुभितस्य=प्रवृद्धस्य, अर्णवस्य=समुद्रस्य, आभा=कान्तिर्येन तत्; आकारितम्=आहूतम्; अदृष्टम्=दर्शनाविषयीभूतम्, पारम्=अवधिः, यस्य तत्, आकारेण=आकृत्या, भीषणम्=भयङ्करम्, अकारयत्=कारितवान् ॥ ३१ ॥

कामदेव ने अपने गम्भीर गर्जन से बड़े बड़े पर्वतों की गुफाओं को कंपा देने वाले एवं विस्तृत समुद्रतुल्य उस दूर तक फैले सेनासमूह को बुद्ध पर आक्रमण के लिए भयङ्कर चीत्कार करके ललकारा ॥ ३१ ॥

आशामशेषमवनीतलमश्नुवानैरावेष्टितः परिकरैरमितप्रभावैः ।
आरूढबोधितलवेदिमभिन्नधैर्यमभ्याससाद मुनिपुङ्गवमात्मयोनिः ॥३२॥

आशामिति। आत्मयोनिः=मनोभवो मदनः; अमितप्रभावैः=अतुलितप्रभावैः, अशेषम्=निखिलम्; अवनितलम्=भूतलम्; अश्नुवानैः=व्याप्नुवद्भिः; परिकरैः=परिच्छेदैः; आशाम्=दिशम्, आवेष्टितः=परिवृतः, सन्; आरूढा=अधिरूढा, बोधितलस्य=बोधिवृक्षस्य (अश्वत्थमूलस्य), वेदिः=परिष्कृता भूमिर्येन तम्, अभिन्नम्=अविच्छिन्नम्, धैर्यम्=धीरता यस्य तम्; मुनिपुङ्गवम्=मुनिश्रेष्ठम् (सिद्धार्थम्); अभ्याससाद=समीपं प्राप ॥ ३२ ॥

तब बहुत बड़ी सेना से घिरा हुआ वह मनोभव बोधिवृक्ष के नीचे विराजमान उस धैर्यमूर्ति मुनिश्रेष्ठ के पास पहुँचा ॥ ३२ ॥

आमुक्तचारुतरचीवरवारवाणमारूढयोगगजबन्धुरकन्धराग्रम्[1] ।
आरब्ध योद्धुमविकम्पितशौर्यराशिं पुष्पायुधः स्फुरदमर्षकषायिताक्षः ॥

आमुक्तेत्यादि। पुष्पायुधः=मदनः; आमुक्तम्=परिहितम्, चारुतरम्=अतिमनोहरम्, चीवरम्=वल्कलमेव, वारवाणम्=कञ्चुकम्, येन तम्; आरू-

१. ०योगभर०—क० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽअविरूढम्, योगः = चित्तवृत्तिनिरोध एव, गजस्य = हस्तिनः, बन्धुरम्= हरम्, कन्धराग्रम्=स्कन्धाग्रभागम्, येन तम्; "शिरोधिः कन्धरेत्यपि", धुरौ नम्रसुन्दरी" इत्यमरः वैजयन्त्यौ। अविकम्पितः=अविचलितः, राशिः=बलसमूहो यस्य तम्; स्फुरता=चञ्चलेन, अमर्षेण=क्रोधेन, कषा- =कलुषिते, अक्षिणी=नेत्रे यस्य सः; सिद्धार्थं प्रति; योद्धुम्-विग्रहीतुम्; ब्ध=प्रारब्धवान् ॥ ३३ ॥

क्रोध से जले-भुने उस कामदेव ने चीवररूप कवचधारी, योगरूपी हाथी पर ढ़ एवं अविचलित शौर्यसम्पन्न मुनिश्रेष्ठ पर आक्रमण प्रारम्भ किया ॥ ३३ ॥

ान्तिके शमदमामृतवारिराशेर्मुक्ता बभूवुरमला विशिखाः स्मरस्य ।
ात्मनामकृतदानफलोन्नतीनां किं किं न सिध्यति कृताक्षयपक्षकाणाम्

तस्येति । शमश्च दमश्च शमदमौ=अन्तर्बहिरिन्द्रियनिग्रहौ एव अमृ- जरामरणवारणादमृतकल्पम्, तस्य वारिराशेः=जलसमूहस्य (समुद्रस्य); =सिद्धार्थस्य; स्मरस्य=मदनस्य; मुक्ताः=विसृष्टाः, कैवल्यभाजश्च, खाः=बाणाः, अमलाः=निर्मलाः; बभूवुः ।

अकृतम्=परैरविहितम्, दानम्-खण्डनम्, यस्यास्ताः, फलस्य=शराग्रस्य= ायो येषां तेषाम्, अथवा—अकृता=असम्पादिता, दानफलेन जाता तयः-अभ्युदयाः यैस्तेषाम्; "दानं गजमदे त्यागे खण्डने", "फलं जाती- लाभे बाणाग्रे" इति च त्रिकाण्डशेषः। कृताः=धृताः, अक्षयाः=नाशरहिताः, =कङ्कादिपत्राणि यैस्तेषाम्; अथवा—कृतः=विहितः, अक्षये-अहिंसा- पक्षः=स्नेहो येषां तेषाम्; किं किं न सिध्यति=सिद्ध भवति ॥ ३४ ॥

ाम-दम आदि योगसाधनरूप अमृत से परिपूर्ण समुद्रतुल्य उस मुनिश्रेष्ठ पर व द्वारा छोड़े गये सभी बाण व्यर्थ जाने लगे; कारण कि शुद्धाशय एवं दानफल ने स्वार्थ में न लगाने वाले, तथा अहिंसादि गुणों में स्नेह रखने वाले सज्जनों ई क्या हानि कर सकता है ! ॥ ३४ ॥

न् क्षमामयतनुच्छदमादधाने धैर्योदधौ तपनचण्डतमप्रभावे[1] ।
कृतात्मगतयः कुसुमास्त्रबाणाः[2] कृत्या इव प्रतिनिवृत्य तमेव जघ्नुः ॥

ास्मिन्निति । क्षमामयम्=क्षमैव; स्वार्थे मयट्; यः तनुं छादयतीति छदः=कवचो यस्य तम्; आदधाने=धार्यमाणे; तपः=सूर्य इव, चण्डतमः= ः, प्रभावः=सामर्थ्यम्, यस्य तस्मिन्; तस्मिन्=सिद्धार्थे; कुसुमास्त्रस्य = य, बाणाः, शराः; कुण्ठीकृता=प्रतिरुद्धा, आत्मगतिः=स्वक्रियाकलापो

०दधावधिकमप्रतिमप्रभावे—म० । २. ०कुसुमात्म०—म० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येषां ते, सन्तः; कृत्याः=आभिचारिक्यः क्रिया इव, तम्=प्रयोक्तारम्, काममेव, जघ्नुः=मारणं चक्रुः ॥ ३५ ॥

क्षमारूप कवच धारण किये हुए धैर्यरूपी समुद्र पर सूर्य की तरह प्रभाव रखने वाले उस मुनिश्रेष्ठ पर कामदेव द्वारा किये गये सभी आक्रमण विफल हो गये। इतना ही नहीं; अपितु उसके द्वारा छोड़े गये बाण, कृत्या की तरह, वापस लौटकर उसी का घात करने लगे ॥ ३५ ॥

मारस्य मार्गणगणाः सुमनायमानाः सत्पक्षसम्भृतसमागतयोऽप्यवापुः ।
तं स्थूललक्षमुपगम्य न दानलाभं को वा ददातु गुणहीनविचेष्टिताय ॥३६॥

मारस्येति । मारस्य-कामदेवस्य, मार्गणगणाः-बाणसमूहाः, "मार्गणस्तु शरेऽर्थिनि" इति हेमचन्द्रः । सुमनसः=पुष्पाणीव आचरन्तः, सद्भिः=उत्कृष्टैः, पक्षैः-पत्रैः, सहायैश्च, सम्भृता=पूर्णा, समागतिः समागमो येषां ते; अपि, स्थूलम्, लक्षम्=बृहत् शरव्यम्, बहुप्रदम्; "लक्षं लक्ष्यं शरव्यं च", "स्युर्वदान्यस्थूललक्षदानशौण्डा बहुप्रदे" इति चामरः । दानलाभम्-खण्डनरूपं फलम्, त्यागफलं च, अवापुः=प्रापुः । गुणेन=ज्यया, धर्मादिना च, हीनम्-रहितम्, विचेष्टितम्=कृत्यम्, यस्य तस्मै; "मौर्व्यां द्रव्याश्रिते सत्त्वशौर्यसन्ध्यादिके गुणः" इत्यमरः । को वा=अविवेकी, ददातु=दानं करोतु ! ॥३६॥

मार के वे नुकीले और पंखवाले बाण भी उस मुनिश्रेष्ठ को उसी तरह कोई हानि नहीं पहुँचा सके जैसे दाता को गुणहीन के लिये किये गये दान का कोई पुण्यफल नहीं मिल पाता ॥ ३६ ॥

चक्रीकृतायतशरासनमास्थितेन[1] सम्प्रेषिताः शितशरा मकरध्वजेन ।
आसाद्य बुद्धमभजन् सुमनोमयत्वं सत्सङ्गतिः सुरलतेव न किं करोति ॥३७॥

चक्रीकृतेत्यादि । चक्रीकृतम्=मण्डलीकृतम्, यत् आयतम्=दीर्घम्, शरासनम्=धनुः; आस्थितेन=प्राप्तवता; मकरध्वजेन=मदनेन, सम्प्रेषिताः=सिद्धार्थं प्रति सम्प्रहिताः; शितशराः=तीक्ष्णबाणाः; बुद्धम्=सिद्धार्थमुनिम्, आसाद्य=प्राप्य; सुमनोमयत्वम्=पुष्पत्वम्; अभजन्=प्राप्नुवन् । सुरलता=देवलता; इवेति सादृश्ये । किं न करोति=विदधाति ! ॥ ३७ ॥

मार द्वारा धनुष को पूरी तरह खींचकर फेंके गये तीखे बाण भी बुद्ध के पास पहुँचकर फूल की तरह कोमल हो जाते थे, कारण कि सत्सङ्गति से कौन कार्य असम्भव है ! ॥ ३७ ॥

सम्प्राप्य शान्तहृदयं मुनिसार्वभौमं संविद्विशेषरहितेष्वपि सायकेषु ।
सद्यो गतेषु मृदुतां स हि शम्बरारिर्व्यारोषदग्धहृदयो[2] मृदुतां न भेजे ॥

१. ०संस्थितेन—क० ।

२. पारोक्ष०—क० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सम्प्राप्येति । तं शान्तहृदयम्=शान्त चेतसम्; मुनिसार्वभौमम्-तपस्विषु चक्रवर्तिरूपम्; सम्प्राप्य=समीपं गत्वा; संविद्विशेषरहितेषु=ज्ञानविशेषशून्येषु; सायकेषु=बाणेषु, सद्यः-सपदि, मृदुताम्=मार्दवम्, गतेषु=प्राप्तेषु सत्सु, स शम्बरारिः=मनसिजो मदनः; व्यारोषेण=अधिकक्रोपेन, दग्धम्=प्रज्वलितम्, हृदयम्=चित्तं यस्य सः, सन्, मृदुताम्=सारल्यम्, न भेजे=न प्राप ॥ ३८ ॥

यद्यपि उस शान्तहृदय मुनि के पास पहुँचकर मदन के वे बाण शान्त हो जाते थे तो भी मदन का चित्त शान्त नहीं होता था, अपितु उसका हृदय तो और भी अधिक क्रोध से जल उठता था ॥ ३८ ॥

चेतोभवस्य सफला अपि सायकास्ते तं प्राप्य शान्तहृदयं विफला बभूवुः ।
दैवे समेयुषि पराङ्मुखतां हि सर्वं हस्तोपयातमपि[1] हन्त ! विनाशमेति ॥

चेतोभवस्येति । ते=अमी; चेतोभवस्य=मनसिजस्य, सायकाः=बाणाः, सफलाः=सप्रयोजनाः, शराग्रसहिता अपि, तम्=अमुम्, शान्तहृदयम्=शान्तचित्तम्; मुनिम्, प्राप्य=लब्ध्वा; विफलाः=निष्प्रयोजनाः, शराग्रहीनाश्च, बभूवुः=अभूवन् । दैवे=विधौ; पराङ्मुखताम्=वैमुख्यम्; गत्वेति शेषः; समेयुषि=प्राप्ते, सति, सर्वम्=अखिलम्, हस्तोपयातम्=करतलगतमपि; विनाशम्=नाशम्; एति=प्राप्नोति ॥ ३९ ॥

उस मनोभव के छोड़े हुए बाण उस शान्तहृदय मुनि के पास जाते ही जाते उसी तरह विफल हो जाते थे, जैसे भाग्य के विपरीत होने पर किसी को उपलब्ध वस्तु भी हस्तगत (फलदायक) न हो पाती हो ॥ ३९ ॥

इत्थं जगत्त्रयतिरस्करणक्षमेषु सर्वेषु हन्त ! विशिखेषु निरर्थकेषु ।
वैरग्रहान्धहृदयो मथनाय तस्य मारो महाप्रलयमारुतमादिदेश ॥ ४० ॥

इत्थमिति । मारः=मदनः; हन्त इति खेदे; जगत्त्रयस्य=लोकत्रयस्य, तिरस्करणे=तृणीकरणे, क्षमेषु=समर्थेषु; सर्वेषु=निखिलेषु, वाणेषु=शरेषु; निरर्थकेषु=निष्फलेषु सत्सु; तस्य=सिद्धार्थस्य; मथनाय=पीडायै; वैरस्य=विरोधस्य, ग्रहेण=ग्रहणेन, अन्धम्=मूढम्, हृदयम्=चित्तम्, यस्य सः; सन्; महाप्रलयमारुतम्=संवर्तवातम्, आदिदेश=आज्ञापयामास ॥ ४० ॥

इस तरह उस मुनि पर छोड़े गये तीनों लोकों को जीतने में समर्थ बाणों को निष्फल होते देखकर उस कामदेव ने अन्त में महाप्रलयकारी (संवर्त) वायु को आदेश दिया कि वह उस मुनिश्रेष्ठ तपस्या में विघ्न डाले ॥ ४० ॥

---

१. ०पसक्त०--म० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आमूलभागधुतदिव्यनदीसमुद्यदम्भोभराहितयथाध्युषिताभिषेकः[1] ।
अभ्यर्चनार्थमिव सम्भृतपुष्परेणुरक्षोभितं[2] मुनिमवाप महासमीरः ॥४१॥

आमूलेत्यादि । आमूलभागम्=मूलभागपर्यन्तम्, धुतायाः=कम्पितायाः, दिव्यनद्याः=देवगङ्गायाः, समुद्यता=उद्गच्छता, अम्भसाम्=जलानाम्, भरेण=समूहेन, आहितः=कृतः, यथाध्युषितः=यथोक्तमनुष्ठितः, अभिषेकः=स्नानं येन सः; सम्भृताः=सञ्चिताः, पुष्परेणवः=पुष्पधूलयो येन सः, महासमीरः=संवर्तमहावातः; अक्षोभितम्=अनभिभूतम्; परैरिति शेषः; मुनिम्=सिद्धार्थं प्रति; अवाप=प्राप ॥ ४१ ॥

देवनदी की विशाल तरङ्गों में नहाया हुआ सा, और दूसरों द्वारा आज तक अपराजित वह वायु उस शान्तहृदय मुनि को तपस्या से विचलित करने के लिये सन्नद्ध हुआ ॥ ४१ ॥

तं प्राप्य सर्वगुणभारगुरुं मुनीन्द्रं न प्रागभवच्चलयितुं स महाजवोऽपि[3] ।
नैतद् विचित्रमखिलाटविघस्मरस्य दावानलस्य न हि मूर्छति शक्तिरप्सु ॥

तमिति । सः=प्रलयवायुः=संवर्तवातः, महाजवः=महावेगः, सन्नपि; सर्वेषाम्=अखिलानाम्, गुणानाम्=सद्गुणानाम्, भारेण=धुरा, गुरुम्=महान्तम्, अतिभारवन्तमित्यर्थः, तम्=सिद्धार्थम्, चलयितुम्=कम्पयितुम्, न प्राभवत्=न शशाक । गुरुषु वेगवतां वेगोऽपि निरर्थक इत्याह—इति नैतत्=कर्म, विचित्रम्=आश्चर्यमयम्; हि=यतः; अखिलम्=सकलम्, अटविम्=वनम्, धस्मरस्य=भक्षकस्य, दाहकस्येत्यर्थः, दावानलस्य=वनवह्नेः=अरण्याग्नेः, शक्तिः=सामर्थ्यम्, अप्सु=जलेषु, न मूर्च्छति=न प्रभवति ॥ ४२ ॥

परन्तु वह महावेगवान् वायु भी उस महामुनि को विचलित नहीं कर पाया, इसमें आश्चर्य की भी कोई बात नहीं; कारण कि समग्र वनों के जला देने में समर्थ अग्नि की भी कोई शक्ति जल के दाह में काम नहीं आती ॥ ४२ ॥

एवं महापवनवारिधरादिकेषु व्यर्थीभवत्सु विपुलेष्वपि चायुधेषु ।
पुष्पायुधः पुनरियेष पुमांसमाद्यं वाक्सायकैर्हृदयमर्मतुदैर्विजेतुम् ॥४३॥

एवमिति । महापवनश्च वारिधरश्च तौ आदी येषां तेषु=संवर्तवायु-मेघप्रभृतिषु, आयुधेषु=प्रहरणेषु सत्सु; "आयुधं तु प्रहरणम्" इत्यमरः । पुष्पायुधः=मदनः, हृदयस्य मर्माणि तुदन्ति=विध्यन्तीति तैस्तादृशैः; वाक्सायकैः=वाग्बाणैः, आद्यम्=प्रधानम्, पुमांसम्=आदिपुरुषम्, पुरुषश्रेष्ठमित्यर्थः, सिद्धार्थम्, विजेतुम्=जयं प्राप्तुम्, इयेष=जगाम ॥ ४३ ॥

१. ०भ्युपिताभि०—क० ।
२. संहत०—म० ।
३. महाजयोऽपि—वि०, म० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इस तरह उस मदन के द्वारा प्रेरित वायु और जल के सभी प्रयत्न निष्फल होने द वह कामदेव अपने वाग्बाणों से उस शान्तहृदय मुनि को विचलित करने यास करने लगा ॥ ४३ ॥

त्वदीयमिदमासनमस्मदीयमुत्थाय तूर्णममुतः सहसापयाहि[1]।
रिता परमपारमिका मयैव तत्साक्षिणी मम महापृतनेत्यवोचत् ॥४४॥

नैवेति। इदम्–एतत्, आसनम्=तपःस्थानम्, त्वदीयम्=त्वत्सम्बन्धि, अपि तु अस्मदीयम्=अस्माकम्, अतः, अमुतः=आसनात्, तूर्णम्=शीघ्रम्, ाय=उत्थानं कृत्वा, सहसा=अनायासेन, अपयाहि–दूरं गच्छ। मया= युधेन, एव; परमपारमिका=परमोत्कृष्टत्वम्, आपूरिता=निर्वतिता, ं महापृतना=महासेना तत्साक्षिणी=परमपारम्यसाक्षाद् द्रष्ट्री, अस्ति— पुष्पायुधः सिद्धार्थम्, अवोचत्–उक्तवान् ॥ ४४ ॥

"अरे यह बोधि-आसन तेरा नहीं, मेरा है, इससे उठकर तू जल्दी ही यहाँ ाग जा ! तू जिन पारमिताओं के पूर्ण करने की बात कर रहा है वे तो वस्तुतः ूरी की हैं, इसका प्रत्यक्ष प्रमाण है मेरी यह अपरिमित एवं महाबलशालिनी !"–यह मदन ने बुद्ध से कहा ॥ ४४ ॥

ात् प्रसार्य करपल्लवमादिभिक्षुर्यावज्जगाद गिरमिद्धतपप्रभावः[2]।
ः पलायत ततो महता बलेन भ्रष्टातपत्ररथकेतुकुथेन भीतः[3] ॥ ४५ ॥

अङ्कादिति। इद्धः=प्रदीप्तः, तपसः=तपश्चर्यायाः, प्रभावः=सामर्थ्यम् सः, आदिभिक्षुः=प्रथमभिक्षुः, अङ्कात्–क्रोडात्, करपल्लवम्=करकिस- ा, प्रसार्य=प्रसारणं कृत्वा, यावद्, गिरम्=वाणीम्, जगाद–अगादीत्; ः=नष्टः, आतपत्रम्=श्वेतच्छत्रम्, रथकेतुः=रथध्वजश्च, कुथः–परिस्तोम- मारः=मदनः, यस्मात् तेन, "परिस्तोमः कुथो द्वयोः" इत्यमरः। महता –महासेनया सह, ततः=तस्मात् स्थानात्, पलायत–अधावत् ॥

इन बातों को सुनकर ज्यों ही अत्यधिक तपःसामर्थ्य वाले उस मुनि ने उसका देने के लिए कुछ बोलना चाहा तभी वह कामदेव, डर के मारे, छत्र रथ ा और आसन को इधर-उधर छोड़कर अपनी सेना के साथ वापस भाग ॥ ४५ ॥

---

[1] नैवेत्यतः पूर्वं श्लोकार्धम् म० पुस्तकेऽधिकं पठ्यते—
"आपूरिता तदनु पारमिता मयैव तत्साक्षिणी मम समस्तवसुन्धरेति।"

[2] ०करप्रभावः—क०।

[3] मारः—इत्यतः पूर्वं श्लोकार्धं क० म० पुस्तकयोरित्थं पठ्यते—
"तावन्महाप्रलयसागरमध्यवेगसंक्षोभमाप सकलापि च भूतधात्री"। इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माराङ्गनास्तदनु मन्थरदृष्टिपाता वाचालरत्नपदनूपुरपारिहार्याः[1] ।
सद्यः समेत्य चतुरस्रविशालगर्भं चक्रुस्तदग्रभुवि ताण्डवमत्युदारम् ॥४६॥

माराङ्गना इति। तदनु=मदनपलायनानन्तरम्, मन्थरः=मन्दगामी, दृष्टिपातः=दृष्टिपतनं यासां ताः, "मन्दगामी तु मन्थरः" इत्यमरः। वाचालौ=मुखरौ, रत्नानाम्=मणीनाम्, पदयोः=चरणयोः, नूपुरः=मञ्जीरश्च, पारिहार्यः=कटकश्च, तौ यासां ताः, "मञ्जीरो नूपुरोऽस्त्रियाम्", "आवापकः पारिहार्यः कटकः" इति चामरः। माराङ्गनाः=मदनपत्न्यः, सद्यः=तत्क्षणम्, समेत्य=आगत्य, चतुरस्रः=अन्यूनानतिरिक्तः, विशालः=विपुलः, गर्भः=मध्यदेशो यस्मिंस्तत्, अत्युदारम्=अतिमहत्, ताण्डवम्=उद्धतनृत्यम्, तस्य=सिद्धार्थस्य, अग्रभुवि=पुरःप्रदेशे, चक्रुः=कृतवत्यः ॥४६॥

तब उसकी सहायता के लिये उस मदन की स्त्रियाँ अपनी मन्थर चाल से नूपुरों को झंकृत करती हुई तत्काल वहाँ पहुँचकर उस मुनि को तपस्या से विचलित करने हेतु उसके सामने, उसको घेर कर, मन को हरने वाले तरह-तरह के ताण्डव नृत्य करने लगीं ॥ ४६ ॥

अन्तःसमाहितसमाधिरसानुषक्तमालोक्य शाक्यकुलनन्दनमप्रकम्प्यम् ।
कर्णामृतानि वचनानि च कातराक्ष्यः कामाङ्गना विदधिरे करुणाक्षराणि ॥

अन्तरित्यादि। ताः, कातरे=अधीरे, अक्षिणी=नेत्रे यासां ताः; कामाङ्गनाः=मदनपत्न्यः, अन्तः=हृदये, समाहिते=उत्पादिते, समाधिरसे=ध्यानानन्दे, अनुषक्तम्=लीनम्; अप्रकम्प्यम्=अक्षोभ्यम्; शाक्यकुलस्य नन्दनम्=पुत्रम्, सिद्धार्थम्; आलोक्य=दृष्ट्वा, करुणानि=करुणारसविशिष्टानि, अक्षराणि=वर्णानि येषु तानि; कर्णामृतानि=कर्णप्रियाणि च, वचनानि=उक्तयः, विदधिरे=ऊचुः ॥ ४७ ॥

जब इन ताण्डव नृत्यों से भी वे ध्यानयोगी मुनि अपने तपःकर्म से विचलित नहीं हुए तो उन चपल नेत्रों वाली मदनाङ्गनाओं ने अपनी कोमल वाणी से उन्हें व्यङ्ग्य वचन सुनाने प्रारम्भ किये ॥ ४७ ॥

अस्यै पतन्मदनसायकविह्वलायै दृष्टिप्रदानमपि कर्तुमपारयन्तम् ।
उत्पाट्य लोचनयुगं द्विजपुङ्गवाय त्वां दत्तवानिति कथं ब्रुवते पुराणाः ॥

अस्यै इति। पतद्भिः=पातमाप्नुवद्भिः, मदनस्य सायकैः=बाणैः, विह्वलायै=विवशायै; अस्यै=मदनाङ्गनायै, दृष्टिप्रदानम्=दर्शनम्, नेत्रार्पणम्, अपि, कर्तुम्=विधातुम्, अपारयन्तम्=अशक्नुवन्तम्, त्वाम्=सिद्धार्थम्, प्रति, "त्वम्, द्विजपुङ्गवाय=कस्मैचिद्द्विजवराय, स्वकीयं लोचनयुगम्=नेत्रयुगलम्,

१. ०रत्नमणिनूपुर०—वि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ाट्य=उद्धृत्य, दत्तवान्=दानं कृतवान्" इति पुराणा।=प्राञ्चः, कथम्=
प्रकारेण ब्रुवते=कथयन्ति ! ॥ ४८॥

एक ने कहा—"अरे ! जब तूँ इनमें किसी एक मदनविह्वला पर दृष्टि डालने में असमर्थ सा दिखायी दे रहा है तब तेरे विषय में पुराने इतिहासलेखकों ने जो ा है कि तू ने माँगने पर किसी ब्राह्मण को अपनी दोनों आँखें निकाल कर दे —यह असत्य ही लिखा है" ॥ ४८॥

नां महामकरकेतनवारिराशौ मामित्थमाधिविधुरामवलम्बशून्याम् ।
तुमप्यकुशलो जननाम्बुराशेरुत्तारयिष्यसि कथं त्वमशेषलोकम् ॥४९॥

मग्नामिति । मकरकेतनः=मीनध्वज एव वारिराशि=सागरः, तस्मिन्; नाम्=निमग्नाम्, इत्थम्=अनेन प्रकारेण, आधिना=मानसव्यथया, विधु=खिन्नाम्, अवलम्बशून्याम्=निराश्रयाम्, माम्=मदनाङ्गनाम्, उद्धर्तुम्=ष्कासयितुम्, अपि, अकुशलः=अपटुः, त्वम्=सिद्धार्थः, अशेषलोकम्=निखिलं ात्, "लोकस्तु भुवने जने"इत्यमरः । जननाम्बुराशेः=संसारसागरात्, कथम्= प्रकारेण, उत्तारयिष्यसि=पारं करिष्यसि ? ॥ ४९ ॥

दूसरी ने कहा—"और जब तूँ कामसागर में डूबी मुझ एक को बचाने में मर्थ सा दिखायी दे रहा है तो तूँ समग्र संसार को इस भवसमुद्र से तारने की क्त क्या जुटा पायेगा !" ॥ ४९ ॥

ट्वाऽस्मदीयमनवद्यतमं विलासं श्लाघाशिरोविधुतिमप्यतिदूरयन्तम् ।
च्छिद्य मस्तकमुदस्तरिपुप्रभावं त्वां दत्तवानिति वदन्ति कथं कवीन्द्राः ॥

दृष्ट्वेति । अस्मदीयम्=अस्मत्सम्बन्धि, अनवद्यतमम्=अत्यन्तं निर्दुष्टम्, लासम्=विभ्रमम्, दृष्ट्वा=अवलोक्य, अपि, श्लाघया=प्रशंसया, शिरोविधु'म=शिरःकम्पम्, अतिदूरयन्तम्=त्यजन्तम्, त्वाम्, उदस्तः=निरस्तः, रिपुभावः=शत्रुप्रतापो येन तम्, मस्तकम्=शिरः, उच्छिद्य=उत्कृत्य, दत्तवान्"— ते कवीन्द्राः=विद्वांसः, त्वाम्=सिद्धार्थम्, उद्दिश्येति शेषः, कथम्=केन कारेण, वदन्ति=कथयन्ति ॥ ५० ॥

तीसरी बोली—"अरे ! जब तूँ हमारी इस अनुपम भाव भङ्गिमा का साधारणतः पना शिर हिलाकर भी समर्थन नहीं दे पा रहा है तो तेरे विषय में पुराने इतिहासरों द्वारा लिखी यह बात असत्य ही प्रतीत होती है कि पहले किसी जन्म में तूँने सी याचक को अपना शिर काट कर दान में दे दिया था" ॥ ५० ॥

ण्यात्मनामधिपते ! पुरुषोत्तमत्वमाप्तुं पदं त्वमभिवाञ्छसि किं तपोभिः !
स्मासु कामपि वधूमधिरोपय त्वं वक्षस्तटे महति मेरुशिलाविशाले ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुण्येत्यादि। हे पुण्यात्मनाम्=पुण्याशयानाम्, पुरुषाणाम्, अधिपते= स्वामिन्! यदि, त्वम्=सिद्धार्थः, पुरुषोत्तमत्वम्=विष्णुत्वरूपम्, पदम्= स्थानम्, आप्तुम्=लब्धुम्, वाञ्छसि=इच्छसि, तर्हि, तपोभिः=एतादृक्कठोर-तपःकरणैः, किम्, प्रयोजनम्=अर्थः, तत् तपोभिर्न साध्यमिति भावः। तर्हि तत्पदप्राप्त्यै किं करणीयम्?—इति चेत्, अत्राह—अस्मासु=मारवधूषु, कामपि=अनिर्वचनीयाम् वधूम्=नारीम्, स्वपत्नीत्वेन, स्ववक्षस्तटे=वक्षःस्थले, मेरोः=सुमेरुपर्वतस्य, शिलाविशाले=विस्तीर्णशिलासदृशे, अधिरोपय=आरोहय। यदि पुरुषोत्तमत्वमभीप्ससि तर्हि विष्णुर्लक्ष्मीमिव त्वमपि अस्मासु यां काञ्चित् स्ववक्षस्तटे अधिरोपयेत्यर्थः॥ ५१॥

किसी ने कहा—"अरे पुण्यात्माओं में प्रधान! यदि तूँ विष्णु का पद प्राप्त करना चाहता है तो उसके लिए तूँ इस कठोर तपस्या के झंझट में क्यों पड़ा है! उसके लिए तो हम में से किसी एक का हाथ पकड़कर उसे अपने हृन्मन्दिर में बिठा लेने मात्र से तेरा कार्य सिद्ध हो जायगा"॥ ५१॥

भद्रान्ववायमथ वा परमेश्वरत्वमाकांक्षसे समुपयातुमलं तपोभिः!
कामप्यमूषु कमलायतदृष्टिपातां वामालकां त्वमधिरोहय वामभागे॥

भद्रेत्यादि। भद्रः=शुभः, अन्ववायः=वंशो यस्य तत्, परमेश्वरत्वम्= परमशिवरूपत्वम्, समुपयातुम्=लब्धुम्, आकांक्षसे=इच्छसि, तर्ह्यपि तपोभिः= एतादृग्भिः- करणैः, तपः अलम्=तपसः, एतत्कृतेऽपि, साध्यमिदं नास्ति। त्वम्=सिद्धार्थः, कमलाम्=पद्मामिव, कामपि मदनाङ्गनाम्, स्वकीये, वामभागे=सव्यभागे, "वामः कामः सव्ये पयोधरे" इति हेमचन्द्रः। अधि-रोहय=स्थापय। विनापि तपसा वामभागे कामाङ्गनारोपेण परमेश्वरसाम्य-प्राप्तेरिति भावः॥ ५२॥

"और यदि तूँ अच्छे उच्चकुल में अपनी उत्पत्ति चाहता है या परम शिव का पद प्राप्त करना चाहता है तो उसके लिये इतना ही बहुत है कि हम में से किसी एक को तूँ अपने वाम भाग में बैठा ले। इसके लिए इन कठोर तपस्याओं के जञ्जाल में तूँ क्यों फँस रहा है!" ५२॥

आनन्दकन्दलितलोचनविभ्रमाणाम् अम्भोरुहप्रकरगर्वगलग्रहाणाम्।
आविःस्मिताननरुचामवलोकनानां पात्रीभवन्ति सुदृशां ननु भाग्यवन्तः॥

आनन्देत्यादि। आनन्देन=हर्षेण, कन्दलिताः=प्रवृद्धाः, लोचनानाम्=नेत्रा-णाम्, विभ्रमाः=विलासाः यासां तासाम्, अम्भोरुहप्रकरस्य=पद्मसमूहस्य यो गर्वः, तस्य गलम्=कण्ठम्, गृह्णन्तीति तासाम्, पद्मगर्वविनाशकानामित्यर्थः; आविर्भूता=समुत्पन्ना, स्मितेन=मन्दहास्ययुक्तेन, आननेन=मुखेन, रुचिः-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ान्तिर्यासु तासाम्; सुदृशाम्=सुलोचनानाम्, भाग्यवन्तः=भाग्यशालिन एव, नु=निश्चयेन, पात्रीभवन्ति = विषयीभवन्ति ॥ ५३ ॥

"अरे ! हर्षविभोर होकर कटाक्षपात करती हुई, कमलों के सौन्दर्य का गर्व चूर्ण करती हुई, मुस्कुराती किसी चपलनयना तरुणी को कोई भाग्यशाली ही प्त कर पाता है !" ॥ ५३ ॥

ाकृष्टरक्तपरपुष्टवचोविलासाद् आलोचनान्तविवृतादृतकर्णपेयात् ।
ाश्चर्यभङ्गिसुभगादपरोक्षसौख्यादाभाषणान्मृगदृशाममृतं किमन्यत् ॥[१]

आकृष्टेत्यादि । आकृष्टः-आकर्षणं प्राप्तः, रक्तस्य=अनुरक्तस्य, परटस्य वचसः=कोकिलालापस्य, विलासः-विभ्रमो येन तस्मात्; आलोचनाम्=नेत्रान्तपर्यन्तम्, विवृताभ्याम्=विस्तृताभ्याम्, आदृताभ्याम्=सादराम्; कर्णाभ्याम्=श्रोत्राभ्याम्, पेयात्=पातुं योग्यात्; आश्चर्यरसरीत्या, भगात्=मनोहरात्, अपरोक्षसौख्यात्; मृगदृशाम्=मृगनयनानाम्, आभागात् =आलापात्, "स्यादाभाषणमालापः" इत्यमरः । अन्यत्-अपरम्, कमस्ति ? ॥ ५४ ॥

"अरे ! इस संसार में, कोयल की तरह मीठी बोली वाली स्त्री के वचनों को कान ाल कर सुनने, और आश्चर्यमय भाव-भङ्गियों से सुखद एवं प्रत्यक्ष आनन्द प्रदान रने वाली तरुणियों के साथ संवाद करने के अतिरिक्त 'अमृत' किसे कहा जा कता है !" ॥ ५४ ॥

श्रान्तपानसहमौषधमात्मयोनितापोदयेष्वनुपदंशमनोऽभिरामम् ।
क्षीयमाणमधरामृतमङ्गनानामास्वाद्यतामयति पुण्यवतां हि पुंसाम्[२] ॥

अश्रान्तेत्यादि । अश्रान्तम्-सततम्, पानं सहते इति तादृशम्, सतता-रताश्रान्तसन्तताविरतानिशम्" इत्यमरः । सततपातेऽप्यरुच्यनुत्पादक-ति भावः, आत्मयोनेः=मदनस्य, तापोदयेषु=तापाविर्भावेषु, अनुपदंशेऽपि=रोचकद्रव्याभावेऽपि मनोऽभिरामम्=मनोहरम्, अक्षीयमाणम्=क्षयरहितम्, ङ्गनानाम्-कामिनीनाम्, अधरामृतम् = ओष्ठसुधा, पुण्यवताम्=भाग्य-ालिनाम्, पुंसाम्=जनानाम् आस्वादयताम्=आस्वादयितुं योग्यताम्, यति=प्राप्नोति ॥ ५५ ॥

"कामोन्माद से विह्वल होने पर निरन्तर चुम्बन क्रिया में समर्थ अत एव सुन्दर पी न क्षीण होने वाला तरुणियों का अधरामृतपान का रसास्वाद तो किसी पुण्यवान् ही मिल पाता है" ॥ ५५ ॥

इतोऽग्रे ५६ संख्याकः श्लोको भ्रष्ट इति पूर्वसंस्करणसम्पादकः ॥५६॥

१. किमार्यम्—म०; किमादथम्—वि० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यहाँ ५६ वाँ श्लोक उपलब्ध नहीं हुआ—ऐसा इस ग्रन्थ के पूर्व संस्करण के सम्पादक का संकेत है ॥ ५६ ॥

एवंविधैर्ललितभावरसानुविद्धैर्नृत्तक्रमैर्निरुपमैर्वचसां विलासैः ।
आलोक्य बुद्धमविकम्पितचित्तवृत्तिं लज्जावशात् प्रतिनिवृत्य ययुस्तरुण्यः॥

एवमिति । ललिताभ्याम् भावरसाभ्याम् अनुविद्धैः=सम्बद्धैः, नृत्तक्रमैः= नाट्यरीतिभिः, निरुपमैः=अनुपमैः, वचसाम्=सूक्तिनाम्, विलासैः=विभ्रमैः, अपि, बुद्धम्=सिद्धार्थम्, अविकम्पिता=अचलिता, चित्तवृत्तिः=ध्यानरूपो मानसव्यपारो यस्य तम्, सन्तम्, आलोक्य=दृष्ट्वा, तरुण्यः=मदनाङ्गनाः, लज्जावशात्=सङ्कोचवशात्, ततः प्रतिनिवृत्य, ययुः=जग्मुः ॥ ५७ ॥

इस तरह ललित भाव और रस से अनुप्राणित नृत्य तथा वाग्विलासों से भी उस स्थिरचित्त तपस्वी को तप से विचलित न कर पाने के कारण लज्जित हुई वे मदनाङ्गनायें वापस लौट गयीं ॥ ५७ ॥

इत्थं पुष्पशरासनस्य विजयव्यापारशुष्कस्थितां
सम्बोधिप्रमदां निवेश्य सुदृशं श्रीबोधिमूले वरः ।
सिद्धार्थश्चिरवासनापरिगतानुच्छिद्य दोषद्विषो-
मुक्तिक्षेत्रकुटुम्बरक्षणविधौ मूर्धाभिषिक्तोऽभवत् ॥५८॥

इति बुद्धघोषविरचिते पद्यचूडामणिनाम्नि महाकाव्ये सिद्धार्थचरिते दशमः सर्गः ॥

इत्थम्=पूर्वोक्तप्रकारेण, विजयव्यापारेण=जयकर्मणा, शुष्कम्=कृशं यथा स्यात् तथा, सम्बोधिरेव प्रमदा=योषित्, ताम्, सुदृशम्=सम्यग्दर्शनवतीम्, क्रोडे निवेश्य=स्थापयित्वा, श्रीबोधिमूले=अश्वत्थद्रुमतले, वरः=श्रेष्ठः, सिद्धार्थः चिरवासनापरिगतान्=अनादिवासनाप्रवृत्तान्, दोषद्विषः=रागादिशत्रून्, उच्छिद्य=विनाश्य, मुक्तिक्षेत्रे स्थितानां कुटुम्बानाम्, रक्षणविधौ=रक्षाकर्मणि मूर्धाभिषिक्तः=कृताभिषेकः, तत्परः इत्यर्थः । अभवत्=अभूत् । शार्दूलविक्रीडितं वृत्तम्; "सूर्याश्वैर्म-स-जास्ततः सगुरवः शार्दूलविक्रीडितम्" इति लक्षणात् ॥ ५८ ॥

इति पदयचूडामणिमहाकाव्ये कीर्तिव्याख्यायां दशमः सर्गः ॥

यों, कामदेव के इस विजय-व्यापार को विफल करते हुए सम्बोधिरूपी प्रमदा को अङ्क में बैठाकर बोधिवृक्ष के नीचे विराजमान वे तपोधन सिद्धार्थ अनादिवासनाओं से उद्भूत रागादि शत्रुओं को समूल उच्छिन्न कर मुक्तिक्षेत्रस्थित कुटुम्बी (ज्ञानी) जनों की रक्षा में सन्नद्ध हुए ॥ ५८ ॥

पद्यचूडामणि (सिद्धार्थचरित) महाकाव्य के दशम सर्ग का भाषान्तर पूर्ण ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिशिष्टोंऽशः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्लोक-सूची

बुद्धघोषनिबद्धेऽस्मिन् सिद्धार्थचरिते शुभे ।
पद्यचूडामणावेष आगतः श्लोकसंग्रहः ॥

ालक्तकरसद्युति० ४७
ात् प्रसार्य करपल्लवम् २३५
समासाद्य लताङ्गनानाम् १४५
नावदनपद्मपूरणीम् १४८
रमन्दहरिचन्दनपङ्कलिप्तैः ४२
ानमेवं जगताम् २००
ाद्भुतामात्मजजन्मवार्ताम् ६९
ान्तमन्धयति दिङ्मुखम् २२३
ुल्बणैरमितसैन्य० २२४
ान्तरे निविडमास्थित० २१८
ान्तरे राजकुमारमेनम् १३३
काचिद् विशालाक्षी २१०
कानिचिदेव वासराणि ५८
ागते सप्तमवासरान्ते १३३
ावलोक्य लोकेशं १६६
ादयं शाक्यमहीपतीनाम् ५६
ःपूर्वामतिलोकशिल्पाम् १३५
ङ्गसाम्राज्यमहाभिषेक० १७३
ःतरं तस्य पुरः सुराधिपैः १५१
ःतररत्नाकरफेनमण्डलैः १२७
न्यग्रोनेरपदानगाथाम् १४५
ःयसाधारणपाटलिम्न। ८९
ःयसामान्यधियं कुमारम् ७५
म्वृत्तान् मणिघण्टिकानाम् ७३
ा कालेन विनामृतद्रवैः १२५
ःसंग्रामविमर्दशीर्णाम १४५
ःसमावेशितफुल्लमल्ली० ८७
ःसमाहितसमाधिरसा० २३६

अन्तःसमुद्भवदमर्ष० २२६
अन्तःस्फुरन्मृगकलङ्कमभङ्गुराभम् १९१
अन्तःस्फुरितबालतमालकान्ति। १९०
अन्तर्मलीमसमभादमृतांशु० १९२
अन्तर्गतस्याद्भुतविक्रमस्य ६१
अन्तर्विगाढे सति सुन्दरीभिः १६६
अन्यत्र कर्णः सुधियामसक्तः २०
अन्यांश्च सर्वानपि बन्धुवर्गान् १०२
अन्येद्युरथ भिक्षार्थम् २०२
अन्योन्यसम्मर्दविशीर्णहार० ६७
अपरेद्युर्विनिर्गत्य २०८
अप्राप्य निर्वाणपदं २०९
अव्यक्तगात्रीमधिवासितेन ८६
अभ्यर्णवर्त्तिभिरकृत्रिमभक्तिशोभैः ४०
अभ्यस्तया संवरणाम्बुराशेः ६६
अभ्युच्छ्रितैरवनिमांसल० २२५
अभ्युद्गतं परिभवं २२६
अभ्युद्गतं यद्गृहधूपराशिम् १२
अभ्युद्गतैररुणरागमनोऽभिरामैः ४२
अभ्युद्यतैरमितसैन्य० २२२
अभ्युल्लसच्चम्पकदामदीप्तिः ७४
अमुष्य यः शासनमाश्रितो जनः १५२
अमुष्य वक्त्रामृतभानुबिम्ब० १११
अमुष्य सर्वत्र वितायमानैः ६५
अम्भोधिसम्पदवलुण्ठन० २२६
अम्भोरुहाकृतिमभङ्गुरपद्मराग० ४६
अम्भोविहाराकुलितैः पयोभिः १७३
अयं महाभाग ! विशुद्धमानसः १५२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्धासिकां भर्तुरनन्यलभ्याम् ३१
अर्धोदितः शीतकरस्य बिम्बः १८५
अलंकृतं मौक्तिककुण्डलाभ्याम् ८६
अलंकृताङ्गाः सुभटान्त्रमाल्यैः १७
अलंक्रियाऽजायत देहकान्तिः ६५
अवकाशप्रदानार्थम् २०१
अव्यक्तवर्णाभिरमुष्य वाग्भिः ७१
अशोकपुष्पस्तबकाभिताम्र० १७६
अशोकयष्टिस्तरुणीजनस्य १५८
अशोकयष्ट्याः स्तबकोपनीतम् १४४
अश्रान्ततृष्णेन विलोचनेन ७०
अश्रान्तपानसहमौषधम् २३:
अश्वीयपाददलिताद् २२७
असक्तहृदयस्तासाम् १६४
असूत सद्यः सहकारशाखी १५८
अस्तङ्गतं भास्करमम्बरश्रीः १८०
अस्तङ्गते भर्तरि भृङ्गमाला० १७६
अस्ताद्रिशृङ्गस्खलिताग्रपादः १८७
अस्ति प्रशस्ता कपिलेति नाम्ना ३
अस्माकमुत्पत्तिरिवात्र भूमौ ६३
अस्यै पतन्मदनसायक० २३७
अस्योपदेशादखिलोऽपि सत्यं ६४

आकर्णमाकृष्टशरासनस्य १०६
आकर्ण्य गानं मधुपाङ्गनानां १८८
आकर्ण्य तद्वचनमश्रुतपूर्वमेषां ५७
आकर्ण्य सन्देशमुखादुदन्तम् ८४
आकारमत्यद्भुतसन्निवेशम् २३
आकाशकन्दरदरीषु वितायमानैः २९
आकाशनीलोत्पलभृङ्गभङ्गि० १८१
आकाशशय्यातलमश्नुवाने १८९
आकाशसिन्धोरपराह्णकर्ण० १७६
आकुञ्चिताग्रैरलकैः ८७
आकृष्टरक्तपरपुष्टवचोविलासात् २३९
आकृष्य शाखाः सदयं लतानां १६१
आगत्य गेहमध्यास्य १६२
आढौकमानरथमण्डल० २२०
आतन्यमानबलरेणु० २२७
आतन्वतश्चेतसि कोमलाङ्ग्याः २६
आतन्वता पांसुविहारमाप्तैः ७२
आदर्शबिम्बे प्रतिमाशरीरम् ६५
आदाय तापसाकल्पम् १९८
आदिकल्पसमुद्भूताम् १६८
आदित्यबन्धोर्बोधैकसिन्धोः २००
आधूयमानकरवालकराल० २२०
आनन्दकन्दलितलोचन० २३६
आनन्दपाकोदयशालिभिः फलैः १३२
आनन्दबाष्पजलजर्जरदृष्टिपात० ४०
आनन्दयित्री हरिणेक्षणानाम् ८२
आपादपद्ममभितः प्रविजृम्भिताभिः ४३
आपीतसर्वमकराकरवारिराशेः २२८
आपूरिते निर्भरमन्तरिक्षे १८
आप्लावयामास करोदकेन १७१
आप्लाविताखिलदिगन्त० २३०
आमुक्तमुक्तासरदर्शनीयम् २७, ६०
आमुक्तचारुतरचीवर० २३१
आमूलचूडमभितः प्रविजृम्भमाणो १४३
आमूलभागधुतदिव्यनदी० २३४
आमोदलुब्धैरलिनां कदम्बैः १४७
आयामशालिभिरमन्ददया० ३९
आरामभूमावतिवाह्य तापम् १६४
आरुरोहासनं तुङ्गम् २१४
आरुह्य मन्दमलयानिलमौपवाह्यम् १३९
आरुह्य सौधानतिमेघमार्गान् ६
आरूढबोधिपर्यङ्कम् २१४
आरोपिताभ्रङ्कषकेतुमाल० ८५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ाप्य तारुण्यविशेषशाणं ७६
ापमारामविहारिणीनाम् १५७
ाख्यलीलाफलकं सतूलिम् १०८
ापचन्दनविसृत्वर० ४५
ोकलोभादभिवर्तमाना: ९९
ोलबाहुबलयस्खलना० ४५
र्भवद्भिः श्रमवारिलेशः ६८
ामखप्रसृमरैरभिनन्दनीयैः ४५
ुर्य शाखां करपल्लवेन १६०
ार्तवेगादपराम्बराशेः १७७
ाम्बराकाशमतिप्रभूता १८२
ामशेषमवनीतल० २३०
ीत् कुमारः पुलकप्ररोहैः ६८
ीर्णमुक्तासिकताभिरामम् ८६
ःफालितानेकमृदङ्गघोष० ६७
ःफालिताप्रतिमभैरव० २२१

सरोजाक्षि विलोकयाम्बुदान् ११५
कृतवति तस्मिन् ५८
क्रमेणाहितपाणिपीडः १०१
गतवति पुण्यैः ३३
प्रवीराः क्षितिपालनन्दन० १५३
प्रवृत्ते मधुमासवैभवे १४६
प्रशंसामुखरे सकौतुकं १२५
विहितविवाहम् ११३
ं कुमारस्य सहावरोधैः १६२
ं जगत्त्रयतिरस्करण० २१३
ं धीरो दर्शयित्वास्त्रशिक्षाम् १३५
ं पुष्पशरासनस्य २४०
ं श्रुत्वा सारथीनां वचः १५४
ं सुपर्वविहितां स्तुतिमादरेण ५५
पमाराधितो देवैः १९६
ादिमासां गिरमत्युदाराम् ११२

इयं चकोराक्षि पयोदमालिका १२१
उच्चण्डदण्डधरकासरसार्वभौम० १३७
उत्क्षिप्तमुक्तातपवारणश्रीः ६६
उत्क्षिप्तशाखाच्छलबाहुदण्डात् १४६
उत्तीर्य तस्याः पुलिने १९८
उत्तुङ्गनीलमणिमन्दिरजृम्भमाण० ३४
उत्तुङ्गबाहुयुगलोदयशैलजात० ४१
उत्थाप्य दूरानतमूढभार्यम् ११२
उत्फुल्लमञ्जरीपुञ्ज० २१२
उत्सेधिनो यत्र गृहाः प्रभूणाम् ४
उदर्चिषस्तस्य हुताशनस्य ६७
उदयच्छमानस्तुहिनांशुमाली १८६
उद्भिन्नरोमोद्गमलोभनीया १०८
उद्वेलसम्भृतमधुव्रतदानराजिः १४२
उन्मोचयन् परिणतच्छदकञ्चुलीकान् १३६
उपकण्ठकलालाप० २०६
उपाहृतैः काञ्चनपुष्पजालैः १५९

ऊर्णाभिरामा नरपालसूनोः ८१

ऋतुश्रिया दीप्ततडित्प्रदीपिका० ११६

एकत्र फुल्लैर्नवपुण्डरीकैः १६५
एकदा पारमीभाग्य० २०९
एकावलिं काञ्चिदनर्पयित्वा १०५
एकेन बाणासनमाततज्यम् १३४
एताभिरेषां स्तुतिभिः २१७
एवं महापवनवारिधरादिकेषु २३४
एवंविधैर्ललितभावरसा० २४०
एवं स कृत्वा सरसीविहारं १७४

ऐरावतस्य इवाकाश० १९५

ओषीकृता मलयमारुतचन्दनेन १४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कठोरकान्ताकुचमण्डलानाम् १६७
कदर्थितात्मीयगुणप्रकाशने १२६
कनन्ति कालागरुधूपमिश्राः १३
कन्दर्पदर्पनिर्भेद० २१५
कन्याकुमारौ कमनीयरूपौ ९९
करुणापूरलहरी २१५
कल्पक्षयक्षुभितमारुत० २२४
कल्पान्तकालघटमान० २२२
कयाचिदभ्यर्णजुषः सलीलं १७०
करेण शाकं मम कोमलेन १६०
कर्णावसक्ताः कमलेक्षणायाः ८८
कलाधिनाथः करजालमुज्ज्वलं १२८
कलापिनः काञ्चनकाहलोपमान् ११८
कल्पद्रुमप्रसवकल्पितकर्णपूर० ४०
कल्लोलवल्लीवलय० १९७
कस्तूरिकाकल्पितपत्रलेखः २६
कस्तूरिकाकल्पितपुष्पलेखः ६८
कस्याश्चिदन्तःसलिले निमज्य १७२
कस्याश्चिदाविष्कृतचन्द्रिकायाः १७०
काचित् तदा कण्टकिताङ्गयष्टिः १०७
काचित् तदाकर्षणसिद्धमन्त्रम् १०७
काचित् प्रगल्भा रमणस्य कर्णे १६१
कान्ताकरोदञ्चितवारिधाराः १६७
कारुण्यकल्लोलितदृष्टिपातं १
कालाञ्जनोच्छ्वासविकूणिताक्षम् १०१
कालागरुमहाधूम० १६४
कालेन गाढतरमानपरिग्रहाणां १३८
किं पुष्पधन्वा प्रतिलब्धमूर्तिः १३४
कुमारमेनं कुलशैलधुर्यम् ११०
कुमुद्वतीकोशपुटावतीर्ण० १६५
कुशलोऽत्रभवानेव २१६
कृतकृत्यं तमुद्दिश्य २०१
कृताप्लवानामचिरेण वारिदैः १३०
कृताभिषेकाः प्रथमं घनाम्बुभिः १२९
कृतोपवीतं गलितातिबाल्यं ७४
कृत्वा दिनमुखाचारं २१०
क्रमेण पश्यन् पुरतः स्थितानमून् १५०
क्रमेण मध्यं चरमाम्बुराशेः १७७
क्रीडातडाकं क्षितिपालसूनुः १६६
क्षणप्रभाचम्पकदामभूषणाः १२२
क्षोणीतलान्तरनिरन्तर० २२१
श्रोणीभुजा कुंकुमवारिधारा १६९

गन्धर्वराजमहिलाजनगीयमान० ५२
गुणैः समस्तैः सह राजसूनोः ७८
गुरुप्रयुक्ता कुलपालका सा ९९
गोरोचनागौररुचिश्चकाशे ३१

घर्मोदबिन्दुप्रकरा विरेजुः १६३
घर्मोदबिन्दुप्रकरैरुदीर्णैः १०६
घोटीखुरपुटीकोटि० २०३

चकाशिरे चन्द्रमसः समुत्थाः १८५
चक्रीकृतायतशरासन० २३२
चचाल मेरोरचलाभिधानं ६६
चण्डातपस्पर्शविवर्धमान० १६२
चन्द्रोदयोज्ज्वलमुखेन झषध्वजाज्ञां १३८
चराचराणामभिवन्दनीयम् १५५
चुलुकीकरणे शूरः २१६
चेतोभवस्य सकला अपि २३३
चेतोभुवः पुष्पशिलीमुखानाम् १०८

छायास्तरूणामभितः प्रवृत्ताः १६३

जगदेकगुरोस्तस्य २०२
जातः पृथिव्यामधिपो मुनीनाम् ६५
जिज्ञासमानास्तिमिरप्रवृत्तिम् १८३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ालोकस्त्रिजगताम् २००
ाप्य सर्वगुणभारगुरुं २३४
ङ्क्यैव सा तस्मै २१०
ाटीरद्रुमसङ्गभाजां १४७
ाकण्ठं मकरन्दसिन्धोः १४४
कनिकटे नद्याः २०८
तेप्रयायाः सविलाससम्पदो १२६
के तस्य सिद्धार्थः २०८
किसलयालोक० २११
कुमारस्य समग्रवैभवो ११४
कुमारस्य पुरन्दरश्रियः १५०
प्रकीर्णाभिनवप्रसूने ८७
ंमभ्यागतमादरेण १६६
कन्दर्पदर्पाणाम् २१४
त्रोणीरमणतनयः १७५
भिक्षां समादातुं २०५
भिक्षां समादाय २०६
हेथतं सुरगणं ददृशुः ३७
रक्षैः सह मित्रवर्गो १७४
तरे कोलियभूमिपालः ८४
तरे जगति पूर्वनिमित्तमासीत् ३४
तरे तामरसैरुदारैः ६२
तरे बिम्बममन्दरागं १७६
ा तत्राहितभक्तिशक्त्या २
ेहे काचित् करपल्लवेन १०२
सोऽपि प्रतिगृह्य ८५
नाम्भोरुहकान्तिलक्ष्म्याः ८०
नालोकनहर्षजात। १०४
नेन्दुं भुवि निस्सपत्नं २७
भौ कुमारोऽसौ १९४
मारुह्य विहारमण्डपं ११५
न्याभ्यागमनेन शाम्यत। ११६

तपोवनेषु धन्येषु २०८
तमागतं शाक्यकुलप्रदीपम् ९६
तमायताक्ष्यः स्पृहणीयमङ्गाद् १०६
तमालनीलं तगरावदातैः १८४
तमालनीलस्य समुद्रविष्णोः १६६
तमालनीला नवरोमराजि। २६
तमेनमालोक्य च शाक्यनन्दनः १५२
तरङ्गरङ्गे सह भृङ्गगानैः १६८
तरङ्गशीकरासार० १६७
तरुप्रवालाश्चलसौकुमार्यात् २८
तरुप्रसूनान्यपचेतुकामा १५७
तस्मादुदीर्णा नवधूमराजिः १००
तस्मिन् क्षमामयतनुच्छद० २३१
तस्मिन्नृपे तन्वति दानवर्षं २२
तस्मिन् मुहूर्ते कपिलाङ्गनानाम् १०२
तस्यांघ्रियुग्मं सहजाभिरूप्यं ७७
तस्यांसधारासदनेऽवतंस० १९
तस्याः प्रवालोदरसोदराभं २३
तस्याः वपुःक्षेत्रमनङ्गशालि २५
तस्याः शरन्निशाकाश० २११
तस्याः स्तनद्वन्द्वमनिन्दिताङ्ग्याः ६१
तस्यान्तिके शमदमामृत० २३१
तस्यापदानानि तटस्थिताभिः २२
तस्याभिषेके सचिवावमुक्तैः २०
तस्या वपुश्चन्दनपङ्कलिप्तम् ६०
तस्यावलोकनायैव १९९
तस्या विशालेन विलोचनेन ३०
ताभिस्तदुद्वीक्षणतत्पराभिः १०५
तारणाय महाम्भोधेः १६८
तालप्रमाणाः सहसा धरित्रीम् ६४
तालीतमालहिन्ताल० २१३
तासां कुमारः शतपत्रमित्रैः १०६
तासां तरलसञ्चार० १६५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृष्णाप्रवाहमवशोषयितुं ५५
तेऽतिप्रसन्नमनसः प्रणिपत्य तस्मै ५६

ददर्श धीरः क्षितिपालपुत्रीम् ६६
दयालुमाश्रित्य तमत्युदारं १९
दिग्दन्तिनां मुखपट० २८८
दिगङ्गनावर्णघृतानुलेपनम् १२६
दिनावसानेन परीक्षकेण ३७९
दिनावसाने सम्प्राप्ते २१३
दीक्षिते भूभृतां नाथे २००
दीनावलोकनदशान्तर० ४०
दोधूयमानसितचामरिका० २२१
दृढावबद्धायतकेशपाशैः १६६
दृष्ट्वा जगत्त्रयगुरुं शिरसा० ४८
दृष्ट्वाऽवबुध्य स्वप्नार्थं २०९
दृष्ट्वाऽहमदीयमनवद्यतमं २३७
दृष्ट्वाऽस्त्रशिक्षां जगदेकबन्धोः १३५

धूलीभरे चुलुकितार्णवितोयपूरे २२५
ध्वजरत्नपताकाभिः १९४

नक्षत्रनाथकरकन्दलमांसलेन ४७
नखांकुशाघातविधूतमूर्धा ७३
नदीव सिन्धोर्नलिनीव भानोः ८२
नमः सकलसंक्लेश० २१५
नमः सुगुणमाणिक्य० २१४
नवप्रसूनैः सकलाङ्गनद्धैः १६१
नवाम्बुवाहेन नभःस्थलीव ७१
नवोदयालोहितमिन्दुबिम्बं १८८
नानाविधाभरणरत्नमरीचिदण्डैः ४३
नाभिह्रदस्तस्य नरेन्द्रसूनोः ७८
निर्गत्य निहृतदिगन्तर० २१८
निर्झरीपूरनिर्घोत० २०७
नितान्तकान्तालिकचन्द्रलेखा २९
नितान्तमानन्दयता प्रजानां ७५
नित्यप्रवृत्तनिरवद्यमहाप्रदान० ५२
निदाघतापज्वलिता वनस्थली १२४
निमज्जनोन्मज्जनरागिणीभिः १६८
निमज्य कासाञ्चिदुदञ्चितानां १७२
निरन्तरस्मेरमणीचकानां १४३
निराकृते काऽपि तरङ्गवातैः १७२
निरंकुशानां तिमिरद्विपानाम् १८४
निरुद्धभूभृन्महिमातिरेको १६
निर्माणकाले भुवनत्रयस्य ११०
निर्व्याजकृत्तगलनिर्गलद० ५१
निशम्य तेषां वचनं नृपात्मजो १५१
निशान्धकारप्रकराम्बुवाह० १८४
निष्यन्दमाननिरपायकृपा० ५१
निष्यन्दमानमकरन्द० ४४
निष्यन्दमानैरिव चन्द्रकान्तैः १८२
निसर्गसौरभ्यनितान्तहृद्यं ७२
निस्साणघोरनिनदो २१९
नेत्रस्य तद्दर्शननिश्चलस्य १०३
नैव त्वदीयमिदमासनमस्मदीम् २३५

पतङ्गदावानललङ्घितात्मनाम् १२६
पतत्रिपक्षप्रविकीर्णपद्म० १६५
पतिः पशूनामिव कालकूटम् १९०
पतिव्रतायाः परदर्शनाय १०४
पत्युः करस्पर्शपरिश्लथस्य १८९
पदार्थमेतत्प्रियदानयोग्यम् ६९
पद्माकरे पङ्कजलोचनाभिः १६७
पयःप्रवाहैः सममेव वारिदः १२३
पयोधरद्वन्द्वमनिन्दिताङ्ग्याः ९०
पयोदकालेन चिरप्रवासिना ११६
पयोधराः केचन काचमेचकाः ११५
पयोधराः पङ्कजलोचनानां १७३

...Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गसम्पत्सिकतावकीर्णे १५६
भ्रमत्षट्पदकार्मुकाणाम् १४६
मललहरीषु पादपानाम् १४६
स्फुरच्छीकरदन्तुराङ्गम् १६८
ांपतत्तुरगखण्डितभू० २२५
ज्ञालिका यद्गृहपञ्जरेषु ५
ौ कृपाणी विरराज यस्य १५
यात्मनामधिपते ! पुरुषोत्तमत्वं २३८
ये मुहूर्ते पुरुहूतलक्ष्मीः ६२
न्दराक्रान्तिभयेन ये पुरा ११७
ायुधस्य नृपतेः परपुष्टवर्गाः १४०
ावचायवलमानपुरन्ध्रि० ३६
कोकिलाः पुनरनङ्गजयापदान० १४२
म्पितायां कठकाषलीलया १२३
ोदिताश्वः पुनरेव धूर्तः १५५
तचामीकरभास्वरेण ६८
तचामीकरगौरविग्रहः १५२
ायमाना प्रथमेतरस्मिन् १८०
ग्रगर्भच्छविपाटलेन ६८
ग्रहाटकशिलाफलकायतस्य ३८
र्थिदन्तिजयसिन्धुर० २२४
ोषवेधाः प्रवरस्य तारा० १८२
ल्लसुमनोवल्ली० २१२
ञ्जनक्षोभविजृम्भिताभिः १३
ातवेलेव सहस्रभानुं ६२
ेव भानोः प्रतिभेव सूरेः ७६
ात्यंमाने प्रमदैर्मलावलैः १२८
ंश्य दूरावनतेन मूर्ध्ना ११२
ास्तिवध्वा प्रवरस्य यस्य १७
ान्नगम्भीरवपुः कुमारः ९२
ान्नमूर्णावलयाभिरामं ८१
दुर्बभूव समयः सुभगो वसन्तः १३८
सादमालासु हिरण्मयीषु ९

प्रज्ञाप्रधानमहिषीपदपट्टबन्ध० ४६
प्रौढान्धकारितदिशावलये २२७

बकावलीविभ्रमकण्डकम्बवो १२२
बभूव तस्या नयनोत्पलस्य २६
बभूव वर्षासमयोऽथ मेदिनी ११४
बभौ कुमारस्य कुलोद्वहस्य ८४
बलारिकार्मुकस्मेर० २०४
बलित्रयालंकृतमध्यदेशा ३१
बालाचलतुलाकोटि० २०४
बिम्वं प्रदर्शितकुरङ्गकलङ्करेखम् १९१
बिम्बप्रविष्टाः स्फटिकस्थलीषु १२
बिम्बाधरोष्ठद्युतिरायताक्ष्याः २८
ब्रह्मणोपहितान् दर्भान् २/३
ब्रह्माण्डकुक्षिम्भरिभिः १६५

भद्रान्ववायमथ वा २३८
भद्रे मुहूर्ते स पतिः प्रजानाम् ६६
भवक्लेशं त्वमेवेश २१७
भास्वानभीप्सुः परलोकयात्रां २७७
भुजङ्गभुग्वान्तफणामणिश्रियः १२०
भुजेन भोगीन्द्रधुरन्धरेण १८
भुजो भुजङ्गाधिपभोगदीर्घः ७६
भृङ्गाभिमुद्रितमुखा मकरन्दपूरैः १४१
भृङ्गारितायतदिगन्तमदा० ५३
भो-भोः पुरन्दरमुखा हरिदन्तपालाः ५६
भ्रूवल्लरी तस्य मनोज्ञमूर्तेः ८१

मग्नां महामकरकेतन० २३७
मञ्जीरनादच्छलतो ममार्तिम् १५७
मधुशीकरदुर्दिनान्धकारे १४७
मध्ये लसन्मकरलाञ्छन० २२६
मनःप्रतोलीं विशतः प्रकीर्णः १०९
मनोरथशतप्राप्त० २०२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनोभवो मण्डलितास्त्रमौर्विका १४६
मनोऽभिरामैर्मणिकिङ्किणीनां ७२
मनोज्ञगन्धैर्वकुलद्रुमाणां १५९
मन्दानिलक्षितिपमङ्गलपाठकानाम् १४३
मन्दानिलाधूतलता० २११
मन्दानिलान्दोलितवीचिमाला० १६४
मन्दानिलेन वहता वनराजिमध्यात् १४०
मन्दारकोरकस्यन्दि० २१२
मन्दारपुष्पकलिकापरिकल्पितेन ४१
ममज्ज तीर्थेषु जजाप मन्त्रम् ३२
मया विनाब्धिः प्रलयप्रसङ्ग १७७
मरालमहिलालीढम् १६६
मरीचिभिर्यन्मणितोरणानां १०
मलीमसं केवलमङ्गमन्तरं ११८
महात्मनस्तस्य महीप्रपात० ६४
महात्मना तेन मखैरजस्रम् २१
महानुभावस्य महाभिषेक० ६५
महामुनीनामपि माननीये ५९
महाराजाधिराजस्य १९३
महेन्द्रकरविक्षिप्ताः १६६
महीपतिर्मान्यगुणोज्ज्वलायां ३२
महीपतिस्तत्र बभूव मान्यः १४
माणिक्यकाञ्चीवलयानुविद्ध० २४, ६१
माणिक्यमौलिवलभी० ३८
माणिक्यसौधवलभी० १०४
मारप्रतापबडवानलकीलजाल० ५०
मारस्य मार्गणगणाः २३२
माराङ्गनास्तदनु १३६
मीनविक्षिप्तकल्हार० १९७
मुग्धस्य तस्यास मुखाम्बुजस्य ७०
मृगाक्षि विद्युल्लतिकाकरम्बितैः ११७
मृणालिका विभ्रमदीर्घिकायाः २७
मैत्रीकलत्रकुचभारपटीरपङ्क० ५०
मोहान्धकारमुषितानि ५४
मोहापनोदमप्येनम् २०५

यः पूर्वमाधाय महाभिषेकम् १५
यच्चन्द्रशालास्वबलाजनानां ८
यत् कार्यते तत्र पतिव्रताभिः ६७
यत्रापगाः स्वच्छजलान्तराल० ८
यत्रालयाः काञ्चनमेरुदण्डैः ६
यत्रेन्द्रनीलोपलकुट्टिमेषु १२
यत्रेन्द्रनीलोपलगोपुराणां ८
यत्रैव यत्रैव कुमारगात्रे १०६
यत्रौकसां रत्नविनिर्मितानाम् ६
यथा यथा वृद्धिमवाप तस्याः ६०
यथा यथा वृष्टिभिरभ्रमण्डले १२३
यदङ्गनाः सौधसमीपलग्नाम् ६
यन्मण्डपाः प्रौढनिदाघतप्ताः ७
यशस्तदीयं यदि नाभविष्यत् १८
यस्यैकदेशं यतयोऽपि वक्तुं २
युवानमेनं युगदीर्घबाहुम् १११
ये दर्शनीया द्विपराजहस्ताः २४
यो वाहिनीं मेघ इवात्तधन्वा १६

रतिश्रमो यत्र विलासिनीनां ११
रथ्यासु रत्नोपहितासु यस्यां ५
रराज तस्या नवरोमराजिः ६१
रराज राजीवविलोचनायाः ३०
राकासुधाकिरणबिम्ब० ५२
रुद्राक्षमालावलयोज्ज्वलानि १८१
रेखाभिरत्यन्तपरिस्फुटाभिः ७६

लताङ्गहारैर्ललितालिगीतैः १५६
लीलाचकोररसनाञ्चल० ३५

वकुलद्रुमवाटिका वरस्त्री० १४८
वक्षःस्थलेन वलमानमनोज्ञहार० ४६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वक्त्राम्बुजं वामदृशः परीता १०१
वक्त्रारविन्दं परितः प्रकीर्णा १००
वक्त्रे मनोज्ञस्मितचन्द्रिकाऽभूत् १७१
वरश्चकाशे हरिचन्दनार्द्रो ९५
वलित्रयालंकृतिदर्शनीय० ७७
ववर्ष वर्षासमयं विनापि ६६
वाण्या वरेण्यस्य मुखे वसन्त्या ८०
वातोत्थितं महति सैनिक० २२३
वामभ्रुवस्तं मणिशृङ्गमुक्तैः १६९
वारवामालकास्तस्य १९३
विकस्वरा व्यञ्जितकण्टकांकुराः १३१
विकासभाजामभितः सरोरुहाम् १३१
विकासिनश्चन्द्रकरोपलालनात् १३०
विकासिनां सप्तपलाशभूरुहां १२७
विकीर्णपङ्काङ्कितशृङ्गकोटयः १३२
विगतोन्मेषसम्मेष० २०५
विगाहमानस्य नभःस्थलीगृहं १२२
विघुष्यमाणे तडिताभ्रमण्डले १२५
विचित्रपट्टास्तरणोपपन्नं १७५
विजित्य विश्वत्रयमद्भुतश्रिया ११९
विजृम्भमाणा नखरत्नदीप्तिः २३
विजृम्भमाणेन विलङ्घ्य वेलां २६
वितायमानैः स्मितचन्द्रिकाभरैः १२८
विद्यागृहं पञ्चमपाठकानाम् १५५
विद्याधराश्च गन्धर्वाः १९६
विद्वेषतापमखिलं जगतां ५४
विनाङ्गरागेण विनाङ्गदेन ८२
विनिद्रकान्तारविनम्रवाटिका १२४
विनेतुकामस्य विलासिनीनाम् १४६
विन्यस्तकालाञ्जनदर्शनीयम् ८९
विपक्वताराधिपबिम्बशङ्क० १८९
विपक्वपुण्ड्रेक्षुपराङ्मुखच्युतैः १३१
विपाकभुग्नाऽभिविदीर्णदाडिमी० १३२
विभावरीचम्पककर्णपूरा १८३
विभावरीशः करपल्लवेन १८८
विभुः प्रतापानलमेव वीध्रम् १५
विभूषणैरन्तरिते मदङ्गे १०३
विभूषणैर्विद्रुम-पुष्पराग० १७४
वियत्पृथिव्योः कियदन्तरं भवेत् १२१
वियोगदुःखादिव पाण्डराङ्गीम् १९०
विलग्नमालग्नवलित्रयीक० २५
विलोक्य चैत्यध्वजसिंहमुद्रां ७
विलोलदृष्टिद्वयलोभनीयम् ३१
विवर्धमानेन च मध्यमेन ५९
विशङ्कटशिलाकोटि० २०७
विशङ्कटशिलासाल० २०३
विशङ्कटामम्बरराजवीथिकां १२४
विशालवक्षःस्थललम्बितेन ९२
विशालविशिखाभोग० २०४
विशालशिखरोद्देश० २०७
विश्लेषदुःखादिव तिग्मभानोः १७९
विश्वम्भरावलयधारण० ८३
विसृत्वरैः शारदिकैः पयोधरैः १२९
विहङ्गपक्षविक्षिप्त० २१२
विहाय भास्वान् नलिनीं सरागाम् १८०
विहारसञ्जातपरिश्रमाणां १६३
वीथीषु माणिक्यमयीषु यस्यां ४
वीथीषु वीथीषु विलासिनीनाम् १०५
वीर ! त्वमेव विजिताखिल० ५३
वीरुन्मयीं विभ्रमयन्त्रडोलाम् १४४
वीरेण मारसुभटेन विभिद्य बाणैः १४०
वृद्धा वितेनुर्विविधौषधीभिः ६१
वेतण्डमण्डलविडम्बित० २१९
वेतण्डशुण्डादण्डाभ० २०६
वेलाजलेषु मणिदर्पणविभ्रमेषु १९०
व्याकोशमेतद् यदि कर्णपाशे १०४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शतह्रादापादितचारुमौर्विकम् १००
शम्पासहस्रचतुरस्रसरोरुहाक्षी० ३६
शरन्निशाकाशतलोदरप्रभा० १२१
शर्वस्य सन्ध्याधृतमण्डपस्य १८२
शाखासु शाखासु समुद्भवद्भिः ६३
शिखण्डिनामद्भुतताण्डवश्रियाम् ११७
शिञ्जानपञ्चशरचक्रित० ३५
शुकावचञ्चूपुटपाटलेन १०७
शुद्धोदनस्य सुततामहमेत्य ५७
शूरस्त्वमेव दुर्वार० २१६
शूरस्य तस्य क्षितिपालसूनोः ७९
शृङ्गारमण्डपशिरोनवरत्नतेजः ३७
श्रियः सरोजान्तरदुःस्थितायाः ७८
श्रुत्वा तु तत्सूर्यकुलावतंसः १३३

संक्रान्तसौधवलभीमणि० ४४
संसारघोरपरितापजुषां ४८
सङ्गीतमङ्गलमहोत्सवसङ्गिनीभिः १३६
स जातकर्मादिकमत्युदारम् ७०
स तेषु सद्मस्वधिराजनन्दनो ११४
स देशिकेन्द्रैरुपदिश्यमाना ७५
स धीरमन्तःपुरसिंहशावैः ७३
सधैर्यमादाय तटेषु पादं १८७
सन्मार्गदेशिकस्यास्य २०१
समस्तलोकनाथस्य १६९
समुच्छ्रितैः सौधतलेषु यस्याः १०
समुज्जिहानं लवणाब्धिमध्यात् १८६
समुद्गता धूमततिः कृशानोः १००
समुद्रगर्भान्तरमाश्रयन्तम् १८५
समुद्रनेमीवहनस्य भारिणः ११९
सम्प्राप्य शान्तहृदयं २३३
सम्भाव्यते यत्र सुधामरीचिः ३
सम्भ्रान्तशाङ्क्विकशतानन० २१८
सविस्तरं तेऽपि सुरैरधिष्ठिताः १५०
सहकारवनीषु सञ्चरन्त्याः १४८
सहस्रशस्सन्त्वपरेऽपि भूपाः २१
सालं यदीयं समतीत्य गन्तुम् १३
सितच्छदानां श्रवणार्तिकारणं १२७
सितच्छदोत्सारणनेत्रयष्टयो १२०
सिद्धार्थमुखशीतां शुं २०२
सिन्दूरक्लृप्तः क्षितिपालपुत्र्याः ८८
सिन्दूरसौन्दर्यसहोदरेण १६०
सुधानिधानं तुहिनांशुबिम्बम् ११०
सुधासनाथेन सुधामयूखः ३१
सुधामरीचिद्युतिशीतलेन १५८
सुरार्णवावर्तमनोज्ञशोभं २५
सुवर्णकारेण तपात्ययात्मना ११८
सुवर्णरूपं सुमनोनिषेव्यं २०
सुवर्णसूत्रग्रथितान्तरेण ९२
सेनाम्बुधौ जयिपदाति० २२९
सोत्कण्ठमालोकयतः कुमारीम् ९७
सौगन्धिकेन्दीवरवासितेन १५९
सौभाग्यवाराकरवीचिकाभ्याम् ३०
सौरभ्यलोभात् सविधे १७९
स्तनद्वयस्याग्रमभूद् विवर्णं ६०
स्तनन्धयस्याननचन्द्रबिम्ब० ७०
स्तनाभिरामस्तबकोज्ज्वलानां १६२
स्नानावसाने नरदेवकन्या ८६
स्पष्टे प्रदोषसमये नरपालसूनुः १९२
स्वैरोज्जिहानसुषमाभरदुग्ध० ४९
स्वहस्तयन्त्रहताभिरद्भिः १७०

✶

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महाकाव्येऽस्मिन् प्रयुक्तानां

अप्रसिद्धार्थकशब्दानां

सूची

यद्यपि बहवः शब्दाः प्रयुक्ता। कविना यथा।
तदर्थे ते न लभ्यन्ते नामलिङ्गानुशासने॥
तथाप्यन्यत्र कोशेषु कोशकारैः स्फुटीकृताः।
तदर्थेऽप्युपलभ्यन्ते, संगृह्यन्ते यथायथम्॥

ा, श्लोकसंख्या	शब्दः	अर्थः	कोशः
१–५२	प्रवालाः	अभिनवकिसलया।	हेमचन्द्र।
१–५६	अन्ता	रम्या	विश्वः
१–६३	विभ्रमः	शोभा	हेमचन्द्रः
२–३	वन्दनमालिका	मङ्गल्यदाम	"
२–४३	शृङ्गारितः	मण्डितः	"
२-४६	मन्दरेण	बहलेन	"
३–१	दौहृदम्	गर्भलक्षणम्	"
३-७	शिखा	अग्रम्	"
३–१४	निर्वाणम्	विश्रान्तिः	"
३–४१	दारकः	बालकः	"
३-४७	रोषणः	निकषोपलः	वैजयन्ती
३–५८	भित्तिः	प्रदेश।	हेमचन्द्र।
३–६४	तीर्थैः	ऋषिजुष्टजलैः	"
४–२७	कौतुकम्	प्रतिसरसूत्रम्	वैजयन्ती
४–४२	पुलक।	रोमाञ्च।	हेमचन्द्रः
४–७५	कादम्बः	बाणः	"
५–१३	काहलः	वाद्यविशेषः	"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्गः श्लोकसंख्या	शब्दः	अर्थः	कोशः
५-१६	शराणि	जलानि	हेमचन्द्रः
५-२८	शर्कराः	खण्डाः	”
५-४३	अङ्कपाली	आलिङ्गनम्	”
६-२	सम्मुखीना	अभिमुखी	”
६-५	कञ्चुलिका	कञ्चुकम्	”
६-१०	गुलुच्छाः	स्तबकाः	”
६-१६	मणीचकानि	पुष्पाणि	वैजयन्ती
७-१	प्रतोदः	तोत्रम्	”
८-१८	वेधाः	अभिज्ञः	”
८-२५	तगरः	नन्द्यावर्तपुष्पम्	”
१०-४	निस्साणः	जयभेरी	सङ्गीतरत्नाकरः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृत्त-सूची

पद्यचूडामणौ काव्ये कविना श्लोकपुञ्जकः ।
निबद्धो येषु वृत्तेषु तेषां सूची विधीयते ॥

टुप् (९— १-८२)

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम् । इति लक्षणम् ।

वज्रा (१-१, १०-१-५७)

"स्यादिन्द्रवज्रा ततजास्ततो गौ" । इति लक्षणम् ।

ातिः (१-५; ३-१; ७-१; ६-८३)

"अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः ।
इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम" ॥ इति लक्षणम् ।

द्रवज्रा (१-३)

"उपेन्द्रवज्रा जतजास्ततो गौ" इति लक्षणम् ।

पताग्रा (६-३२)

'अयुजि न-युगरेफतो यकारो युजि च न-जौ ज-र-गाश्च पुष्पिताग्रा ' इति लक्षणम् ।

ाक्रान्ता (७-५९)

"मन्दाक्रान्ता जलधिषडगैर्म्भौ न-तौ तो गुरू च" इति लक्षणम् ।

लिनी (२-५४; ४-८७)

"न-न-म-य-य-युतेयं मालिनी भोगिलोकैः" इति लक्षणम् ।

ोद्धता (६-३१)

"रात् परैर्न-र-ल-गै रथोद्धता" इति लक्षणम् ।

स्थम् (६-३३)

न्ततिलका (२-१; ३-६४; ५-६४; षष्ठे सर्गे प्रायः सर्वत्र;
अष्टमे सर्गे च ४२ तः ।)

"उक्ता वसन्ततिलका त-भ-जा ज-गौ गः" इति लक्षणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वियोगिनी (२–५५)

"विषमे स-स-जा गुरुः समे स-भ-रा-लोऽथ गुरुर्वियोगिनी" इति लक्षणम् ।

वैतालीयम् (६–२८ इत्यादिषु)

शार्दूलविक्रीडितम् (१०–५८)

सूर्याश्वैर्म-स-जास्ततः सगुरवः शार्दूलविक्रीडितम्" इति लक्षणम् ।

शालिनी (६–४५)

"शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः" इति लक्षणम् ।

Nepal ... Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शोधनपत्रम्

जरायां सुलभभ्रान्तिप्रमादायां क्वचित् क्वचित् ।
मुद्रणस्खलनं जातं शोध्यं तद्धि विचक्षणैः ॥

पृष्ठे	पंक्तौ	अशुद्धपाठः	शुद्धपाठः
१	७	महाकन्दल०	महःकन्दल०
३	१४	शोभा थीं	शोभा बढ़ा रही थीं
३	२६	०रागपतपतका०	०रागपतका०
७	६	अंघ्रेरक्तलक०	अंघ्रेरलक्तक०
०	२२	दिक्यानुभाव	दिव्यानुभाव
८	१	समस्तै	समस्तैः
९	२०	०पङ्कभति०	पङ्कभूति०
३	१०	निहनुता०	निह्नुता०
१	२१	०परुर्मख०	०परुमुंख०
३	शीर्षिण	शक्षाविलोकनम्	शिक्षाविलोकनम्
४	९	एकन	एकेन
९	८	०भूमिषुः	भूमिषु,
९	९	पर्णाः ऐव	पर्णा एव
७	५	कदम्बराकृष्य	कदम्बैराकृष्य०
७	शीर्षिण	सौन्दर्ययम्	सौन्दर्यम्
२	१६	पिण्डीरो	डिण्डीरो
३	२	०पुरमुन्दरीणां	०पुरसुन्दरीणां
१	२०	ऊज्जजृम्भे	उज्जजृम्भे
:	९	सहा	सह
२	५	अन्तर्मलीनम्	अन्तर्मलिनम्
		व्याख्यां	व्याख्यायाम्
४	४	०दर्पाणाम्	०दर्पाणाम०
६	२६	विघुर्विना	विभुर्विना
=	१८	निह्नत०	निह्नुत०
,	८	मानसव्यपारो	मानसव्यापारो
०		०व्याख्ययां	०व्याख्यायां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

NEPAL SANSKRIT UNIVERSITY 1986 A.D
वाल्मीकि विद्यापीठ

Acc. 32284
32284

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu